In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) -15

चतुस्सूत्रीशाङ्करशारीरकभाष्यम्

(भाष्यरत्नप्रभाप्रकाशाख्यव्याख्यायुतम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

व्याख्याकारः

अद्वैतवेदान्तरत्नम्, अद्वैतवेदान्तसम्राट्

डा श्रिष्टि लक्ष्मीकुमारशर्मा

सम्पादकः

आचार्य के नीलकण्ठः

निदेशकः संस्कृत अकाडमी

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2022

In Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization: Muthulakshmi Research Academy

संस्कृत अकादमी [illegible] ग्रन्थमाला (ii) -15

चतुस्सूत्रीशाङ्करशारीरकभाष्यम्

(भाष्यरत्नप्रभाप्रकाशाख्यव्याख्यायुतम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

व्याख्याकारः

अद्वैतवेदान्तरत्नम्, अद्वैतवेदान्तसम्राट्

डा श्रिष्टि लक्ष्मीकुमारशर्मा

सम्पादकः

आचार्य के नीलकण्ठः

निदेशकः संस्कृत अकादमी

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकादमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2022

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 15

Catussūtrīśāṅkaraśārīrakabhāṣyam

(Re-printing of rare book project)

This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher

Director, Sanskrit Academy

Copies can be had from:

Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Catussūtrīśāṅkara śārīrakabhāṣyam

ISBN – 978-93-80171-76-0

© Sanskrit Academy

Year	:	2022
Pages	:	l+341
Copies	:	300
Price	:	Rs 300

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 15

Catussūtrīśāṅkaraśārīrakabhāṣyam

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

With the Commentary of **Bhāṣyaratnaprabhāprakāśaḥ**

by

Advaitavedāntaratnam, Advaitavedāntasamrāṭ

DR. Srishti Lakshmi Kumara Sharma

Retired Sanskrit Reader

Editor

Prof. K. Neelakantham

Director, Sanskrit academy

Associate Editor & Project Investigator

K V Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University

Hyderabad – 500 007

2022

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 15

Catussūtrīśāṅkaraśārīrakabhāṣyam

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Catussūtrīśāṅkara śārīrakabhāṣyam

ISBN – 978-93-80171-76-0

© Sanskrit Academy

Year : 2022
Pages : l+341
Copies : 300
Price : Rs 300

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

The Vedas consist of two parts – the karmakāṇda which consists of various upāsanās and rituals useful for purification of the mind and the jñāna kāṇda or knowledge part which consists of Upanishads that propound the ultimate reality of Brahman – one without a second and that by knowing which everything else is known. The philosophy which is based on the Upanishads is termed the philosophy of Vedānta or Vedānta darshanam or simply Vedānta.

Vedānta system is based on prasthānatrayam. 1. Sruthi Prasthāna: Upanishads particularly the ten principal Upanishads which have been commented by Śankarāchārya and other ācharyaas. 2. Smriti Prasthāna (work arising out of memory or intellect) – Bhagavad Gitā 3. Nyāya or Sūtra Prasthāna (work based on logic and harmony of Upanishadic statements) – Brahma Sūtra.

Brahma Sūtra has 555 sutras in total as per Sri Śankarācharya. The first four sūtras are very important in that and they explain the essence of entire Brahma Sūtra – these four are called as Chatussūtri. The rest of the Brahma sūtra is an explanation and elucidation of these four sūtras only.

Brahma Sutra consists of four Adhyaayas. Each Chapter is again divided into four pādas. Each

In Public domain. Digitization Muthulakshmi Research Academy
pāda is again split into various adhikaraṇas. There are 191 adhikaraṇas. The four Chapters of Brahma Sūtra are: **1**. Samanvaya Adhyāya – various Upanishadic statements are harmonized with the ultimate reality of Brahman as the subject matter. **2.** Avirodha Adhyaaya – Upanishadic statements about Brahman are proved through logic through refutation of other rival philosophies of Sāṅkhya, Yoga, Bauddha, Jaina, Pancharātra etc. **3**. Sādhana Adhyāya – path to the ultimate reality **4**. Phala Adhyāya – effect of realizing the ultimate reality mainly Jeevanmukti while embodied and Videhamukthi after the disposal of the body.

Commentaries on Brahmasūtra: The primary commentary as well as the oldest commentary on Brahmasūtra (which is available at present) is the commentary of Sri Śaṅkarācharya termed as Brahmasūtra Bhāshya or Śāreeraka Bhāshya[1]. The list of sub commentaries on Śaṅkara's Brahmasūtra Bhāshya are exhaustive and main ones alone are given below: -

1. वाचस्पतिमिश्राणां भामतिः (Bhamathi of Vachaspathi Mishra)

2. आनन्दगिरिमहाशयस्य न्यायनिर्णयः (Nyaaya Nirnaya of Anandagiri)

[1] Brahma Sūtra is also termed as Śāreeraka sūtra as it is about Brahman even as the body encompasses the Self or Atman.

In Public domain. Digitization Muthulakshmi Research Academy

3. गोविन्दानन्दपादस्य भाष्यरत्नप्रभा (Bhashya Rathna Prabha of Govindananda)

4. चित्सुखाचार्यस्य भाष्यभावप्रकाशिका (Bhashya bhaava prakaashika of Chitsukhaacharya)

5. पञ्चपादिका पद्मपादाचार्य (Panchapaadika of Padmapaada acharya: one of Direct disciples of Sankaracharya)

Another important work which expounds the topic in each adhikarana in 2 slokas each is the श्री भारतीतीर्थस्वामिचरणानां अधिकरणरत्नमाला (Adhikarana Ratna Maala of Bharathi Teertha Swamigal of Sringeri). Yet another work which encompasses Śańkara's Brahmasūtra Bhāshya is the Sankshepa Śāreeraka of SarvajnaatmaMuni. And there are some sub commentaries available on Bhamathi of Vachaspathi Mishra: 1. Kalpatharu of Amalaananda Parimala of Appayya Dikshita, Abhoga of Lakshmi Nṛsimha, ṚjuPrakāsŚikā of Akhaṇḍānanda Yati. There are some commentaries which are on the Panchapādika of Padmapāda ācharya 1. प्रबोधपरिशोधिनी 2. तात्पर्यद्योतिनी 3.पञ्चपादिकाविवरणम् and others.

Now Sanskrit Academy is bringing out Chatussūtri with a commentary called भाष्यरत्नप्रभाप्रकाशः **Bhāshyaratnaprabhāprakāsha** authored by **Acharya Srishti Lakshmikumara Sarma** of Guntur, Andhrapradesh. He is a versatile scholar of Various Shastras and profound knowledge in the Vedanta. Sri **Lakshmikumara Sarma** sir, a traditional scholar, has published many books and wrote commentary

In Public domain. Digitization Muthulakshmi Research Academy
on Srimadbhagavadgita which will be published within a short time through TTD Tirupati. I have gone through his भाष्यरत्नप्रभाप्रकाशः on Chatussūtri and referred it to my friend Prof. Penna Madhusudan Vice Chancellor of Kavikulaguru kalidasa Sanskrit University, Ramtek and my revered teacher Mahamahopadhyaya T Srihari sharma. Sanskrit Academy feels blessed for publishing this book and I as director thank **Acharya Lakshmi kumara Sarma** sir and request him to forgive us for little delay in getting this book published. He was kind enough for providing us forward by the well-known scholar Acharya Mani Dravida Shastri and sacred blessings by jagadgurus of Sringeri Sharadapeetham.

I also congratulate and acknowledge the integrity of Sri K. V. Suryaprakash the senior research assistant in the academy and in charge of project of reprinting of rare books.

I dearly think the help of my amicable colleagues Dr. V. Subrahmanyam and Dr. K. Varalakshmi, Dy. Directors and Dr. Joshi Santhosh Kumar, Research Assistant for their support at every movement in all the publications of Academy. These four including Suryaprakash have been working tirelessly for bringing out many books under the project of reprinting of rare books sanctioned by the Central Sanskrit University, New Delhi. I congratulate them and convey thanks to our young research scholar Mr. Joshi Bharadwaj.

I must record my sincere thanks to Prof. Srinivasa Varkhedi honourable Vice Chancellor of Central Sanskrit University, New Delhi who motivate

In Public domain. Digitization Muthulakshmi Research Academy
us in the field of research and propagation of Sanskrit. And I am grateful to Prof. D. Ravinder, honourable V. C. and Chairman Management committee of Academy and Prof. Lakshminarayana Registrar of Osmania University for their encouragement. I thank Prof. Gayatri Muralikrishna director of Adarsha scheme in CSU New Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः
आचार्यो के नीलकण्ठः
निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीजगद्गुरुभारतीतीर्थस्वामिनः

श्रीविधुशेखरभारतीस्वामिनः

विधुशेखरभारतीस्वामिनां चरणकमलयोर्वन्दनार्पणपुरस्सरं जगद्गुरु-भारतीतीर्थमहास्वामिनां चरणारविन्दयोः सप्रश्रयं समर्पितमिदं रत्नप्रभाप्रकाशाख्यं पूजाप्रसूनम्।

वेदादिसर्वविद्यानां मूलकन्दं महेश्वरम्।
साक्षाच्छङ्करमाचार्यं भारतीतीर्थमाश्रये।।

रत्नप्रभाप्रकाशाख्यप्रसूनं स्वामिसद्गुरोः।
समर्पितं चरणयोः भक्त्या, तृप्यतु शङ्करः।।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम्,
दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी
Sri Sri Jagadguru Shankaracharya Mahasamsthanam
Dakshinamnaya Sri Sharada Peetham, Sringeri - 577 139.

विद्वत्सु श्रिष्टि लक्ष्मीकुमारशर्ममहोदयेषु सप्रणतिर्विज्ञप्तिः ।

भवत्प्रेषितं चतुस्सूत्रीशाङ्करशारीरकभाष्यग्रन्थं भवदीयरत्नप्रभाप्रकाशव्याख्यासहितं श्रीचरणानां सन्निधौ भवन्नतिततिपुरस्सरं समार्पयम् । तं च श्रीचरणाः अवालोकयन् ।

श्रीमच्छङ्करभगवत्पादाचार्यैः विरचितेषु ग्रन्थेषु ब्रह्मसूत्रभाष्यं सर्वोत्कृष्टं विराजत इति नाविदितं विदुषाम् । तत्र आदितः अधिकरणचतुष्टयं चतुस्सूत्रीति शिष्टैर्व्यवह्रियमाणं विचार्यस्य ब्रह्मणो लक्षणं, प्रमाणं, सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि समन्वयः इत्यादीन् भूयसो विचारान् प्रतिपादयत् नितरां प्राधान्यं भजते । एतदध्ययनेन कृत्स्नस्यापि शास्त्रस्य तात्पर्यं सुष्ठु अवगन्तुं शक्यते । एतच्च पञ्चपादिका-भामती-रत्नप्रभादिव्याख्यासु निपुणतरं प्रत्यपादि । ताः अनुसरन्तो भवन्तः तत्रत्यान् विषयान् सङ्गृह्य सुकुमारमतीनां जिज्ञासूनामुपकृतये यथामति चतुस्सूत्रीरत्नप्रभायाः प्रकाशाख्यामिमां लघुव्याख्यां व्यरचयन्निति नितरां प्रमोदास्पदम् ।

सेयं व्याख्या वेदान्तजिज्ञासूनामुपकारं जनयतु, भवन्तः श्वश्रेयसपरम्पराभिस्समभिवर्धिषीरन्निति च श्रीचरणाः आशासते ।

श्रीचरणैरनुगृहीतान् आशीर्मन्त्राक्षतान् श्रीशारदाप्रसादं च प्रेषयामि ।

13-8-2022 शृङ्गेरी

इति निवेदयिता
दि दक्षिणामूर्ति

Phone: 08265 - 250123 / 250192 • Fax: 08265 - 250792
E-mail: info@sringerisharadapeetham.org • www.sringerisharadapeetham.org

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीगुरुभ्यो नमः ॥

Dr. R.मणिद्राविडशास्त्री GAL
अद्वैतवेदान्तपूर्वमीमांसाचार्यः, मीमांसा शिरोमणिः, Ph.D. Acharya, JRF.
मद्रपुरीयसंस्कृतमहाविद्यालयः, मैलापूर् , चेन्नै – ४

शुभाशंसनम्

आचार्यैः श्रिष्टि **श्रीलक्ष्मीकुमारशर्ममहोदयैः** प्रणीतं **भाष्यरत्नप्रभाप्रकाशाख्यं** चतुःसूत्रीशारीरकशाङ्करभाष्यव्याख्यानं विहगाव-लोकनन्यायेन यथासंभवमवालोकयम्। स्वमतिविमलतायै प्राधान्येन भाष्यरत्नप्रभामाश्रित्य, क्वचित् भामती-न्यायनिर्णयादिव्याख्याः अपि परिशील्य लिखितमिदं व्याख्य ानमिति प्रामाणिकतामावहति। प्रारम्भे "भाष्यरत्नप्रभायाः प्रकाशं वितनोत्ययम्" इति श्लोकदर्शनेन सूत्रभाष्यव्याख्याया रत्नप्रभायाः व्याख्यानभूतोऽयं प्रकाशः इति प्रत्यभात्। पश्चाद् व्याख्यानस्यावलोकनेन साक्षाद् भाष्यव्याख्यानमेवेदमिति ज्ञातम्। अत्र च रत्नप्रभायाः पङ्क्तय एव क्वचित् दीर्घाः वाक्यभेदं कृत्वा, क्वचित् पदान्तरसंयोजनेन च बहुधा दृष्टिपथमायान्ति। भाष्यरत्नप्रभायाः सरलीकरणं तदाशयाविष्करणं च व्याख्यानस्य मुख्यमुद्देश्यं लक्ष्यते। भूमिका-विषयसूच्याद्यनुबन्धा अपि योजिता उपयोगिनः सन्ति। भूमिकायां कृतं रत्नप्रभाव्याख्यायाः वैशिष्ट्यवर्णनम्, तत्कर्तृनिर्णयश्च समीचीनमिति मे मतिः। परन्तु मयेदं विदुषां मुखात् श्रुतं यत् श्रीरामानन्दस्वामिनः स्वकीयां भाष्यरत्नप्रभां स्वगुरोर्नाम्ना प्रकाशयामासुरिति। अतएव– "इति श्रीमत्परमहंसपरिव्राजकाचार्य-

In Public domain. Digitization Muthulakshmi Research Academy
श्रीगोविन्दानन्दभगवत्कृतौ श्रीमच्छारीरकमीमांसाभाष्य-व्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य प्रथमः पादः" इत्यादि ग्रन्थान्तपुष्पिकालेखनमपि बहुत्र दृश्यमानं संगच्छते।

सर्वथाऽयं प्रबन्धः प्रकाशितो जिज्ञासूनां महते उपकाराय कल्पेतेत्यत्यत्र न संशीतिः। आचार्याः **श्रिष्टि श्रीलक्ष्मीकुमारशर्म-महोदयाः** इत्थमेव संस्कृतवाङ्मयस्य समृद्धिं वितन्वन्तः परमेश्वरानुग्रहेण सकलश्रेयोभाजनं भूयासुरित्याशासे विदुषां वशंवदः।

मणिद्राविडः

In Public domain. Digitization Muthulakshmi Research Academy

विज्ञापना

चतुस्सूत्रीशाङ्करशारीरकभाष्यस्य रत्नप्रभाप्रकाशव्याख्यान-निर्माणे अपेक्षितसर्वविधसौकर्यानुग्रहसंविधातुः गुण्टूरु रत्नगिरि-नगरौकसः सर्वेश्वरस्य दशभुजश्रीलक्ष्मीगणपतिस्वामिनः पादमूले साष्टाङ्गप्रणामाहस्त्रीमादौ विनिवेदयामि। ततः व्याख्यारूपं लघुनिबन्धमिमं भक्त्या समर्प्यमाणं पूजाप्रसूनमिव स्वीकृत्य, अनुग्रहश्रीमुखं प्रदापितवतां, साक्षात् शङ्करभगवत्पादस्वरूपाणं, तत्प्रतिष्ठापितश्रीशारदापीठाधिपतीनां विदितसकलवेदशास्त्राणां करुणालयानां जगद्गुरूणां श्री श्री श्री भारतीतीर्थमहास्वामिनां चरणारविन्दयोः प्रह्वीभूतेन चेतसा साष्टाङ्गनमस्कारसहस्त्रार्पणं, तत्करकमलसञ्जात श्री श्री श्री विधुशेखरभारतीस्वामिनां चरणकमलयोः वन्दनशतसमर्मणपुरस्सरं समाचरामि। विद्यागुरूंश्च विनम्रो वन्दे।

व्याख्याग्रन्थमिमं विद्वल्लोकस्य पुरतः समुपस्थापयितुं शुभाशंसननाम्ना पुरोवाचमनुगृहीतवतां सकलतन्त्रस्वतन्त्राणां मीमांसावेदान्ताचार्याणां महामहोपाध्यायानां शास्त्रसरस्वत्याः आकृतीनाम् आचार्य. आर्. मणि द्राविडशास्त्रिगुरूणां चरणारविन्दयोः सप्रश्रयनमस्काराञ्जलिं घटयामि।

व्याख्याग्रन्थस्यास्य विद्वत्पाठकलोकस्य पुरतः समुपस्थापनाय, मुद्रणप्रकाशनादिकार्यभारनिर्वहणाय च

In Public domain. Digitization Muthulakshmi Research Academy
प्रार्थनामात्रेणैव स्वाङ्गीकारमावेदितवद्भ्यः, साहित्यादिबहुतन्त्र-नदीष्णेभ्यः, विमर्शकधुरन्धरेभ्यः, अनवरताध्ययनाध्यापन-तत्परेभ्यः, संस्कृतभाषाप्रचारोद्यमनिर्वाकोत्तमेभ्यः संस्कृत अकाडमीसंस्थानिर्देशकेभ्यः, नैकशास्त्र साहित्यादिग्रन्थप्रकाशन-सौभाग्यसंविधातृभ्यः उत्तमसहृदयेभ्यः आचार्यैभ्यः के.नीलकण्ठं महोदयेभ्यः हार्दकृतज्ञताञ्जलिपूर्वकनमस्काराञ्जलिघटनात्किमन्य-न्निवेदयामि। सर्वथा संस्कृत अकाडमी हैदराबाद् संस्थायै कृतज्ञोऽस्मि।

सन्दर्भेऽस्मिन् मयि श्रीगणेशभक्तिं विविधशास्त्रेषु प्राथमिकसंस्कारं चाहितवतां शाब्दिकाग्रेसराणां पितृचरणानां की.शे.पं.श्रिष्टि साम्बमूर्तिशास्त्रिणां, वेदान्तविद्यागुरूणां म.म.ब्र.वे.आर्.कृष्णमूर्तिशास्त्रिणां चरणारविन्दयोः सादरसप्रश्रय-नमस्काराः। तथा अपेक्षितन्यायमीमांसादिज्ञानमयशरीरदातृगुरूणां की.शे.म.म.रामचन्द्रुल कोटीश्वरशर्मणां, तथा म.म. की.शे. मद्दुलपल्लि माणिक्यशास्त्रिसद्गुरूणां, पं.ब्र.वे.देन्दुकूरि नारायण-शर्मसोमयाजिनां, ब्र.वे.कुप्पा रामसुब्रह्मण्यशास्त्रिमहोदयानां च चरणकमलेषु सप्रश्रयनमस्काराञ्जलिं घटयामि। मन्त्रदीक्षागुरूणां तुनि तपोवनपीठाधिपतीनां श्री श्री श्री सच्चिदानन्दसरस्वतीस्वामिनां चरण कमलयोः सादरप्रणामशतानि।

ग्रन्थस्यास्य टङ्कणविधौ अंशतः सहकृतवते अस्मत्प्रियशिष्याय श्रीमते डा.गुदिमेल्ल तिरुमलश्रीकृष्ण-भरद्वाजाचार्याय, अंशतः लेखनविधौ सहकृतवते श्री बण्डारं

In Public domain. Digitization Muthulakshmi Research Academy
वेङ्कटसुब्रह्मण्यकृष्णकिशोराय शर्मणे, साङ्केतिकसाहाय्यसंविधात्रे पुत्राय डा.नागेशभट्टशर्मणे, दौहित्राय श्री शम्बुनि श्रीनिवासभरद्वाजाय चानेकमङ्गलाशासनानि। व्याख्यालेखने प्रोत्साहकेभ्यः श्रीसाम्बशिवश्रीगणेशचारिटबुल् संस्थासदस्येभ्यः, सुहृद्वरेभ्यः कर्रा सूर्यनारायणदासमहाशयेभ्यश्च वन्दनानि।

इत्थं

श्रीचरणसेवकः सुधीजनविनीतश्च

डा. श्रिष्टि लक्ष्मीकुमारशर्मा

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

क्र.सं	विषयः	पृ.सं
1	Preface	i
2	कृतिसमर्पणम्	vii
3	भारतीतीर्थस्वामिनामनुग्रहश्रीमुखम्	ix
4	आचार्य. आर्.मणिद्राविडशास्त्रिणां शुभाशंसनम्	xi
5	विज्ञापना	xiii
6	भूमिका	xix
7	जिज्ञासासूत्रविचारभूमिका	1
8	प्रथमवर्णकम्-अध्यासविचारात्मकम्	21
9	द्वितीयवर्णकम्-ब्रह्मजिज्ञासोपक्रमभाष्यम्	93
10	तृतीयवर्णकम्-जिज्ञासासूत्रार्थविचारात्मकम्	95
11	चतुर्थवर्णकम्-विचारकर्तव्यताप्रधानम्	123
12	पञ्चमवर्णकम्-जन्माद्यधिकरणम्,ब्रह्मलक्षणविचारः	137
13	षष्ठवर्णकं शास्त्रयोनित्वाधिकरणम्, ब्रह्मणः शास्त्रकारणत्वविचारः	174
14	सप्तमवर्णकं ब्रह्मणः शास्त्रप्रमाणकत्वविचारः	185
15	अष्टमवर्णकं समन्वयाधिकरणं भाट्टमतनिरासात्मकम्	188
16	नवमवर्णकं वृत्तिकारमतोपस्थापनम्-तत्खण्डनं च	220
17	प्राभाकरमतखण्डनम्-सिद्धार्थे पदानां तात्पर्यव्यवस्थापनं च	290
18	उपयुक्तग्रन्थसूची	335
19	सङ्केताक्षरसूची	336
20	व्याख्यातृस्वीयपरिचयः	339

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगणेशाय नमः

भूमिका

मानवस्सदा सुखाय समीहमानः, दुःखपरिजिहीर्षया प्रयतते। किन्तु सत्यामपि दुःखतत्तत्साधनपरिजिहीर्षायां सदाशिवानुग्रहविदूरः, असुखमपि सुखत्वेन सम्भावयन्, नैकविधानि साधनान्युपादत्ते। फलतश्च संसारसागरे पतितः बडिशगृहीतो मत्स्य इव व्यथते। यदा तु पूर्वजन्मनि, इह जन्मनि वा कृतैः कर्मभिश्शुद्धो भवति मानवः, तदा तस्य चित्तं नित्यानित्यवस्तु-विवेकाद्यात्मकसाधनचतुष्टयमेकरूपमेवोपादत्ते। क्रमेण विगलद-नित्यसुखाभिलाषः, ईश्वरानुग्रह-विशिष्टगुरुलाभादिना, अद्वैतात्म-पर्यालोचनाप्रवणः श्रवणादीनि ज्ञानसाधनान्युपाददानः, संसारपङ्कं ज्ञानगङ्गया निश्शेषं प्रक्षालयति। दुस्तरादपि संसारात् ज्ञानप्लवेनैवोत्तीर्णो भवति। तथा च श्रुतिस्मृती'ज्ञानादेव तु कैवल्यम्,' 'सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि' इति। एतदर्थविवेचनायैव उपनिषद्-गीता-सूत्रभाष्यात्मना प्रस्थानत्रयं भगवत्पादैराचार्यशङ्करैः प्रावर्ति। भाष्यपाठकानामपि प्राशस्त्यं' महाभाष्यं वा पाठयेत्,' 'महाराज्यं वा पालयेत्' इति विद्वल्लोकप्रथितमस्ति। परं कस्य वा भाष्यस्य तादृशं प्राशस्त्यमित्युक्ते? पाणिनीयसूत्रप्रणालिकायां पूर्वापरभावज्ञानस्य, तत्तल्लक्ष्येषु पूर्वत्रासिद्धपूर्वविप्रतिषेधपरविप्रतिषेधादिज्ञानस्य, क्रमेण

In Public domain. Digitization Muthulakshmi Research Academy

बहुलक्ष्यविषयकसाधुत्वनिश्चयस्येत्येवमादीनां विषयाणामाश्चर्य-जनकतयाऽस्ति वैशिष्ट्यं पातञ्जलमहाभाष्यस्य सुप्रसिद्धम्। किन्त्वापाततोऽद्वैतविरोधिनीनामिव भासमानानां श्रुतीनां प्रस्थानत्रयद्वारा अद्वैततात्पर्यनिरूपणे भाष्यकाराणामचञ्चलो व्यवसाय इति नाविदितं समेषां विदुषाम्। तत्रापि (190) नवत्युत्तरैकशताधिकरणात्मना विभज्य, 555. ब्रह्मसूत्राणां, श्रुत्युदाहरणप्रत्यभिज्ञानपुरस्सरम्, अधिकरण-अध्याय-पादात्मना विभागपुरस्सरं व्याख्यनमत्याश्चर्यकरम्। उदाहरणार्थमानन्दमया-धिकरणे वृत्तिकृन्मतनिरासपुरस्सरं, पुच्छवाक्यस्यविषयवाक्यत्वेन चयनम्, 'शब्दादेव प्रमितः'(ब्र.सू.1.3.24.) इति प्रमिताधिकरणे कठोपनिषदः अङ्गुष्ठमात्रवाक्यचयनम्, 'व्याप्तेश्च समञ्जसम्' (ब्र.सू.3.3.9.) इति व्याप्त्यधिकरणे 'ओमित्येतक्षरमुद्गीथमुपासीत' इति छान्दोग्यवाक्यचयनम्, चतुर्विधसामानाधिकरण्यविचारः, सम्भृत्यधिकरणे (ब्र.सू.3.3.23) 'ब्रह्मज्येष्ठावीर्या सम्भृतानि' इत्यादिनाराणायनीयशाखायाः उदाहरणसङ्ग्रहः, तस्मिन्नेवाध्याय-पादेहान्यधिकरणे तत्मबन्धिनां बहूनां वाक्यानामुदाहरणं चात्याश्चर्यकरं दृश्यते। नैतदेकद्वित्रिवेदज्ञानां साध्यम्। एतच्च बहुवेदशाखाभिज्ञैः सर्वज्ञैरेव साध्यम्। अतश्चाधिकरणरचनया, आध्यात्मिकसर्वसंशयोच्छेत्तृत्वात्, ज्ञानेन जीवस्य जीवत्वनिरास-

In Public domain. Digitization Muthulakshmi Research Academy
द्वाराब्रह्मत्वाविष्करणहेतुत्वाच्च, महाभाष्यख्यातिं विशेषतश्शाङ्कर-शारीरकसूत्रभाष्यमेव लभते इति कथनं वस्तुप्रस्तुतिरेव।

सूत्रभाष्यमपि प्रसन्नगम्भीरं भामतीकल्पतरुपरिमलादि-व्याख्योपबृंहितमेकधा विशिष्टपथे प्रसृतं कृत्स्नस्य भाष्यस्योपलभ्यते, सोऽयं भामतीसम्प्रदायः। विवरणसम्प्रदायस्तु ततो विलक्षणः, भामतीसम्प्रदायात्प्राचीन इति, शतभूषणीकाराणां पण्डितराजानाम् अनन्तकृष्णशास्त्रिणामाशयः। तन्मतानुसारेण क्री.प.788-820. समयवासिनां शङ्करभगवत्पादानां साक्षाच्छिष्याः पद्मपादाचार्याः क्री.प.840. वासिन इति, तत्साक्षाच्छिष्याः विवरणाख्य-पञ्चपादिकाटीकाकर्तारः प्रकाशात्ममुनय इति, ते भामतीकारेभ्यः वाचस्पतिमिश्रेभ्यः प्राचीना इति, विवरणोपन्यासहिन्दीभूमिकायां (पृ.क.) महेशानन्दगिरिस्वामिनः उल्लिखन्ति। पञ्चपादि-कायामिदानीं चतुस्सूत्रीपर्यन्तमुपलभ्यमानायां वर्णकनवकविभागः दृश्यते। तदनुसारेणैव विवरणतत्त्वदीपनादिकं प्रवृत्तम्। तदनुसारिण्यः न्यायनिर्णयभाष्यरत्नप्रभादयस्तु कृत्स्नस्य शारीरकसूत्रभाष्यस्य व्याख्यारूपेणोपलभ्यन्ते। पञ्चपादिकाशब्दस्य को वा अर्थः इत्यन्वेषणे क्रियमाणे न तत्प्रास्ताविकश्लोकेभ्यः किञ्चिदपि लभ्यते। किन्तु पञ्चपादिकानववर्णकानि इति कथमयं विभागः इति सन्देहः पीडयत्येव। विषयेऽस्मिन्विचारणे क्रियमाणे वेदवेदान्ततत्त्वज्ञाः ब्र.वे.मुदिगोण्डशङ्करशर्माणः माधवीयशङ्कर-

In Public domain. Digitization Muthulakshmi Research Academy
विजयचतुर्दशसर्गोल्लिखानुसारमेवं प्रावदन्। पद्मपादाचार्याणां रामेश्वरयात्रासमये मध्येमार्गं प्रखरप्राभाकरानुयायिनां स्वपूर्वाश्रम-मातुलानां गृहे अवरोहणे सति, सूत्रभाष्यस्यद्वितीयाध्याये तर्कपादपर्यन्तं पञ्चभिः पादैः पूर्वमेव पद्मपादविरचितः रक्षणव्याजेन स्वसकाशे मातुलैरेवाभिनन्द्य निक्षेपितः। किन्तु पद्मपादाचार्याणां यात्राप्रस्थानानन्तरं शाङ्करसिद्धान्तपोषकतद्ग्रन्थस्यावस्थाने महती प्राभाकरकुलोच्छत्तिर्भविष्यतीति भीत्या, असूयया चाचार्याणां विश्वासोत्पादनार्थं पञ्चपादिकाग्रन्थेन सह स्वगेहमपि दग्ध्वा, अनृतामपि वार्तां सत्यत्वेन प्रत्यागतेभ्य आचार्येभ्यो न्यवेदयन्मातुलः। किङ्कर्तव्यताविमूढाः पद्मपादाचार्यास्तु अनन्यशरणं शङ्करमेवाचार्यं शरणं गत्वा, दाहनष्टग्रन्थात्, चतुस्सूत्रीपर्यन्तमेव वर्णकनवकोपशोभितं लब्ध्वा, लोके पञ्चपादिकां पुनः प्रसारयामासुरित्यैतिह्यम्। मूलभूतपञ्चपादिकायां पञ्चपादादात्मकत्वं युज्यते। किन्तु इदानीं भगवत्पादानुग्रहलब्धे वर्णकनवकात्मके कथं नामैचित्यमिति चेत् इत्थं चिन्त्यते। पद्यते अनेनेति पादः इति व्युत्पत्त्या, पादः अथ वा पादिका ब्रह्मप्रतिपत्तिसाधनम्। तत्र अध्यासाक्षेपसमाधानलक्षणसम्भावना-प्रमाणप्रकारपरो भाष्यभागः प्रथमवर्णकात्मकः, पृथक्शास्त्रत्व-निरूपणात्मकद्वितीयवर्णकात्मको भागश्च पीठिकारूपेणैकः पादः। ततः अथातश्शब्दविचारेणाधिकारिनिरूपण परस्य, ब्रह्मजिज्ञासा-

In Public domain. Digitization Muthulakshmi Research Academy
समासार्थविचारेण फलाविष्करणहेतोर्विचारस्येति तृतीयवर्णकात्मकस्य भागस्य, तथा अप्रसिद्धिनिबन्धनपूर्वपक्षोद्धारहेतोः विचारकर्तव्यताप्रधानस्य चतुर्थवर्णकस्य च ब्रह्मजिज्ञासासूत्रान्तर्गतत्वेन एकसूत्रविषयत्वेन द्वितीयपादत्वम्। ब्रह्मलक्षणस्य श्रुत्येकवेद्यत्वनिरूपणपरस्य निरूपणपरस्य जन्माद्यधिकरणस्य तृतीयपादत्वम्। ततः एकसूत्रविषययोः शास्त्रकारणत्वब्रह्मनिरूपितशास्त्रनिष्ठप्रामाण्यपरयोः शास्त्रयोनित्वाधिकरणस्थयोः षष्ठसप्तमवर्णकयोः चतुर्थपादत्वम्। ततः भाट्टमतनिरूपणपुरस्सरं तद्विदलनप्रधानस्य अष्टमवर्णकस्य, वृत्तिकारप्राभाकरादिमतनिरूपणपुरस्सरं तद्विदलनप्रधानस्य नवमवर्णकस्य च समान्वयाधिकरणस्थत्वेन, एकसूत्राधिकरणविषयतया एकपादत्वेन ग्रहणे पञ्चमपादत्वमपि सिद्धम्। एवमिदानीमपि पञ्चपादिकात्वमन्वर्थमाभाति। पञ्चपादिकाविवरणसम्प्रदायानुसारिणी भाष्यरत्नप्रभापि चतुस्सूत्र्यन्तं तेनैव नववर्णकमार्गेणैव प्रचलति। एवं भाष्ये चतुस्सूत्रीभागस्य पञ्चपादिकादिसम्प्रदायेनानुसृतत्वात्, प्रायशः वेदान्तशास्त्रोपयोगिनां बहूनामेव मुख्यानां विषयाणां सद्भावात्, तद्गाम्भीर्यविरणपरं रत्नप्रभाव्याख्यानं पूर्णानन्दीयव्याख्यया पूर्णमपि, आत्मतुष्ट्यै, बुद्धिशोधनाय च व्याचिख्यासामि।

In Public domain. Digitization Muthulakshmi Research Academy

भाष्यरत्नप्रभाकर्तृपरिचयः- भाष्यरत्नप्रभाकाराः षोडशसप्तदशशतकवासिनः इति महेशानन्दगिरिस्वामिनां निर्णयः। (वि.उ.भूमिका.पृ.ङ.) भाष्यरत्नप्रभायाः कर्ता कः? इत्युक्ते 1934. मुम्बयीनगरे निर्णयसागरमुद्रणालयेन पाण्डुरङ्गजाव जी द्वारा प्रकाशिते, पं.वासुदेवशर्मभिः संस्कृते ब्रह्मसूत्रशाङ्करभाष्ये मुखपुटे रत्नप्रभायाः गोविन्दानन्दकर्तृकत्वेनोल्लेखः दृश्यते। व्याख्याप्रारम्भश्लोकेषु तु 'श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतोऽहं यथालिः' (श्लो.4.) इत्युल्लेखात्, गोविन्दसरस्वत्याः, अथवा गोविन्दानन्दस्य शिष्यत्वमेव व्याख्याकर्तुः ज्ञायते, न तुव्याख्याकर्तुरेव गोविन्दानन्दत्वम्। परं 'विप्रतिपत्तीनां प्रपञ्चो निरासश्च विवरणोपन्यासेन दर्शितस्सुखबोधायेतीहोपरम्यते' (र.प्र.पृ.44.) इत्यन्तस्साक्ष्याधारात्मकेन वचनेनैव विवरणोपन्यासनाम्नी रचनान्या रत्नप्रभाकारेणैव कृतेति ज्ञायते। 'वाक्यवृत्तिव्याख्याने रामानन्दीये विस्तरेणायमर्थः प्रतिपादितः' इति (पूर्णानन्दीया,पृ.131) उल्लेखादपि रामानन्देन वाक्यवृत्तिव्याख्यानं लिखितमिति ज्ञायते। विवरणोपन्यासान्तिमग्रन्थे 'गोविन्दभगवत्पूज्यपादपदौकसा। रामानन्दसरस्वत्या रचितोऽनुक्रमो मुदे'। इति श्लोकोल्लेखोऽपि विवरणोपन्यासस्य रामानन्दकर्तृकत्वमेव ज्ञापयति, नतु गोविन्दानन्दकर्तृत्वम्, प्रत्युत गोविन्दानन्दस्य गुरुत्वमेव ज्ञापयति। अतः निर्णयसागरीयपाठे तथोल्लेखः

In Public domain. Digitization Muthulakshmi Research Academy
रामानन्दस्य गुरुभक्तिमवेक्ष्य तथाकल्पनाप्रयुक्तः स्यात्। एतद्व्याख्योपक्रमचतुर्थश्लोकादपि तस्यगोविन्दवाणीशिष्यत्वेन ज्ञानात्, रत्नप्रभाकृद्विरचिते विवरणोपन्यासे रामानन्दकर्तृकत्वस्य स्पष्टमुल्लेखाच्च रामानन्दा एव रत्नप्रभाकाराः इत्यलमधिकोक्त्या।

रत्नप्रभाव्याख्यावैशिष्ट्यम्- नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते इति व्याख्यातृशिरोमणिमल्लिनाथोक्तदिशा विवरणसम्प्रदायापेक्षितभाष्यव्याख्यानापेक्षया अधिकं किञ्चिन्नोक्तम्। 'वच्मि...वाग्जालबन्धच्छिदमभ्युपायम्' (र.प्र.श्लो.5.) इति व्याख्याकारप्रतिज्ञानुसारं नूनमियं व्याख्या भाष्यवाग्जालबन्धच्छेदिन्येव। क्वचिद्रत्नप्रभायाः दुरूहतायां सञ्जातायां, तत्पङ्क्तितात्पर्यं पूर्णानन्दीयादपि ज्ञातुं शक्यते। अत एव 'रत्नप्रभां दुरूहां च व्याकरोमि यथामति' इति पूर्णानन्दीयव्याख्याकारैः (पृ.2.) उक्तम्। चतुस्सूत्र्याः पञ्चपादिकासम्प्रदायानुसारित्वेन भाष्ये वर्णकविभागः कथमितिनिरूपणीयम्, तथापि पञ्चपादिकानाम्नः अन्वर्थतानिरूपणावसरे विषयसूचिकायां च वर्णकविभागस्य दर्शितत्वान्न पृथग्वर्णकविभागः निरूपयिष्यते।

अथ भाष्यगाम्भीर्याविष्कारे रत्नप्रभा कथं व्यापृतास्तीति? द्वित्रैरुदाहरणैर्वच्मि। 1.जिज्ञासासूत्रे अथशब्दार्थविचारसन्दर्भे अर्थान्तरपरत्वमप्यस्तिवेति भाष्यकारैः कश्चिद्विचारः कृतः। एतद्विचारपरा पङ्क्तिश्च 'पूर्वप्रकृतापेक्षायाश्च फलत

In Public domain. Digitization Muthulakshmi Research Academy
आनन्तर्याव्यतिरेकात्' (र.प्र.पृ.29.) इति दृश्यते। वस्तुतोऽत्र अर्थान्तरवाचिपदं स्फुटतया नदृश्यते। तथापि व्याख्यकाराः' पूर्वप्रकृतापेक्षा यस्याः अर्थान्तरतायाः' इति बहुव्रीहिवशात्, अर्थान्तरताया इति पदाध्याहारेण च न्यरूपयन्। एवं फलत इत्यस्यापि द्वेधा अर्थं निरूप्य, तत्पङ्क्तिव्याख्यां प्रवर्तयामासुः। तदेतत्सर्वं रत्नप्रभाप्रकाशे व्याख्यतम्। 2.एवम् 'अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता' (र.प्र.पृ.74) पङ्क्तिव्याख्यानेऽपि सन्दर्भाविरुद्धाः त्रयः अर्थाः व्याख्याताः। 3.एवं 'न हन्तव्यः' इति वाक्यार्तनिरूपणायां 'सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति' (र.प्र.पृ. 92,93.) इति भाष्यपङ्क्तौ चशब्देन नञः धातु-आख्यात-सम्बन्धात्मकं पक्षद्वयमपिनिषेधवाक्यार्थोपपादकं भाष्यतात्पर्य-विषयत्वेन व्याख्याकारैर्निरूपितम्। एवं तद्व्याख्यागाम्भीर्यस्य अनेकोदाहरणानि।

अध्यासभाष्यरत्नप्रभाविशेषाः- रत्नप्रभायाम् 'इह खलु स्वाध्यायोऽध्येतव्यः' इत्यारभ्य 'युष्मदस्मत्प्रत्यगोचरयोः' इति भाष्यपर्यन्तं भूयान् व्याख्याग्रन्थः उपलभ्यते। पाठकानां झटिति पङ्क्तीनां दर्शने किमेतावान् ग्रन्थो वा इति सम्भ्रमो जायते। परमार्थतस्तु जिज्ञासासूत्रविचारोपयोगिशास्त्रमर्यादानिरूपणाय, न्यायतोऽर्थनिरूपणावश्यकतानिरूपणाय च तावान् ग्रन्थः। प्रतिपङ्क्ति प्रतिपङ्क्तिसमुदाये च भूयानर्थः अस्ति। तत्र ब्रह्मजिज्ञासायां

In Public domain. Digitization Muthulakshmi Research Academy
का प्रसक्तिः? इत्युक्तेनित्याध्ययनविधिसिद्धतद्विजिज्ञासस्वेति वाक्यपर्यालोचनावत्त्वम्। एवं सति जिज्ञासाधिकरणनिर्णेष्यमाणस्यानुबन्धचतुष्टयस्य, न्यायसहकृतश्रुतिभिरेवसिद्धत्वात्, जिज्ञासासूत्रवैयर्थ्यशङ्कायाम् 'अधिकार्यादीनामागमिकत्वेऽपि न्यायेनार्थनिरणयार्तमिदं सूत्रम्' (र.प्र.पृ.3.) इति प्रकाशात्मश्रीचरणवचनानुसन्धानपुरस्सरं श्रवणविध्यात्मकश्रुतिसहकारिन्यायत्वं सूत्रस्य प्रतिपादितम्। ततः श्रुत्यध्यायपादसूत्रसङ्गतयो निरूपिताः। ततः 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्याद्यध्यासपूर्वपक्षसिद्धान्तभूमिकारूपेण पूर्वपक्षसिद्धान्तानुमानपुरस्सरं विषयादिषडङ्गघटिताधिकरणरचनायाः तन्मर्यादायाश्च अग्रे सूत्रार्थविचारणसन्दर्भे मध्ये उपदेष्टुमशक्यत्वादादावेव व्याख्याकारैर्निरूपणं कृतम्। सूत्रादर्थतस्सिद्धस्याध्यासस्य निरूपणे उपोद्घातसङ्गतिं निरूप्य, अस्मदर्थपरमात्मनः स्मरणेन, अध्यासभाष्यस्य माङ्गलिकत्वं समर्थ्य, 'युष्मदस्मत्प्रत्ययगोचरयोः' इति समस्तपदस्यैव भूयसी व्याख्या प्रवर्तिता। समाससाधुत्वविचारश्च मतभेदेन व्याख्याकृता निरूपितः।

लोके युष्मच्छब्दस्यसम्बोध्यचेतने, अस्मच्छब्दस्य च वक्तृचेतने प्रयोगात्, तमःप्रकाशयोरिव तयोः सर्वात्मना विरोधः अध्यासाक्षेपाङ्गतया नोपपद्यत इति, युष्मदस्मदी इत्यस्य पराक्प्रत्यग्वस्तुनी इत्यर्थः विरोधोपपादनाय निरूपितः। तत्र

In Public domain, Digitization Muthulakshmi Research Academy
अस्मदर्थस्य व्याख्याकारेण कृतं प्रत्यक्त्वेन वर्णनं शास्त्रप्रक्रियामाश्रित्य। एवं प्रत्ययपदस्य व्युत्पत्तिभेदेन प्रतीतिविषयप्रतीती अर्थः। गोचरपदस्य 'अहं कर्ता' 'अहं ब्रह्मास्मी'ति व्यवहारावर्थः। एवं च पराक्प्रत्यक्त्वेन, प्रतीतितः, व्यवहारतश्च त्रिविधो विरोध उक्तः। अयमेव विरोधः पूर्वव्याख्यात्रा न्यायनिर्णयकारेणापि निरूपितः।

युष्मदस्मत्प्रत्यगोचरयोः इति समाससाधुत्वविचारः- ननु कथमत्र युष्मदस्मत् इत्यत्रविग्रहः?। यदि' त्वं च अहं च युष्मदस्मदी' इति विग्रहः तर्हि तयोरेकवचनान्तत्वेन उत्तरपदे परतः 'प्रत्ययोत्तरपदयोश्च' इति सूत्रेण एकवचनान्तयुष्मदस्मदोः त्वमादेशापत्तिः। यदि च 'यूयं वयं चेति' बहुवचनान्ततया विग्रहः, तर्हि बहुवचनान्तत्वेन शब्दसाधुत्वेऽपि, अहङ्काराद्यनात्मनः लोके यूयमिति प्रत्यविषयत्वाभावात्, अर्थासाधुत्वं प्रसज्येत इति शङ्कायां, रत्नप्रभाकारैः गोचरपदस्य योग्यतापरत्वमास्थाय युष्मच्छब्दप्रत्यय-योग्यानात्मपरत्वमास्थितम्। 1.पक्षेऽस्मिन् युष्मदस्मत्प्रत्ययगोचरः इत्येव समासार्थः। न तु त्रिविधो विरोधः शाब्दिकः। न वा युष्मदस्मदी एव प्रत्ययौ, तावेव गोचरौ इति द्वन्द्वैकशेषघटितसमानाधिकरणतत्पुरुषः। 2.यदि आवृत्तप्रत्यय-गोचरपदबलात् युष्मदस्मत्पदाभ्यामेव पराक्प्रत्यग्वस्तुनी लक्ष्येते, तर्हि अर्थतः असाधुत्वमपि नास्ति पराचां बहुत्वेन,

In Public domain. Digitization Muthulakshmi Research Academy

प्रतीचोऽप्यौपाधिकबहुत्वेन, तयोश्शब्दयोरेकत्ववाचित्वाभावेन त्वमादेशदोषाप्रसक्तेः, द्वन्द्वैकदेशघटितसमानाधिकरणतत्पुरुषेण त्रिविधविरोधभाने बाधकाभावाच्चेति पक्षः रत्नप्रभाकृत्सम्मत इत्याभाति। 3.आश्रमश्रीचरममते तु युष्मदस्मत्पदयोः सम्बोध्यचेतन अहङ्कारविशिष्टचेतनवाचिनोरपि, युष्मदस्मच्छब्द-प्रतीतिगोचर-लाक्षणिकयोः अत्र ग्रहणात्, 'युष्मदस्मदोः षष्ठीचतुर्थी द्वितीयास्थयोर्वां नावौ' इति सूत्रज्ञापितांशमादाय, शब्दलक्षकयोः नत्वमादेशावित्युच्येत, तथापि तन्मते विशिष्टार्थस्य युष्मदस्मदोरेव लाभात्, प्रत्ययगोचरपदयोः लक्षणातात्पर्यग्राहकत्वमास्थेयं स्यात्। युष्मदस्मत्पदयोः ब्रह्मविद्याभरणकारोक्तदिशा युष्मदस्मच्छब्दो-ल्लेखिनि लक्षणास्वीकारे तु न प्रत्यगोचरपदयोर्नैरर्थक्यम्। एवं समाससाधुत्वे संक्षेपतः व्याख्योक्तो विचारः निरूपितः। अन्यच्चाभ्यर्हितस्यास्मच्छब्दस्य पूर्वप्रयोगाभावः, युष्मदस्म-दित्यत्रैकशेषाभावः, इत्यादयो विषयाः अध्यासाक्षेपोक्रम एव निरूपिताः।

अध्यासविचारात्मकप्रथवर्णकोक्ता अन्ये विषयाः- एवमध्यासाक्षेपसमाधानात्मकभाष्ये यावन्ति पदानि, तावतां सर्वेषां पदानां सार्थक्यं प्रावदन् रत्नप्रभाकाराः। अध्याससिद्धान्तात्प्रागपि सम्भावितविकल्पनिरूपणपुरस्सरं पूर्वपक्षं कृत्वा, सर्वेषां प्रश्नानां सिद्धान्तभाष्यद्वारा समाधानं प्रत्यपीपदन्। अध्यासलक्षणस्य'

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति भाष्योक्तस्य स्वयमवगाहनपुरस्सरम्' एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यवभास्यत्वम्' इतिलक्षणे (र.प्र.पृ.11.) अनिर्वचनीयख्यातिवादिनामद्वैतिनां मतानुसारेण तात्पर्यमभिधाय, तार्किकमार्गेण तत्रत्यदलानां सार्थक्यमवर्णयन्। मिथ्याज्ञान-निमित्तः, स्मृतिरूपः, पूर्वदृष्टावभासः इति पदानां व्याख्याव्याजेन अध्याससामग्रीमपि व्याख्याकाराः प्रकाशितवन्तः। तार्किकबौद्ध-मीमांसकशून्यवादिमतानुसारेण अध्यासलक्षणान्याविष्कृतानि। अर्थाध्यास-ज्ञानाध्यास-धर्मि-धर्माध्यास-तादात्म्य-संसर्गाध्यास-साद्यनाद्यध्यासानामपि स्पष्टो भेदः दर्शितः। ततः भाष्योक्ताध्याससम्भावनासरणिं व्याख्याय, 'तमेतमेवंलक्षणमध्यासं पण्डिताः अविद्येति मन्यन्ते। तद्विवेकेन वस्तुस्वरूपावदारणं विद्यामाहुः' (शा.भा.पृ.19.) इति विद्याविद्ययोः व्याख्येयत्वेन प्रकृतत्वे, अध्यासनिरूपणं किमर्थमिति शङ्कायाम्-तत्रैवं सतीत्यादिसमनन्तरभाष्यपङ्क्तिव्याख्याने 'मूलाविद्यायाः सुषुप्तावनर्थत्वादर्शनात् कार्यात्मना तस्यानर्थत्वज्ञापनार्थं तद्वर्णनम्' इति रत्नप्रभायां (र.प्र.पृ.19) समाहितम्। तथा प्रमाणानामविद्यावद्विषयत्वनिरूपणानन्तरं च 'मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सकललोकप्रत्यक्षः' (शा.भा.पृ.25.) इति भाष्यपङ्क्तिव्याख्यानसन्दर्भे भाष्यकारैः प्रत्यक्षस्याध्यासे प्रामाण्येन

In Public domain. Digitization Muthulakshmi Research Academy
उपसंहारः कृतः कथं सङ्गच्छते? इत्यशङ्क्य साक्षिप्रत्यक्षमेवाध्यासधर्मिग्राहकं मानम्, अनुमानादिकं तु सम्भावनार्थमित्यभिप्रेत्य, भाष्यकृता प्रत्यक्षेणोपसंहारः कृत इत्युक्तं रत्नप्रभायाम्। (र.प्र.पृ.25.26.)

आद्यसूत्रवर्णकचतुष्टयोक्तविषयसङ्ग्रहः- रत्नप्रभायां प्रथमसूत्रस्थव्याख्यनान्ते' एवं प्रथमसूत्रस्य चत्वारोऽर्थाः व्याख्याचतुष्टयेन निरूपिताः' (र.प्र.पृ.45.) इतिपङ्क्तिर्दृश्यते। के ते चत्वारोऽर्था इति जिज्ञासायां पूर्णानन्दीये नकिञ्चिदुपलभ्यते। किन्त्विदमत्र सम्भावनीयम्। 1.एतावत्पर्यन्तं वर्णकचतुष्कं समापितमिति, वर्णकचतुष्टयमेव चत्वारः सूत्रार्था इत्यनेन ग्राह्यं भवति। जिज्ञासासूत्रे विचारस्य ज्ञानफलकत्वेन प्रतिज्ञानात्, ज्ञानस्य च बन्धरूपानर्थनिवृत्तिद्वारा ब्रह्मस्वरूपावगतिफलकत्वेन प्रतिज्ञया सूचितत्वात्, बन्धस्य सत्यत्वे अनर्धनिवृत्तेरयोगात्, ज्ञाननिवर्त्यत्वान्यथानुपपत्तिरूपार्थापत्त्या अध्याससूचितः। स एकोऽर्थः। अध्याससम्बन्धी विचारः सर्वोऽप्यत्रान्तर्भवति। 2.प्रथमसूत्रव्याख्योपक्रमे उपयुक्ताभ्यां 'व्याचिख्यासितस्य ब्रह्ममीमांसाशास्त्रस्ये'ति पदाभ्यां ज्ञायमानः ब्रह्ममीमांसाशास्त्रनिष्ठपृथक्त्वरूपोऽर्थः द्वितीयः। 3.अथशब्दस्य मङ्गलाद्यर्थान्तरपरत्वं व्युदस्य, साधनचतुष्टयानन्तर्यार्थत्वं व्यवस्थाप्य, अतश्शब्दार्थविचारसन्दर्भे 'तद्यथेहकर्मचितो लोकः' इति

In Public domain. Digitization Muthulakshmi Research Academy
छान्दोग्यश्रुत्युदाहरणेन वैराग्यमपि समर्थ्य, तत्रैव 'ब्रह्मविदाप्नोति परम्' इति श्रुत्युदाहरणेन, अधिकारिणः स्वस्वरूपावाप्ति-रूपफलमपि भाष्यकारैः समर्थितम्। तदनु ब्रह्मजिज्ञासा इत्यत्र, 'ब्रह्मणो जिज्ञासा' इति शेषषष्ठीत्वनिरासपुरस्सरं तद्विजिज्ञासस्वेति श्रुतिसाहाय्येन च कर्मणि षष्ठीत्वपक्षस्यैव समर्थनाच्च, विचाररूप-जिज्ञासायाः फलं ब्रह्मैवेति विज्ञायते। ज्ञानेच्छायाः जिज्ञासापदार्थ-त्वपक्षेऽपि, 'अवगतिपर्यन्तं ज्ञानं सन्प्रत्ययवाच्यायाः इच्छायाः अर्थः' (शा.भा.40) इति भाष्यात्, अखण्डसाक्षात्कारात्मक-वृत्तिज्ञानात्मकं, आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यरूप-भाष्योक्तावगतिरूपफलाभव्यञ्जकं, ज्ञाधात्वजहल्लक्षणया लक्ष्यं इच्छायाः विषयः कर्म। फलीभूतज्ञानं च 'अज्ञाननिवृत्तिरूपफलसाधनत्वेन' (पूर्णानन्दीयम्.पृ.12) इति पूर्णानन्दीयविवरणात्, वृत्तिज्ञानमेव भवति, नावगतिः ब्रह्मस्वरूपा। 'कर्तुरीप्सिततमं कर्म' (पा.सू.1.4.49.) इति सूत्रानुसारेण भाष्यकारैः' ज्ञानेन हि प्रमाणेनाप्तुमिष्टं ब्रह्म' (शा.भा.पृ.41) इति व्याख्यनात् प्रमाणक्रियाजन्यफलेनाज्ञाननिवृत्त्या अतिशयेन सम्वन्धुमिच्छाविषयत्वस्य ब्रह्मण्येव सत्त्वात्, ब्रह्मणः औपचारिकं कर्मत्वं फलत्वं च। ज्ञाधातुना फलीभूतज्ञानात्मकवृत्ति-ज्ञानस्याभिधानेऽपि, सूत्रे भाष्यकारोक्ता अवगतिः क्वोक्ता? इति सन्देहे 'ब्रह्मावगतिर्हि पुरुषार्थः' इति भाष्यग्रन्थस्य ब्रह्मस्वरूपा

In Public domain. Digitization Muthulakshmi Research Academy
अवगतिः इति भामतीकारेण व्याख्यानात्, सूत्रे ब्रह्मपदस्य सद्भावाच्च, अवगतिरूपफलमप्युक्तमेव। एवं तृतीयवर्णके अधिकारिफलसम्भवासम्भवप्रयुक्तपूर्वपक्षनिरासः अधिकारिफल-निरूपणेन कृत इति, स च तृतीयः सूत्रार्थ इति च मन्तव्यम्।

4.चतुर्थवर्णके च ब्रह्मप्रसिद्ध्यप्रसिद्धिपक्षयोः ब्रह्मणः अविचारणीयत्वं पूर्वपक्षीकृत्य, ब्रह्मशब्दव्युत्पादनेन तत्प्रसिद्धावपि, वाक्याभासावष्टब्धाष्टमतैः, स्वमतेन च वादिषु विप्रतिपत्तेः दर्शनात्, सामान्यतो ब्रह्मज्ञानेऽपि, विशेषं प्रति विप्रतिपत्तेः, अविचार्य च यत्किञ्चित्प्रतिपत्तौ, निःश्रेयसात्प्रतिहन्येतेति, वेदान्तवाक्यमीमांसा-ऽविरोधितर्कोपकरणः निःश्रेयसप्रयोजनो विचारः कर्तव्य एवेत्युक्तं भाष्ये। स च वादिविप्रतिपत्तिनिरासफलकः अवश्यकर्तव्यो विचारः चतुर्थवर्णकार्थः। एतान्येव रत्नप्रभाकृताव्याख्यानचतुष्टय-पदेनाभिप्रेतानि। एवमेकस्य सूत्रस्यानेकार्थत्वे वाक्यभेदप्रसक्तौ महावाक्यार्थजनकावानतरवाक्याभिप्रायेण सूत्रस्यानेकार्थत्वं भूषणमिति समर्थितं रत्नप्रभायाम्।

5.**पञ्चमवर्णकम्-** अत्र भाष्ये सूत्रघटकपदानामर्थनिर्धारण-द्वारा जन्मस्थितिभङ्गसमाहारोपादानत्वेन, निमित्तत्वेन च 'यतो वाइमानी'त्यादिश्रुतौ यत इति पञ्चमीश्रुत्या, इतरनिरूप्यत्वलक्षणं तटस्थं ब्रह्मणो लक्षणम्, 'सर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि' इत्यधिकरणान्तभाष्य-वचनेन च, यः सर्वज्ञः इत्यादिश्रुतेः स्मरणाच्च

In Public domain. Digitization Muthulakshmi Research Academy
इतरानिरूप्यत्वलक्षणं सर्वावभासनयोग्यतारूपं स्वरूपलक्षणं च रत्नप्रभाकारैर्निरूपितम्। "विमतमभिन्ननिमित्तोपादानकं विमतं चेतनकर्तृकं वा कार्यत्वात् सुखादिवत्" (र.प्र.पृ51.) इत्यनुमानेन अभिन्ननिमित्तोपादनत्व-सम्भावकेन श्रुत्युक्तं ब्रह्मलक्षणं दृढीकृतम्। ईश्वरनिष्ठतया कल्पितस्य जगत्कारणत्वस्य ब्रह्मलक्षणत्वे तु तदेवेतरनिरनिरूप्यत्वेन तटस्थलक्षणम्। एवमुभयविधं ब्रह्मलक्षणं व्याख्यया प्रकाशितम्। "यथोक्तविशेषणमीश्वरं मुक्त्वा प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि सम्भावयितुं शक्यम्:" (र.प्र.पृ. 49.) इति भाष्यात् प्रधानाण्वादिपूर्वपक्षनिरासः प्रधानतयात्राधिकरणे तात्पर्यविषयीभूत इतिवक्तुं न शक्यते, तथापि तदवान्तरतात्पर्यविषयीभूतम्। किन्तु जन्मादिसूत्रं अनुमानविधया ब्रह्मलक्षणपरम्? उत ब्रह्मलक्षणश्रुतिप्रदर्शनपरम्? इति सन्देहे ब्रह्मलक्षणश्रुतिप्रदर्शनपरमेवेति भाष्यकाराणां सिद्धान्तः। "आद्यं कार्यं चेतनजन्यं कार्यत्वात् कुम्भवत्" इत्यनुमानेन प्रधानशून्ययोर्निरासेऽपि जगत्कर्तृत्वे हिरणयगर्भादेः जीवस्य वारणार्थं सूत्रे वेदस्य न्यायतोऽर्थनिर्धारणात्मके अनेककर्तृभोक्तृसंयुक्तस्येत्यर्थकं अस्येति पदम्। न च "अङ्कुरादिकं सकर्तृकं कार्यत्वात्" इत्यनुमानेन ब्रह्मणः सिद्धिरिति वाच्यम्। अङ्कुरादौ जीवस्य कर्तृत्वादर्शनात्, जीवादन्यः कर्ता नास्तीति निश्चयेन च सकर्तृकत्वनिरूपितव्याप्तेः कार्यत्वे अभावनिश्चयाच्च।

In Public domain. Digitization Muthulakshmi Research Academy
(र.प्र.पृ.49) न च कार्यत्वेन साक्षादीश्वरस्यासिद्धावपि, कार्यत्वेन सकर्तृकत्वसिद्धेः लाघवतर्केण च जगतः कर्तृत्वेन सर्वज्ञेश्वरसिद्धिरिति वाच्यम्। ब्रह्मणः ज्ञानोपाधेः शरीरस्यैवाभावेन, सुतरामेव मनसोऽप्यभावात्, अमनोजन्यस्य ज्ञानस्याभावाच्च, ज्ञानस्यैवाभावे कुतो वा नित्यज्ञानत्वलक्षणं सर्वज्ञत्वम्?। ततश्च बाधितेन कार्यत्वेन नानुमानाद्ब्रह्मणः सकर्तृकत्वसिद्धिः। (र.प्र.पृ.50) अन्यच्च 'यत्कार्यं तद्ब्रह्मजम्,' 'यत्कार्यं तत्सकारणकम्' इत्यनुमानाद्वापि ब्रह्मणो न सिद्धिः। श्रुत्या तद्ब्रह्मेति ब्रह्मकारणत्वस्यानुक्तौ ब्रह्मजत्वनिरूपितव्याप्त्यसिद्धेः। द्वितीयेऽपि कार्यत्वात्सकारणत्वस्य सिद्धावपि, कारणे ब्रह्मत्वस्य श्रुतिमन्तरा अप्रतिपत्तेः। तस्मात् समन्वयाधिकरण इवात्रापि श्रुतीनामेव मूर्धाभिषिक्तता। अनुमानं तुजगदभिन्ननिमित्तोपादानकमित्यादि श्रुत्यर्थसम्भावकतयोपयुज्यते। पण्डितो मेधावी (छा.उ.6.14,2.) 'श्रोतव्यो मन्तव्य' इत्यादिश्रुत्या मननादौ पुरुषबुद्धिसाहाय्यस्य प्रकाशनात्। न च वेदार्थैकर्मणीव वेदार्थे ब्रह्मज्ञानेऽपि, नास्ति मननाद्यपेक्षेति वाच्यम्। चोदनातन्त्रे पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्ये, विधिनिषेधोत्सर्गादिविषये असाक्षात्कारप्रधाने कर्मणि, वेदचोदितस्यैव क्रियमामाणत्वात् , वेदोक्तविकल्पेषु पुरुषस्य चयने स्वातन्त्र्याच्च, मननापेक्षाया अभावेऽपि, एकरूपस्य ब्रह्मणः असाक्षात्कारे, पुरुषार्थासिद्धेः, ब्रह्मज्ञाने पुरुषचेयविकल्पानुष्ठान-

In Public domain. Digitization Muthulakshmi Research Academy
स्याभावात्, केवलं ब्रह्मात्मकवस्तुतन्त्रत्वाच्च, वाक्यार्थविचारणाजनितवृत्तिज्ञानेन ब्रह्मसाक्षात्कारपर्यन्तं मननापेक्षा, तद्रूपमनुमानं च प्रमाणदार्ढ्यायोपयुज्यते। प्रमातुः प्रमाणसञ्चारवेलायां पुरुषबुद्धिसाहाय्यं ब्रह्मज्ञाननिष्ठवस्तुतन्त्रत्वं प्रति नव्याघातुकम्। सर्ववेदान्तैः एकरूपस्यैवार्थस्य प्रतिपादनात्, तत्र पुरुषस्य श्रुतिचोदितविकल्पानामनवकाशाच्च। अतश्च जन्मादिसूत्रं श्रुत्या अर्थनिर्णायकमेव, नानुमानेन।

शास्त्रयोनित्वाधिकरणम् (षष्ठ-सप्तमवर्णके) अस्मिन्नधिकरणे अस्तिवर्णकद्वयम्। प्रथमं ब्रह्मणः वेदादिशास्त्रकारणत्वपरम्। द्वितीयं तु ब्रह्मणि वेदस्य प्रामाण्यनिरूपणपरम्। जन्मादिसूत्रोक्तेन सर्वकर्तृत्वेन सर्वज्ञत्वे कल्पिते, तत्सूत्रस्य सर्वकर्तृत्वसर्वज्ञत्वविषयकतया, अस्याप्यधिकरणस्य षष्ठवर्णकात्मकस्य वेदकर्तृत्वसर्वज्ञत्वविषयकतयाएकविषयत्वसङ्गत्या उत्थानम्। वेदकर्तृत्वसर्वज्ञत्वयोरुपपत्तेराक्षेपात्, आक्षेपसङ्गत्या पूर्वपक्षः। तत्र भाष्येसिद्धान्तपरे 'प्रदीपवत्सर्वार्थावद्योतिनः योनिः कारणं ब्रह्मे'त्युक्तम्। एतदाधारेणैव रत्नप्रभायाम् "वेदे उपलभ्यमाना सर्वार्थावभासनशक्तिः तदुपादानब्रह्मगतशक्तिपूर्विका तद्गतावाप्रकाशनशक्तित्वात् कार्यगतशक्तित्वाद्वा" इत्याद्यनुमानं (र.प्र.पृ.55.) च वेदानां ब्रह्मकर्तृकत्वेन ब्रह्मणः सर्वज्ञत्वदृढीकरणपरम्। 'यद्यद्विस्तरार्थम्' इत्यादिभष्याधारं "वेदः

In Public domain. Digitization Muthulakshmi Research Academy

स्वविषयाददिकार्थवद्ज्ञानजन्यः प्रमाणवाक्यत्वात्" इति(पृ.56.) रत्नप्रभोक्तमनुमानं तु उपादानब्रह्मगतशक्तिपूर्वकत्वसाध्यकानुमाने मायाया अपि उपादानत्वसम्भवेन, ब्रह्मण एव उपादानत्वासिद्धौ, अनुमाने साध्यबाधः स्यादिति, ब्रह्मण एव वेदोपादनत्वनिरूपणाय प्रवृत्तम्। पक्षेऽस्मिन् वेदस्य ब्रह्मकर्तृकत्वेन प्रसक्तपौरुषेयत्वनिरासाय, विषयवाक्यनिरूपणाय च निःश्वसित-वाक्योदाहरणम्। प्रथमपक्षे प्रसक्तः वेदगतपौरुषेयत्वप्रयुक्तः दोषोऽपि व्याख्याकृता सम्यक्परिहृतः। सप्तमवर्णके तु यतो वा इत्यादिश्रुतेरेव शास्त्रत्वेनोल्लिखितायाः ब्रह्मणि प्रामाण्यम्, नत्वनुमानस्येत्युक्तं भाष्ये। पूर्ववर्णकस्य अस्य वर्णकस्य च शास्त्रगतहेतुप्रमाणत्वयोः ब्रह्मविषये विषयत्वेन ब्रह्मरूपैकार्थनिर्णायकत्वेन, वर्णकयोः एकफलत्वसङ्गतिरित्युक्तं व्याख्यायाम्।

समन्वयाधिकरणम् **(अष्टम-नवमवर्णके)** अत्रापि वर्णकद्वयम्। तत्राष्टमं वर्णकं वेदान्तानां कर्मोपासनाविधिशेषत्वमभ्युपगच्छतां भाट्टानां मतं प्रतिक्षिपत्, अखण्डार्थे ब्रह्मणि षड्विधतात्पर्यलिङ्गैः समन्वयं ब्रूते। तत्र भाट्टानां पूर्वपक्षे अर्थवादाधिकरणपूर्वपक्षोक्तयुक्तिभिः वेदान्तानां नैरर्थक्यशङ्का। तदधिकरणसिद्धान्तयुक्त्या च वेदान्तानामानर्थक्य-शङ्कापरिहारः। द्वितीयवर्णकं तु वृत्तिकृतां प्राभाकराणां च

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वपक्षनिरूपणात्मकं तत्खण्डनात्मकभाष्यकारीयस्वमतसाधकश्रुतियुक्तिप्रपञ्चात्मकमत्यन्तविततम्, अधिकरणान्तव्यापि च। तस्य सर्वस्य भगवच्छङ्करपादोक्तस्य श्रौतयुक्तिजालस्य सङ्ग्रहेणैकत्र अवस्थापनं महासागरकृत्स्नजलस्य एकस्मिन् घटे निक्षेपप्रयत्नवत् साहसं भविष्यति। अथापि सङ्ग्रहेण निरूपणाय कश्चिद्यत्न आस्थीयते। भाट्टमतनिरासोपसंहारे "सिद्धार्थे व्युत्पत्तिग्रहमिच्छतां ब्रह्मनास्तिकानां मतम्" (र.प्र.पृ.65.) इति भाट्टानां मतं रत्नप्रभाकृता विशेषितम्। सिद्धार्थे व्युत्पत्तिमिच्छतामिति कथनात्, भाट्टाः सिद्धार्थं ब्रह्म पदार्थरूपेणापि, नाभ्युपगच्छन्तीति वक्तुं न शक्यते। किन्तु वाक्यार्थरूपेण प्राधान्येन ब्रह्म नाभ्युपगच्छन्तीति वक्तुं शक्यते। अन्यथा सर्वात्मना ब्रह्मनिरासे मीमांसादर्शनस्य शून्यवादप्रवेशापत्तिः, अथ वा सर्वात्मना नास्तिकदर्शनेषु प्रवेशापत्तिः। कर्तृदेवतास्तुत्यनुपपत्तेश्च। अत एव उपासनादिक्रियार्थत्वं वा इति भाष्यपङ्क्तिव्याख्यानसन्दर्भे "असद्ब्रह्माभेदमारोप्य, अहं ब्रह्मास्मीत्युपासीत" (र.प्र.पृ.59.) इति व्याख्याकृद्वचनस्य असन् ब्रह्माभेद इत्येवावधेयम्, न तु असदेव ब्रह्मेति। एवं च भाट्टमते वाकायार्थरूपेणैव ब्रह्म नास्तिकत्वं, न तु पदार्थरूपेणापीति मन्तव्यम्।

वृत्तिकारपूर्वपक्षः-अत्रापरे प्रत्यवतिष्ठन्ते इत्यादिना प्राभाकरानुयायिनः वृत्तिकारास्तु पदानां कार्यान्वितस्वार्थे

In Public domain. Digitization Muthulakshmi Research Academy

शक्तिग्राहकमूर्धन्यव्यवहारबलाच्छक्तिमभ्युपगच्छन्तः, निरस्यन्तश्च सिद्धार्थे शक्तिम्, अपूर्व-नियोग-विध्यादिशब्दितं कार्यमेव वाक्यार्थमभ्युपगच्छन्ति। वेदान्तेषु 'अहं ब्रह्मास्मी'ति समानाधिकरणपदानां स्मारकशक्तियुक्तत्वेऽपि, कार्यस्मारक-लिङादिपदाभावेन, वाक्यार्थबोधाजनकत्वात्, तेषामानर्थक्यं माभूदिति, 'आत्मानमेव लोकमुपासीत' इत्यादिविधिप्रत्ययघटित-वाक्यस्थले उपासनाप्रकाराकांक्षायां तन्निवर्तकतया, 'अहं ब्रह्मास्मी'ति पदस्मारितप्रत्यगभिन्नब्रह्मणः आक्षेपात्, प्रत्यग्ब्रह्माभेदोपासनाविधिः तत्र वाक्यार्थः। एवं च प्रत्यग्ब्रह्माभेदश्रवणमात्रेण मतमिदं वेदान्तिसंनिहतमिवाभाति। किन्तु प्रतिपत्तिविधिवादिनामेषां शुद्धप्राभाकरापेक्षया अद्वैतसङ्कीर्णता सम्पन्ना। भाट्टमतसम्मतसिद्धपदार्थसङ्गतिग्रहद्वेषित्वं च प्राभाकर-मतावलम्बनेन सम्पन्नम्। प्रत्यग्ब्रह्माभेदोऽपि योषिदग्निबुद्धिविषय इवासन्नेव, नाद्वैतिमत इव वास्तविकः। अस्तु तत्तथा। वेदनकामस्य, अथ वामोक्षकामस्य अधिकारित्वेन लाभात्, अधिकार्यश्रवणस्थले च अधिकारिणः आक्षेपात् उपासनाविध्यु-पपत्तिरपीत्यभिप्रयन्ति वृत्तिकाराः। ब्रह्मपदस्य लोके अप्रसिद्धार्थकत्वात्, कथं शक्तिग्रह? इति शङ्कायां, 'यूपं तक्षति' इत्यादौ स्मारितस्य पशुबन्धनविधिशेषतया दृष्टादृष्टसंस्कारयुक्त-दारुविशेषस्येव, प्रतिपत्तिविधिशेषस्य 'अहं ब्रह्मास्मी'त्यादिपद-

In Public domain. Digitization Muthulakshmi Research Academy

स्मारितार्थस्योपासनाविधिना आक्षेपात्, विध्येकवाक्यतया अर्थप्रतिपत्तिः। शास्त्रस्य प्रवृत्तिनिवृत्त्यन्यतराधायकतया पुमर्थसम्पादकत्वेन, विधि-निषेध-तच्छेषाणामेवार्थवत्त्वम्। 'दृष्टो हि तस्यार्थः कर्मावबोधनम्', 'चोदनेति (क्रियायाः नियोगज्ञानद्वारा) प्रवर्तकं वचनमिति शास्त्रतात्पर्यविदां शबरस्वामिनां वचनम्' 'आम्नायस्यक्रियार्थत्वात्' (जै.सू.1.2.1.)' तद्भूतानां क्रियार्थेन समाम्नायः' (जै.सू.1.1,25.) इत्यादिजैमिनिसूत्राण्यपि कार्यान्वितशक्तिवादे प्रमाणम्। अन्यच्च वेदान्तानां कर्तव्यविध्यननुप्रवेशे, वस्तुमात्रकथने, हानोपादानासम्भवात्, 'सप्तद्वीपा वसुमती' इत्यादिवाक्यानामिव सिद्धार्थपरत्वे अप्रामाण्यं स्यात्। 'रज्जुरियं नायं सर्पः' इति वाक्ये भ्रान्तिजनितभयनिवर्तकत्वमिव, असंसार्यात्मतत्त्वबोधनेन, संसारनिवर्तकत्वमेव प्रयोजनमिति चेत्, रज्जुस्वरूपश्रवणमात्रेण लोके भ्रान्तिनिवृत्तिर्दृष्टा। किन्त्वसंसार्यात्मश्रवणमात्रेण, भ्रान्तिर्न निवर्तते। श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वधर्मदर्शनात्। यदि च संसारित्वं निवृत्तं, कुतः श्रोतव्यः मन्तव्यः इत्यादिना श्रवणमननादिकं श्रुतिर्विदध्यात्। तस्मात्प्रतिपत्तिविधिपराण्येव वेदान्तानि, मोक्षस्तु स्वर्गादिवददृष्टमेव फलम्, न दृष्टः पुरुषार्थ इति वृत्तिकारपूर्वपक्षः।

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तिकृन्मतखण्डनं भाष्यसिद्धान्तश्च अत्राभिधीयते – इत्यादिना भाष्ये सिद्धान्तः। सिद्धान्तोपष्टम्भकं चानुमानं व्याख्यायामित्थम्। "वेदान्ता न विधिपराः स्वार्थे फलवत्त्वे सति नियोज्यविधुरत्वात् नायं सर्प इति वाक्यवत्" (र.प्र.पृ.69.70.) इति। 1.अयं तु सिद्धान्ताशयः। धर्मब्रह्मजिज्ञासाफलयोरस्ति महद्वैलक्षण्यम्। शारीर-वाचिक-मानसिकधर्मानुष्ठानेन, तादृशेनैवाधर्माचरणेन, तत्रत्याचरणतारतम्याच्च, स्वर्गनरकादि, उपासकानां देवलोकगमनम्, अनुपासकानामविद्यादिदोषवतां च कर्मिणां स्वर्गप्राप्तावपि, पुनरावृत्तिः, इत्यादि तरतमभावापन्नफलमेव दृश्यते श्रुति-स्मृति-न्यायप्रसिद्धम्। एवं "न हवै सशरीरस्य प्रियाप्रिययोरुपहतिरस्ति" इति श्रुत्या सशरीरस्य शरीराभिमानिनः, प्रियाप्रिययोगरूपरूपसातिशयमेव फलम्। अशरीरिणस्तु शरीराभिमानरहितस्य तु "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" (छा.उ.8.12.1.) इति श्रुत्या, प्रियाप्रियस्पर्शनिषेध एव स्वाभाविकं फलमुक्तं निरतिशयं मोक्षाख्यम्। अशरीरत्वस्य स्वाभाविकत्वेन धर्माधर्मकार्यत्वाभावात्। तस्मात् क्रियाविधिसाध्यो न मोक्षः। 2.ब्रह्मणः सांख्यप्रकृतिवत् परिणामिनित्यत्वाभावात्, कूटस्थनित्यत्वेन, व्योमवत् सर्वक्रियारहितत्वेन, 'अन्यत्र धर्मादन्यत्राधर्मा'दित्यादिकठश्रुत्या धर्माधर्माद्यसम्बन्धात्, नास्ति ब्रह्मणः कर्तव्यानुप्रवेशः। यदि ब्रह्मणः कर्तव्यानुप्रवेशः,

In Public domain. Digitization Muthulakshmi Research Academy

मोक्षस्यानित्यत्वं प्रसज्येत। 3.न च ब्रह्मात्मैकत्वविज्ञानानन्तरमपि क्रियानुप्रवेशः। "को मोहः कश्शोक एकत्वमनुपश्यतः" (ई.उ.7.) इति श्रुतेः। "पश्यन् वामदेवः प्रतिपेदे अहं मनुरभवम्, अहं सूर्यश्च" (बृ.उ.1.4.10) इत्यादिश्रुतेः शतृप्रत्ययवाच्यहेतुत्ववद्दर्शनसर्वात्म-भावयोः, 'तिष्ठन्गायती'त्यादौ शतृप्रत्य वाच्यलक्षणत्ववत्स्थान-गानक्रिययोः इव मध्ये क्रियान्तरव्यवधानाभावात्। 4.न्यायदर्शनप्रथमसूत्रे 'तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति प्रतिज्ञाय, दुःखजन्मेत्यादिद्वितीयसूत्रेण, तत्त्वज्ञानान्मिथ्याज्ञानापाये तन्मूलदुःखान्तानां तत्त्वानामपायो मोक्ष इत्युक्तम्। अतश्च दर्शनान्तरसंवादात् ज्ञानादेव मोक्षः, नोपासनादिक्रियया। ब्रह्मात्मैकत्वविज्ञानादेव मोक्षः इति त्वन्यदेतत्। 5.ब्रह्मविज्ञानस्य सम्पत्-अध्यास-विशिष्टक्रियायोगनिमित्तकोपासनारूपत्वे, पत्नीकर्तृकाज्यावेक्षणादिसंस्कारकर्मत्वे वा, तत्त्वमसीति समानाधिकरणपदप्रतीतसमन्वयस्य पीडनापत्तेः, 'भिद्यते हृदयग्रन्थिः' इत्यज्ञाननिवृत्तिरूपफलप्रतिपादकश्रुत्यवरोधापत्तेश्च। 6.अन्यच्च प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवत् वस्तुतन्त्रे ब्रह्मात्मैकत्वविज्ञाने श्रुतिचोदितविकल्पाद्यवकाशरहिते, कर्मणीव पुरुषव्यापारतन्त्रत्वस्याभावात्, सर्ववेदान्तैः ब्रह्मात्मैकत्वविज्ञान-स्यैकरूपेण प्रतिपादनाच्च, न क्रियाविधिविषयत्वं ब्रह्मणः। 7.किञ्च ब्रह्मणः घटादिवदनुत्पाद्यत्वेन, क्षीरादिवदविकार्यत्वेन,

In Public domain. Digitization Muthulakshmi Research Academy

ग्रामादिवदनाप्यत्वेन, निर्गुणस्य अनाधेयातिशयस्य ब्रह्मणः गुणाधानदोषापनयनलक्षणसंस्कारायोगात्, असंस्कार्यत्वेन नास्ति क्रियानुप्रवेशः। 8.न च देहाश्रयस्नानाचमनादिक्रियया देहिनः आत्मनः संस्कारो युक्तः। तत्राप्यविद्यया परिगृहीतस्यैवात्मनः संस्काराभ्युपगमात्। देहाश्रयचिकित्सया धातुसाम्यसम्पादनेन संहतात्मनि अरोगबुद्धिवत् देहाश्रयाचमनादिक्रियया संहतात्मन्येव संस्कृतत्वबुद्ध्युपपत्तेः, 'सपर्यगाच्छुक्रम्' इत्यादिश्रुत्या आत्मनः स्वतश्शुद्धत्वप्रकाशनात्। 9.अपि च ध्यानवत् ज्ञानं न मानसी क्रिया, ध्याने हि 'यस्यै देवतायै हविर्गृहीतं स्यात्' इति देवताचयनस्य पुरुषतन्त्रत्वेन, श्रुत्यैव चोदितत्वात्, करणाकरणादीनामवकाशात्, तस्य क्रियात्वं युक्तम्। प्रमाणजन्ये ब्रह्मज्ञाने तु सर्वविधविकल्पानास्पदेवस्तुतन्त्रप्रसिद्धज्ञानवत्, वस्तुतन्त्रत्वस्यैव सद्भावेन, ब्रह्मज्ञानस्य क्रियात्वमेव नास्ति, कुतः ब्रह्मणः क्रियाशेषत्वम्। 10.ब्रह्मणो विध्यविषयत्वे 'आत्मा वारे द्रष्टव्यः श्रोतव्यः' इत्यादीनां श्रुतिवचनानां का गतिरित्युक्ते' विधिछायानि' इति भाष्यकारैरेव प्रश्नवाक्ये अनूदितेनवचनेन, "स्वाभाविकप्रवृत्तिविषयीकररणार्थानीति ब्रूमः" इति वाक्येन च समाधानम्। भेददर्शनप्राबल्यपक्षे अविद्याजुषां संसारिणां ज्ञानोत्पत्तिफलकापूर्वाधायकतया विचारात्मके श्रवणादौ नियमविधिः परिसंख्या वा। न तु ज्ञाने प्रमाणजन्ये विधिः। 11.न

In Public domain. Digitization Muthulakshmi Research Academy

च ब्रह्मणः विदिक्रियायाम्, उपासनाक्रियायां वा अनुप्रवेशः। "अन्यदेव तद्विदितादथो अविदितादधि" "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति केनोपनिषद्वचनाभ्यां ब्रह्मणः विद्युपासनाक्रियाभिरसम्बन्धात्, तदविषयत्वाच्च। ब्रह्मणः विद्यादिक्रियाऽविषत्वे, तस्य प्रतिपादितं शास्त्रप्रमाणकत्वं कथमित्युक्ते केवलमविद्यापरिकल्पितभेदनिवृत्तिपरत्वेन। ब्रह्मणस्तु स्वयं प्रकाशत्वेन केवलं स्फुरणम्, न तु विषयतया। एवं वृत्तिकृन्मतनिरासाय स्वमतसाधकयुक्तीः श्रुतिवचनानि च निरूप्य, पूर्वोक्तदोषाणां समाधानमपि भाष्ये समाधानमपि प्रपञ्चितम्।

वृत्तिकारोक्ताक्षेपाणां परिहारः- 1.वस्तुमात्रकतने हानोपादानशून्यानां 'सप्तद्वीपा वसुमती' इत्यादिवाक्यानामिव, वेदान्तवाक्यानामानर्थक्यमिति यदुक्तं वृत्तिकारेण, तस्य ज्ञानेन सर्वकर्तव्यताहानौ हानोपादानाभावः अलङ्कार वेति, श्रुत्या, 'कृतकृत्यश्च भारत' इति स्मृत्या च समाधानम्। 2.यदपि वस्तुमात्रकथनपराद्वाक्यात्, 'रज्जुरियं नायं सर्पः' इति वाक्यादिव ब्रह्मात्वैकत्वविद्यया संसारित्वनिवर्तने वेदान्तिभिः श्रुत्यनुसारं प्रतिज्ञाते, श्रुतब्रह्मणोऽपि, यथापूर्वं संसारित्वदर्शनात् इति पुनराक्षिप्तं वृत्तिकारैः, तदपि न विचारसहम्। 'ब्राह्मणो न हन्तव्यः' इति वाक्यस्य वेदान्तिमतेन विचारानन्तरं भाष्यकारैरेव समाधानस्य प्रकाशितत्वात्। तथा हि पूर्वं गृहस्थावस्थायां धनाभिमानिनः

In Public domain. Digitization Muthulakshmi Research Academy
धनापहारनिमित्तदुःखसद्भावेऽपि, पारिव्राज्यदशायां त्यक्तधनाभिमानस्य दुःखाभावस्यैव दर्शनात्, पूर्वं कुण्डलित्वाभिमानेन धृतकुण्डलस्य, सुखदर्शनेऽपि, पश्चात्कुण्डलवियुक्तस्य, अथ च कुण्डलित्वाभिमानरहितस्य व्यक्तिविशेषस्य दृष्टान्ते सुखाभावस्यापि प्रतिपादनेन ज्ञानिनः प्रियाप्रियस्पर्शरूपानर्थनिवृत्तिः सानुभवं प्रकाशिता भाष्ये। अतः वृत्तिकृतां श्रुतब्रह्मणोऽपि नानर्थनिनिवृत्तिः इति वचः साहसमात्रम्। 3.अन्यच्च समन्वयाधिकरणान्तिमभागेषु भाष्यकारैः "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इति श्रुत्युदाहरणात्, स्थितप्रज्ञस्य का भाषा इति स्मृत्युदाहरणाच्च वेदान्तिभिः जीवन्मुक्तिदशा अभ्युपगता, या च मीमांसकै र्नाभ्युपगता। सर्पविनिर्मुक्तायाः वल्मीके क्षिप्तायाः त्यक्ताभिमानायाः त्वचः दृष्टान्तेन, जीवन्मुक्तेन त्यक्ताभिमानस्य जीवन्मुक्तशरीरस्य साम्यवर्णनेन, 'जीवन्नपि ब्रह्मैव' इति जीवन्मुक्त्यवस्था अहिनिर्ल्वयिनी इत्यादिश्रुत्या प्रतिपादिता। तादृश्याः जीवन्मुक्त्यवस्थायाः श्रुतिसम्मतायाः अपि, वृत्तिकारैरस्वीकारात्, तैः वेदान्तिनां विषये तथा दोषापादनम्। एतादृशश्रुतिपर्यालोचने तु प्रायिकी संसारनिवृत्तिः तैरप्यभ्युपगन्तव्या। 6.किञ्च श्रवणवत् मनननिदिध्यासनयोरप्यवगत्यर्थत्वात्, न तयोः विधिविषयत्वम्। अवगतस्य ब्रह्मणः अन्यत्र विनियोगाबावाच्च न विधिः।

In Public domain, Digitization Muthulakshmi Research Academy

7. वृत्तिकृत्पूर्वपक्षोक्तशाबर-जैमिनीयवचनयोः विरोध-परिहारः तु अवशिष्टः। 'दृष्टो हि तस्यार्थः कर्मावबोधनम्', 'चोदनेति क्रियायाः प्रवर्तकं वचनम्', इति शबरस्वामिवचनानि धर्ममीमांसोपक्रमे तथोक्तानि स्युः। यदि तैरेव ब्रह्ममीमांसा कर्तव्या स्यात्, 'अनुपलब्धेऽर्थे तत्प्रमाणमि'ति वचनात्, मानान्तरावेद्या-बाधितफलवदर्थे तैरप्यवश्यं प्रामाण्यं स्वीकर्तव्यं स्यात्। एवमाम्नायस्येत्यादिजैमिनिसूत्रेणापि नास्ति विरोधः। यदि तथा एकान्ततया अभ्युपगम्येत, दध्ना जुहोतीत्यादिभूतोपदेशानर्थक्यं प्रसज्येत। यदि 'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते' इति न्यायेन भूतोपदेशस्य साध्यार्थत्वेन नानर्थक्यम्, वेदान्तिमते तु वाक्यार्थतया सिद्धस्यैवार्थस्याभ्युपगमात्, कार्यस्यानभ्युपगमात्, नास्ति साध्योपदेश इति, सिद्धोपदेशस्यानर्थक्यमित्युच्येत, तर्हि वयं पृच्छामः। किं भूतस्य कार्यशेषत्वं शब्दार्थत्वाय? फलाय? वा इति। भूतस्य दध्यादेः कार्यशेषत्वेऽपि, दधिपदेन प्रथमतः वस्तुमात्रमुपदिश्यत एव। पश्चादेव कार्यशेषत्वम्। यतः पदानां कार्यान्विते शक्तिकल्पनापेक्षया अन्वितमात्रे शक्तिकल्पनं लघुभूतम्। एवं सति 'अहं ब्रह्मास्मी'ति वेदान्तवाक्यस्थपदानामपि सिद्धार्थे सङ्गतिग्रहः सिद्ध एव। अथ सिद्धेऽर्थे सङ्गतिग्रहस्योपपन्नत्वेऽपि, न तस्यफलमस्ति किल? इत्युक्ते, तदपि न। यथा तत्र होमोद्देशेन सिद्धस्य दध्यादेर्ज्ञानादनुष्ठानेन फलम्, तथा

In Public domain. Digitization Muthulakshmi Research Academy

अनवगतात्मवस्तूपदेशेन तदवगत्या संसारहेतोः मिथ्याज्ञानस्य निवृत्तिः फलम्, किन्त्वत्र क्रियायाः द्वाराभावो विशेषः। एवं च दध्यादिवाक्ये, सत्यादिवाक्ये चार्थवत्त्वमविशिष्टम्। वस्तुतस्तु 'दध्ना जुहुयात्', 'सोमेन यजेत', 'आत्मा द्रष्टव्यः' इत्यादौ सर्वत्र इष्टसाधनत्वस्यैव विध्यर्थत्वसम्भवात्, लिङः कार्यविध्यादौ शक्तिकल्पनमपि व्यर्थम्। अतः सर्वत्र वाक्येषु इष्टसाधनत्वरूपसिद्धार्थे तात्पर्यस्य साधितत्वात्, कार्यान्वित-शक्तिवादः अत्यन्तदुर्बलः।

8.वस्तुतस्तु 'न हन्तव्यो ब्राह्मणः' इत्यादौ वाक्यस्य कार्यपरत्वं न युज्यते। नञः अभावस्य मुख्यार्थतया, तस्यैव वाक्ये प्राधान्यमस्तीति स्वीकर्तव्यतया, तस्य चाक्रियात्वात्, क्रियां प्रति शेषत्वाभावाच्च। ब्रह्मणाहननविषयकसङ्कल्पं कुर्यादिति पर्युदास-विधिपक्षाश्रयणे तु निर्निमित्तं नञीक्षत्योः लक्षणास्वीकारापत्तिः। तथा कार्यबोधस्य रागतो हनने प्रवृत्तं प्रत्यनिवर्तकत्वात्, लक्षणास्वीकारोऽपि वृथैव। किन्तूपर्युक्तदिशा धातूत्तरप्रत्ययस्य इष्टसाधनत्वस्वीकारपक्षे, तत्रापि प्रत्ययार्थप्राधान्यपक्षमाश्रित्य, धात्वर्थहननस्य प्रत्ययार्थेष्टसाधनत्वे अन्वये, नञा च तन्नेति बोधे, ब्राह्मणहनने अनिष्टसाधनत्वप्रतीतेः निवृत्तिरनायाससाध्या। अथ वा आख्यातसमभिव्याहृतधातुवाच्ये हनने इष्टसाधनत्वस्य, तादृशेष्टसाधनत्वविशिष्टस्यहननस्य नञर्थाभावे अन्वये इष्टसाधनं

In Public domain. Digitization Muthulakshmi Research Academy

हननं न इति बोधो जायते। उभयथापि हनने इष्टसाधनत्वाभावज्ञानात्, इष्टसाधने हननाभावत्वज्ञानाद्वा रागतः प्राप्तस्य हननान्निवृत्त्युपपत्तिः। निषेधवाक्यस्थले च अभावस्यैव प्राधान्येन भानात्, न कार्यपरत्वं निषेधवाक्यस्य। पक्षद्वयं चेदं भाष्यगम्भीरपङ्क्तिषु निक्षिप्तम्। विस्तरस्त्वस्मद्व्याख्याने द्रष्टव्यः।

9.एवं यदपि केचिदाहुः इत्यादिना प्राभाकरमतं निरूप्य, तत्प्रतिक्षेसमये 'तं त्वौपनिषदं पुरुषम्' इत्यादिश्रुतिबलात् कार्यं प्रत्यनङ्गस्य सिद्धब्रह्मणः सद्भावं निरूप्य, भाष्यकाराः अस्मद्दृष्टिं ज्ञानप्रवणां कर्तुं अशरीरत्वलक्षणा जीवन्मुक्तिः ज्ञानाभिव्यङ्ग्यैव, सशरीरत्वं तु मिथ्याज्ञानजन्यमेव, न कर्मजन्यमिति निरणैषुः। किञ्च 'मनुष्योऽह'मित्यहम्प्रत्ययस्य' सिंहो माणवक' इति प्रत्ययवत् गौणत्वेन, तस्य च मिथ्यात्वाभावेन, तत्त्वज्ञानानिरास्यत्वात्, पुनः कार्यवादे प्राभाकरैरुत्थापिते, संशयविपर्ययादिज्ञानस्येव 'मनुष्योऽह'मिति प्रत्ययस्य मिथ्याज्ञानजन्यत्वं भाष्यकाराः निरूपयामासुः। अन्ते च श्रवणादौ विध्यङ्गीकारेऽपि, ब्रह्मणः न श्रवणविधिशेषत्वमपितुशास्त्रप्रमाणकत्वमेवेति निरूप्य, ब्रह्मणः शास्त्रप्रमाणकत्व एव, 'अथातोब्रह्मजिज्ञासे'ति पृथक्शास्त्रारम्भोपपत्तिः, सर्वेषां प्रमाणानां विधीनां च ब्रह्मावगतिफलकत्वमेव, न ब्रह्मणः विधिशेषत्वमिति भाष्यकारा अन्वगृह्णन्।

In Public domain. Digitization Muthulakshmi Research Academy

रत्नप्रभाप्रकाशसरणिः- व्याख्यानेऽत्र आनन्दगिरिस्वामिनां न्यायनिर्णयात् अमूल्याः केचन विषया संगृहीताः। रत्नप्रभावगाहनाय अपेक्षितः पूर्णानन्दीयसहकारोऽपि लब्धः। विशिष्य समन्वयाधिकरणे वेदान्तानामखण्डारत्वनिरूपणाय पूर्णानन्दीयनिरूपितवाक्यवृत्तिरामानन्दीयव्याख्यासहकारोऽपि प्राप्तः। भाष्यरत्नप्रभाविषयसन्नाहकतया विस्तृतविषयसूचिकायाः दत्तत्वात्, तेषामेकत्र दर्शनेन भाष्योक्तविषयसम्भावनापि भविष्यतीति सम्भावयामि। अथापिभाष्योक्तवर्णविषयाः भूमिकायां सङ्ग्रहेण निरूपिताः। प्रतिस्विकस्य भाष्यग्रन्थखण्डस्य, अथ वा व्याख्याविषयस्य प्रारम्भे पाठकजनसौकर्याय अवान्तरशीर्षककल्पनं कृतम्। ग्रन्थविस्तरभयात् रत्नप्रभाव्याख्यानमत्र न दत्तम्। सर्वत्रास्मत्कृतव्याख्याप्रमाणतया, भाष्यरत्नप्रभाभामतीन्यायनिर्णय-व्याख्योपशोभितस्य, पं.लक्ष्मणशास्त्रिकृतनिर्णयसागरीयसागरीय-तृतीयसंस्करणस्य पुटसंख्यादिनिर्देशाय प्रमाणभावस्समादृतः। उपयुक्तग्रन्थसूची सङ्केताक्षरसूची च दत्ता। सर्वत्र भाष्यपुटसंख्या-निर्देशायनिर्णयसागरीयभाष्यग्रन्थ एवदत्तः। प्रत्यधिकरणं अधिकरणरचनामर्यादया पृथक्पूर्वपक्षाद्युपस्थापनं विहितम्। कृतपरिश्रमश्च विद्वन्निकषोपललेख्यतायै विद्वत्परितोषाय, जिज्ञासुलोकोपकाराय प्रधानतया शङ्करभगवत्पादरामानन्दयोः प्रीतये कल्पतामिति भगवन्तं श्रीगणेशं प्रार्थये।

In Public domain. Digitization Muthulakshmi Research Academy

भाष्यरत्नप्रभाप्रकाशाख्योऽयं लघुनिबन्धः साक्षात् शङ्करभगवत्पादस्वरूपाणां तत्प्रतिष्ठापितशृङ्गेरीशारदापीठाधिपतीनां, विदितसकलवेदशास्त्राणां करुणालयानांजगद्गुरूणां श्री श्री श्री भारतीतीर्थमहास्वामिनां चरणारविन्दयोः प्रह्वीभूतेन चेतसा साष्टाङ्गनमस्शतसमर्पणपूर्वकं पूजाप्रसूनत्वेन समर्पयितुमुद्दिष्टः। पूजाप्रसूनस्वीकारार्थं श्रीचरणान्, तत्करकमलसञ्जात श्री श्री श्रीविधुशेखरभारतीस्वामिनां च चरणारविन्दयोः वन्दनशत-समर्पणपुरस्सरं च सप्रश्रयं सम्प्रार्थये।

शुभकृत् हनुमज्जयन्ती — इत्थं

25-05-2022 — स्वामिचरणचरणकमलान्तेवासी

श्रिष्टि लक्ष्मीकुमारशर्मा

In Public domain. Digitization: Muthulakshmi Research Academy

श्रीगणेशाय नमः

चतुस्सूत्रीशाङ्करशारीरकभाष्यम्
रत्नप्रभाप्रकाशव्याख्याविभूषितम्
(रत्नप्रभाप्रकाशयोरुपक्रमश्लोकाः)

र.प्र.प्र.- द्वयमप्यद्वयरूपं लक्ष्मीगणपतिं नौमि।
दशभुजमप्यभुजं शुद्धं ब्रह्मैव केवलं वन्दे।।1।।

यस्मिन्नध्यस्तमिदं विश्वं विभाति च शुक्तौ रजतवत्।
एकस्मिन्नपि चन्द्रे द्वितीयचन्द्रसाहित्यमिवाङ्गुल्यवष्टम्भात् ।।2।।

एकस्मिन्नपि देवे विभाति मायया विश्वजीवभिदा।
गणपतिमतिचतुरम् अखिलार्थावभासकं नौमि।।3।।

नत्वा गुरुपदद्वन्द्वमवाङ्मानसगोचरम्।
यत्प्रभावादयं भाष्यरत्नप्रभाव्यायामुद्यतोऽभयम्।।4।।

सूत्रभाष्यकृतौ नौमि व्यासश्रीशङ्करौ पुनः।
भाष्यरत्नप्रभाव्याख्याकृद्रामानन्दं प्रणम्य च।।5।।

चतुस्सूत्र्यां भाष्यरत्नप्रभायाः'प्रकाशं'वितनोत्ययम्।
लक्ष्मीकुमारशर्मायं'श्रिष्टि'प्रख्यातवंशजः।।6।।

व्युत्पित्सूनां च बालानां विबोधार्थं विशेषतः।
भाष्यपङ्क्तिनिगूढार्थव्याख्येयं सम्प्रणीयते।।7।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रभवान् रामानन्दयतिः श्रीमद्भगवद्बादरायणकृत-ब्रह्मसूत्राणां शाङ्करशारीरकभाष्यं व्याचिख्यासुः निर्विघ्नग्रन्थ-परिसमाप्त्यर्थं, शिष्यशिक्षायै च 'यमिह कारुणिकम्' इत्याद्यारभ्य श्लोकत्रयेण अरिसहोदरस्यापि विभीषणस्य महत्पददातुः रागद्वेषादिलवेनापि शून्यस्य, भगवतो जनकजाजानेः रामचन्द्रस्य, श्रीगौर्या सकलार्थदातुः स्वापरावतारेण, स्वतुण्डासिना प्रौढविघ्नवनस्यापिनिहन्त्रा ढुण्ढिविनायकेनोपशोभितस्य, वैराग्यमेव परं सौख्यमिति स्वधृतचर्मकपालादिना उपदेष्टुः काशिकेशस्य शिवस्य, मूकस्यापि शास्त्रार्थसम्पन्नवचोवैभवं संयोजयन्त्याः सरस्वत्याश्च संस्मरणपूर्वकनमस्कारात्मकं मङ्गलमाचारीत्। ततः चतुर्थश्लोकेनस्वपरमेष्ठिगुरुप्रभृतिगुरुपरम्परायां 'निर्वतोऽहं यथालिः' इति निस्सीमभक्तिं प्रकटीकृत्य, समनन्तरपञ्चमश्लोकेन शङ्करभगवत्पादसूत्रकृद्धरिस्वरूपव्यासौ प्रणम्य वाग्जालबन्धच्छिद-मभ्युपायं वच्मीति प्रतिज्ञातवान्। विस्तृतग्रन्थवीक्षायामल-समनस्कान् प्रति स्वव्याख्याप्रवृत्तिरिति स्वीयव्याख्याप्रवृत्तावुद्देश्य-मप्याविरकार्षीत्, षष्ठेन श्लोकेन। श्रीमच्छङ्करवाचां गङ्गायाः रथ्योदकपावकत्वमिव स्ववचः पावकत्वं सम्भावयाम्बभूव, सप्तमेन श्लोकेन। चतुर्थश्लोके स्वगुरोः गोविन्दसरस्वत्याः गुरवः ये गोपालसरस्वत्यः, तेषां गुरवः शिवरामार्याः। यत्ते परमेश्वर्या कामाक्ष्या स्वयं दत्तस्य, सुरैरपि नुतस्य प्राज्यस्य

In Public domain. Digitization Muthulakshmi Research Academy
दुग्धपायसस्याधिकारिणोऽर्हाः। तेषां नामापि शिवराम इति। स्वयं च ते शिवरामाभेदमेव बोधयन्ति। शिवरामाभेदबोधप्रस्तावेन शिवकेशवयोरभेदमेव प्रस्तुवन्तः अद्वैतग्रन्थव्याख्याप्रारम्भे पृथक्स्मृतयोरपि शिवरामयोः ऐक्यनिरूपणाय पृथक्स्मृतिं समर्थयन्ति। एवं शिवरामादिगोविन्दसरस्वत्यन्तगुरुपरम्परां स्मृत्वा, रामानन्दयतीन्द्रः अद्वैतरत्नभूतस्य सूत्रभाष्यस्य भाष्यरत्नप्रभाभिधां व्याख्यां निर्ममौ। ततः सूत्रभाष्यकारौ प्रणम्य, श्रीभाष्यतीर्थाख्ये सरसि विहरतां परमहंसानां सन्तुष्ट्यर्थं भाष्यवाग्जालबन्धच्छेदनोपायं वच्मीति प्रतिज्ञातवान् रामानन्दगुरुः। परमार्थतः सत्यमिदं वचनम्। यदि रत्नप्रभा न स्यात्, अध्यासभाष्यादिभाष्यगतानां गभीरार्थकानां वचनानामस्माकंबोध एव संक्षेपेण न स्यात्। अतः वाग्जालबन्धच्छिदमिति तदीयप्रकटना नाहङ्कारपूर्णा, किं तु तदीयव्याख्यागतवास्तवगुणप्रकाशिनी इत्यस्माकमग्रे स्पष्टी भविष्यति। किञ्चैषा व्याख्या अतिविस्तृतभाष्यग्रन्थदर्शने अलसमनस्कानां ततस्ततः भाष्यग्रन्थादपेक्षितविषयप्रकाशने परमार्थतः भाष्यरत्नप्रभा। एवं गङ्गादृष्टान्तेन स्ववचसां रथ्योदकस्येव भाष्यस्य पावकत्वोक्त्याच, व्याख्याकारः विनयविश्वासौ समं प्रकटयति। ततः अष्टमश्लोकेन प्रत्यग्ब्रह्माभेदानुभूतिमेव

In Public domain, Digitization Muthulakshmi Research Academy
प्रकाशितवान्। एषाममूल्याभिप्रायाणां प्रकाशकान् तदीयानेव श्लोकान् अष्ट उदाहरामि।

यमिह कारुणिकं शरणं गतोऽप्यरिसहोदर आप महत्पदम्।
तमहमाशु हरिं परमाश्रये जनकजाङ्कमनन्तसुखाकृतिम्।।1।।

श्रीगौर्या सकलार्थदं निजपदाम्भोजेन मुक्तिप्रदम्
प्रौढं विघ्नवनं हरन्तमनघं श्रीढुण्ढितुण्डासिना ।
वन्दे चर्मकपालिकोपकरणैर्वैराग्यसौख्यात्परं
नास्तीति प्रदिशन्तमन्तविधुरं श्रीकाशिकेशं भजे।।2।।

यत्कृपालवमात्रेण मूको भवति पण्डितः।
वेदशास्त्रशरीरां तां वाणीं वीणाकरां भजे।।3।।

कामाक्षीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्याधिपूज्य-
श्रीगौरीनायकाभित्प्रकटनशिवरामार्यलब्धात्मबोधैः।
श्रीमद्गोपालगीर्भिःप्रकटितपरमाद्वैतभासास्मितास्य-
श्रीमद्गोविन्दवाणीचरणकमलगोनिर्वृतोऽहं यथालिः।4

श्रीशङ्करं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतं च वच्मि।
श्रीभाष्यतीर्थे परहंसतुष्ट्यै वाग्जालबन्धच्छिदमभ्युपायम्।।5।।

विस्तृतग्रन्थवीक्षायामलसं यस्य मानसम्।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा।।6।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमच्छारीरकं भाष्यं प्राप्य वाक् शुद्धिमाप्नुयात्।
इति श्रमो मे सफलोगङ्गां रथ्योदकं यथा।।7।।

यदज्ञानसमुद्भूतमिन्द्रजालमिदं जगत्।
सत्यज्ञानसुखानन्तं तदहं ब्रह्म निर्भयम्।।8.**(र.प्र.पृ.1-2.)**

रत्नप्रभायां शास्त्रारम्भसमर्थनम्-

र.प्र.प्र.- 'अथातो ब्रह्मजिज्ञासा' इति शास्त्रारम्भसूत्रेण शास्त्रारम्भौपयिकं ब्रह्मविचाराङ्गभूतम् अनुबन्धचतुष्टयं निरूपयिष्यते। भाष्यकाराणां तु भाष्यं अध्यासग्रन्थेनोपक्रम्यते। अध्यासग्रन्थेच अध्यासपूर्वपक्षतत्सिद्धान्त-अध्यासलक्षण-तत्सम्भावनाप्रमाणप्रकारादीनि भाष्यकारैर्निरूपयिष्यन्ते। एवं चशास्त्रोपक्रमः किमध्यासपूर्वपक्षादिभिर्भवति? उत अनुबन्धनिरूपणपरेण प्रथमसूत्रव्याख्यानेन भवति? इति शङ्का जायते। किन्त्विदमत्र समाधानम्। 'ब्रह्मज्ञानाय विचारः कर्तव्यः' इत्यर्थकब्रह्मजिज्ञासासूत्रेण विषयप्रयोजनादिसिद्धिहेतोः अध्यास-स्याप्यस्तित्वं समसूचि। एतच्च "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" (ब्र.सू.2.3.29) इति सूत्रेण, "तदनन्यत्वमारम्भण-शब्दादिभ्यः" (ब्र.सू.2.1.14) इत्याद्यधिकरणे चनिर्णेष्यमाणमपि भगवत्पादैः प्रथमसूत्रोपोद्घातरूपेणेहैव निरूपितम्। एवमात्मनः कर्तृत्वभोक्तृत्वादिकमपि, व्यावहारिकमुत्तरत्र निरूपयिष्यमाणमपि, इहैव निरूप्यते उपोद्घाततया। अतो न पौनरुक्त्यम्।

In Public domain, Digitization Muthulakshmi Research Academy
एवमेवब्रह्मजिज्ञासासूत्रेण निरूपयिष्यमाणमप्यनुबन्धचतुष्टयं, शास्त्रारम्भभूमिकारूपेण इहैव रत्नप्रभाकृता निरूपयिष्यते। अत इदमपि पौनरुक्त्यास्पदमिति न चिन्तनीयम्।

जिज्ञासासूत्रारम्भवैयर्थ्यपूर्वपक्षः-

र.प्र.प्र.- ननु अथातो ब्रह्मजिज्ञासा इत्यधिकार्यादिचतुष्टयनिर्णयाय प्रत्येकशः सूत्रं भगवता नारम्भणीयम्। यतः 'स्वाध्यायोऽध्येतव्यः' (श.ब्रा.11.3.1.) इति शतपथब्राह्मणवचनेनस्वाध्यायस्य नित्यमध्येयत्वेन वचनात्, अधीतसाङ्गस्वाध्यायस्य, 'तद्विजिज्ञासस्व' (तै.आ.1.3.1.) "सोऽन्वेष्टव्यः सविजिज्ञासितव्यः" "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः" (बृ.उ.2.4.5.) इति श्रवणविधिरुपलभ्ते। यतः 'विजिज्ञासस्व' इति श्रुतौ जिज्ञासापदस्य ज्ञानेच्छासाध्ये विचारे लक्षणया ब्रह्मविचारः कर्तव्य इत्यर्थः प्रतीयते। एवमात्मा श्रोतव्यः इति विधिवाक्येऽपि, विधेयं श्रवणं नाम ऊहापोहात्मकविचारात्मा मानसव्यापारः। स चब्रह्मविषयेकर्तव्य इति 'आत्मा श्रोतव्यः' इति वाक्याल्लभ्यते। ब्रह्मजिज्ञासासूत्रेऽपि कर्तव्यपदाध्याहारेण ब्रह्मणः विचारः कर्तव्य इति प्रतीयते। अतश्च श्रुतिसूत्रयोरेकार्थबोधकत्वम्। विधिस्थले भावनायां साध्याकांक्षा, साधनाकांक्षा, इतिकर्तव्यताकांक्षा च भवति। तत्र विचारः कर्तव्यः इत्युक्ते किमर्थं केन विचारः कर्तव्यः इत्याकांक्षायां, 'यजेत

In Public domain. Digitization Muthulakshmi Research Academy

स्वर्गकाम' इत्यत्र स्वर्गस्य फलत्वेन, यागस्य करणत्वेन चान्वयस्येव, अमृतत्वाख्यस्य मोक्षस्य फलत्वेन, वेदान्तानां करणत्वेन चान्वयः। विधौ च विचारः विषयः। विचारे वेदान्ताः विषयः। एवं च ब्रह्मविचारश्च अद्वैतात्मा इति, विचारसाधनानां चवेदान्तश्रुतित्वमिति, 'तद्विजिज्ञासस्व' 'आत्मा श्रोतव्यः' इत्यादीनां नियमविधित्वेन स्वीकाराल्लभ्यते। तेन चवैदिकानां भिन्नात्मशास्त्रविचारप्रवृत्तिः, विचारं प्रति पुराणादीनां साधनत्वं च निरस्यत इति वस्तुस्थितिः। तत्र इह जन्मनि जन्मान्तरे वा अनुष्ठितैः यज्ञादिभिः यस्यान्तःकरणं निर्मलीकृतम्, सः, श्रवणविधेः कः विषयः,? किं फलम्? को वा अधिकारी? कस्सम्बन्धः? इति जिज्ञासते। तादृशं जिज्ञासुमुपलभमान एव भगवान् सूत्रकारः श्रवणात्मक (विचारात्क) शास्त्रारम्भप्रयोजकं न्यायतः निर्णेतुम् 'अथातो ब्रह्मजिज्ञासा' इति सूत्रमरीरचत्। तत्र न्यायो नाम

"विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽकरणं स्मृतम्"।।इति

(पूर्णानन्दीयम्पृ.5.) व्याख्योक्तदिशा पञ्चावयवोपेताधिकरणात्मा, अथवा फलेन सहषडवयवोपेताधिकरणात्मा न्यायः। ननु विध्यङ्गानुबन्धचतुष्टये अधिकारी अन्यतमः। स च विधिसंनिहितार्थवादैरेव ज्ञातुं शक्यते। यस्य नित्यानित्य-

In Public domain. Digitization Muthulakshmi Research Academy
वस्तुविवेकः, इहामुत्रार्थ भोगेषु विरागः, तन्निष्पन्नशम-दमादिसाधनसम्पत्तिः, मुमुक्षुत्वं चास्ति, स साधनचतुष्टयसम्पन्नः अधिकारी। "तद्यथेह कर्मचितः लोकः क्षीयते एवमेवामुत्र पुण्यचितः लोकः क्षीयते" (छा.उ.8.1.6.) इति श्रुत्या 'यत्कृतकं तदनित्यम्' इति न्यायसहकृतया, कृष्यादेः फलस्येव पुण्यकर्मार्जितस्वर्गफलस्यापि क्षयिष्णुत्वं तेनानित्यत्वं च प्रतिपादितम्। किन्तु "यो वै भूमा तदमृतम्, अथ यदल्पं तन्मर्त्यम्" (छा.उ.7.14.1.) इति श्रुत्या निरतिशयितव्यापकस्यभूम्नः अमृतत्वम्, "न जायते म्रियते वा विपश्चित्" इति श्रुत्या नित्यत्वम्, ततोऽन्यस्य प्रपञ्चस्य नाशशीलत्वञ्च प्रतिपादितम्। एवं द्विविधश्रुतिपर्यालोचनेन आत्मनो नित्यत्वस्य, अनात्मनः अनित्यत्वस्य चविवेकलाभात् श्रुत्यैव 1.नित्यानित्यवस्तु-विवेकलाभात्मकाधिकारिविशेषणं प्रतिपन्नम्। 2."परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" (मु.उ,1.2.12) इति श्रुत्या, अकृतस्य नित्यस्य, मोक्षस्य कृतेन कर्मणा असम्भवात्, कर्मचितान् लोकान् कर्मफलानि परीक्ष्य, अनित्यत्वेन निश्चित्य निर्वेदम्, आयात् प्राप्नुयात्, इति प्रतिपादनात्, एहिकामुष्मिकफलवैराग्यं श्रुत्यैव लभ्यम्। 3."शान्तो दान्त उपरतः तितिक्षुः समाहितः श्रद्धावित्तो भूत्वा आत्मन्येवात्मानं पश्येत्" (बृ.उ.4.4.23) इति श्रुत्या, शम-दम-उपरति-तितिक्षा-समाधि-

In Public domain. Digitization Muthulakshmi Research Academy
श्रद्धात्मकं शमदमादिसाधनषट्कमधिकारिविशेषणतया लभ्यते। 4."न सपुनरावर्तते" (कालाग्निरुद्रोपनिषत् 2.) इति श्रुत्या स्वयं ज्योतिरानन्दात्मकस्य मोक्षस्य, पुनरावृत्त्यभावेन नित्यत्वश्रवणात्, नित्ये मोक्षे इच्छालक्षणा अधिकारिविशेषणीभूतमुमुक्षापिश्रुत्यैव लभ्यते। तथा च पूर्वोक्तरीत्याविवेकादिविशेषणवानधिकारीति लभ्यते।

एवं "प्रतितिष्ठन्ति ह वै यएतारात्रीरुपयन्ति" इत्युपयिचोदना-चोदितरात्रिसत्रविधौ प्रतितिष्ठन्तीति प्रतिष्ठाख्यफलस्येव, भूमाख्यस्य अमृतत्वस्य फलतया प्रसिद्धेः, तत्कामनया श्रोतव्यः इति विचारविधेः अस्ति फलमिति वक्तुं शक्यते। एवं च विचारफलस्य सद्भावात्, अधिकार्यप्यत्र सुलभः। अथ को नाम विषयः? इत्युक्ते श्रोतव्यः इत्यत्र तव्यत्प्रत्ययस्य विधिरूपनियोगार्थकत्वात्, विचारात्मकश्रवणं विधौ विषयः। विचारस्य च वेदान्ता एव विषयः इत्यपि ज्ञातुं शक्यते। "तन्त्वौपनिषदं पुरुषम्" (बृ.उ.) "वेदान्तविज्ञानसुनिश्चितार्थाः" (मु.उ.3.2.6.) इति श्रुतेश्च वेदान्ता एव विषयः। वेदान्तैरेव ब्रह्मणः ज्ञानस्य प्रतिपादनात्। वेदान्तवाक्यानां च आगमत्वेन प्रामाण्यमप्यस्ति। ऊहापोहात्मकविचारस्य तु नास्ति तत्। एवंच श्रुतिविचारविषयत्वलक्षणविषयत्वमपि श्रुत्यैव सिद्धम्। किं च आत्मा द्रष्टव्यः इत्यादिना अद्वैतात्मदर्शनमुद्दिश्य विचारो विहितः।

In Public domain, Digitization Muthulakshmi Research Academy
स चाविचारः स्वयमात्मदर्शने प्रत्यप्रमाणभूतोऽपि वेदान्तवाक्यद्वारा प्रमाणभूत इति, अस्ति वेदान्तवाक्यानां विषयत्वम्। 'तत्वमसि' (छा.उ.6.8.7.6.16.3) अहं ब्रह्मास्मि (बृ.उ.1.4.10.) इति श्रुतिभ्यां प्रतिपाद्यं प्रत्यग्ब्रह्मैक्यं विषयः। यद्यपि जीवब्रह्मैक्यं विषयः इति वक्तव्यम्, तथापि जीवस्यजीवत्वेन सतः ब्रह्मणा अभेदायोगात्, प्रत्यग्ब्रह्मैक्यमेव विषयः। प्रत्यक् नाम परिपूर्णमात्मतत्वं हृदयदेशस्थमुपलभ्यमानम्। तस्य ब्रह्मणा ऐक्यमुपपद्यत इति श्रुत्यैव वेदान्तानां फलमाविष्कृतम्। एवं विचारविधेः फलमपि साक्षाद् ज्ञानम्। परम्परया चमुक्तिः। तच्च "तरति शोकमात्मविद्"- (छा.उ.7.3.) "ब्रह्मविदब्रह्मैव भवति" (मु.उ.3.2.9) इति श्रुतिभ्यामेव प्रत्यपादि। तत्र शोकनिवृत्तिर्नाम शोकोपलक्षितसर्वानर्थनिवृत्तिः। एवं ब्रह्मज्ञानस्य ब्रह्मात्मतया भवनमपि फलं निर्दिष्टम्। ब्रह्मविचारस्य अधिकारिणा कर्तव्यतारूपसम्बन्धः। फलस्य मोक्षस्य, ब्रह्मज्ञानस्य च प्राप्यतारूपसम्बन्धः सह सुबोध इति, अधिकारि–प्रयोजन-विषय-सम्बन्धानां श्रुत्यैव निर्णयात् किमर्थं ब्रह्मजिज्ञासासूत्रमिति पूर्वः पक्षः। (र.प्र.पृ.2.)

जिज्ञासासूत्रवैयर्थ्यशङ्कापरिहारः-अधिकार्यादिश्रुतीनां स्वार्थे तात्पर्यनिर्णायकसूत्राभावे, अनुबन्धचतुष्टयगतसंशयानिवृत्तेः।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यथा किं विवेकादिविशेषणवानधिकारी अन्यो वा? इत्यधिकारिविषये सन्देह एव। एवं वेदान्ताः पूर्वतन्त्रेण गतार्था वा? अगतार्था वा? इति विषयेषु वेदान्तेषु सन्देहः अस्त्येव। यतः ब्रह्मणोऽपि भावनासाध्यधर्मवत् उपासनादिक्रियासाध्यत्वे, क्रियाप्रतिपादकधर्ममीमांसाशास्त्रेणैव ब्रह्मणोऽपि प्रतिपादितत्वे, वेदान्तवाक्येषु गतार्थागतार्थत्वकोटिकसन्देहः। तेन च विषये ब्रह्मणि शारीरकमीमांसाशास्त्रप्रतिपाद्यत्वमस्ति न वेति? सन्देहः जायते। एवं किं मुक्तिःस्वर्गादिवदुपासनाप्राप्यं लोकान्तरम् अथवा आत्मस्वरूपम्? इति संशयानिवृत्तेः। तस्मादागमैरापाततः अधिकार्यादिचतुष्टयस्य प्रतिपन्नत्वेऽपि, न्यायतः अधिकार्यादिनिर्णयार्थं प्रारम्भसूत्रमावश्यकम्। अत एवोक्तं प्रकाशात्मश्रीचरणैः। "अधिकार्यादीनामागमिकत्वेऽपि, न्यायेन निर्णयार्थमिदं सूत्रम्" इति। (र.प्र.पृ.3.)। एतत्सूत्राभावे च विचारविधेरप्रतिष्ठानात्, तदौपयिकानुबन्धचतुष्टयनिर्णयस्य अनपेक्षणात्, न्यायप्रपञ्चरहितः श्रौतो विचारविधिरपि व्यर्थ एव स्यात्। न च विचारविधायकश्रुतेरभावेऽपि, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति विचारौपयिकगुरूपसादनविधेस्सद्भावात् तदङ्गतया अनुबन्धचतुष्टयनिरूपकसूत्रस्यावश्यकता अस्तीति वाच्यम्। विचारविधेरेवाभावे गुरूपसादनविधेरपि निरालम्बनत्वात्, जिज्ञासासूत्रस्य वैयर्थ्यापातात्। न्यायत अनिर्धारिते, अविहिते वा

In Public domain. Digitization Muthulakshmi Research Academy
विचारे अनुबन्धचतुष्टयस्यानावश्यकत्वादिति विवरणसम्प्रदायः। (र.प्र.पृ.2-3.) यद्वा अन्वयव्यतिरेकलभ्यत्वात्ज्ञानात्मकश्रवणेऽपि विधिं नेच्छन्ति भामतीकारादयः। अतस्तन्मते न्यायतोऽर्थनिर्णाययकजिज्ञसासूत्रतद्भाष्यादीनां वैयर्थ्यं माभूदिति, ज्ञानार्थाध्ययनविधिना प्रवर्तितस्य विचारस्यैव न्यायप्रवर्तकत्वमिति, तन्मतेऽपि न्यायतोऽर्थनिर्थारणात्मकसूत्रभाष्यादीनामावश्यकता अस्त्येव।

शास्त्रे सङ्गतिनिरूपणम्- शास्त्रे पूर्वनिरूपितनिरूप्यमाणयोः सङ्गतिरवश्यमपेक्ष्यते। 'नासङ्गतं प्रयुञ्जीत' इति न्यायात्। यन्निरूणानन्तरं यन्निरूप्यते, तत्तन्निरूपितसङ्गतिमत्। ताश्चसङ्गतयः षड्विधा अन्यत्र निरूपिताः। "सप्रसङ्ग उपोद्घातः हेतुतावसरस्तथा। निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते" इति। 1.प्रसङ्गः स्मृतस्योपेक्षानर्हत्वम्, 2.उपोद्घातः प्रकृतसिद्ध्यर्था चिन्ता, 3.हेतुताः कार्यकारणभावसम्बन्धः, 4.अवसरः प्रतिबन्धकीभूतशिष्यजिज्ञासा-निवृत्त्यनन्तरकालीनावश्यवक्तव्यत्वप्रकारकज्ञानविषयत्वम्। 5.निर्वाहकैक्यम् प्रयोजकयोरैक्यम्, 6.कार्यैक्यम् एकफलत्वम् इति।

प्रकृते चास्य सूत्रस्य श्रवणादिविध्यपेक्षिताधिकार्यादि-श्रुतिभिः स्वार्थनिर्णयायोत्थापितत्वात्, श्रुतिं हेतुतया कृत्वा, सूत्रस्य निष्पन्नत्वात् हेतुहेतुमद्भावलक्षणसङ्गतिः। शास्त्रारम्भस्य सूत्रनिर्णयानुबन्धचतुष्टयस्य चोपोद्घातसङ्गतिः। "चिन्तां

In Public domain. Digitization Muthulakshmi Research Academy
प्रकृतसिद्ध्यर्थमुपोद्घातं प्रचक्षते" इत्युक्तप्रकारेण अनुबन्धचतुष्टयनिर्णयस्य शास्त्रारम्भानुकूलत्वात्। ब्रह्मणः सर्वात्मत्वादिकं स्पष्टं लिङ्गम्। तादृशस्पष्टब्रह्मलिङ्गप्रतिपादकानां "ऐतदात्म्यमिदं सर्वं तत्सत्यम्, स आत्मा तत्त्वमसि" (छा.उ.6.16.3.) इत्यादिश्रुतिभिः विषये प्रत्यग्ब्रह्मैक्ये समन्वयोक्तेः प्रथमाध्यायप्रथमपादस्थाधिकरणानां श्रुतीनां स्पष्टब्रह्मलिङ्ग-प्रतिपादकत्वेन कार्यैक्यसङ्गतिः। एवं सर्वसूत्राणां श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात्, सूत्रैस्सह श्रुतीनां सङ्गतिः। एवं प्रथमाध्यायद्वितीयपादोदाहृतानां उपास्य ब्रह्मप्रतिपादिकाना-मस्पष्टब्रह्मलिङ्गकानां श्रुतीनां तादृशार्थप्रतिपादकेन प्रथमद्वितीयपादेन सह उपास्यब्रह्मणि समन्वयलक्षणकार्यैक्यात्पादसङ्गतिः। एवं प्रथमाध्यायतृतीयपादोदाहृतश्रुतीनाम् अस्पष्टज्ञेयब्रह्मलिङ्गकानां तादृशतृतीयपादेन सह समन्वयोक्तेः ज्ञेयब्रह्मणिसमन्वय-लक्षणकार्यैक्यात्सङ्गतिः। तथा प्रथमाध्यायचतुर्थपादोदाहृतानाम् अजादिपजघटितश्रुतीनां तादृशपदविचारात्मकेन चतुर्थपादेन सह समन्वयोक्तेः सङ्गतिः। कृत्स्नस्य प्रथमाध्यायस्य अद्वितीय-ब्रह्मसमन्वयबोधकत्वात्, समन्वयौपयिकश्रुतिभिः सह एकार्थत्वलक्षणसङ्गतिः। प्रथमाध्यायोक्ततात्पर्ये प्रसक्तविरोध-परिहारात्मकस्य अविरोधबोधिनीभिः श्रुतिभिस्सह प्रतियोग्यनुयोगिभावलक्षणसम्बन्ध उन्नेयः। एवं तृतीयाध्यायस्य

In Public domain. Digitization Muthulakshmi Research Academy
साधनानि, चतुर्थाध्यायस्य फलं च विषयः। ब्रह्मजिज्ञासाधिकरणस्य प्रथमाधिकरणत्वात्, स्वपूर्ववर्त्यधिकरणाभावात्, न सङ्गतिरपेक्षिता। द्वितीयाद्यधिकरणानां तु स्वपूर्ववर्त्यधिकरणान्तरैः सम्बन्धस्तु अग्रे वक्ष्यते। (र.प्र. पृ.3.)

शास्त्रारम्भाधिकरणरचना-

र.प्र.प्र.-1. 'आत्मा श्रोतव्यः' इति विहितश्रवणात्मकं वेदान्तमीमांसाशास्त्रं विषयः। 2.तत्किमारब्धव्यं न वा? इति संशयः। संशयं प्रति हेतुभूतौ तु शास्त्रविषयप्रयोजनसम्भवासम्भवौ। तथा हि बन्धस्य कर्तृत्वादिलक्षणस्य सत्यत्वे, शास्त्रस्य विषयः जीवब्रह्मैक्यं न सिद्ध्यति। यतः जीवस्य बद्धत्वम्, ब्रह्मणश्चाबद्धत्वम्। विचारस्य प्रयोजनं ज्ञानम्। तच्च अनर्थनिवृत्तिद्वारा स्वस्वरूपसुखावाप्तिफलकम्। आरम्भसूत्रेण' ब्रह्मज्ञानाय विचारः कर्तव्य' इति प्रतिज्ञातत्वेऽपि, बन्धस्य सत्यत्वे, तन्निवृत्तेः प्रयोजनस्यासम्भवात्, विचारसाध्यज्ञानमपि तादृशं न सम्भवति। यदि बन्धस्य सिद्धान्तरीत्या अध्यस्तत्वं स्वीक्रियेत, तन्निवृत्तेः ज्ञानफलस्य, ज्ञानौपयिकजीवब्रह्मैक्य(प्रत्यग्ब्रह्मैक्य)रूपविषयस्य च सद्भावात्, शास्त्रस्यारम्भणीयत्वं सिद्ध्यति। एवं च विषयप्रयोजनसम्भवासम्भवाभ्यां शास्त्रमारम्भणीयं न वा? इति सन्देहः। 3.पूर्वपक्षः-'नाहं ब्रह्म' इति भेदग्राहिप्रत्यक्षेण,

In Public domain. Digitization Muthulakshmi Research Academy
जीवब्रह्मणोः ऐक्यासिद्धिः। किंच "ब्रह्मात्मानौ ऐक्यशून्यौ कर्तृत्वभोक्तृत्वादिविरुद्धधर्मवत्त्वात् दहनतुहिनवत्" इत्यनुमानेन ब्रह्मात्मैक्यरूपस्यासिद्धिः। एवं पूर्वपक्षेप्रपञ्चस्य सत्यत्वेन स्वीकारात्, सत्यबन्धस्य ज्ञानादनिवृत्तेः ज्ञानफलं बन्धनिवृत्तिरपि न सिद्ध्यति। (र.प्र.पृ.3.)

किं च न्यायनिर्णयोक्तरीत्या ब्रह्मप्रसिद्ध्यप्रसिद्धिपक्षयोः विषयविचारयोरसिद्धिः। ब्रह्मणः प्रसिद्धत्वे अज्ञातत्वघटित-विषयत्वस्याभावात्, विचारविषयासिद्धिः। एवं विषयस्य प्रसिद्धत्वादेव, अविचार्यतया विचारफलाभावात्, विचारशास्त्रारम्भो न युक्तः। अथ ब्रह्मणः यद्यप्रसिद्धत्वम्, तर्हि अप्रसिद्धस्य शशशृङ्गादिवद्विचारार्हता नास्ति। तादृशविषयप्रतिपादकस्य शास्त्रस्य अप्रसिद्धेन विषयेण सह प्रतिपाद्यप्रतिपादकभावलक्षणः सम्न्धोऽपि दुर्लभः। प्रयोजनत्वं च विचारशास्त्रजन्यब्रह्मज्ञानस्य दुर्लभम्। एवं ब्रह्मविचारस्य पृथक्प्रयोजनाभावे प्राच्या धर्ममीमांसयैव गतार्थत्वाद्ब्रह्मविचारशास्त्रस्य आरम्भावश्यकतापि नास्ति। विषयफलयोरसम्भवे फलेच्छावतः अधिकारिणोऽपि तुच्छत्वात्, ब्रह्मविचारशास्त्रमनारम्भणीयमिति पूर्वपक्षः। (न्यायनिर्णयः पृ.3.)

अत्रायं सिद्धान्तः- अथातो ब्रह्मजिज्ञासा इति शास्त्रारम्भसूत्रम्। तन्मूलभूतश्रुतिस्तु 'तद्विजिज्ञासस्व' इति, अथवा

In Public domain. Digitization Muthulakshmi Research Academy
'श्रोतव्यः' इति श्रुतिः। श्रुतौ तदित्यस्य ब्रह्म इत्यर्थः। विजिज्ञासस्वविचारय इत्यत्र लोटा विधिरूप स्थाप्यते। श्रुतिसमानार्थकत्वाय सूत्रे कर्तव्या इति पदमध्याहार्यम्। अध्याहृतं च भाष्यकृता 'कर्तव्या '- इति। (शा.भा.पृ.39.)जिज्ञासा इत्यस्य ज्ञातुमिच्छा इत्यर्थः। तत्र ज्ञानमिच्छा वा विधेयतां नार्हतः। अतः अध्याहृतकर्तव्यपदस्यार्थेन ज्ञानेच्छायाः अन्वयाभावात्, सन् प्रत्ययेन शक्त्या उपस्थापितया इच्छयातत्साध्यः विचारः जहल्लक्षणया लक्ष्यते। विचारस्य च कर्तव्यतायामन्वयः सुलभः। विषयसौन्दर्यबललभ्यायाः इच्छायास्तु स्वतः अकर्तव्यत्वम्। एवं जिज्ञासा इत्यत्रज्ञाधातोः शक्त्या ज्ञानमर्थः, तत्रापि तस्य कृत्यसाध्यत्वात्, अध्याहृतकर्तव्यपदार्थानन्वयेन प्रकृतेः ज्ञाधोरजहल्लक्षणया फलीभूतज्ञानमित्यर्थः। तच्च ज्ञानं विचारप्रयोज्यमेवेति कृतिसाध्यम्। फलीभूतज्ञानं नाम "अवगतिपर्यन्तं ज्ञानं सन् प्रत्यवाच्यायाः इच्छायाः कर्म" इति (शा.भा.पृ.40.) भाष्यकारोक्तेः आवरणनिवृत्तिरूपाभिव्यक्ति-मच्चैतन्यात्मकं ब्रह्मापरोक्षज्ञानमेव। तथा च 'ब्रह्मज्ञानाय विचारः कर्तव्य' इति सूत्रस्य श्रौत एव वाक्यार्थः। तत्र ज्ञानस्य स्वतः फलत्वायोगात् कर्तृत्वभोक्तृत्वात्मकानर्थनिवर्तकत्वेनैव फलत्वं वक्तव्यम्। ब्रह्मज्ञानाय विचारः कर्तव्यः-इति विधिना अनर्थस्य सत्यत्वेसत्यसर्पादीनामिव ज्ञानेन निवृत्त्ययोगात्,

In Public domain. Digitization Muthulakshmi Research Academy
बन्धस्याध्यस्तत्वमर्थात्सूचितम्। स चाध्यासः शास्त्रस्य विषयप्रयोजनसिद्धिहेतुः। विषयश्च प्रत्यग्ब्रह्मैक्यं जीवब्रह्मैक्यं वा जीवस्य जीवत्वेन सह ब्रह्मणा ऐक्यायोगात्, जीवगतं प्रमातृत्वाद्यनर्थजालं विचारशास्त्रजनितज्ञानेन व्यपोह्य विज्ञेयम्। (र.प्र.पृ.3.)

ननु तर्हि प्रत्यग्ब्रह्मैक्यमित्येवोच्यतां किमिति जीवब्रह्मैक्यमित्यप्युच्यते इति चेत्, अन्यदीयानर्थनिवृत्त्या स्वस्य जीवत्वानपगमे प्रयोजनाभावात्, तत्त्वमसीत्यादावपि, तथैव जिज्ञासोरनर्थनिवृत्त्याश्रयं त्वम्पदार्थमन्तर्भाव्यैवोपदेशात्, भिन्नयोः तत्त्वम्पदार्थयोः ऐक्यायोगात्प्रत्यग्ब्रह्मैक्ये पर्यवसानम्। अत एव क्वचिच्छास्त्रे जीवब्रह्मैक्यमिति अन्यथा च व्यवह्रियते। एवमध्यासाभ्युपगमाच्छास्त्रविचारस्य विषयप्रयोजनयोः सद्भावात्, "ब्रह्ममीमांसाशास्त्रमारम्भणीयम्, विषयप्रयोजनवत्त्वात् भोजनादिवत्" इति वेदान्तशास्त्रविचारस्यारम्भणीयत्वं सिद्धम्। पूर्वोक्तानुमाने प्रयोजनवत्त्वं हेतुघटकतयोपन्यस्तम्। तत्र च "शास्त्रं प्रयोजनवत् अज्ञानात्मकबन्धनिवर्तकज्ञानहेतुत्वात्, रज्जुरियमिति वाक्यवत्" इत्यनुमानेन प्रयोजनवत्त्वसिद्धेः, न पूर्वोक्तानुमानस्य स्वरूपासिद्धत्वम्। प्रकृतानुमाने च ज्ञाने बन्धनिवर्तकत्वं हेतुकुक्षौ विशेषणतया दत्तम्। तत्र ज्ञानं बन्धनिवर्तकमित्युक्ते, प्रकारान्तरेण बन्धः ज्ञाननिवर्त्यः इत्यर्थः पर्यवस्यति। तत्र च "बन्धः

In Public domain. Digitization Muthulakshmi Research Academy
ज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवत्" इत्यनुमानेन अध्यस्तत्वहेतुना बन्धे ज्ञाननिवर्त्यत्वं सिद्धम्। एवं च बन्धनिवृत्तिरेव ज्ञानस्यापि प्रयोजनमित्युक्तं भवति। प्रयोजनं च जीवब्रह्मणोरैक्यमप्यर्थात्सूचितं भवति। तथा चानुमानम् "जीवो ब्रह्माभिन्नः, तज्ज्ञाननिवर्त्याध्यासाश्रयत्वात् यदित्थं तत्तथा"। "यो यद्ज्ञाननिवर्त्याध्यासाश्रयः सःतदभिन्नः, यथा शुक्त्यभिन्न इदमंशः"इति सामान्यमुखीया व्याप्तिः। इदमंशे शुक्तिज्ञानेन रजताध्यासनिवृत्तौ शुक्तिज्ञाननिवर्त्याध्यासाश्रयस्य पूर्वं रजतत्वेन गृहीतस्य इदमंशस्य भ्रमनिवृत्तिकाले शुक्त्या अभेदसम्भवात्। अत एव रत्नप्रभायां यथा शुक्त्यभिन्नः इदमंशः इत्यन्वयदृष्टान्तः प्रदर्शितः। एवं च बद्धाबद्धयोः जीवब्रह्मणोः ऐक्यायोगः इति पूर्वपक्षिणः वादोऽपि परास्तः, विचारजनितज्ञानेनाध्यासनिवृत्तेः। अत एवास्य शास्त्रस्य ब्रह्मात्मैक्यप्रतिपत्तिरूपफलस्य पृथक् सत्त्वेन, धर्मज्ञानार्थं प्रवृत्तेन पूर्वतन्त्रेण नास्ति गतार्थता। एवम् एतच्छास्त्रीयपृथक्फलसद्भावादेवाधिकारिणोऽप्यतुच्छत्वात्प्रसिद्धेः, ब्रह्मविचारशास्त्रमारम्भणीयम्। वस्तुतः ब्रह्मणः निस्सामान्यविशेषत्वेऽपि, आरोपितसामान्यविशेषभाव-व्यवस्थामादाय, तस्य किञ्चिज्ज्ञाततया च प्रसिद्धेः, अज्ञातत्वांशमादाय, विषयाप्रसिद्धिसम्भावनाऽपि, न कर्तव्या। किञ्चिदज्ञातस्य किञ्चिज्ज्ञातस्य च ब्रह्मणो विषयस्य प्रसिद्धेः।

In Public domain. Digitization Muthulakshmi Research Academy
विचारशास्त्रस्य तेन सह प्रतिपाद्यप्रतिपादकभावसम्बन्धोऽप्यस्तीति, अनुबन्धचतुष्टयसम्भावनया शास्त्रमारम्णीयम्। शास्त्रस्य च परमं फलं मुक्तिः। सा चपूर्वपक्षे लोकान्तरावाप्तिलक्षणेति, बन्धश्च सत्य इति, ज्ञानादन्येनैव कर्मोपासनादिना साध्य इति च पूर्वपक्षिणोऽभिप्रायः। सिद्धान्ते तु बन्धस्याध्यस्तत्वेन ज्ञानादेव स्वस्वरूपानन्दावाप्तिलक्षणं मोक्षः फलमित्यनुसन्धेयम्। भगवता सूत्रकारेण विचारस्य ज्ञानार्थं प्रतिज्ञानात्, ज्ञानस्य च स्वरूपतः फलत्वाभावात्, अध्यासनिवृत्त्यैव फलत्वाच्च, विचारप्रतिज्ञान्यथानुपपत्तिरूपार्थापत्तिप्रमाणेन, सूत्रितविषयप्रयोजनवत्त्वसिद्धिहेतुतया अध्यासः अभ्युपगतः। अत एव शाङ्करसूत्रभाष्यं सूत्रार्थविचारेणानारभ्य अध्यासाक्षेपसमाधानाभ्यां "युष्मदस्मत्प्रत्ययगोचरयोः" इत्यादिभाष्येण पृथगुपोद्घातसङ्गत्या व्याख्यातम्। एवं च अध्यासग्रन्थस्य सूत्रानारूढत्वान्न भाष्यत्वमिति केषाञ्चिद्वादः परास्तः। सूत्रस्यार्थापत्तिप्रमाणलभ्यार्थिकाध्यासरूपार्थसंस्पर्शित्वात्। (र.प्र.पृ.3-4.)

सूत्रभाष्ययोर्लक्षणम्– सूत्रार्थसंस्पर्शित्वात् अध्यासभाष्यं व्याख्येयमित्युक्तं रत्नप्रभायाम्। तत्र किं नाम सूत्रमित्युक्ते

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः"।।

In Public domain. Digitization Muthulakshmi Research Academy

इति तल्लक्षणम्। संक्षिप्तार्थम्, असन्दिग्धतात्पर्यविषयीभूत-विश्वतोमुखार्थप्रतिपादकं, हा 3.ऊहा 3.इत्यादिसामवेदप्रसिद्ध-स्तोभाक्षररहितं, निर्दुष्टं च सूत्रमित्यर्थः। भाष्यलक्षणं तु एवम्—

"सूत्रार्थो वर्ण्यते यत्र वाक्यैःसूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः"।।इति।

सूत्रानुकारिभिः- सूत्रसदृशैः, सूत्राप्रतिकूलैः, वाक्यैः यत्रसूत्रार्थो वर्ण्यते, स्वपदानि च भाष्यघटकपदानि च यत्र वर्ण्यन्ते, तद्भाष्यम्। अत्र चलक्षणे सूत्रसदृशैरित्यस्याभावे, गिरिनद्यादीनां विस्तृततया वर्णनात्मके सङ्ग्राहः। वाक्यभिन्ने काव्ये अतिव्याप्तिः। तत्र विस्तृतार्थप्रतिपादकत्वेन, सूत्रसादृश्याभावान्नातिव्याप्तिः। सूत्राप्रतिकूलैः इत्यर्थकस्य सूत्रानुकारिभिः इत्यस्याभावे क्वचित्प्रतिकूलतया अर्थबोधके वार्तिके अतिव्याप्तिः। अतः सूत्राप्रतिकूलैरित्यर्थकं सूत्रानुकारिभिः इति पदम्। एवं सूत्रभाष्यस्य आदौअध्यासनिरूपणे सङ्गतौ ज्ञातायां, सूत्रभाष्ययोः लक्षणे च ज्ञाते, सम्प्रत्यादौ भाष्योक्ताध्यासपूर्वपक्षसिद्धान्तौ यथाभाष्यं सङ्ग्रहेण जानीमः।

In Public domain. Digitization Muthulakshmi Research Academy

अविचार्यं विचार्यं वा ब्रह्माध्यासानिरूपणात्।
असन्देहाफलत्वाभ्यां न विचारं तदर्हति।।1।।

अध्यासोऽहंबुद्धिसिद्धोऽसङ्गं ब्रह्मश्रुतीरितम्।
सन्देहान्मुक्तिभावाच्च विचार्यं ब्रह्म वेदतः।।2।।

अध्यासपूर्वपक्षतत्समाधानभाष्यम्
(अध्यासविचारात्मकं प्रथमवर्णकम्)

शा.भा.- युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमःप्रकाशवद्विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेणविषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्। तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन, अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः।।

र.प्र.प्र-अध्यासभाष्यसारः- भाष्यस्यास्य विस्तृततया व्याख्येयस्यायं संक्षिप्तो भावः आदौ निर्दिश्यते। आरम्भसूत्रेण यद्यपि अध्यासः संक्षिप्ततया सूचितः, तथापि स नोपपद्यते। यतः आत्मन्यनात्माध्यासः वक्तव्यः। अध्यासश्च आरोप्याधिष्ठानयोः भेदाग्रहेण निष्पद्यते। स च तयोरभेदे, तादात्म्ये वा निश्चीयमाने

सम्भवति। प्रकृते तदेव दुर्लभम्। विषयः अनात्मा । स च
In Public domain. Digitization Muthulakshmi Research Academy
तत्त्वमसीत्यादिवाक्ये युष्मच्छब्दार्थः। प्रतीयते अयमिति कर्मव्युत्पत्त्या प्रतीतिविषयः। एवम् इदम्प्रत्ययविषयः त्वङ्कारयोग्यः अनात्मा कर्ता भोक्ता इति व्यवहारविषयत्वात् युष्मत्प्रत्यगोचरः भवति।एवं विषयी आत्मापि अहम्प्रत्यये श्रुत्या परिशील्यमाने शिष्टत्वात्, अस्मदर्थः। प्रतीतिस्वरूपत्वात् ज्ञानस्वरूपत्वात्, प्रत्ययोऽपि भवति। 'अहं ब्रह्मास्मी'ति ज्ञानात्मकव्यवहार-विषयत्वात् गोचरोऽपि भवति। एवं च युष्मदर्थस्यानात्मनः इदङ्कारयोग्यस्य परोक्षवस्तुत्वेन, ज्ञान-विषयत्वेन, त्वमिति व्यवहारतश्च, तथा अस्मदर्थस्यात्मनः प्रत्यग्वस्तुरूपतया, ज्ञानस्वरूपत्वेन, अहमिति व्यवहारतश्च त्रेधा भेदात्, आत्मानात्मनोः तमः प्रकाशवद्विरुद्धस्वभावयोः ऐक्यमेव न सम्भवति। तयोरैक्याभावे च ऐक्यप्रमाहितसंस्कारस्याप्यभावात्, अध्यासकारणीभूतसंस्कारस्याप्यभावेन अध्यासः नोपपद्यते। तयोः परस्पराध्यासाभावे आत्मधर्माणां सत्यज्ञानानन्दत्वानामनृतत्व-जाड्यदुःखात्मकधर्मेष्वप्यध्यासः न सम्भवति। तथा च धर्माध्यासस्याप्यसिद्धत्वात्, अस्मत्प्रत्ययगोचरे चिदात्मके आत्मनि युष्मत्प्रत्ययगोचरस्य विषयस्याध्यासः, तद्विरुद्धतया विषये विषयिणः अध्यासो वा नोपपद्यते। एवमात्मानात्मनोः परस्परतादात्म्याध्यासाभावात्, तद्धर्माणामपि

In Public domain. Digitization Muthulakshmi Research Academy
परस्परतादात्म्याध्यसः मिथ्याभूतो नसम्भवति। अध्यासाभावे च पूर्वोक्तविषयप्रयोजनयोरसिद्धेः ब्रह्मविचारशास्त्रमनारम्भणीयमित्यध्यासपूर्वपक्षः।

तथापीत्यादिना भाष्ये समाधानम्- विद्यमानयोरात्मानात्मनोः अन्योन्यतादात्म्यम्, अन्यतरत्र च अन्यतरधर्मांश्चाध्यस्य अयमनादिकालसिद्धः अध्यासः प्रवर्तते। अध्यासत्वं च भेदाग्रहेण व्याप्तम्। स चभेदाग्रहः कथं भवतीत्युक्ते तस्य अनाद्यविद्या मूलम्। अतः मिथ्याभूतमज्ञानम् अविद्या, भेदाग्रहं, तन्मूलमध्यासं प्रति चोपादानकारणम्। एतदेव मिथ्याज्ञाननिमित्तः इत्यत्र निमित्तपदेन सूचितम्। निमित्तपदस्य च निमित्तकारणपरत्वेन अध्यासौपयिकः अधिष्ठानारोप्ययोः ऐक्यसंस्कारः मिथ्याज्ञानपरिणामात्मकः निमित्तकारणमित्युक्तं भवति। अध्यासे एकं सत्यम्, अन्यदनृतमिति कृत्वा, तयोर्मेलनेनाध्यासस्य प्रादुर्भावात्, शून्यवादप्रसक्तिरपि नास्ति। एवं च अहमिति धर्म्यध्यासस्य, ममेदमिति धर्माध्यासस्य च अनादिकालसिद्धत्वात्, अध्यासस्यास्तित्वेन ज्ञाननिवर्तनीयसिध्या शास्त्रमारम्भणीयमिति सिद्धान्तः।

अध्यासभाष्यस्य माङ्गलिकत्वम् ननु "मङ्गलादीनि मङ्गलमध्यानि" इत्यादिपातञ्जलभाष्यानुसारेण ग्रन्थादौ मङ्गलस्यावश्यकर्तव्यतया, शिष्टाचारस्यापि तादृशत्वात्, "युष्मदस्मत्प्रत्यगोचरयोः" इत्याद्यध्यासभाष्येणैवोपक्रमात्, कथं मङ्गलदूरं भाष्यं शिष्टग्राह्यं

In Public domain. Digitization Muthulakshmi Research Academy

भवतीति चेत्, "सुतरामितरेतरभावानुपपत्तिः" इत्यध्यासाक्षेपभाष्य एव सर्वोपप्लवरहिते विज्ञानघने प्रत्यगात्मनि कथमनात्मनोऽध्यासः? इत्याक्षेपवर्णनवेलायां प्रत्यगात्मनः परब्रह्मणः स्मृतत्वात्, भाष्यकृद्भिः शिष्टाचारपरिपालनं कृतमेव। (र.प्र.पृ.4) न च "युष्मदस्मत्प्रत्ययगोचरयोः" इत्यत्र प्रथमत एव अस्मत्पदेन विषयिणः परमात्मनः प्रत्ययगोचरपदाभ्यां च स्मृतत्वात्, तावत्पर्यन्तगमनं व्यर्थमिति वाच्यम्। अस्मदर्थस्य प्रत्यग्वस्तुत्वेन, ततो ज्ञानत्वेन, व्यवहारतश्चानेकथा वर्णनात्तत्पदैः भेदसम्पादकैः न तथा परमात्मनः स्फूर्तेरभावात्, युष्मत्पदेनैवोपक्रमात्, ततो निर्दोषत्वाच्च 'इतरेतरभावानुपपत्तिः' इत्यन्तभाष्यरचनार्थं सर्वोपद्रवशून्यस्य विज्ञानघनस्य स्मृतत्वात्तावत्पर्यन्तानुधावनम्।

युष्मदस्मत्प्रत्ययगोचरयोः इत्यादिभाष्यस्याक्षरशः व्याख्यानम् - ननु लोके शुक्तौ इदं रजतमिति भ्रमः सत्यरजते 'इदं रजत'मिति प्रमायाम् अधिष्ठानभूतेदमंशस्य सामान्यस्य शुक्तिरजतानुगतस्य, तथा आरोप्यरजतस्य च ऐक्यप्रमाहित-संस्कारेण जन्यः दृष्टः। प्रकृतेऽप्यात्मनि अहङ्काराध्यासे पूर्वप्रमा वाच्या। सा च आत्मानात्मनोः वास्तवैक्यमपेक्षते। न हि तद्वास्तवैक्यमस्ति। यतः "आत्मानात्मानौ ऐक्यशून्यौ परस्परैक्यायोग्यत्वात् तमः प्रकाशवत्" इत्यनुमानेन

In Public domain. Digitization Muthulakshmi Research Academy

तयोरैक्यासिद्धेः। भाष्ये च 'तमःप्रकाशवद्विरुद्धस्वभावयोः' इत्यनेनात्मानात्मनोः स्वभावविरोधमाविष्कुर्वता भाष्यकारेण ऐक्यशून्यत्वरूपसाध्यशून्यत्वमाविष्कृतम्। एवं 'परस्परैक्या-योग्यत्वात्' इतिहेतुरपियुष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणो-रित्यनेन विशेषणेन द्योत्यते। यतः तत्र युष्मदस्मत्पदाभ्यां पराक्प्रत्यग्वस्तुत्वेन, प्रत्यपदेन च प्रतीतित्वेन, प्रतीतिविषयत्वेन, 'अहं कर्ता', 'अहं ब्रह्मास्मी'ति व्यवहाराभ्यां चात्मानात्मनोः विरोधः सूचितः। एवं च आत्मानात्मनोः परसपरैक्यायोग्यत्वरूप-हेतुरुक्तो भवति।(र.प्र.पृ.4.)

युष्मदस्मत्प्रत्यगोचरयोः इति समाससाधुत्वविचारः-ननु युष्मदस्मत्प्रत्यगोचरयोः इति समासस्य कथं विग्रहः इत्युक्ते रत्नप्रभाकारेणैव युष्मच्च अस्मच्च युष्मदस्मदी। ते एव प्रत्ययौ च युष्मदस्मत्प्रत्ययौ। तावेव गोचरौ युष्मदस्मत्प्रत्यगोचरौ इत्युक्तम्। (र.प्र.पृ.5.) अत्र घटकपदार्थानां त्रित्वेऽपि, विषयविषयिणोरिति विशेष्यानुसारात्, द्वयोर्द्वयोरभेदविक्षया समासाच्च द्विवचनोपपत्तिः। अथ वा इतोऽपि स्पष्टतया एवं विग्रहः बोध्यः। प्रतीयते अयमिति प्रत्ययः। प्रतीतिश्च प्रत्ययः। प्रत्ययश्च प्रत्ययश्च प्रत्ययौ इत्येकशेषः। एवं गोचरशब्दस्य अहं कर्ता, अहं ब्रह्मास्मीति द्विविधव्यवहारगोचरः इति पृथगर्थः। एवं च तत्रापि गोचरश्च गोचरश्च गोचरौ इत्येकशेषः। द्वयोरेकशेषवृत्तिभावमापन्नयोः

In Public domain. Digitization Muthulakshmi Research Academy
प्रत्ययगोचरपदयोः प्रत्ययौ चगोचरौ चेति द्वन्द्वे प्रत्यगोचरौ इति निष्पद्यते। ततः युष्मदस्मदी च प्रत्ययगोचरौ च इति पुनर्द्वन्द्वे युष्मदस्मत्प्रत्ययगोचरौ। तयोः इति निष्पन्नम्। पूर्वोक्तरीत्या युष्मदस्मत्प्रत्यगोचरात्मना वस्तुतः, प्रत्ययतः, व्यवहारतश्च एवं त्रेधा विरोधः स्फुटीकृतः। आनन्दगिरिणापि न्यायनिर्णये 'युष्मच्च अस्मच्च युष्मदस्मदी। ते एव प्रत्ययौ, तावेवगोचरौ, तयोस्त्रिविधविरोधभाजोरन्यत्रैक्यायोगात् न तत्प्रमितिरिति' (न्यायनिर्णयः पृ.5.) इति कथयता रत्नप्रभामूलस्त्रोतोभूत एवार्थः निरूपितः। भामतीकारेण तु नैतादृशस्त्रिविधो विरोधः निरूपितः। सन्दर्भेऽस्मिन् समासे युष्मदस्मदोः त्वमावादेशौ कुतो नेत्यपि विचारणीयमस्ति।

युष्मदस्मत्प्रत्ययेत्यादिसमासे त्वमादेशाभावविचारः-

र.प्र.प्र.-रत्नप्रभायामत्र ''न च"प्रत्ययोत्तरपदयोश्च" इत्यादिग्रन्थेन युष्मदस्मच्छब्दयोः त्वमादेशौ कुतो नेति शङ्का समाधानं चोक्ते। परं तु आपत्तिदानवेलायां कीदृशं विग्रहवाक्यमिति न निरूपितम्। अपितून्नेयम्।

1.तत्र कथमत्र भाष्ये विग्रहः? । "त्वमिति अहमिति प्रत्ययः, तस्य गोचरयोः" इति चेत्, न युज्यते। युष्मद् स् +, अस्मद्+ स् इत्यलौकिकविग्रहवाक्ये, द्वन्द्वसमासे युष्मदस्मदस्मदी इति जाते, ते इति प्रत्ययौ इति मध्यमपदलोपिसमासः इति शब्दलोपात्क्रियेत,

In Public domain. Digitization Muthulakshmi Research Academy

तर्हि, समासघटकयुष्मदस्मदोः एकत्वविशिष्टवाचित्वेन, प्रत्ययशब्दात्मके उत्तरपदे परे, 'त्वत्पुत्रो''मत्पुत्र' इत्यादाविव "त्वमावेकवचने" (पा.सू.7.2.97.) इत्यधिकारस्थेन "प्रत्ययोत्तर-पदयोश्च" (पा.सू.7.2.98.) इति सूत्रेण, युष्मदस्मदोः मपर्यन्तस्य त्वमादेशयोः त्वन्मत्प्रत्ययगोचरयोः इति रूपेण भाव्यम्। अथवा 'त्वदीयम्', 'मदीयम्' इत्यादाविव प्रत्ययमेवनिमित्तीकृत्य तादृशरूपेण भाव्यम्। कथं युष्मदस्मत् इति निर्देशः संगच्छते? इति चेत्, उच्यते। नात्र एकवचनयुष्मदस्मच्छब्दान्तर्भावेण विग्रहः। किं तु "यूयमिति वयमितिप्रत्ययौ" इति बहुवचनयुष्मदस्मच्छब्दा-न्तर्भावेण। युष्मच्छब्देन बहूनां जीवानां, अस्मच्छब्देनापि वस्तुतः एकस्यापि प्रत्यगात्मनः उपाधिभेदाद्बहुत्वेन विवक्षितत्वात्, अनयोश्शब्दयोर्बह्वर्थवाचित्वेन, एकार्थवाचकत्वाभावात्, न एकवचनाधिकारस्थौ "प्रत्ययोत्तरपदयोश्च" इति सूत्रेण विहितौ त्वमादेशौ। किन्त्वस्मिन् पक्षे शब्दसाधुत्वस्योपपन्नत्वेऽपि, अर्थसाधुत्वं न युज्यते। लोके अहङ्काराद्यनात्मनां यूयमिति प्रत्ययविषयत्वस्यादर्शनात्।

युष्मच्छब्दस्याभिमुखचैतन्यविशिष्टव्यक्तौ शक्तेः, यूयमित्यस्य अनात्मानः इत्यर्थपरिकल्पनं कथं सङ्गच्छते?। युष्मदस्मदर्थयोः विरोधानुगुण्येन एकस्मिन् प्रत्यगात्मनि अस्मदर्थत्वेन परिकल्पनीये तस्यौपाधिकबहुत्वकल्पनमपि व्यर्थम्। अतः यूयमित्यादिबहुवचन-

In Public domain. Digitization Muthulakshmi Research Academy
विग्रहपक्षे कथमर्थसाधुत्वम्? इति चेत् अत्राप्युच्यते। 'प्रत्ययगोचरयोः' इत्यत्र गोचरपदस्य योग्यतापरत्वमास्थाय, आत्मनः अन्याः इदम्प्रत्यययोग्याः जडा एव यूयमित्स्यार्थतया स्वीकार्याः। एवं अहम् अथवा वयमितिप्रतीतौ अहङ्कारस्य चैतन्यस्य द्वयोर्भानेऽपि, गोचरशब्दार्थयोग्यताबलात्, अस्मत्प्रत्यययोग्यः चिदात्मैव भासते, नत्वहङ्कारः। अहङ्कारस्य'तत्त्वमसी'ति शास्त्रीयबोधेन व्युदस्तत्वात्। युष्मदर्थेन अस्मदर्थस्य विरोधस्फूर्त्यर्थमस्मदर्थस्यैकत्वस्याभ्युपगन्तव्यत्वेऽपि औपाधिकस्य लौकिकस्य प्रत्यगात्मनानात्वस्यापरिहार्यत्वेन, आत्मानात्मभेदेन युष्मदस्मदर्थयोर्विरोधस्य सन्तोष्टव्यत्वाच्च। "न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात्" (शा.भा.पृ.17.) इत्यध्याससम्भावनोपपादनपरभाष्ये चिदात्मनः अस्मत्प्रत्ययविषयत्वाभ्युपगमाच्च। एवं च पक्षेऽस्मिन् युष्मदस्मच्छब्दयोः प्रत्ययगोचरशब्दबलात्, अनात्मप्रत्यगात्मबोधकत्वेन एकत्वविशिष्टार्थवाचित्वाभावात्, न पूर्वोक्तसूत्रेण त्वमावादेशौ। एवं च पक्षेऽस्मिन् यूयमिति वयमिति इत्यत्र इतिशब्दस्य मध्यमपदलोपिसमासेन लोपेऽपि, इतिशब्दस्यानुसन्धानात्, गोचरपदस्य योग्यतापरत्वाच्च अपेक्षितयोः अनात्मप्रत्यगात्मरूपार्थयोः विरुद्धयोः लक्षणां विनैव प्रतीतिरिति भावः। (र.प्र.पृ.4-5.)

In Public domain. Digitization Muthulakshmi Research Academy

2. युष्मदस्मच्छब्दसाधुत्वविषये आश्रमश्रीचरणमतम्-टीकाकृतामाश्रमश्रीचरणानां तु मतं रत्नप्रभायामेवं व्याख्यातम्। युष्मच्छब्दस्य सम्बोध्यचेतने शक्तिः। एवमस्मच्छब्दस्याहङ्कार-विशिष्टचेतने शक्तिः। युष्मच्छब्दस्यलक्षणया तु युष्मच्छब्दजन्य-प्रत्यययोग्यः परागर्थः अर्थः। अस्मच्छब्दस्य च अस्मच्छब्दजन्य-प्रत्यययोग्यः प्रत्गात्मा अर्थः। न चात्र परात्त्वमेव युष्मत्पदलक्ष्यतावच्छेदकम्, प्रत्यत्त्वमेवास्मत्पदलक्ष्यतावच्छेक-मिति वाच्यम्। पराक्प्रतीचोः चेतनत्वाविशेषेऽपि विरोधस्फुरणार्थं, युष्मच्छब्दजन्यप्रतीतिविषयत्वस्य, अस्मच्छब्दजन्यप्रतीति-विषयत्वस्य च लक्ष्यतावच्छेदककुक्षौ भानावश्यम्भावात्। एवं च "यष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः वां नावौ" (पा.सू.8.1.20.) इति सूत्रेण तत्तल्लक्ष्येषु, युष्मद्+ औ, अस्मद्+औ इति प्रकृतिप्रत्यसमुदाययोः युष्मदस्मच्छब्दसम्बन्धिनोः वाम् नौ इत्यादेशयोरपि, सूत्रे शब्दलक्षकयोरपि, द्वित्वविशिष्टार्थवर्तिनोरपि युष्मदस्मदोस्तु वां नावौ न भवतः इति ज्ञाप्यते। ततश्च सूत्रे न वांनावादेशौ। तथाऽत्र युष्मदस्मच्छब्दयोः शब्दलक्षकयोरपि, चिन्मात्रजडमात्रलक्षकयोः युष्मदस्मच्छब्दयोः एकत्वार्थ-बोधकत्वेऽपि" त्वमावेकवचने" इत्यनुशासनेन त्वमादेशौ न भवतः। यदि च युष्मदस्मदोरित्यादिसूत्रे तयोः वां नावादेशवारणाय शब्दमात्रलक्षकयोरेवतयोः वां नावौ भवत इति ज्ञापितमिति

In Public domain. Digitization Muthulakshmi Research Academy
विभाव्यते, युष्मदस्मत्प्रत्ययगोचरयोः इति भाष्यप्रयोगे तु युष्मदस्मदोः लक्षणया पराक्प्रत्यगर्थबोधकत्वमेव, न शब्दलक्षकत्वमिति च विभाव्यते, तदपि न युक्तम्। पूर्वोक्तभाष्यप्रयोगे पराक्प्रत्यगात्मनोः विशेष्यतया भानेऽपि, प्रत्ययविषयपदार्थान्वयार्थं, विशिष्टार्थे लक्षणार्थं वा शब्दस्यापि लक्ष्यतावच्छेदकविधया भानमवश्यं स्वीकार्यम्। एवं च 'युष्मदस्मदोः षष्ठी' इत्यादिसूत्रोक्तज्ञापकात् अत्र त्वमावेकवचने इति सूत्रप्रसक्तत्वमादेशवारणं सुलभम्। एवं च आश्रमश्रीचरणानां मते युष्मदस्मच्छब्दाभ्यामेव लक्षणया तादृशशदब्दजन्यप्रतीति-विषत्वयोग्यत्वलाभे प्रत्यगोचरयोः इति पदं व्यर्थं किल? इत्युक्तौ युष्मदस्मच्छब्दयोः तादृशविशिष्टार्थलक्षणातात्पर्यग्राहकमेव-तदित्यवधेयम्। एवं च पक्षेऽस्मिन् विग्रहविचारक्लेशोऽपि नास्ति।

3.ननु परागर्थः इत्युक्ते इदमर्थ एव भवति। एवं च भाष्ये इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्यम्। कथं युष्मदस्मदिति ।किं च युष्मदर्थस्य अभिमुखचेतनरूपतया परागर्थः इति कथनमपि,न सम्यक् इति चेत्, उच्यते। 'इमे वयमास्महे' इति लौकिकप्रयोगे, 'अयमहमस्मी'ति वैदिकप्रयोगे च, इदं शब्दसामानाधिकरण्यस्य अस्मच्छब्देनापि दर्शनात्, इदमर्थास्मदर्थयोः तात्पर्यविषयीभूतविरोधालाभात्। पराचः युष्मच्छब्दजन्यप्रतीति-विषयत्वेन स्फुरणार्थं युष्मच्छब्दस्य प्रयोगे तु तस्य अस्मच्छब्द-

In Public domain. Digitization Muthulakshmi Research Academy

जन्यप्रतीतिविषयेण प्रतीचा सह विरोधः सुलभः। अत एव अस्मच्छब्दस्याहङ्कारार्थकत्वेऽपि तत्परित्यज्य प्रत्यगर्थत्वमेव स्वीकृतम्। (र.प्र.पृ.5.)

4. इयमन्या आशङ्का स्यात् 'युष्मदस्मदी' इत्यत्र युष्मदस्मच्छब्दयोः त्यदाद्यन्तर्गतत्वेन "त्यदादीनि सर्वैर्नित्यम्" (पा.सू.1.2.72.) इति सूत्रेण एकशेषे विहिते सति, अस्मत्प्रत्यगोचरयोः इति रूपेण भाव्ये, कथमितरेतरयोग-द्वन्द्वनिर्देशः इति चेत्, एकशेषे विवक्षितविरोधास्फूर्तेः इत्याश्रमश्रीचरणानां समाधानम्। यथा' युष्मदस्मदोः' इत्यादिसूत्रे, युष्मद्+ औ इति द्वितीयान्तसमुदायस्य वामित्यादेशः, अस्मद्+औ इति द्वितीयान्तसमुदायस्यच नौ इत्यादेशः इति पार्थक्येन ज्ञानार्थं द्वन्द्व एव, नैकशेष इति द्वयोरप्युपादानं तत्र, एवमेव युष्मदस्मदित्यादिभाष्यप्रयोगेऽपि, पराक्प्रत्यगर्थविरोधस्फूर्त्यर्थं पूर्वोत्तरपदयोः श्रवणार्थं इतरेतरयोगद्वन्द्व एवाश्रीयते इत्याश्रमश्रीचरणाः।

5.**वृद्धमतम्**--स्यादियमाशङ्का—अस्मच्छब्दस्य प्रत्यग्रूपचेतनबोधकतया, युष्मच्छब्दस्य पराग्रूपाचेतनबोधकतया च, युष्मदस्मदी इति द्वन्द्वे 'अभ्यर्हितं पूर्वम्' (वार्तिकम् 1412) वार्तिकेन प्रथमत एव अस्मच्छब्दस्य प्रयोगः कार्यः इति। समाधानं तु वृद्धास्तु इत्यादिना रत्नप्रभायामेवमाविष्कृतम्।

In Public domain. Digitization Muthulakshmi Research Academy
अध्यारोपापवादन्यायेन वेदान्तार्थस्य ब्रह्मणः बोधनात्, युष्मदर्थानात्मनः आरोपितस्य निरूपण एव, ततो निष्कृष्टस्य शुद्धस्य चिद्धातो रपवादेन ग्रहणसम्भवात् प्रथमत एवआनात्मबोधकं युष्मत्पदमुपात्तम्। (र.प्र.पृ.5.)

अध्यापूर्वपक्षभाष्यस्थपदप्रयोजनानि-पदार्थविचारश्च

र.प्र.प्र.-**युष्मदस्त्प्रत्ययगोचरयोः विषयविषयिणोः** इति **पदद्वयप्रयोजनम्-** युष्मदस्मत्-प्रत्यय-गोचरयोः इत्यत्र त्रयाणां पदानां विगृह्य ग्रहणेन, पराक्प्रत्यग्वस्तुत्वेन, ज्ञान-ज्ञेयत्वेन, अहं कर्ता अहंब्रह्मास्मीति विलक्षणव्यवहारविषयत्वेन द्विविधव्यवहाराच्च विरोधः प्राक्प्रदर्शितः। एवं तर्हि विषयविषयिणोः इति पदं किमर्थमित्युक्ते चिज्जडरूपविरोधस्फोरणाय। विषयो नाम जडः। विषयी च केवलचैतन्यमेव। "विषयविषयिणोरितरेतरभावानुपपत्तौ सिद्धाया" मित्यत्र इतरेतरभावो नाम इतरस्मादितरभावः इत्यर्थः यदि वर्ण्येत, तर्हि विवक्षिताभेदतादात्म्ययोः स्फूर्तिः न स्यात्। अतः 'इतरस्य इतरभावः' इति धर्म्यध्यासस्थले, 'इतरत्र इतरभावः' इति धर्माध्यासस्थले च विग्रहः अनुसन्धेयः। तथा च अस्मदर्थयुष्मदर्थयोः चिज्जडभेदेन तमःप्रकाशवदत्यन्तविरुद्धत्वात्, तयोरैक्यं न सम्भवति। माभूदैक्यम्, किं तु 'शुक्लो घटः' इत्यत्रगुणगुणिनोस्तादात्म्याभ्युपगमात् तयोरिव तादात्म्यं किं न स्यात्, इति चेत् विषयविषयिणोरित्युक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy
चिज्जडयोरत्यन्ताभिन्नत्वात्, शुक्लघटयोरिव, भेदसहिष्णवभेदलक्षण-तादात्म्यं न युज्यते। न हि दीपघटयोः प्रकास्य प्रकाशकयोस्तादात्म्यं युज्यते। (र.प्र.पृ.5.)

रत्नप्रभायां विषयविषयिणोरित्यस्य अन्यथापि सार्थक्यमुपपादितम्। युष्मदस्मत्पदाभ्यां पराक्प्रत्यग्वस्तुनी एव उपस्थाप्येते। प्रत्ययगोचरपदाभ्यामाहत्य चिदचित्त्वरूपहेतुरुक्तः। तयोश्चिदचित्त्वे कारणं तु विषयविषयिणोरिति भाष्येण निर्दिष्टम्। तत्र अनात्मा ग्राह्यत्वात् ज्ञानविषयत्वात् अचिदेव। आत्मा तु ग्राहकत्वात् चिन्मात्रम्। यदि आत्मनः अचित्त्वमभ्युपगम्येत, तर्हि एकत्र कर्मत्वं कर्तृत्वं चेति विरुद्धद्वयमभ्युपगम्येत। तथा चात्मनः स्वयम्प्रकाशत्वमपि नस्यात्। एवं च प्रत्यगोचरपदाभ्यामुक्ते चिदचित्त्वे विषयविषयिणोरिति हेतुनिर्देशः। अथवा यथेष्टं हेतुहेतुमद्भावः। (र.प्र.पृ.5)

धर्म्यध्यासाभावे धर्माध्यासस्याप्यनुपपत्तिः- नन्वेतावता धर्म्यध्यासस्यानुपपत्तावपि अस्मत्प्रत्ययगोचरे विषयिणि युष्मत्प्रत्ययगोचरस्य विषयस्य धर्माणामध्यासः किं न स्यात्?। एवमेव तद्विपर्ययेणतद्विरुद्धतया विषयिधर्माणां विषये अध्यासलक्षणः धर्माध्यासः किं न स्यात्? इतीदानीं शङ्क्यते। सन्ति हि विषये जाड्यदुःख-अनृतत्वात्मकाः धर्माः। तेषां विषयिणि चिदात्मनि किमर्थं नाध्यासः? एवमेव विषयिणि चैतन्य-आनन्द-

In Public domain. Digitization Muthulakshmi Research Academy
सत्यत्वात्मकाः धर्माः। तेषामपि विषये किमिति नाध्यासः? इति। अत्र तु भाष्ये आक्षेपस्य धर्माध्यासविषयकत्वेन, इतरेतरभावानुपपत्तिरित्यत्र, इतरत्र धर्म्यन्तरे, इतरेषां धर्माणां भावः संसर्गः, इति विग्रहोऽनुसन्धेयः। धर्मिणोरात्मानात्मनोः ऐक्यतादात्म्ययोरभावे तयोस्संसर्गाध्यासस्यानुपपन्नत्वे, धर्माणामपि विनिमयः परस्परं तादात्म्याध्यासः न सम्भवति। स्फटिके लोहितजपापुष्पसान्निध्यादेव लौहित्यधर्मसंसर्गः। असङ्गात्म-धर्मिणस्तु केनापि संसर्गाभावात्, धर्मिसंसर्गपूर्वकं क्रियमाणः धर्मसंसर्गः सुतरामेव न सम्भवति। अत एवोक्तं भाष्ये तद्धर्मणामपि सुतरामितरेतरभावानुपपत्तिरिति। एवं च धर्म्यध्यासाभावे धर्मयोः परस्परतादात्म्याध्यासोऽपि दुर्लभः। (र.प्र.पृ.5-6)

इतरेतरभावानुपपत्तिरित्यतः- अस्मिन् भाष्ये इति, अतः इतिपदद्वयमुपयुक्तम्। तत्र इतिशब्दस्य कारणतावाचकत्वे अत इत्यस्य पौनरुक्त्यम्। अतः इतीत्यस्य प्रकारार्थकत्वं स्वीकृत्य, उक्तरीत्या तादात्म्याभावेन तत्प्रमाया अप्यभावात् इत्यर्थः ग्राह्यः। अत इत्यस्य तादात्म्यप्रमाया एवाभावात् तत्संस्कारस्याप्यभावेन अध्यासहेतोरभावादित्यर्थः। इत्यतः इत्यस्य च अध्यासो मिथ्येति भवितुं युक्तमिति भाष्येणान्वयः। **मिथ्यापदार्थविवरणम्-** मिथ्याशब्दस्य द्वावर्थौ स्तः। एकः अपह्नवार्थः। अपरश्च अनिर्वचनीयत्वरूपार्थः। अपह्नवशब्दस्यानिर्वचनीयार्थकत्वे,

In Public domain. Digitization Muthulakshmi Research Academy
अध्यासस्यानिर्वचनीयत्वमलङ्कार एवेति नास्ति तत्र शङ्काया अवकाशः। अतः परिशेषात् निषेधरूपापह्नववचन एवायं मिथ्याशब्दः। (र.प्र.पृ.6)

अस्मत्प्रत्यगोचरे विषयिणि चिदात्मके...इत्यादिव्याख्याः- अपह्नवगोचरस्य चाध्यासस्य अधिष्ठानं किम्? इत्युक्ते भाष्ये अस्मत्प्रत्ययगोचरे, विषयिणि, चिदात्मके इति पदत्रयमुपयुक्तम्। तत्र अस्मत्प्रत्ययगोचरत्वं नाम अहमिति प्रतीतियोग्यत्वम्। अहम्प्रत्यये अहङ्कारस्य, चैतन्यस्य च भानात्, अहम्प्रत्ययगोचरत्वं बुद्ध्यादेरप्यस्तीति, तद्वारणाय आत्मनः विषयित्वेन विवेचनाय च विषयिणीत्युक्तम्। विषयिणीत्यस्य बुद्ध्यादिसाक्षिणीत्यर्थः। आत्मगतसाक्षित्वस्य हेतुतया चिदात्मके इत्युक्तम्। एवं धर्म्यध्यासे आरोप्यः युष्मत्प्रत्ययगोचरः अनात्मा अहङ्कारः। युष्मत्प्रत्ययगोचरत्वं च त्वङ्कारयोग्यत्वम्। अर्थादिदमर्थत्वम्। तावतैव युष्मदर्थस्यानात्मनो विवरणे सम्पन्ने पुनः भाष्ये 'विषयस्ये'ति किमर्थमित्युक्ते साक्षिभास्यस्येत्यर्थस्फोरणाय। यद्यपिघटादिवद्बुद्ध्यादेः इदन्तया ग्राह्यत्वं नास्ति, बुद्ध्यादेः साक्षिणैव भास्यत्वात्, तथापि इदन्तया ग्राह्यत्वलक्षणविषयत्वस्य बुद्ध्यदिष्वभावेऽपि, साक्षिभास्यत्वलक्षणविषयत्वं बुद्ध्यादिष्वप्यस्ति। घटादौ ऐन्द्रियिकवृत्त्युपस्थापिते साक्षिभास्यत्वमप्यस्ति, न तु केवलं साक्षिभास्यत्वम्। (र.प्र.पृ.6-7.)

In Public domain. Digitization Muthulakshmi Research Academy

अथवा "अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके" इत्यादिभाष्यस्थपदानां एवं सार्थक्यं रत्नप्रभातोऽवसेयम्। यद्यपि आत्मनः मुख्यं सर्वान्तरत्वलक्षणं प्रत्यक्त्वं प्रतीतित्वम्, 'अहं ब्रह्मास्मी'ति व्यवहारगोचरत्वं चोक्तम्। तथापि तन्न सिध्यति। "आत्मा मुख्यप्रत्यक्त्वाभाववान् अहंब्रह्मास्मीति प्रत्ययगोचरत्वात् अहङ्कारवत्" इत्यनुमानात् पूर्वोक्तधर्मासिद्धेः इति चेत्, अत एव 'अस्मत्प्रत्ययगोचरे' इत्युक्तम्। तत्र हेतुभूतमस्मत्प्रत्ययगोचरत्वं नाम किं अहंवृत्तिव्यङ्ग्यस्फुरणत्वम्? तादृशस्फुरणविषयत्वं वा?। आद्ये दृष्टान्ते अहङ्कारे स्फुरणविषयत्वस्यैवसत्त्वात्, स्फुरणत्वस्याभावात् साधनवैकल्यम्। यदि स्फुरणविषत्वं हेतुः तर्हि, दृष्टान्ते अहङ्कारे तत्सत्त्वेऽपि, आत्मनि स्फुरणविषयत्वस्याभावात् स्वरूपासिद्धिः। अतः पक्षदृष्टान्तानुगतहेतोरभावात्, अस्मत्प्रत्यय-गोचरत्वं हेतुमनास्थाय आत्मनि मुख्यमेव प्रत्यक्त्वमभ्युपेयम्। एवमपि विषयिणीति पदं पुनः किमर्थमुपयुक्तमिति चेत्, "आत्मा विषयित्वाभाववान्, अनुभवामीति शब्दवत्त्वात् अहङ्कारवत्" इत्यनुमानेन विषयित्वाभावसिद्धेः, अहङ्कारस्येव आत्मनोऽपि विषयत्वप्रसक्तौ तद्वारणाय विषयिणीति पदम्। अयमाशयः। अनुभवामीति शब्दवत्त्वं हेतुतयास्थाय पूर्वपक्षिणा आत्मनि विषयित्वाभावः साध्यते। तच्च अनुभवामीतिशब्दवाच्यत्वं वा? उत अनुभवामीति शब्दलक्ष्यत्वं? वा। नाद्यः। अनुभवामीति

In Public domain. Digitization Muthulakshmi Research Academy

शब्दवाच्यवृत्तिज्ञानाश्रयत्वस्य अहङ्कार एव सत्त्वेन, पक्षे आत्मन्यभावेन स्वरूपासिद्धेः। यदि अनुभवामीति शब्दलक्ष्यत्वं हेतुः तर्हि, शब्दलक्ष्यत्वस्य शुद्धे आत्मनि सत्त्वेन स्वरूपासिद्धिवारणेऽपि, अहङ्कारे शब्दलक्ष्यत्वस्याभावात् दृष्टान्ते साधनवैकल्यमेव। अतः न पूर्वोक्तानुमानेन विषयित्वाभावसिद्धिः। ननु तर्हि चिदात्मके इतिपदं किमर्थमुपयुक्तम् इति चेत्, उच्यते। अत्र च समाधानपरा रत्नप्रभापङ्क्तिरेवमस्ति। 'देहं जानामी'ति देहाहङ्कारयोर्विषयविषयित्वेऽपि, 'मनुष्योऽहमि'त्यभेदाध्यासवत्, आत्माहङ्कारयोरप्यध्यासः स्यादित्यत आह चिदात्मके इति'। (र.प्र.पृ.7.) अयमाशयः। 'देहंजानामि' 'मनुष्योऽहमि'ति भिन्नप्रत्यययोः एकस्यैव शरीरस्य, देहमितिद्वितीयान्तेन कर्मतया, मनुष्यः इति प्रथमान्तेन कर्तृतया भेदेन उल्लेखेऽपि, चित्त्दात्म्यापन्नाहङ्कारे अधिष्ठाने अभेदाध्यासो यथा भवति, तद्वदात्मानात्मनोः विषयविषयिणोरत्यन्तभिन्नयोरपि, किमित्यध्यासः न स्यात्? इति शङ्कायां चिदात्मके इत्युक्तम्। पूर्वोक्तशङ्कैव' देहाहङ्कारयोर्विषविषयित्वेऽपि', 'आत्माहङ्कार-योरप्यध्यासः' इत्यत्रापि कारकद्वयमुपयुञ्जानेन रत्नप्रभाकृता सूचिता। चिदात्मके इति निवेशे तु अहङ्कारात्मनोः द्वयोः चिदात्मकत्वाभावान्न दोषः। देहाहङ्कारयोः परस्पराध्यासे उभयोरपि जाड्याल्पत्वाभ्यां सादृश्यादध्यासस्योपपन्नत्वेऽपि, चिदात्मन्यन-

In Public domain. Digitization Muthulakshmi Research Academy
वच्छिन्ने जडपरिच्छिन्नाहङ्कारादेरनुपपन्नत्वात्, एतादृशविरोध-स्याध्यासं प्रति भञ्जकत्वात्, कथमात्मानात्मनोरध्यास इति पूर्वपक्षः सुस्थ एव। एवंच मुख्यं प्रत्यक्त्वमात्मन एव। स्वेतराभास्यत्वात्। विषयस्याहङ्कारादेस्तु चिद्भास्यत्वात् विषयत्वमेव, न प्रत्यक्त्वम्। (र.प्र.पृ.7.)

अहङ्कारस्य प्रत्यक्त्वनिराकरणम्- ननु अहङ्कारस्यापि अहंप्रत्ययभास्यत्वात् मुख्यमेव तस्यापि प्रत्यक्त्वम्। अतश्च अहङ्कारादेः पराक्त्वमसिद्धमिति चेत्, युष्मत्प्रत्यगोचरस्य इति विषयस्य विशेषणम्। ननु तथापि अहङ्कारस्यापि मुख्यं प्रत्यक्त्वम्। "अहङ्कारः मुख्यप्रत्यक्त्त्वादिमान् अहमितिभास्यत्वात् आत्मवत्" इत्यनुमानेन तत्सिद्धेः (पूर्णानन्दीयम्,पृ.27.) इति चेत्, तदपि साधनवैकल्यात्प्रत्युक्तम्। दृष्टान्ते आत्मनि साक्षिभास्यत्वाभावात्। अहंवृत्तिभास्यत्वस्य, प्रत्यक्त्वरूपसाध्यस्य अभावेन व्याप्तत्वात् विरुद्धत्वाच्च। अतश्च बुद्ध्यादेः प्रतिभासतः प्रत्यक्त्वेऽपि, न मुख्यं प्रत्यक्त्वम्। कर्तृत्वकर्मत्वयोरेकत्र विरोधाच्च नाहङ्कारस्य प्रत्यक्त्वम्। एतत्सूचनायैव अस्मत्प्रत्ययगोचरत्वम् अहङ्कारादेः परित्यज्य, "युष्मद् पराक्, तच्चासौ प्रतीयत इति प्रत्ययश्चासौ कर्तृत्वभोक्तृत्वादिव्यवहारगोचरश्च तस्येति विग्रहः इति व्याख्यातं रत्नप्रभायाम् (पृ.7)। भाष्ये विषयस्येतिपदं तु अहङ्कारादेः

In Public domain. Digitization Muthulakshmi Research Academy
हेयत्वख्यापनार्थम्। विषिणोति बध्नातीति विषयः। बन्धक इत्यर्थः।(र.प्र.पृ.7.)

तद्विपर्ययेण विषयिणस्तद्धर्माणां चाध्यासो मिथ्येति भवितुं युक्तम्- ननु आत्मन्यनात्मधर्माध्यासे आत्मनः जाड्यापत्तिभिया अध्यासः मिथ्या भवतु। अनात्मनि अहङ्कारादौ आत्मधर्माध्यासः किं न स्यात्?। दृश्यते हि 'अहं स्फुरामि' 'अहंसुखी' इत्यादिप्रत्ययः इति चेत्, अत एवोक्तं भाष्ये तद्विपर्ययेण विषयिणस्तद्धर्माणां चेत्यादिना। तद्विपर्ययो नाम तद्विरुद्धस्वभावः। स चात्मनः चैतन्यमेव भवति। तेन प्रकारेणेति इत्थम्भूतलक्षणतृतीयया लभ्यते। तेन प्रकारेण चैतन्यात्मना विषयिणस्तद्धर्माणां च अहङ्कारादौ विषये अध्यासः मिथ्येति नास्तीति भवितुं युक्तम्। यतः अध्याससामग्री एवात्र नास्ति। अध्यासे सामग्री च आरोप्याधिष्ठानयोः ऐक्यप्रमाहितसंस्कारः, सादृश्यम्, अज्ञानं च। तत्र निरवयवस्यात्मनः निर्गुणत्वात्, आत्मनि गुणसादृश्यस्य, अवयवसादृश्यस्याभावात्। स्वप्रकाशात्मन्यज्ञानायोगाच्च। एवमात्मनि अनात्मधर्माध्यासः, आत्मानात्मनोः तादात्म्याध्यासो वा न युक्तः।

अध्याससिद्धान्तात्प्राक् रत्नप्रभोदाहृताः आध्यासपूर्वपक्षयुक्तयः- ननु अध्यासपूर्वपक्षभाष्ये "तद्धर्माणां चाध्यासो मिथ्येति" इति भाष्ये अध्यासः निषेधयोग्य इत्युक्तम्। तदयुक्तम्। आत्मनः

In Public domain. Digitization Muthulakshmi Research Academy

निर्गुणत्वेन तद्धर्माणामिति कथनस्यैवायुक्तत्वात् इति चेदुच्यते। बुद्धिवृत्तौ अभिव्यक्तं चैतन्यं ज्ञानम्। विषयाभेदेनाभिव्यक्तं चैतन्यं स्फुरणम्। शुभकर्मजन्यवृत्तौ अभिव्यक्तं चैतन्यमानन्दः इत्येवं वृत्त्यात्मकोपाधिभेदेन ज्ञानस्फुरणानन्दानाम् आत्मधर्मत्वेन व्यपदेशः। एवं चात्मनो वस्तुतो निर्गुणत्वेऽपि, वृत्त्यात्मकोपाधिसम्पर्कात् सगुणत्वमिति "तद्धर्माणां च विषये अध्यासो मिथ्या" इति पूर्वपक्षभाष्यग्रन्थे न किञ्चिदसाङ्गत्यम्। "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभभसन्ते" इति पञ्चपादिकावचनमपि आत्मनः औपैधिकर्मवत्त्वे प्रमाणम्। (र.प्र.पृ.8.)

एवमात्मनः निर्गुणत्वे आस्थिते, वस्तुतः आत्मनि गुणाभावात्, 'अहं करोमी'त्यत्र अहम्पदेन अहङ्कारस्यैव ग्रहणे, तत्र कृत्याश्रयत्वोपपत्तेः, 'अहं करोमी'ति प्रमैवेति न तत्राध्यासः। एवमेव यद्यपि 'अहं नरः' इत्यत्र आत्मतादात्म्यापन्नाहङ्कार-तादात्म्यं शरीरात्मके नरे अध्यस्य वेदान्तिना प्रयोगः समर्थ्यते, किं तु नेदमध्यासे सामानाधिकरण्यम्, किन्तु गौणमेव सामानाधिकरण्यम्। 'आत्मसम्बन्धी नरः' इत्युक्ते प्रकारान्तरेण नरस्य सम्बन्धी आत्मा भवति। तथा च सम्बधित्वरूपगुणसादृश्येन 'आत्मसम्न्धी नरः' इति वाक्यार्थबोधः निर्वोढव्य इति, तत्रापि नास्त्यध्यासस्यावकाशः। एवं च अध्यासाभावे बन्धस्य सत्यतया

In Public domain, Digitization Muthulakshmi Research Academy
ज्ञानान्निवृत्तिरूपफलासम्भवात्, निवर्त्याध्यासाभावे, जीवब्रह्मणोः ऐक्यायोगेन विषयासम्भवात्, शास्त्रमनारम्भणीयमित्यध्यासपूर्वपक्ष-भाष्यतात्पर्यम्। मिथ्येति भवितुं युक्तमित्यत्र पूर्वपक्षान्ते युक्तपदग्रहणात्, पूर्वपक्षस्य दौर्बल्यं सूच्यते। (र.प्र.पृ.8.)

अध्याससिद्धान्तभाष्यम् "तथाऽप्यन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्य नैसर्गिकोऽयं लोकव्यवहारः"। रत्नप्रभायामध्यास-सिद्धान्तः पूर्वपक्षिणा अध्यासस्य नास्तित्वमभिधीयते। तत्र कारणं पृच्छामः। किमध्यासस्यनास्तित्वम् अयुक्तत्वात्? अभानात्? कारणाभावाद्वा? इति। अध्यासः अयुक्त इति चेत्, अस्माकं तदिष्टमेव। अध्यासस्यानुपपद्यमानार्थत्वात्, असङ्गस्वप्रकशात्मनि कस्यापि सङ्गस्यानुपपत्तेः अध्यासस्यालङ्कारत्वात्। अत एव पूर्वपक्षभाष्ये 'अध्यासोमिथ्येति भवितुं युक्तमि'त्यत्र 'यद्यपी'ति पठितव्यम्। न द्वितीयः। भाष्यकारैः सिद्धान्तभाष्ये "अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इति द्विविधाध्यासस्य निरूपयिष्यमाणत्वात्। तत्र लोक्यते अभिमन्यते 'मनुष्योऽहमि'त्यादिरूपेणाति कर्मव्युत्पत्त्या लोकशब्दस्य अध्यस्यमानः अर्थः अर्थः। अयमेवार्थाध्यास इति व्यवह्रियते। व्यवहारो नाम अभिमानः। अयमेव ज्ञानाध्यासः इत्युच्यते। पक्षेऽस्मिन् 'अध्यसनं अध्यासः' इति भावव्युत्पत्तिः। एवंच लोकव्यवहारपदेन द्विविधाध्यासस्य प्रदर्शितत्वात्,

In Public domain. Digitization Muthulakshmi Research Academy
अभानान्नास्त्यध्यासः इति द्वितीयपक्षोऽपि न। किं च "अज्ञः कर्ता मनुष्योऽहम्" इति प्रत्यक्षानुभवादप्यध्यासः सिध्यति। यतो हि जडे आवरणकृत्यस्याभावात्, चेतने आत्मन्येवाहंशब्दबोध्ये अज्ञानाश्रयत्वं कल्प्यते। तत्र 'मनुष्यः' इति शरीरधर्मस्य मनुष्यत्वस्य अध्यासं विना आत्मनि उपपादनासम्भवात्, अध्यासः अवश्यं स्वीकर्तव्यः। एवमेव कर्तृत्वमप्यहम्पदार्थे आत्मनि अध्यासेनैवोपपादनीयम्। न च मनुष्यत्वांशे आत्मनि भ्रमः, कर्तृत्वांशे तु प्रमैवेति वाच्यम्। सामानाधिकरण्यप्रयोगे अर्धजरतीयतायाः अन्याय्यत्वात्, द्वयोरपि धर्मयोः अध्यस्तत्वस्यावश्यं स्वीकर्तव्यत्वात्। अन्यच्च अपौरुषेयेण, अत एव नित्यनिर्दुष्टेन वेदेन उपक्रमादिलिङ्गावधृततात्पर्येण 'तत्त्वमसी'त्यादिवाक्येन अकर्तृत्वस्यैव बोधनेन "अज्ञः अहं कर्ता"-इति प्रत्यक्षस्य भ्रमत्वनिश्चयाच्च। न च प्रत्यक्षागमयोर्मध्ये प्रत्यक्षस्य ज्येष्ठत्वेन आगमजनितज्ञानबाधकत्वात् तस्यैव प्रमाण्यमास्थेयम्। तेन च वेदोक्तार्थबाध इति वाच्यम्। एवं सति "मनुष्योऽहम्"-इति प्रत्यक्षस्यापि आगमापेक्षया प्राबल्यात् देहात्मवादप्रसङ्गात्। मनुष्योऽहम् इति प्रत्यक्षस्य बाधकत्वेन "अथाऽयमशरीरः" (बृ.उ.4.4.7.) इत्यादिश्रुत्यर्थस्यापि बाधितत्वात्, देहान्यात्माऽसिद्धिप्रसङ्गात्। तस्मात् "इदं रजतम्" इति भ्रमवत् भ्रमत्वशङ्काकलङ्कितस्य "मनुष्योऽहम्"इति सामानाधिकरण्य-

In Public domain. Digitization Muthulakshmi Research Academy
प्रत्यक्षस्य आगमात्प्राबल्यमित्यवश्यमङ्गीकर्तव्यम् ।अन्यथा उभयवादिसम्मतदेहान्यात्मासिद्धेः।(र.प्र.पृ.8.)

किं च किमिदं प्रत्यक्षप्रमाणगतं ज्येष्ठत्वम्? पूर्वभावित्वं वा? आगमज्ञानं प्रत्युपजीव्यत्वं वा? (कारणत्वं वा)। नाद्यः। यद्यपि प्रत्यक्षं पूर्वभावि, तथाऽप्युत्तरकालजनितशाब्दज्ञानेन बाध एव दृश्यते लोके। पूर्वोत्पन्नस्यापि "इदं रजतम्" इति भ्रमात्मकस्य प्रत्यक्षस्य पाश्चात्येन शुक्तिज्ञानेन बाधवत्, आगमजनिताकर्तृत्वादि-ज्ञानेन पूर्वं जातस्यापि "कर्ताऽहमि"ति प्रत्यक्षस्य बाधसम्भवात्। न द्वितीयः। यद्यपि आगमजनितज्ञानं प्रति प्रत्यक्षमुपजीव्यम्, तथाऽपि आगमात् ज्ञानोत्पत्तौ, प्रत्यक्षात्मकस्य वृद्धव्यवहारस्य, तत्तत्पदार्थानामागमशब्दप्रतिपाद्यानां सङ्गतिग्रहे शब्दोपलब्धौ च कारणत्वेन प्रत्यक्षस्य व्यावहारिकप्रामाण्यस्य सावकाशत्वात्, तत्त्वमसीत्याद्यकर्तृत्वबोधकवेदवाक्येषु तज्जन्यार्थप्रतीतौ च प्रत्यक्षं न बाधकम्। सामान्यतः श्रुतेरर्थप्रत्यये तात्त्विकप्रामाण्यस्यान-पेक्षणात्। 'अहं कर्ता' इत्यादिलौकिकवाक्यजन्यप्रतीतिं, 'कर्ता भोक्ता' इति वैदिकवाक्यजन्यप्रतीतिं वा व्यावहारिकार्थनिरूपकं प्रति, तत्त्वमसीत्यादिवाक्यजन्यबोधस्य बाधकत्वासम्भवात्। तथा च पूर्वोक्तायाः 'अज्ञः कर्ता मनुष्योऽह'मिति प्रतीतेः अध्यासत्वसिद्धिर्निर्बाधा।(र.प्र.पृ.8.)

In Public domain. Digitization Muthulakshmi Research Academy

यत्तुमतम्- ननु तथाप्यध्यासो नादर्तव्यः। सत्यस्यापि बन्धस्य“ तथा विद्वान्नामरूपाद्विमुक्तः” (मु.उ.3.2.7.) इति श्रुत्या, ज्ञानेन नामरूपात्मकबन्धस्य निवृत्तेः प्रतिपादनात्। किं हि भगवत्या श्रुत्या न साध्यते। अत एव सत्यस्यापि बन्धस्य श्रुतिबलान्निवृत्तिर्भवति। किमर्थमध्यासः? इति चेदत्रोच्यते। ज्ञानमात्रनिवर्त्यस्य क्वापि लोके सत्यत्वं न दृष्टचरम्। यतः सत्यस्त्रिकालाबाध्यः आत्मा केनापि न निवर्त्यते। किं च सत्यबन्धः ज्ञानान्न निवर्त्यः इत्ययोग्यतानिश्चये सति श्रुतेर्बोधकत्वस्योपहतेः। न च “सेतुं दृष्ट्वा ब्रह्महत्यां सन्तरेत्” इत्यादिवचनेन सेतुदर्शनात् सत्यायाः ब्रह्महत्यायाः निवृत्तेः प्रतिपादनात्, ज्ञानस्य सत्यबन्धनिवर्तकत्वयोग्यताप्यस्तीति वाच्यम्। तत्र ब्रह्महत्यानिवृत्तौ काश्यादिदेशवासिनः रामेश्वरसेतुपर्यन्तं पादगमनस्वकृतपापाविष्करणपूर्वकभिक्षाटनपापश्रवणकालीनजनकृ तथूत्कारादिसहनश्रद्धानियमसापेक्षसेतुदर्शनादेव ब्रह्महत्यापापनिवृत्तेः अभिमतत्वात्। अन्यथा रामेश्वरवासिनोऽपि नियमानपेक्षेणैव सकृत्सेतुदर्शनेन ब्रह्महत्यानिवृत्त्यापत्तेः। बन्धस्य च “नान्यः पन्था विद्यतेऽयनाय”(श्वेता.3.8.) इति श्रुत्या ज्ञानमात्रान्निवृत्तिप्रतीतेः। तस्मात् श्रुतज्ञानान्यथानुपपत्तिरूप- श्रुतार्थापत्त्या अध्यस्तत्वं वर्णनीयम्। (र.प्र.पृ.8,9.)

In Public domain. Digitization Muthulakshmi Research Academy

किंच किमिदं बन्धस्य ज्ञानैकनिवर्त्यस्य सत्त्वम् 1.अज्ञानाजन्यत्वम्? 2.स्वाधिष्ठाने स्वाभावशून्यत्वम्? 3.ब्रह्मवद्बाधायोग्यत्वम्? 4,व्यवहारकाले बाधशून्यत्वं वा?। नाद्यः। 'मायां तु प्रकृतिम् '(श्वेता.4.10 इति श्रुत्या मायायाः प्रकृतित्वेनोपादानत्वेन वर्णनात्, अविद्याद्यपरशब्दशब्दितमाया-जन्यत्वस्यैव जगति सत्त्वेन, अज्ञानाजन्यत्वस्य ब्रह्मणीवाभावात्। न द्वितीयः। स्वपदग्राह्यप्रपञ्चाधिष्ठाने ब्रह्मणि स्वपदग्राह्यप्रपञ्चस्य अभावस्यैव "अस्थूलमनणु" (बृ.उ.3.8.8.) इत्यादिश्रुत्या प्रमितत्वात् स्वाधिष्ठाने स्वात्यन्ताभावस्यैव सत्त्वेन स्वाधिष्ठाने स्वात्यन्ताभावशून्यत्वलक्षणसत्यत्वस्यासिद्धेः। न तृतीयः। "विद्वान्नामरूपाद्विमुक्तः" इति श्रुत्या ज्ञानात् बन्धनिवृत्तेः प्रतिपादनात्, निवर्त्यमानस्य बन्धस्य बाधितत्वात्, ब्रह्मवद्बाधायोग्यत्वलक्षणसत्यत्वस्यासिद्धेः। चतुर्थश्चेदर्धाऽभ्युप-गमः। व्यवहारकाले बाधशून्यत्वमित्युक्ते, व्यावहारिकमेव सत्यत्वमेव भवति, न पारमार्थिकं सत्यत्वम्। तादृशसत्यत्वस्य अपरं नामैव अध्यस्तत्वम्। तच्च श्रुत्यर्थैयोग्यताज्ञानार्थं यागस्य द्वारभूतापूर्ववत् अवश्यमङ्गीकरणीयम्। आशुतरनाशिनः यजमानत्यागसङ्कल्पात्मकस्य यागस्य कालान्तरस्थायित्वाभावात्, तस्य स्वर्गसाधनत्वान्यथानुपपत्त्या, यथा यागस्वर्गयोः मध्ये अपूर्वं कल्प्यते, तथा सत्यस्य ज्ञाननिवृत्त्यन्यथानुपपत्त्या, अत्रापि बन्धे

In Public domain. Digitization Muthulakshmi Research Academy
अध्यस्तत्वमवश्यं कल्पनीयम्। एतच्च तदनन्यत्वाधिकरणे वाचारम्भणश्रुतिं, मृदादिदृष्टान्तं चोदाहरद्भिः भाष्यकारैः जगतः ब्रह्मणो भेदाभावस्य वर्णनेन यद्यपि निरूपयिष्यते, तथापि तत्राधिकरणे बहूनां विषयाणां विचारयिष्यमाणत्वेन, प्रकृतजिज्ञासाधिकरणारम्भोपयोगी अध्यासोऽत्र संक्षिप्ततया निरूप्यमाणः न पौनरुक्त्यमापादयतीति शम्। (र.प्र.पृ.9.)

अध्याससिद्धान्तभाष्यम्

शा.भा.-तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन,अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः।

र.प्र.प्र- **अध्याससिद्धान्तभाष्यस्थपदव्याख्या** अत्र च अन्योन्यस्मिन्नन्यात्मकतामित्यनेन धर्म्यध्यासस्वरूपम्, अन्योन्यधर्मांश्चाध्यस्य इत्यनेन धर्माध्यासलक्षणं चोक्तम्। 'इतरेतराविवेकेन' इत्यनेन अध्यासे निमित्तभूतः भेदाग्रहश्चाविष्कृतः। 'मिथ्याज्ञाननिमित्तः' इत्यनेन, अध्यासोपादानभूता अविद्या, तत्परिणामभूतानि संस्कारकालकर्मादीनि निमित्तकारणानि चोक्तानि। 'अहमिदम्'इति धर्म्यध्यासस्य, 'ममेदम्' इति धर्माध्यासस्य चोदाहरणे। नैसर्गिकः इत्यनेनाध्यासस्य अनादित्वं प्रकटितम्। लोकव्यवहारः इत्यत्र 'लोकपदेन लोक्यत इति लोकः'

In Public domain. Digitization Muthulakshmi Research Academy

इतिव्युत्पत्त्या अर्थाध्यासस्य स्वरूपमाविष्कृतम्। एवमभिमानार्थकेन व्यवहारपदेन 'व्यवहरणं व्यवहारः' इति भावव्युत्पत्त्या ज्ञानाध्यास उक्तः। 'अत्यन्तविविक्तयोः धर्मधर्मिणोः' इत्यस्य अत्यन्तभिन्नयोरित्यर्थः। धर्मधर्मिणोरित्यत्र भाष्ये 'धर्मश्च धर्मी च धर्मधर्मिणौ' इति तु विग्रहः स्वीकर्तुं न शक्यते। यतः अन्योन्यात्मकतामित्यनेनावश्यमन्वयः स्वीकर्तव्यः। द्विविधाध्यासनिरूपणप्रसङ्गे तत्रापि धर्म्यध्यासनिरूपणसन्दर्भे एव धर्मिणोरेवान्योन्यात्मकता विवक्षिता। न तु धर्मधर्मिणोः। एवं धर्माध्यासनिरूपणसन्दर्भे धर्मयोरेवान्योन्यात्मकता। अतः उभयविधाध्याससंग्रहाय धर्माणां धर्मिणोरिति षष्ठीतत्पुरुषव्युत्पत्तिः आस्थेया। एवं च जाड्यचैतन्यादिधर्माणां धर्मिणोः अहङ्कारात्मनोः परस्परभिन्नयोः इत्यर्थः पर्यवस्यति। एवं चविषयविषयिणावत्यन्तभिन्नौ, तथापि तयोः मिथ्याज्ञानं निमित्तीकृत्य, सत्यानृते मिथुनीकृत्य अध्यासव्यवहारः प्रवर्तते। धर्माध्यासनिरूपणसन्दर्भे तु अनृतत्वजाड्यादिधर्माणां, सत्यज्ञानत्वादिधर्माणां अत्यन्तविविक्तानाम् अन्योन्यात्मकतया अध्यासः। (र.प्र.पृ.9.)पूर्णानन्दीयम् पृ.34.

ननु विविक्तयोः विषयविषयिणोर्धर्मिणोरित्येवालम्। अत्यन्तत्वस्य विविक्तविशेषणत्वं किमर्थम्? 'सोऽय'मिति प्रमायाः अध्यासत्ववारणमेव फलम्। अन्यथा तदेतत्कालभेदेन एकस्यैव

In Public domain. Digitization Muthulakshmi Research Academy
देवदत्तस्य द्वधा ग्रहणात्स्वरूपैक्यवति, वस्तुतो भेदाभाववति देवदत्ते भिन्नत्वस्य ग्रहणात्, तदभाववति तत्प्रकारकज्ञानत्वेन भ्रमत्वापत्तिः। अतः अत्यन्तभिन्नयोः इत्युक्तम्। कालभेदस्य अत्यन्तभेदानात्मकत्वात्, 'सोऽय'मिति वाक्यस्य न भ्रमत्वम्, न वा अध्यासत्वम्, किन्तु प्रमात्वमेव ।

ननु धर्मधर्मिणोः परस्पराध्यासकथनेनैव धर्माध्यासस्यापि सिद्धौ,पृथग्भाष्यकृद्भिः किमर्थम् 'अन्योन्यधर्मांश्च' इत्युक्तमिति चेत् धर्म्यध्यासस्यास्फुटत्वेऽपि, धर्माध्यासो भवतीति ज्ञापनार्थम्। यथा 'अन्धोऽहम्' इत्यत्र इन्द्रियधर्मः आन्ध्यं आत्मन्यध्यस्यते। किंतु तत्र चक्षुषि धर्मिणि इन्द्रिये आत्माध्यासः अस्ति। परं स्फुटतया न प्रतीयते। 'अहं चक्षु' रिति व्यवहाराभावात्। अतः तादृशधर्माध्यासस्यास्फुटत्वेऽपि, आत्मनि आन्ध्यधर्माध्यासार्थं 'पृथग्धर्मांश्च अध्यस्य' पृथग्धर्माध्यासः भाष्यकारैर्निरूपितः। (र.प्र.पृ.9.)

ननु सत्यानृते मिथुनीकृत्यइत्युक्तं भाष्ये। तत्किमर्थमित्युक्ते शून्यवादनिरासार्थम्। अन्यथा अत्मनि अनात्माध्यासे, अनात्मनि आत्माध्यासे च द्वयोरन्योन्येनापहारात् शून्यमेव परिशिष्यत इति, शून्यवादप्रसङ्गः। अतः सत्यानृते इत्युक्तम्। आत्मनः सत्यत्वेन, अनात्मनः अनृतत्वेन च शून्यवादस्यावकाशाभावात्। सत्यमनिदं चैतन्यम्। तस्य च आत्मनि संसर्गाध्यास एव स्वीक्रियते, न तु

In Public domain, Digitization Muthulakshmi Research Academy
स्वरूपतः अध्यासः, येन शून्यवादप्रसङ्गः स्यात्। अनृतं युष्मदर्थः। तस्य स्वरूपतोऽपि, अर्थात् स्वरूपेण तादात्म्येन चाध्यासः। एवमात्मानात्मनोः मिथुनीकरणान्न शून्यवादः। (र.प्र.पृ.9,10.)

ननु भाष्ये अध्यस्य मिथुनीकृत्य, लोकव्यवहारः इति पदत्रयमुपयुक्तम्। पदत्रयेणाप्यध्यास एव प्रकाशितः। अध्यस्य मिथुनीकृत्य इति क्त्वाप्रत्ययादेशः ल्यप् प्रत्ययः श्रूयते। "समानकर्तृकयोः पूर्वकाले" इति(पा.सू. 6.4.21) पूर्वकालार्थे क्त्वाप्रत्ययः अनुशिष्टः। व्यवहारशब्दबोध्याध्यासपूर्वकालत्वम् अध्यासमिथुनीकरणशब्दशब्दितयोः अध्यासयोः कथं सम्भवति। सर्वेषामध्यासानामैक्यात्, स्वपूर्वकालत्वस्य स्वस्मिन्नभावाच्च इति चेत् अध्यासव्यक्तिभेदादध्यासभेदोपपत्तेः। अत एव पूर्वपूर्वाध्यासस्य उत्तरोत्तराध्यासं प्रति संस्कारद्वारा हेतुत्वात्, तद्योतनार्थमेव अध्यस्य, मिथुनीकृत्य, इति ल्यप् प्रत्ययद्वयस्य प्रयोगः। 'नैसर्गिकोऽयं लोकव्यवहारः' इत्यत्र अध्यासस्य नैसर्गिकत्वं वर्णयद्भिः भाष्यकारैः अध्यासस्यानादित्वमेवाभिप्रेतम्। यद्यपि इदानीमुत्पद्यमानस्य कार्याध्यासस्य अनादित्वं नास्ति, तथापि प्रवाहानादित्वात्, तस्याप्यनादित्वम्। प्रवाहानादित्वेऽपि, प्रवाहस्य प्रवाहिणा अव्यतिरिक्तत्वात्, प्रवाहस्याप्यनादित्वं वक्तुं नशक्यम्, तथापि अनात्मन्यात्माध्यसे क्रियमाणे आरोप्यस्यानात्मनः सिद्धेः, पूर्वाध्याससापेक्षत्वात्, तस्यापि

In Public domain. Digitization Muthulakshmi Research Academy
स्वपूर्वापेक्षत्वात्, कारणीभूताध्याससामान्यगतं अनादित्वं कार्ये अध्यासे आरोप्य अनादिरध्यास इत्युच्यते। एतदेवोक्तं रत्नप्रभायाम् "अध्यासत्वावच्छिन्नव्यक्तीनां मध्ये अन्यतमया व्यक्त्या विना अनादिकालस्यावर्तनं (न सम्भवतीति) कार्यानादित्वमित्यङ्गीकारात्। "(र.प्र.पृ.10.) इति। एवं च आरोप्यसिद्धिहेतुभूतस्य पूर्वपूर्वाध्यासस्य सत्त्वात्, कारणाभावादध्यासो नास्तीति कल्पः परास्तः। मिथ्याज्ञाननिमित्तः इत्यत्र निमित्तपदमुपयुञ्जानैः भाष्यकारैः नैसर्गिकपदेन च अध्यासनिमित्तः संस्कारः सूचितः। न च अध्यासं प्रत्यनुभवजन्यसंस्कारस्य हेतुत्वे स्वीक्रियमाणे पूर्वपूर्वप्रमाजन्यसंस्कारस्यैव अध्यासहेतुत्वे, अध्यासप्रमायाः अभावात्, अध्यासं प्रति कारणीभूतस्य प्रमाहितसंस्कारस्य सुतरां दुर्लभत्वेन कथमध्यास? इति वाच्यम्। पूर्वप्रमाजन्यसंस्कारस्य अध्यासं प्रति हेतुत्वकल्पनापेक्षया पूर्वानुभवजनितसंस्कारस्यैव अध्यासं प्रति कारणत्वकल्पने लाघवात्। यतो हि प्रमा नाम यथार्थानुभवः। अध्यासं प्रति संस्कारस्य जनकतायाः अवच्छेदककुक्षौ यथार्थत्वघटितानुभवत्वरूपप्रमात्वनिवेशापेक्षया लाघवादनुभत्वस्यैव निवेशात्, अनुभवाहितसंस्कारेणाप्यध्यास-निष्पत्तेः। अतश्च पूर्वाध्यासानुभवाहितसंस्कारस्यापि अध्यासहेतुत्वं सुस्थम्। (र.प्र.पृ.10)

In Public domain. Digitization Muthulakshmi Research Academy

मिथ्याज्ञाननिमित्तः- मिथ्या च तदज्ञानं च मिथ्याज्ञानम्। नाम अविद्या। तन्निमित्तोऽध्यास इत्युक्ते, तदुपादानकोऽध्यासः इत्यर्थः स्वीक्रियते। अध्यासस्याविद्यापरिणामत्वात्। किञ्च निमित्तपदेन निमित्तकारणमपि गृह्यते। अज्ञानस्य अध्यासोपादानत्वेऽपि संस्फुरदात्मतत्त्वावारकतया दोषत्वेन निमित्तत्वम्। किं च अहङ्काराध्यासकर्तुः ईश्वरस्योपाधित्वेनापि निमित्तत्वम्। शुद्धाद्ब्रह्मणः अध्यासस्यानिष्पत्तेः। अज्ञानस्य च संस्कार-काल-कर्मादिनिमित्तरूपेण परिणामित्वात्, अविद्याख्यस्याज्ञानस्य निमित्तत्वम्। स्वप्रकाशात्मनः असङ्गत्वात्, तत्र अज्ञानसंसर्गः कथमिति शङ्कायाम् अज्ञानविशेषणतया मिथ्यापदमुपयुक्तम्। गगनतले मार्ताण्डमण्डले प्रचण्डं प्रकाशमानेऽपि, पेचकस्य (उलूकस्य) अन्धकारानुभवः अत्यन्तं प्रसिद्धः। तद्वत्स्त्वप्रकाशात्मनोऽपि, अप्रकाशाज्ञानसंसर्गः। अत एव अहमज्ञः इत्यनुभवसिद्धमज्ञानं दुरपह्नवम्। न च तथापि ज्ञानाज्ञानयोः परस्परविरुद्धत्वात् कथं ज्ञानस्वरूपेणात्मना अज्ञानस्य संसर्ग इति वाच्यम्। कल्पितस्या धिष्ठानाऽस्पर्शित्वात्, अधिष्ठानेनात्मना सङ्गं विना अज्ञानस्य वृत्तौ बाधकाभावात्। नित्यस्य स्वरूपज्ञानस्य कल्पितेनाविरोधित्वाच्च। (र.प्र.पृ.10.)

रत्नप्रभोदाहृतानि अज्ञानलक्षणानि-1. मिथ्याज्ञानमज्ञानम्। आज्ञानमित्युक्ते 'ज्ञानाभावः'-इति वदतां तार्किकाणां मतमपि ग्राह्यं

In Public domain. Digitization Muthulakshmi Research Academy
प्रसज्येत। अतः मिथ्येति पदम्। तन्मतेऽभावस्य सप्तपदार्थेष्वन्यतमत्वेन सत्यत्वमेव न मिथ्यात्वम्। अस्मन्मते तु अज्ञानस्याभावरूपस्योपादानत्वासम्भवात्, भावरूपं जगदुपादानं कल्पितमिति मिथ्या।

2.मिथ्याज्ञानमित्यज्ञानस्य लक्षणम्। तच्च 'मिथ्यात्वे सति साक्षात् ज्ञाननिवर्त्यत्व'स्वरूपम्। केचित् ज्ञानानन्तरमिच्छायाः जायमानत्वात्, ज्ञानेनैव ज्ञानप्रागभावः इच्छाप्रागभावश्च नश्यतीति कथयन्ति। तन्मते इच्छाप्रागभावे साक्षात् ज्ञाननिवर्त्यत्वमस्ति। अतः मिथ्यात्वे सतीत्यज्ञानलक्षणे निवेशितम्। इच्छायां तन्मते मिथ्यात्वस्याभावान्नातिव्याप्तिः। बन्धे ज्ञाननिवर्त्यै अज्ञानात्मके मिथ्याभूते अतिव्याप्तिवारणाय साक्षादिति पदम्। बन्धस्य च कर्तृत्वभोक्तृत्वादेः ज्ञानेन अज्ञाननिवृत्तिद्वारैव निवर्त्यत्वान्नातिव्याप्तिः।

3.'अनाद्युपादनत्वे सति मिथ्यात्वं वा' इत्यज्ञानस्य लक्षणान्तरम्। मायायाम् अनादित्वम्, उपादानत्वम् जगदुपादानत्वम्, मिथ्यात्वं चास्तीति लक्षणसमन्वयः। अनाद्युपादानत्वमात्रोक्तौ ब्रह्मण्यतिव्याप्तिः। अतः मिथ्यात्वं ब्रह्मनिरासार्थम्। उपादानत्वे सति मिथ्यात्वमित्युक्तौ सादौ मृदादावतिव्याप्तिः। अतः अनादीति। अनादौ अनुपादाने

अविद्यातच्चितोर्योगे अनादित्वस्य, मिथ्यात्वस्य च सत्त्वात् अतिव्याप्तिः। अतः उपादानत्वमिति पदम्। (र.प्र.पृ.10,11.)

अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार-इत्यस्य व्याख्या:- आध्यात्मिककार्याध्यासेषु अहमित्याद्योऽध्यासः। न च सिद्धान्ते आत्मनः अहंशब्दबोध्यत्वात्, अहमित्यस्य निरंशत्वेनारोप्यास्फूर्तेः कथमध्यास? इति वाच्यम्। 'अयो दहति' इत्यादाविव, 'अहमुपलभे' दृग्दृश्ययोः आध्यासिकसम्बन्धोपलम्भात्। केवलायसः दग्धृत्वसम्बन्धायोगात्, वह्नितादात्म्यापन्नस्य दग्धृत्वं प्रतिपाद्यते। अयसि वह्नितादात्म्याध्यसात् दग्धृत्वम्। वह्नौ च अयस्तादात्म्याध्यासात्, वह्नेः चतुष्कोणाद्याकृतिमत्त्वम्। एवं तत्र परस्पराध्यासः। तथा 'अहमुपलभे' इत्यत्र चित्संसर्गाध्यासादेव जडस्य अहंशब्दवाच्यस्याहङ्कारस्य बुद्धेः वृत्तिरूपोपलब्ध्या श्रयत्वम्। अहंशब्दबोध्यात्मनस्तु तादात्म्येनाहङ्कारे अध्यासः। अत एवाहङ्कारस्य व्यवहारयोग्यत्वम्। एवं च अदग्धृत्वेनावस्थिते अयसि तादात्म्याध्यासेन वन्हितादात्म्यस्येव, निरंशे अहमर्थे आत्मनि कल्पितसांशत्वस्य अहंकारात्मना सत्त्वात्, अहमिति प्राथमिकाध्यासोपपत्तिः। आरोप्यस्याहङ्कारस्य स्फुटता तु 'अहमुपलभे' इत्यादिव्यवहारात् सिद्धयति, 'अयो दहतीति व्यवहारात् अधिष्ठानेऽयसि वह्निरूपारोप्यादेरिव। 'अहमिदम्' इत्यत्र

In Public domain. Digitization Muthulakshmi Research Academy
इदम्पदेन भोग्यः शरीरादिसङ्घातः उच्यते। तत्र शरीरादौ अहम्पदबोध्यस्य संसर्गिणः अहङ्कारस्य अध्यासे आध्यासिक-तादात्म्यं सिध्यति। अत्राहमिदम् इति रत्नप्रभायां(पृ.11.) अत्रेति स्थलविशेषनिर्देशार्थः आभाति, न तु व्यवहारघटकः। भाष्यकारेण 'मनुष्योऽहम्' इति धर्मितादात्म्याध्यासः दर्शितः आभाति। इदमहमित्यत्र तु अहङ्कारतादात्म्येनाध्यस्तस्य आत्मनः संसर्गः भेदप्रधानतादात्म्यलक्षणः शरीरे स्फुटतया अवभासते। (र.प्र.पृ.11.)

ननु देहात्मनोः अहङ्कारतत्तादात्म्यपन्नशरीरयोश्च तादात्म्यमेव यदि संसर्गः, तर्हि धर्म्यध्यासधर्माध्यासयोरुभयोरपि, तादात्म्यस्यैव संसर्गस्य भानात्, कथं तयोर्भेदः इति चेत्, उच्यते। भेदसहिष्णुरभेद स्तादात्म्यम्। किं तु तत् क्वचित् अभेदप्रधानम्। तत्र अहमिदमिति धर्म्यध्यासे इदम्पदबोध्ये शरीरे धर्मिणि अहम्पदबोध्यस्यात्मनः धर्मिणः अभेदप्रधानतादात्म्येनाध्यासः। ममेदम् इति धर्माध्यासे तु अहंतादात्म्यापन्नात्मनः इदमर्थे शरीरे भेदप्रधानतादात्म्येन संसर्गेणाध्यासः इति भेदोऽवसेयः। एतदेव रत्नप्रभाकृता प्रकारान्तरेणोक्तम्। 'सत्तैक्ये सति मिथो भेदस्तादात्म्यम्' (र.प्र.पृ11.) इति। अयमाशयः। 'ममेदं शरीरमि'ति धर्माध्यासे अधिष्ठानस्य शरीरस्य स्फूर्त्यर्थम् अभेदप्रधानात्मतादात्म्यसंसर्गाध्यासः यद्यप्यस्ति, तथाऽपि

In Public domain. Digitization Muthulakshmi Research Academy
मदीयत्वभानार्थं शरीरे आत्माभेदापेक्षया अपि, आत्मसम्बन्धप्रयुक्तभेदसंसर्गांश एव अधिकतया भासते। 'मनुष्योऽहम्' इत्यादौ तु अभेदप्रधानतादात्म्यमेव। यद्यपि रत्नप्रभाकृता 'सत्तैक्ये मिथो भेदः' इत्येवोक्तम्, तथाऽपि मनुष्योऽहम् इत्यैक्यांशभानम्, इति तदीयविवरणात् मिथो भिन्नत्वे सत्यैक्यमिति तादात्म्यलक्षणान्तरमप्यूह्यम्। एवंच सामग्र्याः सत्त्वात्, अनुभवस्य च सत्त्वात्, अध्यासोऽस्तीति, ब्रह्मात्मैक्ये बाधाभावेन विषयप्रयोजनयोः सत्त्वात्, शास्त्रमारम्भणीयमित्यध्याससिद्धान्त-भाष्यम्। (र.प्र.पृ.11)

अध्यासलक्षणभाष्यम्--

शा.भा.-आह कोऽयमध्यासो नामेति ।उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

र.प्र.प्र.-ब्रह्मजिज्ञासासूत्रेण अर्थात्सूचिते विषयप्रयोजने प्रतिपाद्य, एतावत्पर्यन्तं तत्सिद्धिहेतुभूताध्यासा क्षेपसमाधाने अभिहिते। इदानीं भाष्यकारः लक्षणसम्भावनाप्रमाणैः तमेवाध्यासं साधयिष्यन् लक्षणं पृच्छति आह इत्यादिना। आह इति परोक्तिसूचकश्शब्दः। स च तत्त्वनिर्णयप्रधानेऽस्मिन् शास्त्रे वादिकथात्वद्योतकः। तत्त्वबुभुत्सोः कथा वादः। वादिकथाप्रसङ्गेन हि तत्त्वनिर्णयो भवति। अतः कोऽयमध्यासः? इति प्रश्नः क्रियते। किं लक्षणकः अध्यासः? इति प्रश्नवाक्यस्याभिप्रायः। उच्यते इत्यादिना भाष्ये "स्मृतिरूपः

In Public domain. Digitization Muthulakshmi Research Academy
परत्र पूर्वदृष्टावभासः"- इति वाक्येन लक्षणमुक्तम्। लक्षणवाक्ये लक्ष्यनिर्देशः यदि न क्रियेत, तर्हि कस्येदं लक्षणमिति? शङ्कैव न स्यात् नहि 'गन्धवती' इति कथनमात्रेण, 'पृथिवी'-इति लक्ष्यनिर्देशस्याभावे पृथिव्याः गन्धवत्त्वं लक्षणमिति ज्ञायते । तद्वत् अध्यासलक्षणवाक्ये अध्यास इति लक्ष्यबोधकपदं विना लक्षणत्वाप्रतीतेः, "कोऽयमध्यासो नाम" इति पूर्ववाक्यात्, अध्यास इति पदमनुषङ्गरूपेण सम्बध्यते। अत्र च लक्षणवाक्ये' परत्रावभासः' इत्येवाध्यासलक्षणम्। शिष्टं 'स्मृतिरूपः', 'पूर्वदृष्ट' इति पदद्वयं तु अद्वैतिमतानुसारेण लक्षणोपपादकम्। तत्र 'अवभास्यत' इत्यवभासः इति कर्मव्युत्पत्त्या अवभासविषयः रजतादिः अवभासपदार्थः। अयमेव अर्थाध्यास इत्युच्यते। अवभासनमवभासः इति भावव्युत्पत्त्या तु ज्ञानाध्यासो लभ्यते। अवभासो नाम 'अवसन्नः अवमतो वा भासः' इति भामतीकाराद्युक्तव्युत्पत्त्या, प्रत्ययान्तरबाध एव यस्य ज्ञानस्यास्ति, तद् ज्ञानं अवभासः अथवा अध्यास इत्युच्यते। परत्र इत्यनेनाधिकरणस्यायोग्यत्वं प्रतिपाद्यते। अयोग्यत्वं चाधिकरणस्य आरोप्यात्यन्ताभाववरूपत्वम्, आरोप्यात्यन्ताभाववत्त्वं वा। शुक्तौ विद्यमानस्य रजतात्यन्ताभावस्य अभावानामधिकरणात्मकत्वमिति सिद्धान्तानुसारेण अधिकरणीभूतशुक्तिस्वरूपत्वम्। तत्र अधिकरणशुक्तेः शुक्त्यात्मना स्वरूपयोग्यत्वेऽपि, रजताभावात्मना

अयोग्यत्वम्, अभावस्य तुच्छत्वेनायोग्यत्वात्। अभावस्य पृथक्पदार्थत्ववादिनां नैयायिकानां मते तु आरोप्यरजतकाले शुक्तौ रजताभावत्वमधिकरणस्यायोग्यत्वमिति वक्तव्यम्, तथापि तन्मते अभावस्य पृथक्त्वेनाधिकरणानात्मकत्वात्, इन्द्रिययोग्यत्वाच्च स्वरूपतः अधिकरणस्यायोग्यत्वाभावः। तथा च यत्र एकावच्छेदेन आरोप्यसंसर्गकाले आरोप्यान्ताभाववति यः अवभास्यते सः अर्थाध्यासः। इदमेव रत्नप्रभायाम् "एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यवभास्यत्वमध्यस्तत्वम्"(र.प्र.पृ.11.) इत्यर्थाध्यासस्य लक्षणमुक्तम्। स्वसंसृज्यमाने इत्यस्य स्वसंसर्गकाले इत्यर्थः। अत्र च लक्षणे सर्वत्र स्वपदेन आरोप्यं रजतादिकं गृह्यते। शुक्तौ इदन्त्वावच्छेदेन रजताध्यासात्, एकावच्छेदेन इत्यनेन, इदन्त्वावच्छेदेन इत्यर्थौ ग्राह्यः। वेदान्तिमतेनैयायिकमत इव आपणस्थरजतस्य भानास्वीकारात्, अनिर्वचनीयरजतभानस्यैव स्वीकारात्, शुक्तौ अनिर्वचनीयरजतकाले, वस्तुतः रजताभावस्यापि सत्त्वात्, तादृशरजताभाववत्यां शुक्तौ रजतस्यावभास्यत्वेन एकावच्छेदेनेत्याद्यर्थाध्यासलक्षणसमन्वयः।(र.प्र.पृ.11.)

इदञ्च साद्यहङ्काराध्यासस्य अनाद्यविद्याचित्सम्बन्धादेरप्याध्यासस्य च साधारणं लक्षणम्। वेदान्तिमते च अनादयः षट् पदार्थाः।

In Public domain. Digitization Muthulakshmi Research Academy

"जीव ईशो विशुद्धा चित्, तथा जीवेशयोर्भिदा।
अविद्यातच्चितोर्योगः षडस्माकमनादयः"।।इति।

अध्यासलक्षणदलसार्थक्यम्- लक्षणे एकावच्छेदेन इत्यस्याभावे अग्रावच्छेन कपिसंयोगकाले मूलावच्छेदेन तदभाववति वृक्षे कपिसंयोगस्यावभास्यत्वेन व्यावहारिकस्य अव्याप्यवृत्तिकपि-संयोगादेरपि अध्यस्यमानत्वापत्तिः। अतः एकावच्छेदेनेति। तत्र भिन्नदेशावच्छेदेनैव कपिसंयोगतदभावयोरवभास्य सत्त्वात्, नातिव्याप्तिः। पूर्वं स्वाभाववति पश्चादानीतघटवति भूतले विद्यमानघटे अध्यस्तत्ववारणाय स्वात्यन्ताभाववतीति दलम्। तत्र इदानीं घटसंसर्गकाले घटाभावस्याभावात्, पूर्वमेव घटाभावस्य सत्त्वात्, स्वसंसर्गकाले स्वात्यन्ताभाववतीति विशेणम्। अध्यासलक्षणे स्वात्यन्ताभाववति इत्यस्याभावे भूतत्वावच्छेदेन अवभास्यगन्थे अध्यस्तत्वापत्तिः। पृथिवीभूतस्य पञ्चीकरणप्रक्रियया इतरभूतेषु संमेलने पार्थिवगन्थस्य जलादिभूतान्तरेष्वप्यव-भास्यत्वेन, एकावच्छेदेन भूतत्वावच्छेदेन पञ्चीकरणप्रक्रियया स्वसंसर्गकाले जलादौ गन्थस्य अवभास्यत्वस्य सत्त्वात्, अर्थाध्यासलक्षणस्य व्यावहारिके गन्थादौ सत्त्वादतिव्याप्तिः। अतः स्वात्यन्ताभाववतीति विशेषणम्। न च तत्राध्यासः इष्ट एवेति वाच्यम्। आब्रह्मज्ञानं जलादौ पञ्चीकरणप्रक्रियया भासमानगन्थस्याबाध्यत्वात्। (र.प्र.पृ.11.)

In Public domain. Digitization Muthulakshmi Research Academy

ननु स्वसंसर्गकाले इति दलघटिताध्यासलक्षणस्य अध्यस्यमानरजते असम्भवः। न हि शुक्तौ रजतसंसर्गकाले रजतभासिका सामग्री काचिदस्ति। न च ज्ञानलक्षणाप्रत्त्यसत्त्या शुक्तौ आपणस्थं रजजतं भातीति वाच्यम्। ज्ञानलक्षणाप्रत्तयासत्तेरभ्युपगमे, तया प्रत्त्यासत्त्या जीवस्य किंचिद्ज्ञस्यापि, सर्वज्ञत्वापत्तेः। यदि आपणस्थमेव रजतं शुक्तौ प्रतिभायात्, तर्हि शुक्तेरापणस्थरजतत्वेन भानात्, नैयायिकसम्मतान्यथाख्यातिप्रसङ्गः। स्वमतसिद्धानिर्वचनीय-ख्यातिभङ्गश्च। अतः अनिर्वचनीयरजतोत्पत्तिसामग्री वाच्या। तदर्थमेव स्मृतिरूपः इति दलं लक्षणे निवेशितम्। 'स्मर्यत इति स्मृतिः' इति कर्मव्युत्पत्त्या स्मर्यमाणः सत्यरजतादिः स्मृतिशब्दार्थः। स्मृतेःरूपमिवरूपमस्य इति विग्रहः। स्मर्यमाणसदृशः इत्यर्थः। एवं चाध्यासे अध्यस्ततया भासमानं रजतं स्मर्यमाणसत्यरजतसदृशमेव, नतु सत्यरजतम्। एवं च आपणस्थसत्यरजतस्य अध्यासे अभानात्, नान्यथाख्यातिप्रसङ्गः। सादृश्योक्त्या स्मर्यमाणात् आरोप्यस्य भेदात्। सादृश्यमेवानिर्वचनीयरजते कथमित्युपपादनाय अवभासस्य पूर्वदृष्ट इति विशेषणम्। पूर्वं दृष्टं पूर्वदृष्टम्। अत्र दृष्टपदं "नपुंसके भावे क्तः" (पा.सू.3.3.114) इत्यनुशासनात्, भाववाचकं न तु कर्मवाचकम्। पूर्वदर्शनादवभास्यत इत्यर्थः। पूर्वदर्शनं च

In Public domain. Digitization Muthulakshmi Research Academy
सत्यरजतसंस्कारद्वारा अनिर्वचनीयरजतोत्पादकम्। संस्कारजन्य-ज्ञानविषयत्वं च स्मर्यमाणसत्यारोप्ययोः सादृश्यमुक्तं भवति। स्मृत्यरोपयोर्द्वयोरपि संस्कारजन्यत्वात्। न चैवमध्यासस्य संस्कारजन्यत्वात्, स्मृतेरपि तादृशत्वेन, स्मृत्यध्यासयोरै-क्यापत्तिरिति वाच्यम्। उभयत्र संस्कारस्य साधारणकारणत्वेऽपि, अध्यासे दोषसम्प्रयोगाणामसाधारणकारणत्वेनाभ्युपगमात्, संस्कारमात्रजन्यज्ञानत्वलक्षणस्मृतित्वस्याध्यासे अभावात् नातिव्याप्तिः। सम्प्रयोगशब्दस्य इन्द्रियार्थसन्निकर्षः इति सामान्यतोऽर्थः। किन्तु आत्मन्यहङ्काराध्यासे साक्षिभास्ये अहङ्कारे इन्द्रियार्थसन्निकर्षाभावात्, अधिष्ठानसामान्यज्ञानमेव सम्प्रयोगशब्दार्थः। रजताध्यासे इदमंशरूपाधिष्ठानसामान्यज्ञानस्य सत्त्वात्, अहङ्काराध्यासे चाधिष्ठानात्मज्ञानस्य सत्त्वात्, अध्यासोपपत्तिः। एवं च शुक्तिरजताध्यासे चाकचिक्यादेर्दोषस्य, अधिष्ठानसामान्यज्ञानस्य, सत्यरजतसंस्कारस्य च बलाच्छुक्त्यादौ रजतमुत्पन्नमिति, परत्र परावभास्यत्वलक्षणाध्याससङ्गतिः। स्मृतिरूपपूर्वदृष्टपदाभ्यां च मिलित्वा एतदेवोपपादितम्। (र.प्र.पृ.11-13.)

अन्ये तु – 'दोषादित्रितयजन्यत्वं कार्याध्यासस्य लक्षण'मित्याहुः। अनादौ आत्मनि अविद्याध्यासे च अनादित्वेन जन्यत्वघटितलक्षणाप्रवृत्तेः। (र.प्र.पृ.11)

In Public domain. Digitization Muthulakshmi Research Academy

अपरं तु- 'स्मृतिरूपः स्मर्यमाणसदृशः परत्र परावभासः अध्यासः'। तत्र च सादृश्यं कथमित्युक्ते प्रमाणाजन्यज्ञानविषयत्वेन। स्मृत्यारोपयोः प्रमाणाजन्यत्वात्। पूर्वदृष्टपदं तु पूर्वदृष्टजातीयपरम्। तथा च 'प्रमाणा जन्यज्ञानविषयत्वे सति पूर्वदृष्टजातीयत्वं' प्रातीतिकाध्यासलक्षम्। परत्रावभास इति तु अध्याससामान्यलक्षणम्। एवं च प्रातीतिकव्यवहारिकोभयविधाध्यासलक्षणं पूर्वोक्तरीत्या उक्तं भवति। परत्र पूर्वदृष्टात् अवभासः अवभासः इत्येतावन्मात्रोक्तौ अभिनवघटादौ अतिव्याप्तिः। प्रत्यक्षविषयघटादेरपि घटत्वेन ज्ञानार्थं पूर्वदर्शनजन्यसंस्कारस्यापेक्षितत्वात्। अतः प्रमाणाजन्यज्ञानविषयत्वम्। प्रत्यक्षविषयघटादौ प्रमाणजन्यज्ञान-विषयत्वस्यैव सत्त्वात् नातिव्याप्तिः। प्रमाणाजन्यज्ञान-विषयत्वमात्रोक्तौ, स्मर्यमाणगङ्गायां प्रमाणाजन्यज्ञानविषयत्वेन तत्रातिव्याप्तिः स्यात्। अतः पूर्वदृष्टजातीयत्वम्। स्मर्यमाणगङ्गायां पूर्वदृष्टत्वस्यैव सत्त्वात्, पूर्वदृष्टजातीयत्वस्या भावात्, नातिव्याप्तिः। एतन्मतानुसारेणैव ज्ञानाध्यासस्य लक्षणे वक्तव्ये, स्मृतिसदृशः पूर्वदर्शनादवभासः इति लक्षणं वक्तव्यम्। अर्थाध्यासलक्षणे तु स्मर्यमाणसदृशः परत्र पूर्वदर्शनात् अवभास्य इति योजना कर्तव्या। (र.प्र.पृ.13.)

नैयायिक-बौद्ध-मीमांसक-शून्यवादिनां अध्यसलक्षणानि-

In Public domain. Digitization Muthulakshmi Research Academy
शा.भा.-तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्तद्विवेकाग्रह निबन्धनो भ्रम इति। अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति। सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति।

र.प्र.प्र.-भ्रमस्थले तत्तद्दार्शनिकाः पञ्चख्यातिष्वन्यतमां ख्यातिं स्वीकुर्वन्ति।

"आत्मख्यातिरसत्ख्यातिरन्यथाख्यातिरेव च।
तथाऽनिर्वचनीयख्यातिरख्यातिः ख्यातिपञ्चकम्"।।इति।

तत्र अन्यथाख्यातिवादिनः नैयायिकाः। आत्मख्यतिवादिनस्तु माध्यमिकातिरिक्ताः बौद्धाः। असत्ख्याति वादिनस्तु शून्यवादिनो माध्यमिकाः। अख्यातिवादिनस्तु मीमांसकाः। अनिर्वचनीयख्यातिवादिनस्तु अद्वैतवेदान्तिनः। एवं दार्शनिकेषु बहुधा विप्रतिपत्तेः दर्शनात्, कथं स्मृतिरूप इत्यध्यासलक्षणस्य सिद्धिः? इत्याशङ्क्य दार्शनिकेषु आरोप्याधिष्ठानस्वरूपे सत्यपि विवादे 'परत्र परावभासः' इति सामान्यस्वरूपे नास्ति विवादः इत्युच्यते। युक्तिभिश्च सत्याधिष्ठाने मिथ्यार्थावभासः सर्वतन्त्रसिद्धः। अत इदं सर्वमतसम्मतमध्यास-लक्षणमिति मत्वा अन्यथाख्यातिवादिनां मतानुसारेण अध्यासलक्षणमाह भाष्यकारःआह। (र.प्र.पृ.13)

In Public domain. Digitization Muthulakshmi Research Academy

अन्यथाख्यातिवादिनैयायिकमतम्-1.तम्-अध्यासम्,

केचित् नैयायिकाः, अन्यत्र शुक्त्यादौ, अन्यधर्मा ध्यासम् रजतधर्मस्य रजतत्वस्य अध्यासं वदन्ति। शुक्तौ रजतभानसामग्र्ययोगात्, आपणस्थस्य रजतस्य, तद्गतधर्मस्य वा समारोपः शुक्तौ क्रियते। शुक्तेः अन्यथा रजतत्वेनान्येन प्रकारेण भानात्, अन्यथाख्यातिरिति तेषां वादस्य नाम। किन्तु आपणस्थरजतस्य शुक्तौ भानाभ्युपगमे, रजतस्य इदन्त्वेन अवगाहिनी इदं रजतमिति प्रतीतिर्नोपपद्येत इत्यस्वरसः वदन्तीति कथयद्भिर्भाष्यकारैस्सूचितः।

2.क्षणिकविज्ञानवादिबौद्धमतेनाध्यासः-

माध्यमिकातिरिक्ताः बौद्धास्तु विज्ञानमेव रजताकारं धरत् इदं रजतमित्यध्यासेभातीत्याहुः। बाह्ये शुक्त्यादौ बुद्धिरूपात्मनः धर्मस्यान्तरस्य रजतस्य तद्भावमभ्युपगच्छन्ति। तच्च भ्रमकाले बहिरिवावभासते। इदं रजतमिति प्रतीतेः 'नेदं रजतम्' इति पाश्चात्येन बाधज्ञानेन बाधितत्वात्, बहिरवस्थातुमशक्तस्य रजतस्याश्रयार्थिनः बुद्धिरूपात्मधर्मत्वं कल्प्यते। एवं च बाह्ये शुक्त्यादौ बुद्धिरूपात्मनो धर्मस्य रजतस्य ख्यानादस्य वादस्यात्मख्यातिवाद इति नाम। मतेऽस्मिन् अन्यत्र बाह्ये शुक्त्यादौ अन्यधर्मस्य बुद्धिरूपात्मनः धर्मस्य भानात्, नैयायिकमतवत् अन्यथाख्यातिरिति वक्तुं शक्यते। अत एव तं

In Public domain. Digitization Muthulakshmi Research Academy
केचिदित्यारभ्यवदन्तीत्यन्तमुक्तस्य अध्यासलक्षणस्य आत्मख्यातिमतानुसारेणापि रत्नप्रभायां समन्वयो दर्शितः। (र.प्र.पृ.14.) रजतभ्रमकाले रजतस्य बाधाभावात्, कथं रजतस्य ज्ञानधर्मत्वमिति तु चिन्त्यम्।

3.**मीमांसकानामख्यातिवादः-** "यत्र यदध्यासः तद्विवेकाग्रहनिवनधनो भ्रम" इति। अख्यातिर्नाम नैकं ख्यानमित्यर्थः। 'इदं रजतम्' इत्यत्र इदमिति, प्रत्यक्षज्ञानम्। रजतमिति तु स्मृतिः। अतः यद्यपीदं ज्ञानद्वयम्, तथापि 'इदं रजतमि'ति विशिष्टव्यवहारादेव प्रवृत्तेरुत्पन्नतया वस्तुतो ज्ञानद्वयमपीदं एकमेव ज्ञानमिति भ्रमो जायते। एवमेव इदं रजतमिति इदमंशरजतयोः मध्ये रजतस्य इदमंशे अध्यासात्, अध्यस्यमानरजत-अध्यासाधिष्ठानेदमंशयोः भेदाग्रहात् भ्रमः जायते इति मीमांसकानामाशयः। भाष्यवाक्यसमन्वयस्त्वित्थम्। यत्र इदमंशे, यस्य अध्यासः लोकसिद्धः, तयोः आरोप्याधिष्ठानयोः द्वयोर्ज्ञानयोः, तद्विषययोश्च भेदाग्रहे सति, तन्मूलो भ्रमः इदं रूप्यम्, आथवा इदं रजतमिति विशिष्टव्यवहारः इति केचिद्वदन्ति। एवं मीमांसकैरपि विशिष्टव्यवहारान्थानुपपत्त्या, विशिष्टभ्रान्तेः स्वीकार्यत्वात्, परत्र परावभासः इति लक्षणं तन्मतेऽपि लगति। परं तु ज्ञानद्वयमेव भ्रमः इति तन्मतं नोपपद्यते। सर्वो हि रजतार्थी रजतं

In Public domain. Digitization Muthulakshmi Research Academy

पुरोवर्त्यवगत्यैव प्रातीतिकरजते प्रवर्तते। अतः न ज्ञानद्वयं प्रवर्तकम् इति मीमांसकैरभ्युपगन्तव्यम्। (र.प्र.पृ.14,15.)

4. **माध्यमिकानाम् असत्ख्यातिवादः**- "अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते" इति भाष्यम्। माध्यमिकाश्शून्यवादिनः सर्वं शून्यमित्यभ्युपगच्छन्ति। तन्मते शुक्तौ शून्यमत्यन्तासत् अलीकं रजतं प्रतिभाति। यत्र शुक्तौ, यदध्यासः रजतस्याध्यासः, तस्यैव तस्या एव, विपरीतधर्मः विरुद्धधर्मवान् रजतादिः, तस्य भावः विपरीतधर्मत्वम्, अलीकरजतगतरजतत्वमिति यावत्, तस्य कल्पनामाचक्षत इति शून्यवादिमतनिरूपणपरभाष्यवाक्यसमन्वयः। इदं रजतमिति शुक्तावपरोक्षस्य रजतस्य, देशान्तरे आपणादौ बुद्धौ वा सत्त्वायोगात्, रजतत्वस्यासद्रूपत्वे, प्रत्यक्षत्वायोगात्, पूर्वमतानि नादर्तव्यानि। शुक्तौ विद्यमानमेव रजतं रजतं भातीति, नेदं रजतमिति बाधबुद्धिः न प्रतीतिकाले बाधिका। पश्चात्काले बाधाच्च रजतप्रतीतेः रजतस्य च मिथ्यात्वं ज्ञायते। ननु तथाप्यारोप्यस्य मिथ्यात्वं कथं सूच्यते इत्युक्ते तस्य लोकानुभवसिद्धत्वान्नास्ति युक्त्यपेक्षा। सर्वेष्वेव मतेषु परत्र परावभासः अविशिष्टः अव्यभिचारी। (र.प्र.पृ.15.)

आरोप्यमिथ्यात्वे लोकानुभवः- लोकानुभवादेव आरोप्यस्य मिथ्यात्वम्। शुक्तिका, रजतवत् मिथ्याभूतरजतत्वेनावभासते

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिभासते। "नेदं रजतं अपि तु शुक्तिकैव" इत्यनुभवः बाधनिश्चयत्वेन पश्चान्निष्पन्नः। बाधनिश्चयात् प्राक् इदमंशस्य रजतत्वेनैव भानम्। पूर्वं तस्य शुक्तित्वेनाग्रहात्। रजतवदवभासते इति भाष्यम्। रजतवत् इति तद्धितवृत्तेः रजतेन तुल्यमिति विग्रहः। "तेन तुल्यं क्रियाचेद्वतिः"(पा.सू.5.1.115.) इति सूत्रेण शक्त्या सदृशार्थकस्यापि वतिप्रत्ययस्य लक्षणया मिथ्यारूपार्थवोधकत्वम्। वतिप्रत्ययलक्ष्यार्थस्य मिथ्यापदार्थस्य प्रकृत्यर्थे रजते, तस्य च स्वनिष्ठप्रकारतानिरूपकत्वसम्बन्धेन, अवपूर्वकभासधात्वर्थे अवभासे, आख्यातार्थस्याश्रयत्वस्य शुक्तिकायां चान्वयः। तथा च मिथ्याभूतरजतप्रकारकावभासाश्रयः शुक्तिका इति, शुक्तिका रजतवदवभासते इति वाक्यादर्थबोधः। तथा "एकश्चन्द्रः सद्वितीयवत्" इति द्वितीयमुदाहरणवाक्यम्। द्वितीयवत् इत्यनेन पूर्ववन्मिथ्याभूतद्वितीयस्य बोधः। तस्य च द्वितीयेन सहितः इति सहार्थवाचक स शब्दबोध्यार्थेन सहितेनान्वयात्, "एकश्चन्द्रः सद्वितीयवत्" इति वाक्यात्, मिथ्याभूतद्वितीयसहितः एकश्चन्द्रः इति वाक्यार्थबोधः। न च 'द्वितीयवत्' इति मिथ्याभूतद्वितीयवाचकस्य वृत्तिभावमापन्नस्य सहितवाचकेन सह इति पदेन द्वितीया वृत्तिर्नभवति, "सविशेषणानां वृत्तिर्न वृत्तस्य वा न विशेषणयोगः" इत्यनुशासनादिति वाच्यम्। द्वितीयवता सहितः इति विग्रहेण मिथ्याभूतद्वितीयस्य सहार्थे अन्वयं चास्थाय, द्वितीयवच्छब्दस्य

In Public domain. Digitization Muthulakshmi Research Academy

सहशब्देन समासात्, एकदेशान्वयाभावात्, वृत्तस्य विशेषणायोगात्, विशेष्येणैव योगाच्च। प्रकृते च "शुक्तिका हि रजतवदवभासते" इति वाक्यम् एकस्मिन्नात्मनि अहङ्काराध्यासस्योदाहरणम्। "एकश्चन्द्रः सद्वितीयवत्" इति वाक्यं तु ब्रह्मणि जीवभेदस्योदाहरणम्। यथा एक एव चन्द्रः अङ्गुलिद्वयात्मकोपाध्यवष्टम्भेण, मिथ्याभूतद्वितीयसहितो भाति, एवमेव एक एवात्मा शरीरेन्द्रियान्तःकरणभेदेन मिथ्याभूतानेकजीवसहितः प्रतिभाति। अयं चसोपाधिकाध्यासः। यद्यपि आत्मनि अहङ्काराध्यासोऽपि, अविद्यात्मकोपाधिकारणक इति सोपाधिकाध्यास इति वक्तव्यम्, तथापि "यावत्कार्यमवस्थायिभेदहेतोरुपाधिता"(पूर्णानन्दीयम् .पृ.47.) इति पूर्णानन्दीयोदाहृतवचनानुसारेण, भेदहेतोरेवोपाधित्वात्, अविद्याया ब्रह्मण इव एकत्वात्, साधारणत्वाच्च भेदहेत्वभावात्, भेदाहेतुमविद्यां पुरस्कृत्याध्यासस्य सोपाधिकत्वं नेष्यते। अतः आत्मनि अहङ्काराध्यासः निरुपाधिक एव। एवं द्विविधोऽध्यासः अनुभवानुसारेण निरूपितः। भाष्ये अन्ते, इति शब्दस्तु अध्यासलक्षणप्रकरणोपसंहारार्थः। (र.प्र.पृ.15,16.) इदानीं क्रमप्राप्ता अध्याससम्भावना निरूप्यते। (र.प्र.पृ.15-16.)

अध्याससम्भावनाभाष्यम्-

In Public domain. Digitization Muthulakshmi Research Academy
शा.भा.-कथं पुनःप्रत्यगात्मन्यविषयेऽध्यासो विषयधर्माणाम्। सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते न तावदयमेकान्ते नाविषयः, अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यवसितव्यमिति। अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यनात्माध्यासः ।

र.प्र.प्र.- ननु अध्याससामग्र्यां सत्यां जायमानस्य, लक्षणेन लक्षितस्य, अत एवात्यन्तप्रसिद्धस्य अध्यासस्य क्वास्त्यसम्भावनावकाशः? इति चेत्, विवरणप्रमेयसंग्रहे विद्यारणयस्वाम्युक्तदिशा अत्यन्तप्रसिद्धरक्तमरीचिकाप्रसव-योग्यस्य वृक्षकस्य शुद्धसात्त्विकानां निलये वाराणस्यामारोपणे जायत एव जनानामसम्भावनावकाशः। तद्वत् प्रत्यगात्मनिपरिपूर्णे विषयस्य तद्धर्माणां कर्तृत्वभोक्तृत्वादीनां कथमध्यासः इत्यसम्भावना भवति। प्रत्यगात्मनि तादृशधर्माणामध्यास एव न सम्भवति। यतः सर्वो हि पुरोऽवस्थिते इन्द्रियग्राह्ये विषये विषयान्तरमध्यस्यति। अयं भावः। “यत्र यत्र अपरोक्षाध्यसाधिष्ठानत्वम्, तत्र इन्द्रियसंयुक्तत्वम्, विषयत्वम्” चेति व्याप्तिः। अपरोक्षरजताध्यासाधिष्ठाने शुक्तौ इन्द्रियग्राह्यत्वम्,

इदन्तया ज्ञेयत्वेन विषयत्वं चास्तीति तत्र रजताध्यासो युक्तः। प्रकृते तु आत्मन्यहङ्काराध्यासे अधिष्ठानस्यात्मनः" न चक्षुषा गृह्ते" (मु.उ.3.1.8.) इत्यादिश्रुत्या, रूपादिरहितत्वेन इन्द्रियग्राह्यत्वस्याभावात्, दृग्रूपस्यात्मनः दृश्यत्वाभावात् इदम्प्रत्ययानर्हत्वेन, अधिष्ठानत्वव्यापकाभावात्, व्याप्यस्यापरोक्षाधिष्ठानत्वस्याऽप्यभावः। ततश्चप्रत्यगात्मनिविषयस्याहङ्कारादेः, तद्धर्माणां कर्तृत्वादीनां वा अध्यासः न युक्तः। न च आत्मनः अस्मत्प्रत्यगोचरत्वात् अस्त्येव विषयत्वमिति वाच्यम्। प्रागध्यासभाष्ये युष्मत्प्रत्ययगोचरस्यैव विषयत्वप्रतिपादनात्, युष्मत्प्रत्ययापेतस्य प्रत्यगात्मनः अविषयत्वप्रतिपादनात्, अधिष्ठानत्वव्यापकविषयत्वस्यात्मन्यभावात्, अध्याससम्भावनायाः अनुपपत्तेः। सम्प्रत्यध्यासलोभेन विषयत्वस्वीकारे' न चक्षुषा गृह्यते' इति श्रुतेः स्वसिद्धान्तस्य च बाधः स्यात् इति चेत् उच्यते। न तावदयमित्यादिना सम्भावनासम्भवपरं भाष्ये समाधानम्। "प्रत्यगात्मा न तावदेकान्तेना विषयः, अहम्प्रत्ययविषयत्वात्"। अहमितिप्रत्ययः यस्याध्यासस्य, तद्विषयत्वादात्मनः इत्येकोऽर्थः। अथवा अहम्प्रत्ययविषत्वात् इति भाष्यवचनस्यायमर्थः। अहं अस्मदर्थः चिदात्मा, यत्राहङ्कारे प्रतीयते प्रतिबिम्बितत्वेन, स अहङ्कारः तत्र भासमानत्वात् आत्मनः विषयत्वम्। तथा च शुद्धस्यात्मनः अविषयत्वेऽपि अहङ्कारप्रतिबिम्बितात्मनः

In Public domain. Digitization Muthulakshmi Research Academy
प्रतिबिम्बितत्वेन विषयत्वं सुलभम्। न च अध्यासे सति आत्मनः भासमानत्वम्, भासमानत्वे चात्मनोऽध्यसः, अध्यासाधिष्ठानत्वे सति भासमानत्वमिति परस्पराश्रय इति वाच्यम्। अध्यासस्यानादित्वात्, पूर्वपूर्वाध्यासे भासमानस्यैवात्मनः उत्तरोत्तराध्यासाधिष्ठानत्वस्य सम्भवात्। न च आत्मनः अध्यासे भासमानत्वेन अहङ्कारे प्रतिबिम्बितत्वेन विषयत्वप्रतिपादनं व्यर्थम्। साक्षादेव विषयत्वसिद्धेः। तथा हि आरोप्याधिष्ठानयोः एकस्मिन् ज्ञाने भासमानत्वमात्रम् अध्यासत्वव्यापकम्। भासमानत्वं च भानप्रयुक्तसंशयविपर्ययादिफलभात्त्वम्। आत्मनो भाने सति आत्मविषये संशयविपर्ययाद्यभावात्। तच्च भानभिन्नत्वघटितत्वेन विषयत्वमेव भवति। तथा चाध्यासाधिष्ठानस्य प्रत्यगात्मनः मुख्यविषयत्वमेव सम्भवतीति कथं नाध्याससम्भव इति चेत्, भानभिन्नत्वस्य विषयलक्षणे प्रवेशे गौरवात् पूर्वोक्तरीत्या आत्मनि परम्परया विषयत्वस्य साधनीयत्वात् ।

ननु तथाप्यात्मा अहङ्कारविषयकभानात्मकः, तस्य च भासमानत्वंभाने विषयतया भासमानत्वं कथम्? विषयतया अभासमाने आत्मनि संशयविपर्ययाद्यनिवृत्तेः। तथा च अध्यासे भासमानतालक्षणं विषयत्वमात्मनो न सिध्येतीति चेत्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः इति भाष्ये समाधानम्। 'यत्साक्षादपरोक्षाच्च' (बृ.उ.3.4.1.) इति श्रुत्या

प्रमाणाद्वारकापरोक्षत्वस्यात्मनि व्यवस्थापितत्वेन, स्वयमपरोक्षे आत्मनि आत्मा न वा? इत्यादिसंशयाभावात्। दृश्यते हि अहङ्काराभावाविशिष्टसुषुप्तिकाले, अध्यासाभावात् स्वप्रकाशतया-वस्थानमात्मनः, सत्यामपि संस्कारात्मनाऽविद्यायाम्। एवमेवात्मन्यहङ्काराध्यासात्प्राक् स्वयंप्रकाशतया भासमानत्वम्। स्वत एव संशयनिवृत्तेः तत्र आत्मनः भासमानत्वं प्रति न विषयापेक्षा। एवं चात्मनिष्ठं विषयत्वं अविषयतया भासमानत्वमेव। तदेवाध्यासत्वप्रयोजकम्। अपरोक्षत्वाच्च इत्यत्र च शब्दः पूर्वोक्तशङ्कानिरासार्थः। आत्मनः अपरोक्षत्वं स्वप्रकाशत्वं च कथमिति चेत्, प्रत्गात्मप्रसिद्धेः इति भाष्ये समाधानम्। आबालपण्डितं आत्मनः प्रत्यगात्मनः संशयादिशून्यतया प्रसिद्धेः स्वप्रकाशत्वम्। स्वप्रकाशतया भासमानत्वमेवात्मनिष्ठाध्यासा-धिष्ठानत्वव्यपकम्। तत एवाध्यासः सम्भाव्यते।

यदप्युक्तं "पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमि"ति, तदपि न, इत्याह भाष्यकारः। "नचायमस्ति नियमः" इत्यादिना अध्यासत्वव्यापकं पुरोवर्तित्वं विषयत्वं चेति न विभावनीयम्। अप्रत्यक्षेऽपि इन्द्रियाग्राह्येऽपि आकाशे, बालाः अविवेकिनः तलमलिनतादिकमध्यस्यन्ति। तत्र तलत्वम् इन्द्रनीलकटाहकल्पत्वम्। मलिनत्वं नैल्यादिकं च अपरोक्षतया अध्यस्यन्ति। अतः अपरोक्षाध्यासाधिष्ठानत्वं प्रति

In Public domain. Digitization Muthulakshmi Research Academy
पुरोवर्तिविषयत्वं न व्यापकम्, व्यभिचारात्। नीलं नभः इत्यध्यासानुरोधात्, आरोप्याधिष्ठानयोः परस्पराऽसादृश्ये-ऽप्यध्यासः। अतश्चआरोप्यात्मनोः परसपरसादृश्याभावात्, नाध्याससम्भव इत्यपि न मन्तव्यम्। आकाशस्य इन्द्रियग्राह्यत्वलक्षणप्रत्यक्षाभावे कथं तत्र अगृहीते आकाशे नैल्याध्यासः इति चेत्, चक्षुषा आलोकसंनिकर्षे, आलोकाकारचाक्षुषवृत्तौ जातायां तया वृत्त्या साक्षिणो व्यक्तौ, तेनैव साक्षिणा आकाशोऽपि प्रत्यक्षीभवतीति, आकाशस्य साक्षिवेद्यत्वम्। ततश्च नैल्याध्यासोपपत्तिः। एवमात्मनः इन्द्रियावेद्यत्वेऽपि प्रत्यक्षत्वम्। इयांस्तु विशेषः। आकाशस्य साक्षिवेद्यत्वेन प्रत्यक्षविषयत्वादधिष्ठानत्वम्। आत्मनस्तु स्वप्रकाशत्वेना-धिष्ठानत्वम्, न तु साक्षिवेद्यत्वेन। एतदेवाभिप्रेतम् एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः इति भाष्येण। (र.प्र.पृ.17-19.)

र.प्र.प्र- न्यायनिर्णयोक्तदिशा आत्मनः स्वप्रकाशत्वसाधनम्

न्यायनिर्णयकारैस्तु श्रुत्युक्तमधिष्ठानत्वोपयोगिस्वप्रकाशत्वम् अनुमानेनैवमनुभावितम्। अस्ति तावन्ममेदं विदितमिति विशिष्टधीः। सा च विदितमिति विशेषणज्ञानाधीना। न च विशेषणस्य वेदनस्य ज्ञानान्तरात् स्फुरणम्। तथा सति तस्यापि भासकं ज्ञानान्तरमित्यनवस्था स्यात्। आत्मनः स्वयंप्रकाशत्वे चानुमानम् "विमतम् (विशेषणीभूतज्ञानं) नैतद्विषयम् (न

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानान्तरविषयम्) एतन्निष्ठसाक्षात्कारत्वात्, तादृशघट-साक्षात्कारवत्" इति। न हि प्रकाशात्मा दृष्टान्तः घटादिविषयकः साक्षात्कारः स्वसिद्ध्यर्थं ज्ञानान्तरमपेक्षते। तद्वत् 'ममेदं विदित'मिति साक्षात्कारघटकीभूतं वेदनं वेदनान्तरमपेक्षते। वेदनस्वरूपस्यात्मनः वेदनान्तराधीनप्रकाशत्वे वेद्यत्वापत्तेः। अतः वेदनस्वरूपस्यात्मनः स्वप्रकाशत्वं सिद्धम्। अन्यच्च आत्मनः संविद्रूपत्वेनैव स्फुरणादपरोक्षत्वम्। स्वापकाले स्वकालीन-देवदत्तात्मास्तितारूपस्य पाश्चात्यव्यवहारस्य हेतुभूतः साक्षात्कारः अस्ति। तस्यापि कालत्वात्। तथा चानुमानम् "देवदत्तस्वापकालः देवदत्तात्मास्तीतिव्यवहारहेतुभूतसाक्षात्कारवान् कालत्वात् इतरकालवत्" इति। न च स्वापकालेऽपि इतरकालवत् अहंवृत्त्या साक्षात्कार इति वाच्यम्। सुषुप्तावहंवृत्तेः सत्त्वे स्वापस्यैव भङ्गापत्तेः। न च अन्यः पुरुषः सुषुप्तसाक्षात्कारहेतुरिति वाच्यम्। पुरुषान्तरस्य तादृशसाक्षात्कारे सामर्थ्याभावात्। सुषुप्तपुरुषसाक्षात्कारं प्रति ईश्वरस्यैवेशितृत्वपक्षे पूर्वोक्तानुमाने आत्मास्तित्वव्यवहारहेतुसाक्षात्कारे अस्मदीयेति विशेषणं देयम्। तथा चास्मदीयसाक्षात्कारे ईश्वरस्याहेतुत्वान्न दोषः। ततश्च सुप्तौ आत्मास्तिताप्रत्यक्षस्यान्यहेतुकत्वाभावात्, आत्मनः स्वप्रकाशत्वं सिद्धम्। स्वतःप्रकाशत्वेनात्मनः अपरोक्षाध्यासाधिष्ठानत्वम्। (न्यायनिर्णयःपृ.18.)

In Public domain. Digitization Muthulakshmi Research Academy

आदौ अविद्यामनिरूप्य अध्यासस्यैव निरूपणे बीजम्-

शा.भा.- तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न सम्बध्यते। तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि।

र.प्र.प्र.- ननु सूत्रकारैः ब्रह्मविचारस्य कर्तव्यत्वेन प्रतिज्ञानात्, तदनुकूलतया शास्त्रेऽस्मिन् भूमिकारूपेण विद्याऽविद्ये निरूपणीये, न तु अध्यासेनैव शास्त्रोपक्रमः। किमर्थम् अविद्यां परित्यज्य, अध्यासेनैवोपक्रमः इति प्रश्नमुत्तरीतुम् "तमेतमेवंलक्षणमित्यारभ्य विधिप्रतिषेधमोक्षपराणि" इत्यन्तं भाष्यम्। तम् आक्षिप्तम्, अध्यासतत्सम्भावनायुक्तिभिः समाहितम्, अध्यासं, पण्डिताः लक्षणसम्भावना युक्त्यभिज्ञाः अविद्या कार्यत्वात्, अविद्येति मन्यन्ते। तद्विवेकेन अध्यस्तनिषेधेन आरोपितनिषेधेन, वस्तुस्वरूपावधारणम् विद्यामध्यासनिवर्तिकाम्, आहुः। तथाऽपि कारणाविद्यां त्यक्त्वा, कार्याविद्यारूपः अध्यासः किमिति वर्ण्यते इत्युक्ते तत्रैवं सतीत्यादिभाष्यम्। तत्रैवं सति अध्यासे अविद्यात्मके सति, यत्र यस्मिन्नधिष्ठाने आत्मनि, यदध्यासः अहङ्काराध्यासः, तत्कृतेन अध्यासकृतेन, गुणेन दोषेण वा सः अधिष्ठानम् आत्मा, न

In Public domain. Digitization Muthulakshmi Research Academy

सम्बध्यतेन लिप्यत इत्यर्थः। एतदुक्तं भवति। विद्यया मूलाज्ञाननिवृत्तौ, तन्मूलाध्यासनिवृत्तेः, ब्रह्मात्मभावः सुलभ इति प्रधानतया निवर्तनीयः अध्यास एव निरूपितः। अन्यच्च निरूपितायामपि मूलाविद्यायां तया सुषुप्तौ समाधौ वा अनर्थः नानुभूयते। अतः निवर्तनीयस्य अनर्थत्वसिद्ध्यर्थम् अविद्यायाः अध्यासात्मना निरूपणमेवापेक्षितम्। इदमन्यत्प्रयोजनमध्यास-निरूपणे, यत् लौकिक-वैदिककर्मशास्त्रीय-मोक्षशास्त्रीयसर्वविध-व्यवहारसिद्धिः। एतदेव तमेतमित्यारभ्य, मोक्षपराणि शास्त्राणि इत्यन्तेन भाष्येण निरूपितम्। भाष्ये तमेतमित्यनेन अध्यासस्य साक्षिप्रत्यक्षसिद्धत्वेन प्रामाणिकत्वं निरूपितम्। अन्तःकरणवृत्ति-रूपप्रमाणे चैतन्यसंसर्गाध्यासात् वृत्तेः प्रमाणत्वसिद्धिः। घटादिप्रमेये चैतन्यसंसर्गाध्यासात् प्रमेयसिद्धिः। एवं देहे, बुद्धौ आत्मतादात्म्याध्यासात्, इन्द्रियेषु आत्मीयत्वाध्यासात्, बुद्धेः देहेन्द्रियादिसंसृष्टस्य, प्रमातृत्वसिद्धौ सर्वे प्रमाण-प्रमेयव्यवहाराः लौकिककर्मशास्त्रीय-मोक्षशास्त्रीयाः अध्यासं पुरस्कृत्य प्रवर्तन्ते। सर्वाणि विधिनिषेधपराणि कर्मशास्त्राण्यृग्वेदादीनि, विधिनिषेध-शून्यमोक्षपराणि च सर्वाणि शास्त्राणि अध्यासं पुरस्कृत्यैव प्रवर्तन्ते। (र.प्र.पृ.19.)

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणानां शास्त्राणां च अविद्यावद्विषयत्वसमर्थनम्-

शा.भा.- कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमामणानि शास्त्राणि चेति। उच्यते देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति। न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः सम्भवति। न चाध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते। न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च।।

र.प्र.प्र.-कथंपुनरविद्यावद्विषयाणि इत्यादिग्रन्थेन भाष्यकारैः प्रमाणानां शास्त्राणां चाविद्यामूलत्वं समर्थ्यते। पश्चाच्च विवेकिविद्वद्व्यवहारस्याप्यविद्यामूलत्वं, तदनु अध्यासप्रमाण-प्रकारादिकं च निरूपयिष्यते। अध्यासे 1.प्रत्यक्षम् 2.व्यवहारान्यथानुपपत्तिरूपा अर्थापत्तिः 3.यजेत स्वर्गकामः इति श्रुतार्थापत्तिः। 4.अनुमानम्, 5.आगमश्च प्रमाणानि प्रघट्टकेऽस्मिन् भाष्ये रत्नप्रभायां च निरूपितानि। अत्र च 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादिप्रमाणानि शास्त्राणि च' इति भाष्ये गभीरं शङ्कावाक्यम्। तस्यास्य वाक्यस्य रत्नप्रभायां द्वेधा व्याख्यानं प्रपञ्चितम्। एका व्याख्या प्रसिद्धप्रत्यक्षातिरिक्तप्रमाण-जिज्ञासाविषयिणी। अपरा च व्याख्या, प्रमाणानामविद्यावद्विषकत्वे

In Public domain. Digitization Muthulakshmi Research Academy
अविद्यादोषप्लुतार्थस्य ग्राहकाणां प्रमाणानां प्रमाण्यं कथमित्येतदर्थविषयिणी इति संक्षेपतः शङ्काद्वयगर्भितेयं भाष्यवाक्यशङ्का ।

1.अविद्यावान्नाम अहमित्यध्यासरूपेण परिणताविद्यावानात्मा। स च प्रमाता एव भवति। स विषयः-आश्रयः येषां तानि अविद्यवद्विषयाणीति विग्रहः। तत्तत्प्रमेयव्यवहारहेतुभूता प्रमा। सा च अध्यासात्मक (अध्यासनिष्पन्न) प्रमात्राश्रिता। तत्रैव प्रमाणान्यपि सन्तीति, अविद्यावद्विषयकत्वं प्रश्नवाक्ये भाष्यकारैरभिप्रेतम्। यद्यपि प्रमाणानाम् अविद्यावद्विषयकत्वं प्रत्यक्षप्रमाणसिद्धम्, तथापि पुनरपि कथं 'केन प्रमाणेन अविद्यावद्विषयत्वं प्रमाणानां शास्त्राणां च'? इत्येका आशङ्का पूर्वभाष्योक्तरीत्या पर्यवस्यति। प्रथमप्रश्ने कथमित्यस्य केन प्रमाणान्तरेणेत्यर्थः। एवमविद्याविषयत्वं प्रमाणानां शास्त्राणां च प्रत्यक्षप्रमाणेनैव पूर्वसिद्धमिति, नाविद्यावद्विषयिणी शङ्का, किं तु अविद्यावद्विषयाणि शास्त्राणि प्रमाणानि च पुनः केन प्रमाणान्तरेणाविद्यावद्विषयाणीति वाक्ययोजना। (र.प्र.पृ.20.)

2. यद्वा शास्त्राणां प्रमाणान्तराणां च अविद्यावद्विषयत्वे कथं तानि प्रमाणानि? इति द्वितीया शङ्का भाष्यकाराणामभिप्रेता इति रत्नप्रभाकाराः व्याचक्षते। प्रमाणानामविद्यावद्विषयत्वे तेषामाश्रयदोषादप्रामाण्यमेव स्यात् इति द्वितीयपक्षे भाष्यतात्पर्यम्।

In Public domain, Digitization Muthulakshmi Research Academy

तत्र प्रमाणान्तरप्रश्ने व्यवहारार्थापत्तिः व्यवहारलिङ्गकानुमानं चेति प्रमाणद्वयमभिप्रेत्य भाष्ये उच्यते- इत्यादिना समाधानग्रन्थः उपक्रान्तः। व्यवहारस्य कारणमध्यासः। स च दृश्यमानव्यवहारान्यथानुपपत्त्या कल्पित इति, अध्यासे अर्थापत्तिः प्रमाणम्। किं च अध्यासे अनुमानमपि प्रमाणम्। तथाहि- "देवदत्तकर्तृकः घटानयनादिव्यवहारः अहंममाध्यासमूलः तदन्वयव्यतिरेकानुविधायित्वात् यदित्थं तत्तथा"। अर्थात् "यो यदन्वयव्यतिरकानुसारी स तन्मूलः यथा मृन्मूलो घटः"- इत्यन्वयदृष्टान्तः। मृदन्वयव्यतिरेकानुविधायिनः घटस्य मृन्मूलत्ववत्, "अध्यासससत्त्वे व्यवहारसत्त्वम्, अध्यासाभावे व्यवहाराभावः" इत्यन्वयव्यतिरेकानुसारित्वात्, व्यवहारस्याध्यास-मूलकत्वम्। "देहेन्द्रियादिष्हंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ, प्रमाणप्रवृत्त्यनुपपत्तेः" इति भष्यं तु व्यतिरेकमुखेन अध्यासाभावे प्रमातृत्वादिव्यवहारा भावनिरूपणपरम्। तथा हि देवदत्तस्य सुषुप्तौ अध्यासः प्रमाणप्रमेयादिव्यवहारो वा कोऽपि नास्ति। कुत इत्युक्ते आत्मनः अन्तःकरणेन आध्यासिकसम्बन्धाभावात्। न च तत्र देहे आत्मतादात्म्याध्यासः इन्द्रियादौ ममत्वाध्यसो वा। अत एवात्मनः सुषुप्तौ प्रमातृत्वमेव नास्ति। अतः सुतरां प्रमाणानां प्रमेये प्रवृत्तिर्नोपपद्यते।

In Public domain. Digitization Muthulakshmi Research Academy

"नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति" इति भाष्यवाक्यम्। वाक्येऽस्मिन् प्रत्यक्षादिव्यवहारः इत्यत्र आदिपदादनुमानस्य ग्रहणम्। अत एव इन्द्रियाण्यनुपादायेत्यत्र इन्द्रियाणीति पदस्य, इन्द्रिय-लिङ्ग-शब्दादीन्यनुपादाय इत्यर्थः व्याख्येयः। तथा च पूर्वोक्तभाष्यवाक्यस्य द्वेधा रामानन्दयतिभिरर्थः व्याख्यातः।

ममतास्पदेन्द्रियलिङ्गादीन्यनुपादाय, प्रत्यक्षानुमानादि-व्यवहारः न सम्भवतीत्येकोऽर्थः। पक्षेऽस्मिन्प्रत्यक्षादिव्यवहारस्य असम्भवक्रियाकर्तृत्वात्, तस्यैव इन्द्रियकर्मकानुपादानक्रिया-कर्तृत्वाच्च समानकर्तृकत्वेन क्त्वा प्रत्यये, तस्य ल्यबादेशे अनुपादायेत्यस्य साधुत्वम्। अथवा इन्द्रियाणि ममत्वेनानुपादाय यो व्यवहारः सः न इत्यन्यः अस्य वाक्यस्यार्थः। पक्षेऽस्मिन् सम्भवतीति क्रियापदमविवक्षितम्। इन्द्रियानुपादानपूर्वकं यः व्यवहारः सः व्यवहार एव न इत्यर्थस्य विवक्षितत्वात्, अभवन अनुपादानक्रिययोः एकः कर्ता आत्मेति, समानकर्तृकत्वमादाय अनुपादायेत्यत्र क्त्वाया उपपत्तिः। इन्द्रिये, रूपग्रहणसामर्थ्यस्येव, ममत्वाध्यासस्यापि सत्त्व एव तत्सम्बन्धित्वेनाध्यस्तस्यात्मनः द्रष्टृत्वव्यवहारः, अन्यथा तु न। अतः प्रमातुः प्रमाणप्रवृत्तौ इन्द्रियेषु ममत्वाद्यासः अवश्यमपेक्षितः। (र.प्र.पृ.20.)

In Public domain. Digitization Muthulakshmi Research Academy
ननु इन्द्रियाध्यासेनैव व्यवहारोपपत्तौ किमर्थं देहाध्यासः? इति चेत्, न चाधिष्ठानमन्तरेण इत्यादि भाष्यम्। इन्द्रियाणां स्थितौ शरीरमधिष्ठानम्। अधिष्ठानमन्तरेण शरीरं विना इन्द्रियाणां व्यवहारः न सम्भवति। न च आत्मना संयुक्तं शरीरमेव इन्द्रियाणामाश्रयो भवतु, किं शरीरस्यात्मभावाध्यासेनेति वाच्यम्। आत्मभावस्य आत्मतादात्म्यस्याऽनध्यासे केवलेन देहेन कस्यापि व्यापारासिद्धेः। स्वतो देहस्य जडत्वात्, आत्मना सह देहस्य "असङ्गोह्ययं पुरुषः"(बृ.उ.4.3-16.)इति श्रुत्या असङ्ग एव प्रतिपादितः। अतः देहे आत्मतादात्म्याध्यास एव सम्बन्धो वक्तव्यः। न च अध्यासानङ्गीकारेऽपि आत्मनः स्वतश्चेतनतया प्रमातृत्वं स्यादिति वाच्यम्। सुषुप्तिदशायां करणोपरमवेलायां आत्मनः चेतनत्वस्य सत्त्वेऽपि प्रमातृत्वानुपपत्तेः। अतः असङ्गात्मनः अध्यासेनैव प्रमातृत्वमुपपद्यते, न संयोगादिसम्बन्धेन। किं च प्रमातृत्वं प्रमाश्रयत्वम्। प्रमा यदि चिन्मात्रम्, तर्हि प्रमातुः तदाश्रयत्वायोगः। करणानां वैयर्थ्यं च प्रसज्येत। यदिवृत्तिमात्रं प्रमा, वृत्तेः जडत्वेन जगदान्ध्यं प्रसज्येत। अतः वृत्तीद्धः बोधः प्रमा इति वक्तव्यम्। तथा सति तदाश्रयत्वलक्षणं प्रमातृत्वं वृत्तिमन्मनस्तादात्म्याध्यासं विना दुस्साधम्। अत एवोक्तं भाष्ये- "न चैतस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते" इति। अध्यासाङ्गीकारभिया यद्यात्मनः प्रमातृत्वं नेष्यते, तर्हि

In Public domain. Digitization Muthulakshmi Research Academy

प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तेरप्यभावप्रसङ्गः। तस्मात् प्रमातृत्वादिव्यवहारसिद्ध्यर्थम् अनुमानार्थापत्तिभ्यामर्थाध्यासः सिद्ध्यति। एवं च प्रथमशङ्कायास्समाधानतया प्रत्यक्षातिरिक्ते अनुमानार्थापत्ती प्रमाणे निरूपिते भवतः।

"तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च" इति भाष्यम्। तस्मात्-इत्यस्यप्रथमपक्षे (प्रमाणान्तरजिज्ञासापक्षे) इत्यर्थः। द्वितीयपक्षे तु (अविद्यावद्विषयाणां कथं प्रामाण्यमिति पक्षे तु) तस्मादित्यस्य प्रमात्रन्तर्गतत्वेनादोषत्वादित्यर्थः। तथा चाध्यासस्यादोषत्वात् अविद्यावदाश्रयाण्यपि प्रत्यक्षादीनि प्रमाणान्येवेति भाष्ययोजना। दोषो हि नाम सः यः सति प्रमातरि पश्चाद्भवति। स चागन्तुकः। यथा नेत्रस्य काचादिः। प्रकृते तु अध्यासेनैव आत्मनः प्रमातृत्वसिद्धेः अध्यासस्य अथवा अविद्यायाः प्रमातृस्वरूपान्तर्गतत्वेन नास्ति दोषत्वम्। अतः अविद्यावद्विषयाण्यपिप्रमाणानि, आगन्तुकदोषाजन्यत्वात् प्रमाणान्येव भवन्ति नाप्रमाणानि। (र.प्र.पृ .20-21.)

विवेकिनां व्युत्पन्नचित्तानामप्यध्यासादेव व्यवहारः-

शा.भा.-पश्वादिभिश्चाविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते आनुकूले च प्रवर्तन्ते, यथा दण्डोद्यतकरं

In Public domain. Digitization Muthulakshmi Research Academy
पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते। अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारः तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा परलोकसम्बन्धमधिक्रियते, तथापि न वेदान्तवेद्यमशनायाद्यतीत-मपेतब्रह्मक्षत्रादिभेदम् असंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते। अनुपयोगादधिकारविरोधाच्च। प्राक् च तथा भूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्याविषयत्वं नातिवर्तते।।

र.प्र.प्र.- ननु अन्यव्यतिरेकाभ्यां व्यवहारः अध्यासकार्य इत्युक्तम्। तदयुक्तम्। विदुषामध्यासाभावेऽपि भिक्षाटनाशनादिव्यवहार-दर्शनात् इति चेत्, 'पश्वादिभिश्चाविशेषात्' इति सङ्ग्राहकवाक्येन भाष्ये समाधानम्। पश्वादिभिश्च इत्यत्र चशब्दः पूर्वोक्तशङ्कानिरासार्थः। वाक्येऽस्मिन् व्युत्पन्नचित्तानाम् अथवा विवेकिनामित्यर्थकं विदुषामितिपदमध्याहर्तव्यम्। एवं च विदुषाम् विवेकिनाम् अविशेषात् पश्वादिभिः व्यवहारवत्त्वेन साम्येन अध्यासः उपपद्यत इति पूर्वोक्तवाक्यार्थः। ननु किमिदं विद्वत्त्वम् किं ब्रह्मास्मीति साक्षात्कारवत्त्वम्? उत यौक्तिकं युक्तिसिद्धम्

In Public domain. Digitization Muthulakshmi Research Academy

आत्मानात्मभेदज्ञानं वा? यदि ब्रह्मास्मीति साक्षात्कारवत्त्वम्, तर्हि, तादृशसाक्षात्कारेणाध्यासनिवृत्तेः, तस्य विदुषः व्यवहार एव नास्ति। यदि वाकश्चिद्व्यवहारोऽस्तीति ज्ञायते, स ज्ञानबाधिताध्यासानुवृत्तिप्रयुक्त एव, न व्यवहारः। स्फुटीकृतं चैतद्भगवद्गीताभाष्ये "स्थितप्रज्ञस्य (ज्ञाननिष्ठस्य) का भाषा किमासीत व्रजेत किम्?" (भ.गी.2.54.) इति प्रश्नस्य निषेधपर्यवसायित्वं निरूपयता भाष्यकारेण। एवमेव समन्वयाधिकरणान्ते द्वितीयवर्णके "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतिमुदाहरता भाष्यकारेणापि परमार्थतत्त्वविदः बाधिताध्यासानुवृत्त्या व्यवहाराभास एव स्वीकृतः। यदि च आत्मानात्मभेदज्ञानमेव विदुषो विद्वत्त्वमुच्यते, तर्हि तादृशज्ञानस्य परोक्षत्वेन अपरोक्षभ्रान्त्यनिवर्तकत्वात्, तादृशविवेकिनामपि, व्यवहारकाले पश्वादिभिरविशेषात्, अध्यासवत्त्वेन तुल्यत्वात्, भेदज्ञानवतां विदुषामपि पश्वादीनामिव व्यवहारस्याध्यासकार्यत्वं युक्तम् इत्याशयेन यथा हि पश्वादयः इत्यादिभाष्यं प्रवृत्तम्। तथाचानुमानम् "विवेकिनः अध्यासवन्तः व्यवहारवत्त्वात्" इति। सङ्ग्राहकवाक्यं स्वयमेव भाष्यकाराः यथाहीत्यादिना व्याचक्षते। यथा हि श्रावणप्रत्यक्षव्यवहारे शब्दादिभिः श्रोत्रादीनां संनिकर्षे सति, शब्दादिविज्ञाने प्रतिकूले अनिष्टसाधनतागोचरे जाते ततः निवर्तन्ते, अनुकूले च इष्टसाधनतागोचरे जाते प्रवर्तन्ते, यथा

In Public domain. Digitization Muthulakshmi Research Academy
चदण्डोद्यत करम् करेण उद्यतदण्डम्, अभिमुखं पुरुषमुपलभ्य, अयं मां हन्तुमिच्छति इति ज्ञात्वा पलायितुमारभन्ते पशवः, हरिततृणपूर्णपाणिमुपलभ्य तु तं प्रत्यभिमुखीभवन्ति पशवः, तथा व्युत्पन्नचित्ताः पशुभ्योऽपि किञ्चिदधिकज्ञानवन्तः, विवेकिनोऽपि पुरुषाः क्रूरदृष्टीन्, आक्रोशतः, खड्गोद्यतकरान्, बलवत एव पुरुषान्उपलभ्य ततो निवर्तन्ते। तद्विपरीतान् सत्कारादिना अभिमुखीभूतान् पुरुषानुपलभ्य प्रवर्तन्ते। अतःपश्वादिभिः पुरुषाणां श्रावणचाक्षुषादिव्यवहारस्य तुल्यत्वेन दर्शनं निश्चीयते। तथाचानुमानम्- "अयं दण्डः मदनिष्टसाधनं दण्डत्वात् अनुभूतदण्डवत्", "इदं तृणमिष्टसाधनम् अनुभूतजातीयत्वात्"- इत्यनुमाय पुरुषाः पश्वादयश्च व्यवहरन्ति। सोऽयं व्यवहारः तृणादाविष्टसाधनत्वमूलः, दण्डादौ च अनिष्टसाधनत्वमूलः। (र.प्र.पृ.22.)

ननु व्यवहारात् प्रवृत्तिं प्रति अध्यासो मूलमिति भवद्भिरुच्यते। न हि पश्वादयः अस्माकं प्रवृत्तिरध्यासाद्भवतीति वदन्ति। न वा तेषां प्रत्यक्षमस्माकं गोचरीभवति। अतः पश्वादिरूपे दृष्टान्ते अध्यासस्य साध्यस्य वैकल्यात् कथं व्यवहारलिङ्गकानुमानेनाध्याससिद्धिः इति चेत्, अत एवोक्तं भाष्ये "पश्वादीनां च प्रसिद्धोऽवि -वेकपुरस्सरः प्रत्यक्षादिव्यवहार" इति। पश्वादीनामात्मानात्मनोः ज्ञानमात्रमस्ति, न तु विवेकः।

In Public domain. Digitization Muthulakshmi Research Academy

तेषामुपदेशाभावात्। अतः अविवेकरूपाध्याससामग्र्याः सत्त्वात्, तेषां प्रत्यक्षादिव्यवहारः उपपद्यत एव। पश्चादिवृत्तिव्यवहारवत्त्वरूपधर्मसाम्यदर्शनाद्विवेकिनामप्ययं व्यवहारः इति निश्चीयते। समानत्वं च व्यवहारस्याध्यासकार्यत्वेन। यदा अध्यासः, तत्काले व्यवहारः। अध्यासाभावकाले तु नास्ति व्यवहारः। यथा सुषुप्तौ। एतच्च प्रागावेदितमेव। एवं चव्यवहारलिङ्गात् विवेकिनामपि देहादिष्वहं ममाभिमानः अस्तीति निरवद्यम्। (र.प्र.पृ.23.)

ननु लौकिकव्यवहारस्याध्यासमूलकत्वेऽपि, ज्योतिष्टोमादिवैदिकव्यवहारस्य नाध्यासमूलकत्वम्। देहातिरिक्तात्मज्ञाने सत्येव स्वर्गार्थिना ज्यातिष्टोमादौ प्रवृत्तेः। ज्ञाने सत्यध्यासस्यायोगात् इति चेत्, शास्त्रीये तु व्यवहारे इत्यादिभाष्यम्। पूर्वपक्षिणा ज्ञाने सति अध्यासो न सम्भवतीति, ज्योतिष्टोमादिप्रवृत्तौ ज्ञानमपेक्ष्यत इति चोच्यते। किं तत् ज्ञानं किं देहान्यात्मज्ञानम्? उत आत्मतत्वज्ञानं? वेति पृच्छामः। देहान्यात्मज्ञानेनैव परलोकभोग्यस्वर्गादिफलकज्योतिष्टोमप्रवृत्त्युपपत्तौ आत्मतत्वज्ञानस्यानपेक्षितत्वात्। देहान्यत्मज्ञानस्य च परलोकाद्यस्तित्वमात्रफलकतया तस्य चाध्यासं प्रत्यविरोधित्वाच्च, अध्यासः तन्मूलव्यवहारश्चोपपद्यते। अथ वेदान्तवेद्यम्, अशनायाद्यतीतम्, अपेतब्रह्मक्षत्रादिभेदम्, असंसारिब्रह्मैवाहमस्मीति ज्ञानं ज्ञानपदेन विवक्ष्यते, तादृशज्ञाने सति अध्यासो न सम्भवतीति, अध्यासतन्मूलव्यवहारानु-

In Public domain. Digitization Muthulakshmi Research Academy
पपत्तियुक्तैव। किंतु तादृशज्ञानं ज्योतिष्टोमादिप्रवृत्तौ अधिकारे च नोपज्यते। तादृशज्ञानस्य क्रियाकारकफलभेदबुद्ध्युपमर्दकत्वेन ज्योतिष्टोमादिकर्मप्रवृत्तिविरोधित्वात्। अतश्च देहान्यात्मज्ञानात्, अधिकारिणः अधिकारित्वलाभः तन्मूलव्यवहारोपपत्तिश्च। पूर्वोक्तात्मतत्त्वज्ञानात्प्रक् तु शास्त्रं यथाभूतार्थविषयत्वं नातिक्रामति। (र.प्र.पृ.23.)

एवं "ब्राह्मणो यजेत" इत्यादिशास्त्राण्यपि आत्मनि वर्णाश्रमवयोवस्थादिविशषाध्यासे प्रमाणम्। तथा हि "ब्राह्मणो यजेत" इत्यत्र ब्राह्मणपदस्य न केवलं ब्राह्मणत्वजातिविशिष्टोऽर्थः, किं तु अध्यस्तब्राह्मणत्ववानिति। यः आत्मानं ब्राह्मणत्वेनाभिमन्यते, सः अर्थः। अतश्चात्र वर्णाध्यासः। "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यागमेन आत्मनि वयोविशेषाध्यासः सिद्धः। "जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इत्याद्यागमोऽपि, अधिकारिविशेषणवयसः अध्यासे प्रमाणम्। "न ह वैस्नात्वा भिक्षेत" इत्यागमोऽपि ब्रह्मचारिभिक्ष्वोरेव भिक्षाधिकारस्य सद्भावात्, स्नातकव्रतानन्तरं भिक्षाप्रतिषेधं ब्रुवन्, आत्मनि स्नातकावस्थाध्यासं प्रकटयति। आश्रमद्वयान्तरालवर्तित्वेन, स्नातकस्य आश्रमत्वाभावात् नात्र आश्रमाध्यासः। (र.प्र.पृ.23-24.)

अध्यासप्रकाराः शास्त्रतात्पर्यप्रयोजननिरूपणञ्च-

In Public domain. Digitization Muthulakshmi Research Academy

शा.भा.- तथा हि- ब्राह्मणो यजेत इत्यादीनि शास्त्राणयात्मनि वर्णाश्रमवयोवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानध्यस्यति। तथा देहधर्मान् स्थूलोऽहम्, कृशोऽहम्, गौरोऽहम्, तिष्ठामि, गच्छामि, लङ्घयामि चेति। तथेन्द्रियधर्मान् मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहमिति। तथाऽन्तःकरणधर्मान् काम-सङ्कल्प-विचिकित्सा-ध्यवसायादीन्। एवमहम्प्रत्ययिनमशेषस्वप्रचार साक्षिणि प्रत्यगात्मन्यध्यस्य, तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणा-न्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोऽध्यासः मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः। अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते। यथाचायमर्थः सर्वेषां वेदान्तानां तथावयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः।।

र.प्र.प्र.-एवमध्यासे प्रत्यक्षानुमानार्थापत्त्यागमैर्निरूपितेऽपि, तस्य चाविद्यावद्विषयत्वे व्यवस्थापितेऽपि, कस्य कुत्राध्यासः? इति जिज्ञासायाम् अध्यासप्रकारान् निरूपयिष्यन् भाष्यकारः सकृदध्यासलक्षणं स्मारयति "अध्यासो नाम अतस्मिन् तद्बुद्धिरित्यवोचाम" इति। तत्र च बाह्यधर्माध्यासः, देहधर्माध्यासः, इन्द्रियधर्माध्यासः, अन्तःकरणधर्माध्यासः, आत्मानात्मनोः

In Public domain. Digitization Muthulakshmi Research Academy

परस्पराध्यासः इत्येवंरूपेण भाष्यकारैः नैकधा अध्यासप्रकाराः निरूपिताः। तत्र बाह्यधर्माध्यासःइत्थम्। स्वदेहाद्भेदेन प्रत्यक्षतया भासमानाः ये पुत्रभार्यादयः, तेषु सकलेषु पूजादिधर्मविशिष्टेषु, विकलेषु पूजादिधर्मरहितेषु, अहमेव विकलः सकलः इत्यध्यासं प्राप्नोति। अयं च साकल्यवैकल्याध्यासः बाह्यधर्माध्यास इत्युच्यते। स च देहविशिष्टात्मनि भवति। मूलभूतसाकल्यवैकल्ययोः भार्यापुत्रादिगतत्वेनतेषामेवात्मन्यध्यारोपे अन्यथाख्यातिप्रसङ्गात्, तत्सदृशसाकल्यवैकल्यरूपानिर्वचनीयबाह्यधर्माध्यासः एव स्वीक्रियते। 'स्थूलोऽहं', 'कृशोऽहं,' 'गौरोऽहम्' इत्यत्र मनस्तादात्म्यापन्ने आत्मनि शरीरधर्मस्थौल्य-कार्श्य-गौरत्वधर्माणामध्यासः। तथा तत्रैव तिष्ठामि, गच्छामि, लङ्घयामि इति स्थिति-गति-लङ्घनक्रियाध्यासः। अत्र तु अध्यस्तात्मभावस्य स्वतः कार्श्यस्थित्यादिधर्मवतः देहादेः आत्मनि तादात्म्येनाध्यस्तत्वात्, साक्षादात्मनि तादात्म्येनैव कार्श्यादीना-मध्यस्ततया भानम्, न तु पूर्ववत् तत्सदृशधर्माध्यासः। एवं मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहम् इति इन्द्रियधर्माध्यासः। अत्रापि इन्द्रियधर्माणां मूकत्वादीनां साक्षादेवात्मन्यध्यासः अङ्गीकर्तव्यः। इदन्तु बोध्यम् यद्यपि इन्द्रियविषये "देहेन्द्रियादिषु अहंममाभिमानरहितस्य" इति भाष्यग्रन्थेन, "इन्द्रियादिषु ममेत्यध्यासासम्भवे अन्धादेरिव" (र.प्र.पृ.20) इति रत्नप्रभाग्न्थेन

In Public domain. Digitization Muthulakshmi Research Academy
च संसर्गाध्यास एव, इन्द्रियात्मनोः प्रदर्शितः। "अन्धोऽहमि"ति प्रकृतभाष्यग्रन्थेन, इन्द्रियादेः तादात्म्येनैवाध्यासः अङ्गीकृत इवाभाति। वस्तुतत्त्वपरिशीलने द्विविधोऽप्यध्यासः इन्द्रियात्मनोः सम्भवतीत्याभाति। विवक्षाधीनत्वात्, व्यवहाराधीनत्वाच्चाध्यासस्य। 'चक्षुरहमि'ति लोकव्यवहाराभावेऽपि, मूकत्वादिवेषेण, इन्द्रियाणाम्‌आत्मनि तादात्म्येनाध्याससम्भवात्। तथा "अहमज्ञः"इति साक्षिप्रत्यक्षेण अज्ञानविषयतया भासमाने आत्मनि मनस्तादात्म्यापन्ने कामसङ्कल्पविचिकित्याध्यवसायादीना-मध्यासस्साक्षादेव निरूपितः। (र.प्र.पृ.24.) आत्मानात्मनोः परस्पराध्यासस्तु भाष्ये एवं निरूपितः।

"एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्य-ध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादि-ष्वध्यस्यति" इति। अहम्प्रत्ययिनमित्यस्य, अहमिति प्रत्ययः अस्य अस्तीति व्युत्पत्त्या अहङ्कार इत्यर्थः। तं स्वप्रचारसाक्षिणीत्यत्र स्वप्रचारपदेन च मनोवृत्तयः ग्राह्याः। प्रत्यगात्मशब्दस्य तु "प्रातिलोम्येन असज्जडदुःखात्मकाहङ्कारविलक्षणतया, सच्चित्सुखा-त्मकत्वेन, अञ्चति प्रकाशते" इति व्युत्पत्त्या हृदयदेशे परिपूर्णब्रह्मात्मना भासमानः आत्मैव प्रत्यक्। एवं तद्विपर्ययेण इत्यत्र तत्पदेन अध्यस्तः जडः गृह्यते। तद्विपर्ययः नाम अध्यस्तविरुद्धमधिष्ठानत्वं चैतन्यं च। विपर्ययेण इत्यत्र तृतीयायाः

 In Public domain. Digitization Muthulakshmi Research Academy

"इत्थं भूतलक्षणे"– (पा.सू.2.3.21.) इति सूत्रेण निष्पन्नत्वात् चैतन्यात्मना इति तद्विपर्ययेणेत्यस्यार्थः फलति। एवं च अहङ्कारं प्रत्यगात्मनि मनोवृत्तिसाक्षिणि तादात्म्येनाध्यस्य, अध्यस्ताहङ्कार-भावं प्रत्यगात्मानं सर्वसाक्षिणं चैतन्येन रूपेण अन्तःकरणादिषु अध्यस्यतीति पूर्वोक्तभाष्यपङ्क्तेरर्थः। केवलाज्ञानरूपायामविद्यायां शुद्धात्मनः संसर्ग अध्यासः। ततः मनसि अज्ञानोपहितस्यात्मनः तादात्म्याध्यासः। ततः देहादौ मन उपहितस्यात्मनस्तादा-त्म्याध्यासः। आत्मनि बुद्ध्यध्यासात् कर्तृत्वलाभः। बुद्ध्यादौ चात्माध्यासात् चैतन्यलाभः। "इदं रजतम्" इत्यत्रापि रजते इदं तादात्म्याध्यासात् प्रवृत्त्युपयोगिवस्तुगताभिमुख्यप्रतीतिः। इदं रजताध्यासाच्च रजतस्यैवार्थिनः प्रवृत्त्युपपत्तिः। एवमयमध्यासः अनादिः। कार्याध्यासस्य अनाद्यविद्यात्मकतयानादित्वम्। अध्यासात्संस्कारः, संस्कारात्पुनरध्यासः इति प्रवाहरूपेणाध्यासस्य विद्यमानत्वात् नैसर्गिकोऽयमध्यासः। अध्यासस्याविद्यात्मकत्वेन निरूपणात्, अध्यासोपादानम् अनाद्यविद्येति निरूपितं भवति। संस्कारस्य अनादिप्रवाहमध्यपतितत्वेन निमित्तत्वमप्युक्तं भवति नैसर्गिकशब्देन। अयं चाध्यासः भाष्यकारैः "एवमनादिरनन्तः" इत्यादिग्रन्थेन अनन्ततया निरूपितः। यद्यध्यासस्यानन्तत्वं नाशरहितत्वं स्यात्, तर्हि मोक्ष एव न स्यात्। अतः ज्ञानं विना नाशशून्यत्वमेव अनन्तत्वमत्रास्थेयम्। तथा चोक्तं भगवद्गीतासु-

In Public domain. Digitization Muthulakshmi Research Academy

"न रूपमस्येह तथोपलभ्यते, नान्तो नचादिर्न चसम्प्रतिष्ठा"। इति (भ.गी.15.3.) अस्य संसारस्य रूपम्, अन्तः, आदिः, पर्वसानं च नोपलभ्यते इत्यर्थः। असङ्गशस्त्रेण संसारछेदनोपदेशात् ज्ञानेनसंसारनिवृत्तिरेव तत्राभिप्रेता। अस्याध्यासस्य स्वरूपं तु मिथ्याप्रत्ययः कार्यप्रपञ्चः, तत्प्रतीतिश्चेत्यवंरूपः। संसारस्य कार्यं तु कर्तृत्वभोक्तृत्वाद्यलर्थ एव। तत्प्रवर्तकश्चाध्यासः। किं च अध्यासः सर्वलोकप्रत्यक्षः।

ननु प्रमाणनिरूपणपरे भाष्ये प्रत्यक्षातिरिक्तानि अनुमानादीन्यपि प्रतिपाद्य, किमिदानीमध्यासे प्रत्यक्षमेव प्रमाणतयोच्यते सर्वलोकप्रत्यक्ष इति, इति चेदुच्यते। अध्यासग्राहिणा प्रत्यक्षेण अध्यासस्य सिद्धावपि, तस्याऽसम्भावनायां प्रसक्तायां, तन्निरासार्थं अनुमानादीनि प्रमाणान्तराणि, प्रत्यक्षमेव मौलिकमध्यासात्मकधर्मिग्राहकं प्रमाणमित्यवधेयम्। (र.प्र.पृ.25-26.)

अस्य चाध्यासस्यानर्थहेतुत्वात्, अयमध्यासः प्रहातव्यः। तदर्थमात्मैकत्वविद्याप्रतिपत्तिरपेक्षिता। आत्मैकत्वविद्या नाम ब्रह्मात्मैक्यसाक्षात्कारः। तस्य प्रतिपत्तिः लाभः, श्रवणाद्युपायैर्भवति। तदर्थं वेदान्तवाक्यानां श्रवणाद्युपायबोधकानामारम्भः। ब्रह्मविद्यायां च सर्वे वेदान्ताः कारणम्। न ह्येकस्य वेदान्तस्य दर्शनेन सर्ववेदान्तार्थः निर्णेतुं शक्यते। अतः सर्वेषां वेदान्तानां यथा

 In Public domain. Digitization Muthulakshmi Research Academy

येन प्रकारेण, प्रत्यक्ब्रह्मैक्यरूपार्थः, तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः इति शास्त्रबोध्यार्थं प्रतिजानते भगवत्पादाः-यथाचायमर्थः इत्यादिना। वेदान्तानां विचारितानां ब्रह्मात्मैक्यं विषयः। मोक्षः फलम्। विचारात्मकवेदान्तशास्त्रस्यापि त एव विषयप्रयोजने। ननु वेदान्तेषु प्राणाद्युपासनानामपि भानात्, कथमात्मैक्यमेव विषयः इति चेत्, "यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः" इतिभगवत्पादानां समाधानम्। शारीरकमीमांसा इत्युक्ते जीवस्य ब्रह्मत्वनिरूपको विचारः। शरीरमेव शारीरकम्। कुत्सितं शरीरमित्यर्थः। तत्र वसति यः शारीरकः। अर्थात् जीवः। तस्य ब्रह्मत्वविचार एव शारीरकमीमांसा। तस्यां मीमांसायां जीवब्रह्मैक्यतात्पर्यं निरूपयिष्यामः। अतश्च उपासनानां चित्तैकाग्र्यद्वारा आत्मैक्यज्ञानजने उपयोगात्, तत्प्रतिपादकोपासनावाक्यानामपि महातात्पर्यं ब्रह्मात्मैक्य एव विवक्ष्यते। एवं च अध्यासोक्त्या ब्रह्मात्मैक्ये विरोधाभावेन वेदान्तशास्त्रमारम्भणीयमिति सिद्धम्।।(र.प.पृ.26.)

इति चतुस्सूत्रीशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशे

अध्यासविचारात्मकं प्रथमवर्णकं समाप्तम्

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मजिज्ञासासूत्रोपक्रमभाष्यम्(द्वितीयवर्णकम्)

शा.भा.-वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्।

र.प्र.प्र.-विचारस्य साक्षात् विषयभूताः वेदान्ताः पूर्वतन्त्रेण गतार्था न वा? इति गतार्थत्वागतार्थसन्देहेन वेदान्तशास्त्रमारम्भणीयं न वा? इति सन्देहे- कृत्स्नस्य वेदस्य विधिपरत्वात्, विधेश्च "अथातो धर्मजिज्ञासा" (जै.सू.1.1.1.) इत्यादिपूर्वतन्त्रेण विचारितत्वात्, गतार्था एव वेदान्ताः इति कारणात्, अव्यवहितस्य बुद्धिस्थस्य विषयस्य प्रतिपाद्यस्याभावेन, वेदान्तशास्त्रं नारम्भणीयमिति पूर्वपक्षे प्राप्ते द्वितीयवर्णके अयं सिद्धन्तः। वेदान्तमीमांसाशास्त्रं व्याचिख्यासितं व्याख्यातुमिष्टम्। मीमांसाशब्दस्य विचार इत्यर्थः। स च विचारः पूजितविचारवचनो मीमांसाशब्दः इति (भामती.पृ.27.) भामतीकारोक्तेः पूजित इति ज्ञायते। वेदान्तविषयकविचारे पूजितत्वं च कथमित्युक्ते विचारेण ज्ञानलाभे ज्ञानादनर्थनिवृत्तिपूर्वकस्वस्वरूपसुखावाप्तिलक्षणमोक्षलाभत्, सर्वोत्तमप्रयोजनसद्भावेन विचारस्य पूजितत्वम्। एवं विचारनिरूकमिदं वेदान्तमीमांसाशास्त्रं व्याचिख्यासितम्। शास्त्रं च सूत्रसन्दर्भः। तस्य च शास्त्रस्य इदमादिमं सूत्रम्। अथातो ब्रह्मजिज्ञासा इति। यदि विधिरेव वेदार्थः स्यात्, सर्वज्ञो बादरायणः ब्रह्मजिज्ञासां न ब्रूयात्, ब्रह्मणि प्रमाणाभावात्। अतः ब्रह्मणो जिज्ञास्यत्वोक्त्या, केनापि तन्त्रेणानवगतत्वात्, ब्रह्मविचारः

 In Public domain. Digitization Muthulakshmi Research Academy

आरम्भणीयः इति सूत्रकृद्दर्शयति। सूत्रकृन्मनोगतं च व्यचिख्यासितस्य, अस्य इति पदद्वयं प्रयुञ्जानैः भाष्यकारैराविष्कृतम्। ब्रह्मविचारस्यागतार्थत्वं तु अग्रे भाष्ये जिज्ञास्यफलभेदाच्च इत्यादिना व्यक्तीभविष्यति।। (र.प्र.पृ.26,27.)

इति ब्रह्मजिज्ञासाधिकरणोपक्रमभाष्यरत्नप्रभाप्रकाशव्याख्या द्वितीयवर्णकं च समाप्तम्

In Public domain, Digitization Muthulakshmi Research Academy

ब्रह्मजिज्ञासाधिकरणम्- (तृतीयं वर्णकम्) अधिकारिफलविचारः

अथातो ब्रह्मजिज्ञासा।।1।।

शा.भा.-तत्राथशब्दः आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः, ब्रह्मजिज्ञासायाः अनधिकार्यत्वात्। मङ्गलस्य च वाक्यार्थे समन्वयाभावात्। अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति।

र.प्र.प्र.-एवं वर्णकद्वयेन वेदान्तविचारस्य कर्तव्यतायां विषयप्रयोजनवत्त्वम्, अगतार्थत्वं चेति हेतुद्वयं, सूत्रस्य आर्थिकार्थरूपमध्यासं च व्याख्याय भाष्यकारः सूत्राक्षरार्थव्याख्यामारभमाणः जिज्ञासाधिकरणाङ्गभूतसन्देहेषु कतिपयेषु निवारितेष्वपि, पुनरप्यधिकारिभावाभावाभ्यां शास्त्रारम्भसन्देहे सति, सिद्धान्ताङ्गतया अधिकारिणं न्यायतो निरूपणाय, सूत्राक्षरार्थव्याख्यानाय चोपक्रान्तः भाष्यकारः "अथ, अतः" इत्यादिपदकदम्बकं व्याख्यास्यन्, आदौ अथशब्दार्थं व्याचष्टे। "तत्राथशब्दः आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः" इत्यादिना। ब्रह्मजिज्ञासा इत्यत्र जिज्ञासापदस्य जहल्लक्षणया ज्ञानेच्छासाध्यविचारस्य उपस्थितेः, तस्य च अध्याहृतकर्तव्यपदार्थे अन्वये 'ब्रह्मविचारः कर्तव्यः' इत्यर्थः वर्णितो भवति। विचारस्याधिकारी कः? इति जिज्ञासायां अथ अतश्शब्दसम्मेलनेन

 In Public domain. Digitization Muthulakshmi Research Academy

साधनचतुष्टयवानधिकारी इति फलति। तत्र अथशब्दस्य आदौ कः अर्थः इति विचारणीयम्। (र.प्र.पृ.27.)

अथशब्दार्थविचारः- भाष्ये अथशब्दार्थविचारसन्दर्भे उपक्रममङ्गल अर्थान्तरक्रमाद्यर्थान् व्युदस्य, आनन्तर्यार्थत्वं सिद्धान्तितम्। "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इति कोशात्, 1.मङ्गलम्, 2.आनन्तर्यम्, 3.आरम्भः 4.प्रश्नः, 5.कात्स्न्र्यम् इति पञ्च अर्थाः कोशे निर्दिष्टाः। तत्र सूत्रे, आनन्तर्यार्थ एवाथशब्दः परिगृह्यते, नाधिकारार्थः। अधिकारो नाम आरम्भः। यथा "अथ योगानुशासनम्" (योगसूत्राणि1.1.) इत्यत्र योगानुशासनारम्भार्थः अथशब्दः, तद्वदत्र आरम्भार्थः इति वक्तुं न शक्यते। तथाहि जिज्ञासापदस्यकिं ज्ञानेच्छापरत्वम्? उत विचारलक्षकत्वम्? इति प्रश्ने, ज्ञानेच्छापरत्वस्वीकारे तस्य उपक्रमार्थकेनाथशब्देन सम्बन्धः न युज्यते। विषयसौन्दर्यबललभ्याया इच्छायाः पुरुषकृतिसाध्यत्वाभावेन अनारम्भ्यत्वात्। अन्यच्च प्रत्यधिकरणमिच्छापि नोपक्रमते। किन्तु इच्छाप्रयुक्तः विचार एव। अतः ब्रह्मजिज्ञासाया अनधिकार्यत्वात् नारम्भार्थः अथशब्दः। अन्यच्च जिज्ञासापदस्य लक्षणया विचारार्थकत्वस्वीकारेऽपि, कर्तव्यपदाध्याहारं विना जिज्ञासापदस्य लक्षणायोगात्, प्रथमतः कर्तव्यपदाध्याहारः कर्तव्यः। कर्तव्यपदाध्याहारेणैव आरभ्यते इत्यर्थ लाभे, पुनः अथशब्दस्यारम्भार्थकत्वं व्यर्थम्। (र.प्र.पृ.27.)

In Public domain. Digitization Muthulakshmi Research Academy

अथशब्दस्य मङ्गलद्योतकत्वमेव न वाचकत्वम्- अथशब्दस्य मङ्गलार्थकत्वेऽपि, मङ्गलवाचकत्वं न सम्भवति। शाब्दिकरीत्या निपातानां द्योतकत्वात्। "मङ्गलस्य वाक्यार्थे समन्वयाभावात्" इति भाष्यम्। वाक्यार्थो हि विचारकर्तव्यता। विचारकर्तव्यतायां अथशब्दार्थस्य मङ्गलस्य कर्तृत्वेनान्वयायोग्यत्वात्। दूर्वादर्शनं मङ्गलमितिवत् ब्रह्मजिज्ञासा मङ्गलम् इति वाक्यार्थो वर्णयितुं न शक्यते। पूर्वोक्तरीत्या विचारकर्तव्यताया एव वाक्यार्थत्वात्। जिज्ञासागतमङ्गलत्वस्य अवाक्यार्थत्वाच्च। न च शास्त्रादौ मङ्गलं कार्यमित्यर्थबोधाय अथशब्दः प्रयुक्त इति चेत्, सत्यमित्याह (र.प्र.पृ.28.) रत्नप्रभाकारः "अर्थान्तरप्रयुक्त एव ह्यथशब्दः" इत्यादिभाष्यग्रन्थनिरूपणाय। वस्तुतस्तु 'मङ्गलं कार्यम्,' 'जिज्ञासा कर्तव्या' इत्युभयविधार्थबोधस्वीकारे, वाक्यभेदप्रसङ्गात्, अथशब्दस्य मङ्गलार्थत्वं वक्तुं न शक्यते। तथापि अथशब्दश्रवणं अथशब्दोच्चारणं च मङ्गलकृत्यं सम्पादयति। श्रुत्या श्रवणेन, शङ्खवीणादिनादश्रवणवत्, ओङ्काराथशब्दश्रवणमेव मङ्गलकार्यं सम्पादयति। "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ"।। इति स्मृतेः। एवं च आनन्तर्यार्थबोधक एवायमथशब्दः न मङ्गलार्थकः। (र.प्र.पृ.27-28) अथशब्दस्य मङ्गलवाचकत्वपक्षे तु मङ्गलस्य विचारद्वारा

In Public domain. Digitization Muthulakshmi Research Academy

कर्तव्यतायामन्वयो भवत्येव, किन्तु मङ्गलार्थकत्वमात्रेण अथशब्देन शास्त्रारम्भप्रयोजकासाधारणहेतुरुद्घाटितो भवति।

अथशब्दस्य पूर्वप्रकृतापेक्षयार्थान्तरपरत्वाभावः-

शा.भा.-पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात् ।

ननु "प्रपञ्चो मिथ्ये"ति वादिना अद्वैतिना प्रतिज्ञाते सति, अथैतन्मिथ्या, 'प्रपञ्चः सत्यः', इति प्रतिवादिनि द्वैतिनि प्रत्यवतिष्ठमाने सति, तादृशप्रत्यवस्थानपरे वाक्ये प्रयुज्यमानः अथशब्दः यथा अर्थान्तरपरः, तथा अत्र अथशब्दस्य अर्थान्तरपरत्वमेव किं न स्यात्। एतत्प्रश्नोत्तरबोधकं च भाष्यवचनं गम्भीरार्थकमस्तीत्यादौ तद्वाक्यमुदाह्रियते "पूर्वप्रकृतापेक्षायाश्च फलतः आनन्तर्याव्यतिरेकात्" इति। वाक्यस्यास्य रत्नप्रभाकारैः द्वेधा अर्थः प्रदर्शितः। तत्र प्रथमपक्षे वाक्येऽस्मिन् अर्थान्तरे बुबोधयिषितस्यानन्तर्याव्यतिरेकस्य निरूपणायोपयोगितया अर्थान्तरत्वस्य इत्यध्याहार्यम्। फलतः इति यद्यपि पञ्चमी, तथापि फलस्येति षष्ठ्यन्तत्वेनार्थो ग्राह्यः। एतदेव "फलतः फलस्येत्यर्थः" इति रत्नप्रभायां व्याख्यातम्। फलस्य इत्यस्य अध्याहृतार्थान्तरत्वस्य इत्यनेनान्वयः। एवं च फलनिष्ठं यदर्थान्तरत्वम् इति पर्यवस्यति। अत्र पूर्वप्रकृतापेक्षायाः किं फलमित्युक्ते, ब्रह्मजिज्ञासात्मकब्रह्मविचार एव। तादृशविचारात्मकफले पूर्वप्रकृतापेक्षा इत्युक्ते,

In Public domain. Digitization Muthulakshmi Research Academy

यत्किञ्चित्पूर्वप्रकृतेत्यर्थो न वक्तव्यः। यतः लोके फलाद्यत्किञ्चित् पूर्वप्रकृतं स्यादेव। अतः पूर्वप्रकृतापेक्षा इत्यत्र पूर्वप्रकृतः हेतुरेव भवति। तन्निरूपितं फलनिष्ठमर्थान्तरत्वं च कार्यकारणभावरूपे आनन्तर्ये एव पर्यवस्यति। ततश्च पूर्वप्रकृतापेक्षायाः इति पञ्चमी। पूर्वप्रकृतापेक्षा अस्य अस्तीति व्युत्पत्तिस्वीकारे, इदंशब्दार्थः प्रकृतहेतुर्भवति। ततः फलस्य यदर्थान्तरत्वं, तस्य आनन्तर्याव्यतिरेकात् इति भाष्यवाक्यस्यार्थः। अत्र च अथशब्दस्य केवलमर्थान्तरत्ववाचकत्वमात्रेण परितोषो न कर्तव्यः। तस्मादर्थान्तरमित्युक्ते, यस्मादर्थान्तरं तस्य हेतुत्वाप्रतीतेः। तस्मादनन्तरमित्युक्ते तु हेतुत्वं प्रतीयत एव। न चैवं सति यत्र आनन्तर्यार्थप्रतीतिः तत्र हेतुत्वभानम् इत्यर्थस्वीकारे "अश्वादनन्तरो गौः" इत्यत्रापि हेतुत्वभानापत्तिरिति वाच्यम्। गवाश्वयोः तत्र आनन्तर्यप्रतीतावपि, तयोः देशतः कालतश्च व्यवधानेन सामग्रीकार्ययोरिव मुख्यमानन्तर्यं नास्ति। किन्तु मुख्यमेवानन्तर्यम्। सामग्रीफलयोस्तु एकदेशावच्छेदेन, एककालावच्छेदेन समाविष्टत्वात् मुख्यमेवानन्तर्यम्, अव्यवधानात्। एतादृशानन्तर्ये प्रतिपादितेऽर्थान्तरत्वं तयोर्नवाच्यमेव। फले सामग्र्याः अर्थान्तरत्वस्यानुक्तावपि ज्ञातत्वात्। हेतुफलभावज्ञानस्यासम्पादकत्वेन तादृशार्थान्तरत्वोक्तेः व्यर्थत्वाच्च। (र.प्र.पृ.29)

In Public domain. Digitization Muthulakshmi Research Academy

यद्वा पूर्वप्रकृते अर्थे अपेक्षा यस्याः सा पूर्वप्रकृतापेक्षा इति बहुव्रीहेः विग्रहः। तत्र विग्रहवाक्यघटकस्य यस्याः इति स्त्रीलिङ्गषष्ठ्यन्तयच्छब्दार्थस्य अन्यपदार्थस्य अर्थान्तरतारूपत्वेन अर्थान्तरतायाः इत्यर्थस्य, यस्याः इति षष्ठ्यन्तेनैव लाभात् अर्थान्तरतायाः इति पृथङ्नाध्याहर्तव्यम्। अत्र च पूर्वप्रकृतं किञ्चित्, तदपेक्षया अर्थान्तरं विचारः, तत्फलं च इति त्रयाणां सत्त्वात्, ज्ञानरूपफलापेक्षया अर्थान्तरस्य विचारस्य यदर्थान्तरत्वम्, तत् पूर्वप्रकृतस्य फलापेक्षया आनन्तर्यमेव भवतीति, अर्थान्तरतायाः आनन्तर्याव्यतिरेकादिति भाष्यसमन्वयः। पक्षेऽस्मिन् फलत इत्यस्य फलस्येति परिवर्तनमपि न कार्यम्। फलतः फलापेक्षया विचारे अर्थान्तरताया एव विवक्षितत्वात्। 'फलं ज्ञानं, तद्द्वाराआनन्तर्याव्यतिरेकात्' इति रत्नप्रभावचनस्यापि, फलापेक्षया विचारे अर्थान्तरतायाः आनन्तर्याव्यतिरेकात् इत्यत्रैव तात्पर्यात्। एवं च आनन्तर्यव्यतिरिक्ततया अर्थान्तरत्वं न अथशब्दार्थ इति फलितम्। (र.प्र.पृ.29.)

अथशब्दस्यानन्तर्यार्थकत्वेऽपि धर्मजिज्ञासानन्तर्यं कर्मावबोधानन्तर्यं वा नाथशब्दार्थः-

शा.भा.- सति चानन्तर्यार्थकत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते, तद्वक्तव्यम्।

स्वाध्यायानन्तर्यं तु समानम्। नन्विह कर्मावबोधानन्तर्यं विशेषः। न। धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः।

र.प्र.प्र.- अथशब्दस्य आनन्तर्यार्थकत्वे यथा धर्मजिज्ञासा नियमेन पूर्ववृत्तमपेक्षते, एवमेव ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं तन्नियमेनापेक्षत इति वक्तव्यम्। नियमेन पूर्वभावि च पुष्कलकारणम् असाधारणकारणमित्युच्यते। तदेवावधिरिति वक्तव्यम्। ननु धर्मविचार इव ब्रह्मविचारेऽपि, वेदाध्ययनमेव पुष्कलं कारणं भवतु इति चेत्, न, स्वाध्यायानन्तर्यस्य साधारणकारणत्वेनापुष्कल-कारणत्वात्। धर्मब्रह्मणोरुभयोरपि वेदार्थत्वेन, तद्विचारं प्रति स्वाध्यायानन्तर्यस्य समानत्वात्। ननु कर्मावबोधोऽपि ब्रह्मविचारं प्रत्यसाधारणकारणम्। यतो हि "यजेत स्वर्गकाम" इति श्रुत्या स्वर्गार्थं विनियुक्तस्य यज्ञस्य "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति(बृ.उ.4.4.22) श्रुत्या ज्ञानार्थं विनियोगस्य प्रतिपादनात्, कर्मावबोधस्यापि ज्ञानं प्रत्यसाधारणकारणत्वात्। "एकस्यतूभयत्वे (तूभयार्थत्वे) संयोगपृथत्त्वम्" (जै.सू.4.3.5.) इति जैमिनिसूत्रम्। एकस्य यज्ञस्य, उभयत्वे स्वर्गज्ञानोभयार्थत्वे, संयोगपृथत्त्वम् विनियोजकवाक्यभेदः, इति पूर्वोक्तन्यायस्यार्थः। अनेन न्यायेन "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" (ब्र.सू.3.4.26) इति सर्वापेक्षाधिकरणे ज्ञानाङ्गत्वमपि कर्मणां वक्ष्यत इति,

In Public domain. Digitization Muthulakshmi Research Academy
कर्मावबोधानन्तर्यम् अथशब्दार्थः किं न स्यादिति शङ्का। न इत्यादिना भाष्ये समाधानं च। धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः, न कर्मावबोधानन्तर्यं ब्रह्मविचारे पुष्कलकारणम्। अयमभिप्रायः। न तावत् पूर्वतन्त्रस्थं न्यायसहस्रं ब्रह्मज्ञाने तद्विचारे वा पुष्कलकारणम्। न्यायसहस्रस्य धर्मनिर्णयमात्रहेतुत्वात्। नापि कर्मनिर्णयः ब्रह्मजिज्ञासां प्रति हेतुरिति वक्तुं शक्यते। कर्मनिर्णयस्य कर्मानुष्ठानमात्रहेतुत्वात्। न च "यत्र धूमस्तत्राग्नि"रितिवत्" यत्र कर्मज्ञानं तत्र ब्रह्मज्ञान"मिति व्याप्तिरस्ति। तथा सत्येव किल कर्मावबोधस्य ब्रह्मज्ञानाङ्गत्वम्?। यद्यपि कर्मावबोधद्वारा कर्मानुष्ठाने सति, चित्तशुद्धेः विवेकस्य च जननात्, कर्माणि ब्रह्मविचारहेतवः भवन्ति, तथापि, तेषां कर्मणां नब्रह्मविचाराधिकारिविशेषणत्वम्, अज्ञातानां जन्मान्तरकृतानामपि कर्मणां ब्रह्मविचाररूपफलहेतुत्वात्, ब्रह्मविचाराधिकारिविशेषणं कर्म न भवति। ज्ञायमानानां नित्यानित्यवस्तुविवेकवैराग्यादीनामेव, ब्रह्मविचाराधिकारिविशेषणत्वात्। प्राग्भवीयकर्मणां तु अज्ञातत्वेन तेषां कर्मणां अधिकारिविशेषणत्वायोगात्। अतः कर्मावबोधः तदुपयोगिन्यायविचारो वा न ब्रह्मजिज्ञासायाः अवधिरिति, कर्मजिज्ञासानन्तर्यं नाथशब्दार्थः। (र.प्र.पृ.29-32.)

अथशब्दस्य क्रमरूपार्थान्तरपरत्वशङ्कानिरासः-

शा.भा.- यथा च हृदयाद्यवदानानामानन्तर्यनियमः, क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः, शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावात्, धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च। अभ्युदयफलं धर्मज्ञानं, तच्चानुष्ठानापेक्षम्। निःश्रेयसफलन्तु ब्रह्मविज्ञानं, न चानुष्ठानान्तरापेक्षम्। भव्यश्च धर्मोजिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारपरतन्त्रत्वात्। इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वात्, न पुरुषव्यापारपरतन्त्रम्। चोदनाप्रवृत्तिभेदाच्च। या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैवपुरुषमवबोधयति। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाऽजन्यत्वात्, न पुरुषोऽवबोधे नियुज्यते। यथाऽक्षार्थसंनिकर्षेणार्थावबोधे तद्वत्।।

र.प्र.प्र.--अथशब्दस्य धर्मजिज्ञासानन्तर्यार्थकत्वाभावेऽपि, क्रमरूपार्थान्तरपरत्वं किं न स्यात्? यथा "हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः" (तै.स.) इति श्रुत्या पशुयागे विहितानां तत्तदवयवावदानानां क्रमज्ञानाय, अथशब्दः उपयुक्तः। प्रथमतः हृदयभागात्, अथ जिह्वायाः, अथ वक्षसः, भागाः अवदेयाः इत्यवदानानां क्रमबोधः यथा, तथा आदौकर्मजिज्ञासा, ततः ब्रह्मजिज्ञासा इति तयोः क्रमः अत्र विवक्षितः इति चेत्, "न तथेह क्रमो विवक्षितः, शेषशेषित्वे अधिकृताधिकारे वा प्रमाणाभावात्"-

 In Public domain. Digitization Muthulakshmi Research Academy

इति भाष्यम्। यत्र एककर्तृकत्वेन एकषेषत्वं, शेषशेषिभावः, अधिकृताधिकारो वा प्रतिभाति, तत्रैव क्रमविवक्षा, नान्यत्र। यथा पशुयागे अवदानानां प्रयाजादीनां च पशुयागाङ्गत्वेन एकशेषत्वात्, तयोः क्रमस्य विवक्षा युक्ता। एवं ययोः शेषशेषित्वं यथा प्रयाजदर्शयोः, तत्रापि, अङ्गप्रधानक्रमः, दर्शस्य शेषित्वात्, प्रयाजादीनां च शेषत्वात् अङ्गत्वात्, अङ्गप्रधानक्रमः। एवमधिकृताधिकारस्थलेऽपि क्रमः अधिकृताधिकारात्सिध्यति। यथा दर्शयागे "चमसेनापः प्रणयेत्" इत्यपां प्रणयनं किञ्चिदङ्गं विहितम्। तच्च चमसेन कर्तव्यम्। यः दर्शाधिकारी स एव पशुकामश्चेत्, तेनाप्प्रणयनाश्रितेन गोदोहपात्रेण पशुलक्षणं फलं सम्पादनीयम्। "गोदोहेन पशुकामस्य" इति विशेषविधानात्। तत्र च गोदोहनपात्रधर्मानुष्ठानस्य दर्शयागीयतत्पूर्वाङ्गनिरूपितः क्रमः दर्शाधिकृताधिकारात्सिद्ध्यति। तेषामेककर्तृकत्वं च सम्भवति। एकप्रयोगवचनगृहीतानामङ्गानां युगपदनुष्ठानासम्भवात्, क्रमाकांक्षायां, श्रुति-अर्थ-पाठ-स्थान-मुख्य-प्रवृत्त्याख्यैः प्रयोग-विधिसहकारिभिः प्रमाणैः क्रमः सिद्ध्यति। किन्तु धर्मजिज्ञासाब्रह्मजिज्ञासयोः शेषशेषित्वे श्रुत्याद्यन्यतम-प्रमाणाभावात्, शेषशेषित्वं नास्ति। अतश्च 'कर्मजिज्ञासानन्तरं ब्रह्मजिज्ञासा; इति क्रमो न युक्तः। एवमेव "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते"त्यत्रापि दर्शाद्युत्तरकालं विहिते सोमयागे

In Public domain. Digitization Muthulakshmi Research Academy
दर्शाधिकृताधिकारात्, तयोः एककर्तृकत्वम्। तत एव क्रमबोधकप्रमाणसहकारेण द्वयोः यागयोः क्रमः। एतादृशाधिकाराभावान्नात्र जिज्ञासाद्वयस्य एककर्तृकत्वनिबन्धनः क्रमः।

ननु "ब्रह्मचर्यं समाप्य गृही भवेत्। गृही भूत्वा प्रव्रजेत् गृहाद्वा वनाद्वा"—(जा.उ.4.) इति जाबालश्रुत्या, "अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य यत्नतः। इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत्"।। इति (म.स्मृ.6.36) स्मृत्या च कर्माधिकृताधिकारत्वं मोक्षस्य भातीति, द्वयोः जिज्ञासयोः क्रमः अस्त्येवेति वाच्यम्। त्वया उदाहृतयोः श्रुतिस्मृत्योः अशुद्धचित्तविषयत्वावगमात्। एतदुक्तं भवति जन्मान्तरकृतकर्मभिः यदि चित्तं शुद्धं, तर्हि, ब्रह्मचर्यादेव सन्यस्य ब्रह्म विजिज्ञासितव्यम्। यदि न शुद्धमिति स्वगतरागेण ज्ञायते, तर्हि अवश्यं गृही भवेत्। तत्राप्यशुद्धौ वनी भवेत्। तत्राप्यशुद्धौ तथैव कालमाकलयेत्। यदि वानप्रस्थे शुद्धः, तर्हि प्रव्रजेत्। तथा च श्रुतिः "यदहरेव विरजेत्, तदहरेव प्रव्रजेत्" इति। वैराग्यपरिपाकयोग्यतायां सत्यामेव ज्ञातायामेव सत्यां संन्यासाधिकारः, अन्यथा तु नास्ति। एतदज्ञात्वा केचिदधुनापि वृथा पारिव्रज्यं स्वीकृत्य, महीमण्डलमाहिण्डन्ते। ब्रह्मचर्यादेव प्रव्रजेत्- इति जाबालश्रुतिरपि कर्मजिज्ञासां विनैव ब्रह्मजिज्ञासायां प्रमाणम्। (र.प्र.पृ.32-34.)

 In Public domain. Digitization Muthulakshmi Research Academy

ननु धर्मब्रह्मजिज्ञासयोः शेषशेषित्वाधिकृताधिकारित्वाभावेऽपि, एकफलत्वेन, एकजिज्ञास्यत्वेन एककर्तृकत्वं तयोस्स्यादेव। वदन्ति हि समुच्चयवादिनः ज्ञानकर्मभ्यां मुक्तिरिति। एवं धर्मब्रह्मणोरविशिष्टतया वेदार्थत्वेन, जिज्ञासैक्यादेककर्तृकत्वम्। आग्नेय-उपांशुयाग-आग्नेयलक्षणत्रिकात्मकपौर्णमासयागस्य, ऐन्द्र-पयः उपांशुयाग ऐन्द्रदधिलक्षणामावास्यायागस्य च पूर्वमीमांसायां द्वादशलक्षण्याम् एकस्वर्गफलकत्वात् एककर्तृकत्वं निर्धारितम्। प्रमाण-भेद-अङ्गाङ्गिभावादिलक्षणनिरूप्यविषयभेदेऽपि, जिज्ञास्यस्य धर्मस्यैकत्वात्, एककर्तृकत्वम्। एवं च एककर्तृत्वस्य प्रकृतेऽपि सद्भावात्, धर्मजिज्ञासाब्रह्मजिज्ञासयोः क्रम एवाथशब्देन विवक्षित इतिचेन्नैवम्। सौर्यार्यम्णप्राजापत्यचरूणां ब्रह्मवर्चसस्वर्ग-आयुः फलानां "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" "अर्यम्णे चरुं निर्वपेत्सुवर्गकामः" "प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः" इति श्रुतिभिः विहितानां भिन्नफलत्वेन एकफलत्वाभावात् यथा क्रमो न विवक्षितः, तद्वदत्र अभ्युदयफलस्यधर्मज्ञानस्य, निःश्रेयसफलस्य, अनुष्ठानान्तरनिरपेक्षस्य ब्रह्मविज्ञानस्य च क्रमः नविवक्षितः। अभ्युदयो नाम अभितः उदेति, विषयाभिमुख्येन उदेतीत्यभ्युदयः। अर्थात् विषयाधीनं स्वर्गादिसुखम्। तच्च धर्मज्ञानहेतोः मीमांसायाः फलम्। ब्रह्मज्ञानस्य तु निःश्रेयसं फलम्। निःश्रेयसं नाम नित्यं निरपेक्षं श्रेयः। अर्थान्मोक्षः।

In Public domain. Digitization Muthulakshmi Research Academy

तद्ब्रह्मजिज्ञासायाः फलम्। एवं न केवलं धर्मजिज्ञासा-ब्रह्मजिज्ञासयोः, अथवा तज्ज्ञानयोः फलभेदः, अपि तु अनुष्ठानापेक्षत्व-निरपेक्षत्वाभ्यामपि भेदः अस्ति। धर्मावगमे जाते, तस्य धर्मानुष्ठानद्वारा स्वर्गादिफलजनकत्वम्। ब्रह्मावगमे तु जाते न किञ्चिदन्यनुष्ठेयमस्ति, कृतार्थत्वात्। अतः द्वयोः ज्ञानयोः सापेक्षत्वनिरपेक्षत्वाभ्यामपि भेदः अस्ति। (र.प्र.पृ.34-35.)

जिज्ञास्यभेदादपि जिज्ञासयोर्भेदः। यथा कामचिकित्सातन्त्रयोः स्त्रीपुंविषयकरागरञ्जितप्रवृत्तिविषयकत्वेन, धतुसाम्यप्रयुक्तस्वस्थताऽर्थिविषयकत्वेन च जिज्ञासाभेदः अस्ति, तद्वत् धर्मब्रह्मजिज्ञासयोरपि विषयभेदाद्भेदः। अतः तयोः एककर्तृकत्वं नास्तीति अथशब्देन क्रमविवक्षायाः नास्त्यवकाशः। धर्मब्रह्मणोः कीदृशः विषयभेदः इत्युक्ते "भव्यश्च धर्मो न जिज्ञासाकालेऽस्ति, पुरुषव्यापारपरतन्त्रत्वात्, इह तु भूतं ब्रह्म जिज्ञास्यं, नित्यत्वात् न पुरुषव्यापारपरतन्त्रम्" इत्युक्तं भाष्ये। भव्यः भवतीति भव्यः, साध्य इत्यर्थः। स च धर्मः जिज्ञासाकाले नास्ति, अपि तु यागाद्यनुष्ठानसाध्यः। नहि धर्मस्य ज्ञानकाले अभावमात्रेण तुच्छत्वं वक्तुं शक्यते। अत एव भाष्ये तस्य पुरुषव्यापारतन्त्रत्वमुक्तम्। पुरुषप्रयत्नतन्त्रत्वात् तदधीनत्वात्, धर्मः साध्य एव भवति, न सिद्धः। इह विचारणीयं ब्रह्मभूतं सिद्धं, नित्यत्वात् तस्य पुरुषव्यापारतन्त्रत्वं नास्ति।

In Public domain. Digitization Muthulakshmi Research Academy

'चोदनाप्रवृत्तिभेदाच्च' धर्मविषये चोदनात्मकं वैदिकं वाक्यं प्रमाणम्। सा च चोदना धर्मे नियुञ्जानैव पुरुषं धर्ममवबोधयति। वेदान्तवाक्यरूपब्रह्मचोदना तु केवलं पुरुषं ब्रह्म बोधयति, न प्रवर्तयति। तथा च कर्मवाक्ये अज्ञातज्ञापकत्वलक्षणविधित्वम्, अप्रवृत्तप्रवर्तकत्वलक्षणचोदकत्वं चोभयमस्ति। वेदान्तन्तवाक्य-रूपचोदनायां तु अवबोधकत्वमेवास्ति, न प्रवर्तकत्वमिति, धर्म-ब्रह्मचोदनयोर्विशेषः। न च वेदान्तवाक्यात् ब्रह्मावबोधे जाते तत्र चोदनया प्रवृत्तिर्भवतीति वाच्यम्। यथा हि अक्षार्थसंनिकर्षे सति जायमाने प्रत्यक्षरूपावबोधे प्रवृत्तिं विनैव तज्ज्ञानं अक्षार्थसंनिकर्षादेव जायते, एवमेव वेदान्तवाक्यात् प्रमाणभूतात् विचारसहकृतात्, अर्थावबोधः जायते, तत्र न कस्यापि प्रवृत्त्यपेक्षास्ति। "स्वर्गकामो यजेते"ति वाक्यं स्वविषये यागकरणकस्वर्गादिफलकभावनारूपे धर्मे, फलहेतुयागादि-विषयकनियोगात्मके धर्मे वा पुरुषं प्रवर्तयदेवावबोधयति। "अयमात्मा ब्रह्म" "तत्त्वमसी"त्यादिवाक्यं तु त्वमर्थं केवलं अप्रपञ्चब्रह्मत्वेन बोधयत्येव, न प्रवर्तयति। अध्यस्तधर्मनिषेधे विषयाभावात्। अन्यच्च यजेतेत्यादिविधिवाक्यस्थले 'अयं मां प्रवर्तयतीति' प्रवृत्त्यवबोधः, ब्रह्मवाक्यस्थले तु न, पूर्वोक्तरीत्या अध्यस्तसर्वधर्मनिषेधात्। (र.प्र.पृ.35-36.)

In Public domain. Digitization Muthulakshmi Research Academy

नच वेदान्तवाक्यस्थले विषयाभावेऽपि अवबोध एव विषयः, तत्रैव पुरुषः प्रवर्तते इति वाच्यम्। ब्रह्मचोदनया केवलं ब्रह्मावगमात्, तद्वाक्यस्य प्रवर्तकत्वाभावेनवाक्यजन्यबोधे वेदान्तवाक्यस्य प्रवर्तकत्वं न युज्यते। किञ्च 'प्रवर्तकमानमेयः धर्मः'। 'उदासीनमानमेयं ब्रह्म' इति जिज्ञास्ययोः धर्मब्रह्मणोः भेदेन एककर्तृकत्वाभावादपि, तयोः जिज्ञासयोः क्रमबोधकः अथशब्द इति वक्तुं न शक्यते। (र.प्र.पृ.36.)

अथशब्दस्य साधनचतुष्टयसम्पत्त्यानन्तर्यार्थकत्वम्

शा.भा.-तस्मात्किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति। उच्यते नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वं च। तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये। तस्मादथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यते।

र.प्र.प्र.- एवमथशब्दस्य आरम्भ-मङ्गल-अर्थान्तरत्व-क्रमाद्यर्थान्तरबोधकत्वासम्भवात्, आनन्तर्यार्थकत्वमेवास्थेयम्। यदनन्तरं ब्रह्मजिज्ञासा सूत्रकृता उपदिश्यते, तदपि वक्तव्यमिति चेदुच्यते इत्यादिना भाष्य एव, ब्रह्मजिज्ञासां प्रति नियतकारणान्युक्तानि उक्तानि। 1.नित्यानित्यवस्तुविवेकः 2.इहामुत्रार्थभोगविरागः 3.शमदमादिसाधनसम्पत्तिः 4.मुमुक्षुत्वं चेति।

 In Public domain. Digitization Muthulakshmi Research Academy

1. तत्र नित्यानित्यवस्तुविवेकः- नाम, अयं नित्यः अयमनित्यः इति ज्ञानमात्रं न हि। तावन्मात्रस्य ब्रह्मविचरानुपयोगित्वात्। किंतु आत्मातिरिक्तं सर्वमनित्यम्, कार्यत्वात् घटवत् इत्यनुमानात्मकमेव। तथा आत्मैव नित्यः क्रियारहितत्वात्, सर्वविक्रियाशून्यत्वात् इत्यादिः बुद्धिङ्क्षः आगमार्थाविरुद्धः यः अनुमित्यात्मकः निश्चयः, स एव नित्यानित्यवस्तुविवेकः।

2.इहामुत्रार्थफलभोगविरागः इहलोकपरलोकयोरर्थ्यमानेषु भोगेषु फलेषु वैराग्यम्। अर्थात्, वर्तमानदेहस्थितिहेतु-भूताऽनिषिद्धान्नाद्यतिरिक्तार्थेच्छाराहित्यलक्षणेहामुत्रार्थवैराग्यम्।

3.शमदमादिसाधनसम्पत्तिः- 1.शमः लौकिकव्यापारात् मनसः उपरमः। 2.बाह्यकरणानामुपशमः दमः। 3.उपरतिः-ज्ञानार्थं विहितनित्यादिकर्मसंन्यासः। ज्ञानसाधनाय, लौकिक-कर्माणि परित्यज्य, नित्य-नैमित्तिक-कर्माण्युपादत्ते। ततः चित्तपरिपाकसिद्धौ, तान्यपि कर्माणि यतिर्भवन् परित्यजति। अतः नित्य–नैमित्तिक-कर्मपरित्याग एवोपरतिः। 4.तितिक्षा-शीतोष्णादिद्वन्द्वसहनम्। 5.समाधिः ज्ञानार्थिनः निद्रालस्य प्रमादत्यागः अवश्यमपेक्ष्यते। निद्रालस्यप्रमादत्यागेन मनसः स्थितिः समाधानम्। 6.श्रद्धा-सर्वत्रास्तिकता। गुरूपदिष्टशास्त्र-

In Public domain. Digitization Muthulakshmi Research Academy

वाक्येषु श्रुतिवाक्येषु च विश्वासः। एषैव शमदमादिसाधनषट्क-सम्पत्तिरित्युच्यते।

4.मुमुक्षुत्वम्- मोक्षे तीव्रेच्छा मुमुक्षुत्वम्। विवेकादीनामागमसंमतत्वं तु प्रागेवोपपादितम्। अत्र च नित्यानित्यवस्तुविवेकः पूर्वोक्तलक्षणलक्षितः वैराग्योत्पत्तौ अन्वयव्यतिरेकाभ्यां हेतुः। विरागित्वे सत्येव साधनषट्कसम्पत्तेः सौलभ्यम्। तत्सत्त्व एवमुमुक्षुत्वम्। तत्सत्त्व एवान्वयव्यतिरेकाभ्यां ब्रह्मजिज्ञासायाः क्रमेणाविर्भावः। एतत्साधनसम्पत्त्यभावे कथंचित्कुतूहलितया ब्रह्मविचारे क्रियमाणेऽपि, ब्रह्मज्ञानफलं ब्रह्मापरोक्षसाक्षात्कारः नोदेति। एवं च साधनचतुष्टयसम्पत्तिः यद्यस्ति, प्रागपि धर्मजिज्ञासायाः ऊर्ध्वं च ब्रह्म जिज्ञासितुं शक्यते। तस्मात् अथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यते। (र.प्र.पृ.36-37.)

अतश्शब्दार्थविचारः

शा.भा.- अतश्शब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादीनां श्रेयस्साधनानामनित्यफलतां दर्शयति "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" (छा.उ.8.1.6.) इत्यादिः। तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति "ब्रह्मविदाप्नोति परम्" इत्यादिः (तै.उ.2.1.)। तस्माद्यथोक्तसाधन-सम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या।।

 In Public domain. Digitization Muthulakshmi Research Academy

र.प्र.प्र- ननु नित्यानित्यवस्तुविवेकादिकं न सम्भवत्येव। यतः "अक्षय्यंह वै चातुर्मास्ययाजिनः सुकृतम्" इत्यादिश्रुत्या चातुर्मास्ययागफलस्य नित्यत्वेन, तद्ग्रहणेच्छा एव सद्भावात्, कथं चिदैहिकफलेच्छायाः क्लेशेनत्यागसम्भवेऽपि, आमुष्मिक-फलेच्छात्यागः न सम्भवति। अतः ब्रह्मप्रतिद्वन्द्विनः चातुर्मास्यफलस्य सद्भावे, जीवस्य ब्रह्मात्मत्वप्राप्त्या मोक्षोऽपि, न सम्भवति। किं च एकरूपेणावस्थितस्य प्राप्तुः अन्यस्याभावात् लोष्टादिवत्पुरुषार्थत्वायोगाच्च। अतः ब्रह्मजिज्ञासाचरमकारणीभूता मुमुक्षापि न सम्भवतीति चेत् अत एव सूत्रे हेत्वर्थः अतश्शब्दः उपयुक्तः। कोऽसौ हेतुरित्युक्ते **"अतश्शब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादीनां श्रेयस्साधनानामनित्यफलतां दर्शयति"** इति **भाष्यग्रन्थेनोक्तम्।** अग्निहोत्रादीनां श्रेयस्साधनानामपि कृष्यादिकर्म-फलवत् अनित्यफलत्वमेव **तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते (छा.उ.8.1.6.)** इत्यादिश्रुत्या दर्शितम्। तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति **ब्रह्मविदाप्नोति परम् इत्यादि (तै.उ.2.1.)** श्रुत्या मोक्षाख्यपरब्रह्मावाप्तिलक्षणः नित्यः पुरुषार्थ एव ब्रह्मविज्ञानस्य दर्शितः। यथाहिवेदः कर्मफलस्यानित्यत्वं दर्शयति, तथा ब्रह्मज्ञानात् प्रशान्तशोकानलमपारं स्वयंज्योतिरानन्दंदर्शयति। यत्तु "अक्षय्यं हवै चातुर्मास्ययाजिनः सुकृतम्" इति श्रुत्या चातुर्मास्यफलस्य

In Public domain. Digitization Muthulakshmi Research Academy

अक्षयिष्णुत्वं दर्शितम्, तत् इतरफलापेक्षया अक्षयत्वाभिप्रायकमेव, न सर्वात्मना नित्यत्वतात्पर्यकम्। ततश्च श्रुतित्वाविशेषात्, द्वयोः श्रुत्योः समप्राबल्येऽपि, अक्षय्यश्रुत्यपेक्षया "तद्यथेहकर्मचितो लोकः" इत्यादिश्रुतेः "यदल्पं तन्मर्त्यम्" (छा.उ.7.14.1.) "यत्कृतकं तदनित्यम्" इति श्रुतिन्यायाभ्यां सहकृतत्वेन तात्पर्यवत्त्वेन, बलवत्त्वात् अक्षय्यश्रुत्यत्यर्थ-बाधकत्वात्, मोक्षरूपफलदृष्ट्या कर्मफले अनित्यत्वदर्शनात् इहामुत्रार्थेषु वैराग्योपपत्तिः। "अतोऽन्यदार्तम्" इति श्रुत्या च आत्मनोऽन्यस्य नश्वरत्वप्रतिपादनेन नित्यानित्यविवेकोऽपि सुलभः। ततो वैराग्योपलब्धेः शमदमादिसम्पत्तिः, मुमुक्षाच सुलभेति, पुष्कलकारणवतः अधिकारिणः समर्थनात्, शास्त्रमारम्भणीयम्। ब्रह्मजिज्ञासा च कर्तव्या। सूत्रे ब्रह्मजिज्ञासा इत्यत्र जिज्ञासापदेन विचारस्य लक्षयिष्यमाणतया, तदन्वयानुगुण्येन कर्तव्यपदाध्याहारः कृतः। (र.प्र.पृ.37.38.)

समस्तब्रह्मजिज्ञासापदार्थविचारः

(तादर्थ्यचतुर्थीसमासाभावविचारश्च)

शा.भा.- ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्य यतः इति। अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

र.प्र.प्र.-"ब्रह्मणो जिज्ञासा" इति भाष्ये कर्मणिषष्ठीसमासाभिप्रायेण विग्रहः सिद्धान्तितः। न च 'धर्माय जिज्ञासा' इति चतुर्थीतत्पुरुषवत्, अत्रापि 'ब्रह्मणे जिज्ञासा' इति चतुर्थीतत्पुरुषः स्यादिति वाच्यम्। यतो हि जिज्ञासापदे सन्प्रत्ययस्य इच्छार्थकतया, सन्नन्तधातुवाच्यक्रियायाः इच्छायाः सविषयकत्वेन, आदौ विषयकर्मणि ज्ञाने आकांक्षा, ततः फले ब्रह्मणीति, आदौ कर्मणो ज्ञानाय, 'ब्रह्मणो जिज्ञासा'- इति कर्मणि षष्ठीसमास एव कर्तव्यः, न चतुर्थीसमासः। न चात्र चतुर्थीसमास एव सम्भवति। यतः ब्रह्मणे जिज्ञासा इति "तादर्थ्ये चतुर्थी वाच्या" इत्यनुशासनेन चतुर्थीसमासो वक्तव्यः। तत्र च प्रकृतिविकृतिग्रहणं कर्तव्यम् इत्यनुशासनात्, 'यूपदारु' इति प्रकृतिविकृतिभावस्थल एव चतुर्थीसमासात्। प्रकृते च जिज्ञसायाः ब्रह्मार्थत्वेऽपि, यूपे दारुविकारत्वस्येव, जिज्ञासायां ब्रह्मविकारत्वस्याप्रसिद्धेः, नात्र तादर्थ्यचतुर्थीसमासः। न च सर्वोपादानब्रह्मणः जिज्ञासां प्रत्यप्युपादनत्वात् कथं न प्रकृतिविकृतिभावस्तयोरिति वाच्यम्। जिज्ञासां प्रति ब्रह्मणः विवर्तोपादनत्वेऽपि परिणाम्युपादानत्वाभावात्। अत एवाश्वघासादिस्थले प्रकृतिविकृतिभावाभावात्, षष्ठीसमास एवादृतः। (न्यायनिर्णयःपृ39., र.प्र.प्र.28-29)

In Public domain. Digitization Muthulakshmi Research Academy

यदि च जिज्ञासापदस्य विचारे लक्षणा विचारफलत्वस्य धर्मब्रह्मणोः सत्त्वात्, धर्माय जिज्ञासा इतिवत् ब्रह्मणे जिज्ञासा विचारः इत्युक्तं वृत्तिकारैरिति सम्भाव्यते, फलाकांक्षाया एव मुख्यत्वादित्युच्येत, तर्हि चतुर्थीसमासमपि कटाक्षयन्ति रत्नप्रभाकाराः। विचारस्य क्लेशात्मकत्वात्, विचारस्य कर्मापेक्षया फलस्यैवाकांक्षितत्वात्। ज्ञातुमिच्छा जिज्ञासा इति शक्यार्थस्वीकारे तु इच्छायाः स्वर्गस्येच्छा इत्यादाविव कर्मणि साकांक्षत्वात्, "सा हितस्य ज्ञातुमिच्छा" इति शाबरभाष्यानुसारेण षष्ठीसमास एव युक्तः। न च ब्रह्मणो ज्ञातुमिच्छेति विग्रहे, ज्ञातुमिति तुमुन्नर्थबोध्यफलत्वस्यैव इच्छयाकांक्षितत्वात् ब्रह्मणः कथं कर्मत्वमिति वाच्यम्। ज्ञानस्य इच्छानिरूपितफलत्वेऽपि, ब्रह्मणा कर्मणा अविशेषितस्य ज्ञानस्य फलत्वसम्पत्तेरभावात्, तदर्थं इच्छायाः प्रथमं कर्मणा ब्रह्मणा एवाकांक्षायाः सद्भावात् कर्मणि षष्ठीसमास एव युक्तः। (र.प्र.पृ.28.29.)

ब्रह्मपदार्थविचारः- नन्वत्र जिज्ञास्यं ब्रह्म किमात्मकं? ब्रह्मक्षत्रम् इति वैदिकप्रयोगे ब्राह्मणत्वजातौ, ब्रह्म आयातीत्यत्र जीवे, ब्रह्मशब्दस्य स्वयम्भुवि, प्रजापतौ, कमलासने च प्रयोगदर्शनात्, ब्रह्मशब्दोऽत्र कस्मिन्नर्थे प्रयुक्त इति शङ्कायां, "ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्य यत" इति भाष्यम्। अत एव जगत्कारणत्वप्रतिपादकसूत्रासाङ्गत्यादेव ब्रह्मपदं

In Public domain. Digitization Muthulakshmi Research Academy
नार्थान्तरबोधकम्। किं तु जगद्विवर्तोपादानभूतशुद्धब्रह्मपरमेव। (र.प्र.पृ.29.)

ब्रह्मजिज्ञासेत्यत्र शेषषष्ठीव्युदासपूर्वकं कर्मणि षष्ठीत्वव्यवस्थापनम्

शा.भा.- ब्रह्मण इति कर्मणि षष्ठी, न शेषे, जिज्ञास्यापेक्षत्वाच्च जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च। ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, सम्बन्धसामान्यस्य विशेषनिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्। न व्यर्थः ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेन्न। प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम्। तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि। यथा राजाऽसौ गच्छतीत्युत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्। श्रुत्यनुगमाच्च। "यतो वा इमानि भूतानि जायन्ते" (तै.उ.3.1.) इत्याद्याः श्रुतयः, "तद्विजिज्ञासस्व तद्ब्रह्म" इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मषष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्माद्ब्रह्मण इति कर्मषष्ठी।।

र.प्र.प्र- 'ब्रह्मजिज्ञासा' इत्यत्र प्राचीनकृते वृत्त्यन्तरे ब्रह्मणः जिज्ञासा इत्यत्र, ब्रह्मणः इति शेषषष्ठी इत्यभिप्रयन्ति। शेषषष्ठी नाम

सम्बन्धसामान्ये षष्ठी। अतः ब्रह्मसम्बन्धिनी जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्मसम्बन्धिनां प्रमाणादीनां विचारे क्रियमाणे तच्छेषिणः ब्रह्मणोऽपि विचारः अर्थतस्सिद्ध्यतीति शेषषष्ठीवादिनामभिप्रायः। जिज्ञासा इत्यत्र सन्प्रत्यवाच्याया इच्छायाः ज्ञानं कर्म। तस्य च ज्ञानस्य कर्म ब्रह्म। ज्ञानेच्छाक्रिययोः द्वयोः सकर्मकक्रियात्वात्, इच्छायाः कर्मणा ज्ञानेनजन्यत्वात्, ज्ञानस्यापि अनिश्चितकर्माख्यविषये निश्चयाय इच्छानिष्पादकत्वात्, प्रथमापेक्षितज्ञानस्य कर्मैव ब्रह्मणः इति षष्ठ्या उच्यते, न सम्बन्धसामान्यम्। जिज्ञासायाः परम्परया जिज्ञास्यापेक्षत्वात्। सूत्रे जिज्ञास्यान्तरानिर्देशाच्च। शेषषष्ठीपक्षे षष्ठ्याः सम्बन्ध एव श्रौतार्थः, न तु ब्रह्मणः सम्बन्धीनि प्रमाणादीनि शब्दतोऽर्थः। एवं च कर्मषष्ठीपक्षे श्रुतं ब्रह्मनिष्ठं कर्मत्वमुत्सृज्य, अश्रुतं प्रमाणादिकं कर्मत्वेन कल्पयतः 'पिण्डमुत्सृज्य करं लेढी'ति न्यायावतारः प्रसज्येत। (र.प्र.पृ.39.)

ननु "षष्ठी शेषे"(पा.सू.2.3.50) इति सूत्रेण सम्बन्धसामान्ये षष्ठीविधानेऽपि, स सम्बन्धः कर्मत्वार्थ एव पर्यवस्यति। जिज्ञासा इति सकर्मकक्रियासम्बन्धात्। अतः ब्रह्मनिष्ठकर्मत्वस्य शेषषष्ठ्यैव लाभे, कर्मणि षष्ठीस्वीकारपक्षः अनावश्यक इति चेत् एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य इत्यादि भाष्यम्। कर्मणि षष्ठी श्रौतषष्ठी। शेषषष्ठी तु

 In Public domain. Digitization Muthulakshmi Research Academy

अर्थात्कर्मत्वबोधिका षष्टी इति सम्न्धसामान्यषष्ठ्या कर्मत्वकल्पनं प्रयासग्रस्तं निष्फलं च। एवं कर्मणिषष्ठीवादिनि सिद्धान्तिनि पुनश्शेषषष्ठीवादी शङ्कते न व्यर्थः प्रयासः इत्यादिना। शेषषष्ठ्या ब्रह्मसम्बन्धिनी जिज्ञासा प्रतिज्ञाता भवति। यानि ब्रह्माश्रितानिलक्षण-प्रमाण-युक्ति-ज्ञानसाधन-फलानि, तेषामपि विचारः प्रतिज्ञातो भवति। तेषां जिज्ञासायाः अपि ज्ञानोपकारकत्वेन ब्रह्मसम्बन्धित्वात्। कर्मणि षष्ठ्यान्तु ब्रह्मकर्मकविचार एव प्रतिज्ञातो भवतीति पूर्वपक्षिमनोगतं पुनराक्षेपात्मकं वचनम्। तथाच अधिकार्थसंग्रहणशीलत्वात्, शेषषष्ठीपक्षः न प्रयासफलकः, ब्रह्मसम्बन्धिनामशेषाणां विचाराणां प्रतिज्ञानफलकत्वात् इति, पूर्वपक्षिणः शङ्का। प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात् इत्यादिना भाष्ये कर्मणिषष्ठीवादिनः समाधानं च। ब्रह्मणः कर्मत्वस्य कर्मणि षष्ठ्या शब्दतः परिग्रहे, ब्रह्मणः सम्बन्धीनि तच्छेषभूतानि अर्थादेवाक्षिप्यन्ते। ननु ब्रह्मण एव प्रधानत्वं कथमिति चेत् इच्छाविषयतया ज्ञानक्रियया आप्तुमिष्टतमत्वात्, इति भाष्ये समाधानम्। यथा हि "चैत्रः ग्रामं गच्छती"त्यादौ, चैत्रनिष्ठगमनक्रियया तज्जन्यसंयोगद्वारा सम्बन्धुमतिशयेनेच्छा-विषयत्वं ग्रामे, एवं ज्ञानक्रियाद्वारा ब्रह्मावारकाज्ञान-निवृत्तातिशयेनेच्छाविषयत्वस्य ब्रह्मण्येव सत्त्वाद्ब्रह्मणः प्राधान्यम्। एवं जिज्ञासाकर्मत्वेन प्रधाने ब्रह्मणि सति, यैर्जिज्ञासितैः

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणादिभिर्विना, ब्रह्म जिज्ञसितं नभवति, तान्यर्थाक्षिप्तान्येव भवन्ति। अतस्तेषां पृथक्सूत्रीकरणमपि नापेक्ष्यते। यथा 'राजाऽसौ गच्छती'त्युक्ते अमात्यभटादिपरिवारसहितस्यैव राज्ञः गमनम्, अमात्यादीनामर्थाक्षिप्तत्वात्, तद्वत्। (र.प्र.पृ.39-40.)

श्रुत्यनुगमाच्च श्रुतिमनुसृत्य सूत्रस्य एकार्थबोधकत्वं श्रुत्यनुगम इत्युच्यते। "यतो वा इमानि भूतानि जायन्ते" इत्यादयः श्रुतयः तदिति ब्रह्म कर्मत्वेन निर्दश्य, विजिज्ञासस्व विचारय, इति कथयन्ति। तत्र च तत् ब्रह्मेति इति श्रुत्या ब्रह्मणः कर्मत्वं स्पष्टतयैव निर्दिष्टम्। श्रुत्युक्तब्रह्मकर्मत्वस्यैव कर्मषष्ठीपरिग्रहपक्षे सूत्रेणाप्युक्तत्वात् सिद्धः सूत्रस्य श्रुत्यर्थानुगमः। (र.प्र.पृ.40.)

ननु ब्रह्मणः इति कर्मणि षष्ठी इत्युक्तम्। केन सूत्रेण इति चेत्, जिज्ञासा-शब्दस्य कृत्प्रत्ययान्तत्वेन "कर्तृकर्मणोः कृति" (पा.सू.2.3.66.) इति पाणिनीयसूत्रेणेत्यवधेयम्। ज्ञातुमिच्छा-इत्यर्थे ज्ञाधातोः सनि जिज्ञासशब्दः निष्पन्नः। ततः सन्नन्तात् जिज्ञासशब्दात् "अप्रत्ययात्"–(पा.सू.3.3.102)इतिसूत्रेण स्त्रियाम् अकारप्रत्यये, ततः अदन्तत्वलक्षणे टापि, सवर्णदीर्घे जिज्ञासाशब्दः निष्पन्नः। एवं च जिज्ञास इति कृदन्तयोगात् कर्मवाचकस्य ब्रह्मन्शब्दस्येयं षष्ठी कृद्योगलक्षणा षष्ठी। न चात्र कर्मणि षष्ठ्याः सिद्धत्वेऽपि, कर्मषष्ठ्यन्तस्य पदान्तरेण "कर्मणि च" (पा.सू.2.2.14) इति सूत्रेण षष्ठीसमासप्रतिषेधात्, कृतायामपि

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठ्यां कथं षष्ठीसमास इति वाच्यम्। "उभयप्राप्तौ कर्मणि" (पा.सू.2.3.66.) इति सूत्रेण विहिताया एव कर्मणि षष्ठ्याः 'कर्मणि च' इति सूत्रेण प्रतिषेधात्। "आश्चर्यो गवां दोहोऽगोपेन" इति तदुदाहरणे, सत्यपि कर्तृकर्मणोः कृद्योगे, कर्मणीति नियमात्, कर्मवाचकात् गोशब्दादेव षष्ठी, न तु कर्तृवाचकादगोपशब्दात्। ब्रह्मणः जिज्ञासा इति प्रकृतस्थले तु कृद्योगेऽपि नास्त्युभयप्राप्तिः। यतः ब्रह्मविचारे कर्मैव, न कर्ता। न हि नित्यमुक्तं ब्रह्मविचारयति। किं तु जीवः ब्रह्मभावावगमाय विचारयति। तस्माद्ब्रह्मणः केवलं विचारे कर्मत्वात्, कर्तृत्वाभावाच्च, उभयप्राप्त्यभावात् तन्मात्रविषयकः 'कर्मणचे'ति षष्ठीसमासप्रतिषेधः नात्र प्रवर्तते। किन्तु, "कर्तृकर्मणोः कृति" इति कृद्योगे कर्मणि षष्ठ्येव। (न्यायनिर्णयःपृ.39.)

ब्रह्मजिज्ञासाघटकीभूतं ब्रह्मज्ञानं कीदृशमिति विचारः-

शा.भा.- ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्प्रत्ययवाच्यायाः इच्छायाः कर्म। फलविषयत्वादिच्छायाः। ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्। तस्माद्ब्रह्म विजिज्ञासितव्यम्।

र.प्र.प्र.- ननु अवगते वस्तुनि इच्छायाः अदर्शनात् फलमूलयोर्ज्ञानयोः ऐक्यं न सम्भवति। एवं भाष्यकारैः "ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म" इति वाक्ये ज्ञानस्य प्रमाणत्वमुक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

तस्य चज्ञानपदस्य रत्नप्रभायां "ज्ञानं वृत्तिः, अवगतिस्तत्फलमिति भेदः इति भावः"(र.प्र.पृ.41.) इति व्याख्यातम्। प्रमाणभूतज्ञानस्य वृत्तिज्ञानत्वे, प्रमारूपावगतेरपि वृत्तीद्धचैतन्यरूपत्वेन अथवा वृत्त्यवच्छिन्नचैतन्यरूपत्वेन तयोर्द्वयोरपि को भेदः? इति प्रश्नोऽप्युपतिष्ठते। तत्र ज्ञाने च प्रयोजकं ज्ञानं आपातरूपमेव। आपातज्ञानेनैव ज्ञानेच्छायाः प्रवृत्तेरितिसमाधातव्यम्। अवगतिपर्यन्तंज्ञानं सन्प्रत्ययवाच्यायाः इच्छायाः कर्म इति भाष्यात्, जिज्ञासाघटकज्ञानपदार्थः प्रत्येतव्यः। अवगतिपर्यन्तं ज्ञानमित्यत्र ज्ञानं तत्त्वमसीत्यादिमहावाक्यजन्याखण्ड-ब्रह्माकाराकारितं शब्दजन्यं वृत्तिज्ञानम्। तस्माज्जायमाना अवगतिर्नाम आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यम्। अवगति-पर्यन्तम् अवगतिमर्यादं यद् वृत्तिज्ञानं, न त्ववगतिः, तदेव जिज्ञासाकर्मीभूततया विवक्षितम्। प्रमाणभूतवृत्तिज्ञाने आवरणनिवृत्तिमच्चैतन्यत्वस्याभावेऽपि, अवगतिरूपफले तादृशधर्मः अस्तीति ब्रह्मणः अपरोक्षता। अवगत्यवधिकं वृत्तिज्ञानं सूत्रे ज्ञानपदार्थः। न तु अवगतिः। एतद्वृत्तिज्ञानमेव जिज्ञासायाः विषयः। फलमपि अहंब्रह्मास्मीति साक्षात्काररूपं तादृशवृत्तिज्ञानमेव। आवरणनिवृत्तिरूपत्वं तु तत्र विशेषः। इच्छायाः मूलं तु आपातज्ञानमेवेति, मूलफलज्ञानयोर्भेदात् न जिज्ञासानुपपत्तिरिति रत्नप्रभाकृदाशयः ननु वृत्तिज्ञानस्यैव इच्छाकर्मत्वं इच्छाफलत्वं च कथम्? 'ग्रामं गच्छती'त्यादौ उत्तरदेशसंयोगः फलम्, तदाश्रयः ग्रामः इति भिन्नतया कर्मफले

In Public domain. Digitization Muthulakshmi Research Academy
अनुभूयेते इति चेत्, क्रियान्तरे तथा भेदेऽपि, इच्छायाः फलविषकत्वात्, तदेव कर्म, तदेव फलम्। आवरणनिवृत्त्यनपेक्षं वृत्तिज्ञानमुपायः। आवरणनिवृत्तिमद्वृत्तिज्ञनं त्ववगतिरूपं फलम्। न चैषा भाष्यकारोक्ता रत्नप्रभाविवृतावगतिः, आरम्भसूत्रे नास्ति, जिज्ञासापदेन स्वार्थघटकतया प्रमाणज्ञानस्यैवावगमात्, फलस्य अवगतेरनवगमादितिमन्तव्यम्। ब्रह्मावगतिर्हि पुरषार्थः इति भाष्यकारैः अवगतेः ब्रह्मात्मना ब्रह्मपदेनोक्तत्वाच्च। ब्रह्मावगतिर्हि पुरुषार्थः इति भाष्यस्य "ब्रह्मस्वरूपा अवगतिः ब्रह्मणः स्वभावः सैव निःश्रेयसं पुरुषार्थः" इति (भामती पृ.41.) व्याचक्षाणैः वाचस्पतिमिश्रैः व्याख्यानाच्च, अवगतिपर्यन्तस्य वृत्तिज्ञानस्य फलं ब्रह्मैव। यतः मोक्षाख्यं ब्रह्मैव पुरुषैरर्थ्यते। ब्रह्मस्वरूपावगतौ सत्यामेव, निश्शेषसंसारबीजाविद्यादिनिबर्हणं भवति। वृत्तिज्ञानद्वारा अविद्यानिवृत्तिपूर्वंब्रह्मस्वरूपावगतेः फलस्य सद्भावादेव ब्रह्म विजिज्ञासितव्यम् इति सूत्रेण प्रतिज्ञा कृता। (र.प्र.पृ.41.) एतच्च स्फुटीकृतं भाष्ये ज्ञानेन हि प्रमाणेन इत्यारभ्य, तस्मात् ब्रह्म विजिज्ञासितव्यमित्यन्तेन ग्रन्थेन।।

इति

ब्रह्मजिज्ञासाधिकरणशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशव्याख्यायां

तृतीयं वर्णकं समाप्तम्

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मजिज्ञासाधिकरणम् (चतुर्थवर्णकम्) विचारकर्तव्यताप्रधानम्।

ब्रह्मणः अप्रसिद्धिनिबन्धनपूर्वपक्षोद्धारः

शा.भा. तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं न जिज्ञासितव्यम्। अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति। उच्यते अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं, सर्वज्ञं, सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थानुगमात्। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वोह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म। यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्। न। तद्विशेषं प्रति विप्रतिपत्तेः।

र.प्र.प्र.- प्रथमवर्णके लक्षण-सम्भावना-प्रमाणैः अध्यसस्य निरूपणात्, अध्यासाभावात् विषयप्रयोजनासम्भवात्, शास्त्रमनारम्भणीयमिति पूर्वपक्षो निरस्तः। द्वितीयवर्णके चवेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितत्वेन सूत्रप्रायतया पृथक्शास्त्रत्वं निरूपितम्। रत्नप्रभायां पृथक्शास्त्रत्वं स्फुटीकृतं च। समन्वयाधिकरणान्ते च स्वयमेव भाष्यकारैः वेदान्तशास्त्रस्य पृथक्शास्त्रत्वं विचारयिष्यते। तृतीयवर्णके च अधिकारिसद्भावासद्भावाभ्यां शास्त्रारम्भसन्देहे अथ, अतः शब्दाभ्यामधिकारिसद्भावप्रदर्शनेन, शास्त्रविचारस्य च फलप्रदर्शनेन शास्त्रस्यारम्भणीयता समर्थिता। इदानीं चतुर्थवर्णके तु ब्रह्मप्रसिद्ध्यप्रसिद्धिभ्यां विषयप्रयोजनयोः विषयसम्बन्धयोश्च

In Public domain. Digitization Muthulakshmi Research Academy

सम्भवासम्भवाभ्यां सन्देहे विषयाप्रसिद्धिनिबन्धनपूर्वपक्षसमाधानायेदं वर्णकमुपक्रान्तम्। "तत् पुनर्ह्म प्रसिद्धम् अप्रसिद्धं वा स्या"दित्यादिना। पुनश्शब्दः वर्णकान्तरत्वद्योतनार्थः। वेदान्तविचारात्प्रागेव तत् ब्रह्म प्रसिद्धं न वा? ज्ञातं न वा?इत्यर्थः। यदि ज्ञातं ब्रह्मणि, अज्ञातत्वघटितविषयत्वस्य अभावात्, ज्ञानाभावेन तन्निवृत्तिः फलमपि न सम्भवति। अथ ब्रह्म अज्ञातं केनापि, तर्हि अज्ञातस्योद्देश्यत्वायोगात्, तदुद्देशेन विचारोऽपि कर्तुं न शक्यते। एवं ब्रह्मणोअज्ञातत्वे, बुद्धावनारूढस्य ब्रह्मणः विचारात्मकशास्त्रेण वेदान्तैश्च सम्बन्धो नास्तीति, ज्ञानानुत्पत्तेः फलमपि नास्तीत्यनारभ्यं शास्त्रमिति पूर्वपक्षः।

भाष्ये उच्यते इत्यादिना समाधानम्। आपातप्रसिद्ध्या ब्रह्मणः विषयस्य सम्भवात् शास्त्रमारम्भणीयमिति सिद्धान्तः प्रतिपाद्यते। अस्ति तावत् ब्रह्म। अस्ति तावदित्यस्यप्रसिद्धास्तित्ववत् इत्यर्थः। ब्रह्मणः अस्तित्वेऽपि ब्रह्मणः अप्रसिद्धत्वे विचारायोगात्, ब्रह्मप्रसिद्धिरेवात्रास्ति तावदित्यनेन विवक्षिता।

ननु ब्रह्मणः केन प्रमाणेन प्रसिद्धिः? न च "सत्यं ज्ञानमनन्तं ब्रह्म"इति श्रुत्या प्रसिद्धिरिति वाच्यम्। ब्रह्मपदस्य लोके शक्तिग्रहस्यादर्शनात्, तद्घटितसत्यादिवाक्यस्याप्यबोधकत्वात्, ब्रह्मपदस्य व्युत्पत्त्यनुसारेणार्थः निर्णेय इति भाष्यकाराः "ब्रह्मशब्दस्यव्युत्पाद्यमानस्य नित्यशुद्धत्वादयोर्थाः

In Public domain. Digitization Muthulakshmi Research Academy

बृहतेर्धातोरर्तानुगमात्" इति व्याचक्षते। ततः प्राक् नित्यशुद्धबुद्धमुक्तस्वभावमित्यनेन निर्गुणब्रह्मणः, सर्वज्ञं सर्वशक्तिसमन्वितमित्यनेनसगुणस्यच ब्रह्मणः तत्पदबोध्यस्य प्रसिद्धिं दर्शयति। श्रुतौ सूत्रे च ब्रह्मपदप्रयोगात् तदन्यथानुपपत्त्या ब्रह्मपदस्य कश्चिदर्थः अस्तीति ज्ञायते। प्रमाणवाक्ये निरर्थकशब्दप्रयोगादर्शनात्। व्यकरणशास्त्राच्चब्रह्मशब्दस्य महत्त्वरूपार्थः निश्चीयते। बृहिवृद्धौ इत्यस्माद्धातोः बृहेरिदित्वात् "इदितो नुम् धातोः" (पा.सू.7.1.58) इति सूत्रेण नुमागमे बृ+न्+ह् इति जाते, "बृंहेर्नोच्च" (उणादिः558) इति सूत्रेण बृंहणं वृद्धिः इति भावार्थे औणादिके मनिन्प्रत्यये, धातौ नुमागमस्थनकारस्य अत्त्वे, बृ-अह्+मन् इति जाते, इकोयणचि इति सूत्रेण यणादेशे, ब्रह्+मन् , ब्रह्मन् शब्दः निष्पन्नः। तत्र च बृहद्घटः- बृहत्त्वस्येव सङ्कोचकघटादिपदाभावात्, प्रत्युत श्रुतौ अनन्तपदस्यापरिच्छिन्नत्वार्थकस्य सद्भावच्च, ब्रह्मपदस्य निरधिकमहत्त्वमेव सिद्ध्यति। निरवधिकमहत्त्वं च अन्तवत्त्वादिदोषवत्त्वे, सर्वज्ञत्व-सर्वशक्तिमत्त्वरूपगुणविहीनत्वे च न सम्भवति। लोके गुणहीनदोषवतोरल्पत्वेन प्रसिद्धेः। ततश्च सर्वज्ञसर्वशक्तिलक्षणतत्पदवाच्यसगुणब्रह्मप्रसिद्धिः। ब्रह्मणः अतिरिक्ततया कल्पितस्य कार्यस्य जगतः अपरिशेषे, तथा ज्ञेयस्य चापरिशेषे, ब्रह्मणः सर्वशक्तित्वगुणो न स्यात्, सर्वज्ञत्वं च न स्यादितिकल्पितगुणैः सर्वशक्तेः सर्वज्ञस्य च सगुणब्रह्मणः सिद्धिः।

In Public domain. Digitization Muthulakshmi Research Academy

एवमेव बृंहणात् निरतिशयमहत्त्वादेव देशतः कालतः वस्तुतश्च परिच्छेदाभावलक्षणं नित्यत्वं, अल्पत्वप्रतिद्वन्द्यविद्यादिदोषशून्यत्वम्, अल्पत्वविरोधिजाड्यराहित्यं, जाड्यकालेऽपि स्वतोबन्धाभावलक्षणं मुक्तस्वभावत्वं च सिद्धम्। तदेवं तत्पदबोध्यं निर्गुणं ब्रह्म ब्रह्मपदादेव अनन्तादिपदसहकृतात्सिद्ध्यति। एवं तत्पदबोध्यस्य निर्गुणब्रह्मणः ईश्वरस्य च प्रसिद्धावपि,मुमुक्षोः तादृशप्रसिद्धिमात्रेण सप्रमाणं नब्रह्मप्रमा सिद्ध्यति। केवलं तादृशज्ञानस्यापातत्वात्, अज्ञानानिवर्तकत्वाच्च। यदा प्रमातुः "अहं ब्रह्मास्मी"ति प्रतीचि ब्रह्मैक्यविषयिणी प्रमा जायते, तदैवाज्ञाननिवृत्तिः। अतः सप्रमाणं ब्रह्मप्रसिद्धेः निरूपणाय, त्वम्पदार्थात्मनापि प्रसिद्धिः अवश्यं निरूपणीया। अत एव भाष्ये "सर्वस्यात्मत्वाच्च ब्रह्मात्मत्वप्रसिद्धिः" इति वाक्येन त्वम्पदार्थमुखेन ब्रह्मणः आत्मत्वेन प्रसिद्धिः निरूपिता। सर्वस्य लोकस्य योऽयमात्मा तदभेदाद्ब्रह्मणः प्रसिद्धिरिति तद्वाक्यस्यार्थः। ननु आत्मनः का प्रसिद्धिरित्युक्ते "सर्वो हि आत्मास्तित्वं प्रत्येति न नाहमस्मी"त्यादि भाष्ये उक्तम्। यदि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोकः नाहमस्मीत्येव प्रतीयात्। नहि तथा प्रतिपत्तिः लोके दृश्यते। यतः नाहमस्मीति यः ब्रूयात्, तस्यैवात्मत्वात्। सत्येव आत्मनि प्रतिषेधप्रसक्तेः, आत्मनि च सति न प्रतिषेधः। या आत्मनः अहमस्मीति प्रसिद्धिः, सैव सच्चिदानन्दात्मना प्रसिद्धिः। यतो हि आत्मा एव ब्रह्म। तथा चोक्तम् आत्मा च ब्रह्म इति।

In Public domain. Digitization Muthulakshmi Research Academy

एतेन शून्यवादः परास्तः। आत्मप्रसिद्धावपि, ब्रह्मणः किमायातमित्युक्ते आत्मप्रसिद्धिमूलिका ब्रह्मप्रसिद्धिः सिद्धयति। "अयमात्मा ब्रह्म" (बृ.उ.2.5.19) इति। एवं ब्रह्मणः आत्मत्वेन प्रसिद्धौ, अज्ञातत्वाद्यभावेन विषयाद्यभावात् अविचारणीयत्वं प्राप्तमिति पूर्वपक्षोपपादनाय एषा प्रसिद्धिर्निरूपिता यदि तर्हि इत्यादिभाष्येण। "न। तद्विशेषं प्रति विप्रतिपत्तेः" इत्यादिना समाधानं च। अयं भावः 'इदं रजतमि'त्यत्र इदमिति वस्तुतः शुक्तिप्रसिद्धिः। तत्र इदन्त्वं शुक्तिरजतानुगतो धर्मः। तेन धर्मेण शुक्तेः प्रसिद्धिः। तद्वत् 'अहं ब्रह्मास्मी'त्यत्रापि सत्यचैतन्यरूपात्मत्वसामान्येन ब्रह्मणः वस्तुप्रसिद्धिः, न तु परिपूर्णानन्दब्रह्मात्वत्वादिविशेषविषयकत्वेन। यदि पूर्णानन्दत्वादिना ब्रह्म भायात्, तर्हि वादिनां विवाद एव नस्यात्। न हि "इदं रजत"मित्यत्र इदमः शुक्तित्वेन विशेषदर्शने जाते 'इदं रजतम्', 'रङ्गमन्यद्वा' इति विप्रतिपत्तिरस्ति। तथा विशेषदर्शने सति आत्मनः, परिपूर्णानन्दस्वरूपं वा आनन्दाश्रयो वा, विज्ञानं वा शून्यं वा कर्ता भोक्ता वा इत्यादयः विप्रतिपत्तयः न स्युः। अतः तादृशविशेषविप्रतिपत्त्यन्यथानुपपत्त्या सामान्यतः आत्मत्वेन प्रसिद्धावपि, परिपूर्णानन्दत्वेनाप्रसिद्धत्वात्, ब्रह्मणः विचारणीयता। (र.प्र..पृ.41-43.)

विचाराङ्गविप्रतिपत्तिनिरूपणम्—

In Public domain. Digitization Muthulakshmi Research Academy

शा.भा.- देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लौकायतिकाश्चप्रतिपन्नाः। इन्द्रियाण्येव चेतना न्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके। अस्ति तद्व्यतिरिक्तः ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे। एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किञ्चित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येतानर्थं चेयात्। तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते।।1।।

इति श्रीशङ्करभगवत्पादकृतौ ब्रह्मसूत्रशारीरकभाष्ये

प्रथमाध्यायप्रथमपादे

प्रथमंब्रह्मजिज्ञासाधिकरणं समाप्तम्

र.प्र.प्र.-वादिषु विप्रतिपत्तेः सद्भावात् ब्रह्म कीदृशमिति? सन्देहे विचारः प्रवर्तते। तत्र च स्वमतेन सह नव विप्रतिपत्तयः अत्र भाष्यकारैरुद्भाविताः। विप्रतिपत्तिनिरूपणोपसंहारान्ते च "एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयास्सन्तः" इत्युक्तम्। यावच्छक्यमेतेषां मतानां निर्दुष्टता, तत्र अष्टमतेषु अस्वारस्यादिकञ्च, न्यायनिर्णये निरूपितानि। पूर्वोक्तभाष्यवाक्याच्च तेषु मतेषु युक्त्याभासश्रुत्याभासमूलकत्वं प्रतिपादितम्। अतः

In Public domain. Digitization Muthulakshmi Research Academy

एकैकमतनिरूपणावसरे युक्त्याभासश्रुत्याभासनिरूपणं सप्रयोजनमिति तथा निरूप्यते।

1.चार्वाकमतम् “देहमात्रं चैतन्यविशिष्टमात्मेत्येके”। देहातिरिक्तं चैतन्यं स्वतन्त्रमस्वतन्त्रं वा नास्ति। किन्तु देहाकारपरिणतभूतचतुष्टयान्तर्गतमेव चैतन्यम्। क्रमुक-सुधा-नागवल्लीपत्र-लालाजलसम्पर्कादिना रक्तिमेव देहाकारपरिणतेषु चतुर्ष्वेव भूतेषु चैतन्यमुत्पद्यते। अतः चैतन्यविशिष्टशरीरमेवात्मा। भाष्ये चैतन्यमात्रमित्यत्र मात्रशब्दः अवधारणपरः। लौकायतिकाः नाम भूतचतुष्टयवादिनः चार्वाकाः। तन्मतेमानुषोऽहमित्यहम्प्रतीतेः देहगततया भानात्, देह एवात्मा। “स वा एष पुरुषोऽन्नरसमयः” (तै.उ.2.1.) इति तैत्तिरीयश्रुतेः अन्नरसमयस्य शरीरस्यात्मत्वम्।

2.इन्द्रियात्मवादः- “इन्द्रियाण्येव चेतनान्यात्मेत्यपरे”। चार्वाकेष्वेव केचित् सत्यपि शरीरे, असति नेत्रादौ, असति स्वापादौ स्वरूपज्ञानाभावात्, इन्द्रियाणां सद्भाव एव चौतन्यस्य दर्शनात्, यदा चैतन्यं तदा अहम्बुद्धेः काणोऽहम्, मूकोऽहम् इत्यादिव्यवहाराणां चदर्शनाच्च इन्द्रियाणामेवात्मत्वमिति वदन्ति। न च अनेकेषु तेषु भोगायोग इति वाच्यम्। स्वयंवरगोष्ठ्यां मिलितानां वराणां मध्ये पर्यायेणैकैकस्य प्राधान्यवत्, अन्येषां चाप्राधान्यवत्, तत्तदिन्द्रियेभ्यो भोगनिष्पत्तौ, अन्येषां प्राधान्याभावात्, अनेकेष्वेकस्यापि प्रधान्याद्भोगनिष्पत्तेः। न चइन्द्रियाणां नानात्वे, कालान्तरे अनुभवितुः

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यभिज्ञानवेलायामभावेन प्रत्यभिज्ञानानुपपत्तिः। नित्यत्मवादे तु आत्मनः नित्यस्यानुभवितुः प्रत्यभिज्ञायमानैकत्वात् नास्ति दोष इति वाच्यम्। इन्द्रियाणां नानाभूतानामप्येकदेहाश्रयाश्रितत्वेन प्रत्यभिज्ञानाद्युपपत्तेः। "अथ ह प्राणा आहंश्रेयसिव्यूदिरे" (छा.उ.5.1.6.) इत्यादिश्रुतौ चक्षुरादीन्द्रियाणामेव चेतनत्वेन परामर्शाच्च।

3.मन आत्मवादः" मन इत्यन्ये" इति भाष्यम्। इन्द्रियाणामात्मत्वं न युज्यते। स्वप्ने नेत्राद्यभावेऽपि, केवले मनसि ज्ञानस्य दर्शनात्। 'अहं देवदत्तः ''अहं यज्ञदत्तः' इत्याद्यहंधियः मनस्युपपत्तेः। यद्यपि "इन्द्रियसत्त्वे रूपादिधीः, तदभावे तदभावः" इत्यन्वयव्यतिरेकनिश्चयस्य इन्द्रियेषु सत्त्वात्, इन्द्रियाण्येवात्मेति वक्तव्यम्। तथापि रूपादिधियाम् इन्द्रियाधर्मत्वेऽपि, इन्द्रियकरणकत्वमात्रेणोपपत्तौ चैतन्यस्येन्द्रियधर्मत्वकल्पनं व्यर्थम्। एकदेहस्थत्वेनेन्द्रियाणां प्रत्यभिज्ञानाश्रयत्वकल्पनमपि न सम्यक्। एकप्रासादस्थानामपि मध्ये एकस्य चैतन्ये अन्येषामपि चैतन्यप्रसङ्गात्। तस्मात् मन एवात्मा इति, मन आत्मवादः प्रवृत्तः। तथा च श्रुतिः मन उवाच इति। अयमपि वादः लौकायतिकमतेष्वन्यतमः।

4.क्षणिकविज्ञानात्मवादः "विज्ञानमात्रं क्षणिकमित्येके' मन आत्मवादोऽपि मनसः करणत्वेनोपक्षीणत्वात्, चैतन्याश्रयत्वानुपपत्तेः

In Public domain. Digitization Muthulakshmi Research Academy

परास्तः। किन्तु क्षणिकविज्ञानमात्रमेव आत्मा इति बौद्धेष्वेकदेशिनां योगाचाराणामाशयः। यद्यप्यद्वैतवेदान्तिभिरपि "विज्ञानमानन्दं ब्रह्म" इत्यभ्युपगम्यते, तथापि तन्मते ज्ञानस्य नित्यत्वमेव, न क्षणिकत्वम्। ज्ञानस्य क्षणिकत्वे अनुभवस्मृतिव्यवहारः कथमिति चेत्, क्षणिकज्ञानेष्वपि सादृश्यादैक्योपपत्तेः। "योऽयं विज्ञानमयः प्राणेषु"- इति श्रुतिरपि आत्मनः विज्ञानमयत्वं प्रतिपादयति। सर्वस्यापि तत्तत्क्षणभेदेन विजातीयार्थक्रियाकारित्वात्, क्षणिकत्वमिति विज्ञानानामपि क्षणिकत्वं सिद्धम्।

5.शून्यात्मवादः "शून्यमित्यपरे' इति भाष्यम्। शून्यवादिनः माध्यमिकाः सर्वं जगत् शून्ये कल्पितमिति वदन्ति। अतः शून्यमेवात्मा। सुषुप्तौ धियः अभावात् विज्ञानात्मवादो न युक्तः। अकस्मादेव पुनः अहमिति बुद्ध्युदयात्, असदालम्बनैवाङ्कारधीः। अतः असत् शून्यमेवात्मेत्यपरे। "असद्वा इदमग्र आसीत्" (तै.उ.2.7.)इति श्रुतिं चासदात्मवादे मानं दर्शयन्ति।

6.कर्तृत्वभोक्तृत्वविशिष्टात्मवादः "अस्ति देहव्यतिरिक्तः कर्ता भोक्ता आत्मेत्यपरे" इति भाष्यम्। अहमस्मीत्यनुभवात् शून्यातिरिक्त आत्मा अस्तीत्यभ्युपगन्तव्यम्। आलम्बनस्यैवात्मत्वात्। तस्यैव स्मृतिप्रत्यभिज्ञादौ स्थायित्वाच्च। आत्मनि भोक्तृत्वं क्रियाफलयोगः। एवं क्रियावेशात्मकं कर्तृत्वमप्यात्मन्यस्ति। फलस्य पूर्वमविद्यमानस्य इदानीं क्रियया निष्पाद्यस्य विकारत्वमेव, न त्वविकारत्वम्। विकारः

 In Public domain. Digitization Muthulakshmi Research Academy

शून्यत्वमिति द्वयम् एकरूपं न भवति। अतः क्रियावेशात्मककर्तृत्वेन क्रियाफलयोगलक्षणभोक्तृत्वस्य च सिद्धिरिति, संसारी कर्ता भोक्ता आत्मेति मीमांसकाः। यद्वा कर्तृत्वं कृतिः आत्मगुणः नक्रियावेशः। एवं भोक्तृत्वं सुखदुःखान्यतरसाक्षात्कारवत्त्वम्। तदुभयमपि विशेषगुणाश्रये आत्मनि सम्भवतीति नैयायिकाः। अयं च संसारी एव, न मुक्तवदसंसारी। तत्र च कर्ता भोक्ता इत्यादिश्रुतिश्च मानमिति वदन्ति।

7.साङ्ख्यानां केवलभोक्तृत्ववादः "भोक्तैव केवलं न कर्तेत्येके' इति भाष्यम्। एके साङ्ख्या इत्यर्थः। 'करोमि''जानामि' इति प्रतीतेः जडप्रकृतिविकाराहङ्काराश्रयतया कृतिज्ञानादीनां बुद्धिवृत्तीनां भानात्, अहङ्कारे आत्मत्वायोगात्; चिदवसानरूपस्य भोगस्य अक्रियात्वेन प्रकृतिधर्मत्वायोगात् भोगाश्रयः चैतन्यं पुरुष एव भवति इति कृत्वा, भोक्तृत्वमेव पुरुषस्य। कर्तृत्वं तु प्रकृतेरथवा तद्विकाराणामहङ्कारादीनां, न तु भोक्तुरात्मनः। किन्तु "अनश्नन्नन्यो अभिचाकशीति" (मु.उ.3.1.1.) श्रुतिः सांख्यमतनिरूपणे प्रमाणाभासः एव। आत्मनि अशनात्मकभोगस्याभावात्, अविद्यापगमे तस्यैव शुद्धात्मत्वात्, तस्य च केवलमाभिमुख्येन प्रकाशनात्, विकारलक्षणभोगाभावाच्च, न सा श्रुतिः, आत्मनः भोक्तृत्वमात्रसाधिका इत्यद्वैतिनः।

8.योगिनामीश्वरात्मवादः "अस्ति तद्व्यतिरिक्तः ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्" इति भाष्यम्। पूर्वोक्तसांख्याः निरीश्वरवादिनः।

In Public domain. Digitization Muthulakshmi Research Academy

योगिनस्तु सेश्वरसांख्याः। कर्तृत्व-भोक्तृत्वयोः प्रकृतिपुरुषगतयोः प्रदाता कश्चिदस्ति, स एवेश्वरः। तं विना स्वतः प्रकृतेः पुरुषस्य वा तत्तद्धर्माणामनुपपत्तेः। अयं च ईश्वरः जीवविलक्षणः सर्वज्ञः सर्वशक्तिः। "अन्तरो यमयत्येष त आत्मा" बृ.उ.(3.7.3.) इत्यन्तर्यामिब्राह्मणस्थं वचनम् ईश्वरस्य आत्मत्वे प्रमाणमभ्युपगच्छन्ति।

9.अद्वैतात्मवादः-"आत्मा स भोक्तुरित्यपरे" इति भाष्यम्। सांख्याः आत्मनः भोक्तृत्वमभ्युपगच्छन्ति। अद्वैतिनस्तु भोक्तुरपि य आत्मा स आत्मेति प्रतिपादयन्ति। वेदान्तिमते विकाररूपं कर्तृत्वमिव भोक्तृत्वमपि क्रियावेशरूपं निर्विकाररूपे आत्मनि कल्पितम्। अतः भोक्तुरपि यः आत्मा स एवात्मेत्यद्वैतिनः। (न्यायनिर्णयः.पृ.42-44, र.प्र.पृ.42-44) यद्यपि रामानन्दयतिनैव विरचिते विवरणोपन्यासाख्ये ग्रन्थे निरूपितमतेषु गुणदोषपरिशालनं व्यधायि, तथापि, पूर्वव्याख्याकृता आनन्दगिरिणैव कृतत्वात्तदनुसारेणेहनिरूपितम्। एष्वाद्यादिपञ्चमतेषु यद्यपि वेदवाक्यानि प्रमाणतयोपन्यस्तानि, तथापि तेषां प्रामाण्यं नास्ति। यद्यपि "देहादिः आत्मा अहम्प्रत्ययगोचरत्वात्, व्यतिरेकेण घटादिवत्" इत्यनुमानेन देहादेरात्मत्वम्, तथापि "देहादिः अनात्मा अधिष्ठानत्वात्, अधिष्ठानत्वविलक्षणावच्छेकत्वधर्मवत्त्वात्" इति सत्प्रतिपक्षानुमानेन देहादेरात्मत्वाभावः। तथा "तत्वमसी"त्यादिश्रुतिविरोधात्, प्रबलश्रुतिविरोधे दुर्बलश्रुतिभिः

In Public domain. Digitization Muthulakshmi Research Academy

आभासत्वस्य सिद्धत्वाच्च। एवं "देहादिः अनात्मा, पाञ्चभौतिकत्वात्, दृश्यत्वाच्च" इत्याद्यनुमानेन देहादेरनात्मत्वसिद्धेः, ये देहादेरात्मत्वसाधकाः न्याया उपन्यस्ताः, ते न्यायाभासा एव भवन्ति। आत्मनश्च "आनन्दमयोऽभ्यासात्" (ब्र.सू.1.1.12) इत्याद्यानन्दमयाधिकरणेन आनन्दात्मत्वेन निर्णीतत्वात्, पूर्वोक्तयुक्तीनां न्यायाभासत्वमेव। स्वमते च "जीवो ब्रह्मैव आत्मत्वात् ब्रह्मवत्" इत्यनुमानं युक्तिरेव, न युक्त्याभासः। चार्वाकमतनिरूपणावसरे प्राकृता इत्यस्य शास्त्रज्ञानशून्या इत्यर्थः। आभासीकृतश्रुतिभिः प्रथमपञ्चमतानामुपपादितत्वात्, तेषां वेदबाह्यत्वम्। मीमांसक-तार्किकादिमतेषु तु अंशतः वेदसंवादस्य सत्त्वेऽपि, पारमार्थिकतत्त्वावेदकश्रुतिविरोधात्, तेषामपि सर्वात्मनाप्रामाण्यं वक्तुं न शक्यते। प्रथमपञ्चमतानि तु "किमात्मा देहादिरूपः"? उत तद्भिन्नः?" इति कोटिद्वयोपस्थापनायोक्तानि। ततः "आत्मा कर्तृत्वादिमान्नवा?" इति कोटिद्वयोपस्थापनाय तार्किकसांख्यपक्षावुपन्यस्तौ। अष्टमस्तु योगिनां पक्षः "स आत्मा ईश्वरात् भिन्नो न वा"? इति कोटिद्वयोपस्थापनाय। तत्र अस्ति तावदिति प्रकृतौ निरतिशयसत्त्वं गृहीत्वा "ईश्वरः जीवाद्भिन्नः सर्वज्ञत्वादिगुणसम्पन्नः" इति योगिनो वदन्ति। एवं सांख्यानां योगिनां च मते य आत्मा भोक्ता अकर्ता उदासीनतया साक्षी च परिभाषितः, तस्य ईश्वरः आत्मैवेति वेदान्तिनो वदन्ति। (र.प्र.पृ.44-45)

एवं वादिषु विप्रतिपन्नेष्वपि, यस्य यन्मते श्रद्धा अस्ति, तदाश्रयणात् तस्यस्वार्थः सेत्स्यति, किं ब्रह्मविचारारम्भेण? इत्युक्ते, 'तत्राविचार्य यत्किञ्चिदि'त्यादिना समाधानम्। ब्रह्मात्मैकत्वज्ञानादेव मुक्तिरिति वस्तुस्थितिः। मतान्तराश्रयणे तु तदभावान्मोक्षस्यासिद्धिः। अतः भिन्नात्मदर्शनैः यत्किञ्चिदात्मतत्त्वं प्रतिपद्यमानः निःश्रेयसात्प्रतिहन्येत। अनर्थं च प्राप्नुयात्। आत्मानमन्यथा ज्ञात्वा तत्पापेन संसारकूपे पतेत्। तथाचोक्तमीशावास्ये "अन्धंतम प्रविशन्ति"(ई.उ.12) इति। एवं "ये के चात्महनो जनाः" (ई.उ.3.) इति श्रुत्यापि अद्वितीये आत्मनि अविद्यया भेददर्शनमेव जनानामात्मघातत्वेन निरूपितम्।

"योऽन्यथा सन्तमात्मानम् अन्यथा प्रतिपद्यते। किन्तेन न कृतं पापं चोरेणात्मापहारिणा"।। इति वचनाच्च आत्मनः अन्यथाज्ञानमेव पापत्वेन निरूपितम्। अतः 'सर्वैर्मुमुक्षुभिः निःश्रेयसफलाय ब्रह्मविचारः कर्तव्यः' इति तस्मादित्यादिनोपसंहरति भाष्यकारः। तस्मात् 1.बन्धस्याध्यस्तत्वेन विषयप्रयोजनयोः सद्भावात्, 2.पूर्वतन्त्रेणागतार्थत्वात्, 3.अधिकारिलाभात्, 4.आपातप्रसिद्ध्या विषयादिसम्भवाच्च, आत्मगतसच्चिदानन्दत्वादि-विशेषधर्मपरिज्ञानाय वेदान्तवाक्यविषयिणी, जिज्ञासा-मीमांसा-पूजितविचारः वेदान्तवाक्याविरोधिभिः तन्त्रान्तरस्थन्यायैः उपकृतः कर्तव्यः निःश्रेयसाय। मीमांसायां पूजितत्वं नामधर्मजिज्ञासायां चेत्, विचारितावगतार्थानुष्ठानद्वारा अभ्युदयसाधनशक्तिसम्पन्नत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy
ब्रह्ममीमांसायां चेत्, विचारजनितज्ञानद्वारा अपरोक्षब्रह्माभिव्यञ्जन-क्षमत्वम्। (र.प्र.पृ.45)

ननु सूत्रस्य अध्यासभाष्यमारभ्य चतुर्भिः वर्णकैः व्याख्यानचतुष्टयप्रदर्शनेन अनेकार्थवत्त्वात्, वाक्यभेदः स्यादिति चेत्, सूत्रस्य संक्षिप्तार्थप्रतिपादकत्वेन अनेकार्थप्रतिपादकत्वं भूषणमेव तन्न दूषणम्।

नन्विदं सूत्रं शास्त्राद्बहिः स्थित्वा शास्त्रारम्भं प्रयोजयति, अन्तर्भूतं वा? इति चेत् शास्त्राद्बहिरवस्थानेऽस्य सूत्रस्य, शास्त्रबहिर्भूतत्वात्, हेयत्वमेव स्यात्। शास्त्रान्तर्गतमिदं सूत्रमिति पक्षे तु अस्य सूत्रस्य शास्त्रान्तर्गतत्वे अन्यच्छास्त्रमारम्भकं वक्तव्यम्। न हि स्वयमेव स्वस्यारम्भकं भवति। स्वस्मात् स्वस्योत्पत्तेः आत्माश्रयदोषग्रस्तत्वात् इति चेत्, "स्वाध्यायोऽध्येतव्यः" इत्यध्यनविधिः वेदान्तर्गत एव वेदारम्भप्रयोजकः यथा भवति, तद्वत् श्रवणादिविधिना आरब्धमिदं सूत्रं शास्त्रारम्भं प्रयोजयति। क्वचिदनुभवबलात् ऊर्ध्वाभिमुखपरस्पराधारेष्टिकाद्वयारब्धनिर्माणस्थले परस्पराधारत्वस्येव, अत्र आत्माश्रयत्वस्यादूषकत्वात्। यद्वा प्रारम्भसूत्रं न कृत्स्नं शास्त्रम्, किन्तु तदवयवः शास्त्रान्तर्गतश्च। अतस्तस्य स्वातिरिक्तातावयवात्मकशास्त्रारम्भकत्वात्, द्वयोरपि शास्त्रत्वाच्च नास्त्यात्माश्रयदोष इत्यवधेयम्। (र.प्र.पृ.45.)

इति ब्रह्मजिसाधिकरणं चतुर्थवर्णकभाष्यरत्नप्रभाप्रकाशव्याख्या च समाप्ता।।

In Public domain. Digitization Muthulakshmi Research Academy

जन्माद्यधिकरणम् (पञ्चमवर्णकम्) ब्रह्मलक्षणविचारः

लक्षणं ब्रह्मणो नस्ति किं वास्ति नहि विद्यते
जमादेरन्यनिष्ठत्वात् सत्यादेश्चाप्रसिद्धितः।।।1।।
ब्रह्मनिष्ठं कारणत्वं स्याल्लक्ष्यं स्रग्भुजङ्गवत्
लौकिकानीव सत्यादीन्यखण्डं लक्षयन्ति हि।।2।।

शा.भा.–ब्रह्मविजिज्ञासितव्यमित्युक्तम्। किं लक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान् सूत्रकारः-

जन्माद्यस्य यतः।।2।।

र.प्र.प्र.- अधिकरणरचना सम्बन्धविचारश्च :- प्रथमसूत्रेण शास्त्रारम्भमुपपाद्य शास्त्रमेव आरभमाणः जिज्ञासाधिकारणस्य अस्याधिकारणस्य च सङ्गतिनिरूपणाय पूर्ववृत्तमनुवदति भाष्यकृत्- ब्रह्मजिज्ञासितव्यमित्युक्तम् इत्यनेन। मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यइत्युक्तम्। ब्रह्मणो विचार्यत्वोक्तावपि ब्रह्मसम्बन्धिनां प्रमाणादीनामर्थात् प्रतिज्ञातत्वमभ्युपगतम्। ब्रह्मप्रमाणं ब्रह्मयुक्तिः इत्यादिविशिष्टविचाराणां विशेषणीभूतब्रह्म-पादार्थज्ञानमन्तरा कर्तुमशक्यत्वात् ब्रह्मणः, स्वरूपज्ञानाय लक्षणं वक्तव्यम्। तदेव न सम्भवति इत्याक्षिपन्नपि भाष्यकारः सूत्रकृतं पूजयन्नेव "किं लक्षणं पुनस्तत् ब्रह्म" इति पृच्छन् लक्षणसूत्रमवतारयति "जन्माद्यस्य यतः" इति। किंलक्षणमित्यत्र

 In Public domain. Digitization Muthulakshmi Research Academy

किंशब्दः न प्रश्नार्थकः, अपि तु आक्षेपार्थकः। आक्षेपार्थो नाम निषेधार्थः। एवं च आक्षेपसङ्गत्यास्याधिकारणस्योत्थानात् पूर्वाधिकरणेन अस्याधिकरणस्य आक्षेपिकी सङ्गतिः। "ब्रह्मज्ञानाय विचारः कर्तव्यः" इति पूर्वाधिकरणेन प्रतिज्ञातत्वेऽपि ब्रह्मणो लक्षणस्याभावे स्वरूपस्याज्ञानात्, कर्तव्यत्वेन प्रतिज्ञातो विचारो न युज्यत इत्याक्षेपस्य स्वरूपम्। अस्य च अधिकरणस्य समन्वयाध्यायवर्तित्वेन अद्वितीयब्रह्मणि तात्पर्यनिश्चायकत्वेन, "यतो वा इमानि भूतानि जायन्ते" (तै.उ.3.1) इत्यादिश्रुतीनां प्रसिद्धजगत्कारणत्वात्मकस्पष्टब्रह्मलिङ्गकत्वेन च अध्यायश्रुतिपाद-सङ्गतयः।

1)विषयः- "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्यं विषयः। 2) तत्र च विषयः श्रुतिवाक्यं मौलिकतया ब्रह्मणः लक्षणं वक्ति न वा? यदि "अङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत् "इत्यनुमानेनैव सर्वजगत्कर्तृकत्वमीश्वरस्य सिद्ध्यति, तर्हि जगत्कर्तृत्वस्य ब्रह्मलक्षणस्य अनुमानादेव सिद्धौ, यतो वेत्यादिश्रुतिवाक्यस्य ब्रह्मलक्षणत्वनिरूपणमानावश्यकम्। यदि अनुमाने अप्रत्यक्षजातीयवस्तुसाधकत्वं नास्तीति विभाव्यते, तर्हि सिद्धं श्रुतिवाक्यस्य लक्षणपरत्वम्। ततश्च पूर्वोक्तश्रुतिवाक्यं प्रधानतया लक्षणपरं न वेति? सन्देहः। 3)अनुमानस्यैव लक्षणपरत्वात् श्रुतिवाक्यं न लक्षणपरमिति पूर्वपक्षः।

In Public domain. Digitization Muthulakshmi Research Academy

4)श्रुतिवक्यमेव लक्षणपरमिति सिद्धान्तः ब्रह्मलक्षणस्य अनुमानासाध्यत्वात् 5)फलम् पूर्वपक्षे अद्वैतब्रह्मणो लक्षणाभावेन अद्वैतमुक्त्यसिद्धिः। लोकान्तरप्राप्तिलक्षणमुक्तिसिद्धिश्च फलम्। सिद्धान्ते तु श्रुतिवाक्यस्य लक्षणपरत्वात् शुद्धब्रह्मणः लक्षणमस्तीति प्रत्यक्ब्रह्मैक्यलक्षणमोक्षपरत्वम्। 6)अत्र च आक्षेपसङ्गत्या पूर्वपक्षस्य उत्थानात्, आक्षेपस्य एतदधिकरणसिद्धान्तेन समाधानलाभे सति पूर्वाधिकरणविचारस्य यत्फलं तत् फलं तथैव अवशिष्टमिति पृथक् सिद्धन्ते फलं न वक्तव्यम्। तथापि स्पष्टप्रतिपत्त्यर्थमुक्तम्। तथाचोक्तं -

"आक्षेपे चापवादे च प्रप्त्यां लक्षणकर्मणि।

प्रयोजनं न वक्तव्यं यत्र कृत्वा प्रवर्तते "।।

इति आक्षेपसङ्गत्या प्रवृत्ते अधिकारणे, अपवादादिकरणे, यदर्था प्रवृत्ता चिन्ता तत्सूत्रे, लक्षणसूत्रे, सम्भाव्य कञ्चिदर्थं निरूपणपरे कृत्वाचिन्ताकरणे च प्रयोजनं न वक्तव्यमिति तदर्थः। आपवादिकी सङ्गतिर्नाम पूर्वाधिकरणसिद्धान्तमपोद्य यत्र पूर्वपक्षः प्रवर्तते तयोरधिकरणयोः सङ्गतिः। (र.प्र.पृ.45-46.)

द्वितीयसूत्रार्थविचारः:- जन्मादि, अस्य, यतः इति त्रिपदं सूत्रम्। अस्य इत्यनेन प्रत्यक्षादिसन्निधापितं विचित्रं वक्ष्यमाणविशेषण-विशिष्टं जगत् परामृश्यते। अस्य जगतः जन्मदिजन्मस्थितिभङ्गम्, यतः सर्वज्ञात् सर्वशक्तेः भवति तद्ब्रह्मेति वाक्यशेषेण सूत्रार्थः। अत्र

 In Public domain. Digitization Muthulakshmi Research Academy

यतः इति कारणवाचकपदं आच्छाद्य जगज्जन्मादि ब्रह्मलक्षणम् इति यद्युच्येत, तन्न सम्यक्। जन्मादेः जगद्धर्मत्वेन ब्रह्मावर्तिनः जन्मादेः लक्षणत्वाऽयोगात्।

यत इति पञ्चमीविचारः :- न च जगदुपादानत्वे सति कर्तृत्वं ब्रह्मणो लक्षणम्। तच्च श्रुतिवाक्यलभ्यम्। यतः इति कारणात्वार्थिका पञ्चमी। तच्च कारणत्वं "विभाषाऽगुणेऽस्त्रियाम्" (पा.सू.2.3.25)। इति सूत्रे विभाषेति योगविभागात् क्वचित् अगुणे अस्त्रियामपि हेतौ विकल्पतया पञ्चम्यां, तसिल् प्रत्यये लभ्यं निमित्तत्वम्। "जनिकर्तुःप्रकृतिः" (पा.सू.1.4.30) इति सूत्रेण "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यादाविव प्रकृतित्वलक्षणम् उपादनत्वलक्षणं च अपादानत्वमिति वाच्यम्। कर्तुरुपादानत्वे दृष्टान्ताभावेनाभिन्न-निमित्तोपादानस्य ब्रह्मणः अनुमानादसिद्धेः। न च श्रौतस्य ब्रह्मणः श्रुत्यैव लक्षणसिद्धेः किमनुमानेन? इति वाच्यम्। अनुमानस्य श्रुत्यनुग्राहकत्वेन श्रुत्यर्थम् अनुभवपथं नेतुं उपयोगित्वेन, अनुमानाभावे तद्विरोधेन श्रुत्यर्थस्य असिद्धेः। न च जगत्कर्तृत्वं जगदुपादानत्वं वा पृथगेव लक्षणमिति वाच्यम्। कर्तृमात्रस्योपादानाद्भिन्नस्य परिच्छिन्नत्वेन तस्य ब्रह्मत्वायोगात्। उपादानत्वेऽप्यकर्तृत्वे जगत्सर्जनाद्ययोगाच्च। अतः अद्वितीये ब्रह्मणि समन्वयसिद्ध्यर्थमनेन सूत्रेण निरूप्यमाणं लक्षणम् अभिन्ननिमित्तोपादानत्वलक्षणं जगत्कर्तृत्वमेवेति वक्तव्यम्। किञ्च

In Public domain. Digitization Muthulakshmi Research Academy

मौलिकस्य पुरुषाभ्यूहमात्रस्य अनुमानस्य अप्रतिष्ठितस्य अतीन्द्रिये ब्रह्मणि प्रसराऽयोगात्, अपौरुषेयतया नित्यनिर्दुष्टश्रुत्युक्तस्य उभयविधकारणत्वस्यैव सुखादिदृष्टान्तेन सम्भावयितुं शक्यत्वात्, जगज्जन्मनिमित्तोपादानत्वमेव श्रुत्युक्तं अनुमानेन अस्माभिः सम्भावनीयं भवति। तथाहि "जगदभिन्ननिमित्तोपादानकं कार्यत्वात् सुखादिवत्" इति। तत्र दृष्टान्ते आत्मानिष्ठसुखं प्रति नैयायिकोक्तरीत्या आत्मनः समवायिकारणत्वेन उपादनत्वम्, आत्मनः कर्मादिद्वारा निमित्तत्वात् निमित्तकारणत्वं च। सुखादिकं कार्यत्वात् अभिन्ननिमित्तोपादानकं यथा, तद्वत् "जगत् अभिन्ननिमित्तोपादनकं कार्यत्वात्" इति जगत्प्रति अभिन्ननिमित्तोपादानस्य ब्रह्मणः सिद्धिः। एवं घटाकाशसंयोगं प्रति तत्तज्जीवीयादृष्टादिना आकाशस्य निमित्तकारणत्वम्। एवमाकाशसंयोगं प्रति आकाशस्य समवायिकारणत्वेन उपादानकारणत्वं चेत्याकाशस्य उभयविधं कारणत्वं नैयायिकमतेऽपि द्रष्टव्यम्। अतः जन्मादिनिमित्तोपादानत्वं ब्रह्मणः लक्षणं सिध्यतीत्यभिप्रायेणोक्तं सूत्रकृता जन्माद्यस्य यतः इत्यत्र यत इति पञ्चमी।

यद्यपि यत इति पञ्चम्या उपात्तं कारणत्वं जगज्जन्मस्थितिलयनिमित्तत्वमिति वक्तव्यम्, तथापि "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" (ब्र.सू.1.4.23) इत्यधिकरणे तत्कारणत्वं

 In Public domain. Digitization Muthulakshmi Research Academy

न केवलं निमित्तकारणत्वरूपं कर्तृत्वम्, अपि तु उपादनत्वमपि इति प्रकृतिपदेनोक्तम्। च शब्देन च निमित्तकारणत्वं सूचितम्। तत्र जगत् कर्तुः ब्रह्मणः घटादिकर्तुः कुलालस्येव अधिष्ठात्रन्तराभावात् निमित्तत्वम्। एवं "अभिध्योपदेशाच्च" (ब्र.सू. 1.3.24) इति सूत्रेदाहृतया "सोऽकामयत बहुस्यां प्रजायेय" इति श्रुत्या कुलालस्य मृदं घटत्वेन रचयमीति सङ्कल्पस्येव, ब्रह्मणः मायया जगद्रचयामीति सङ्कल्पस्य, "तदैक्षत" इति श्रुत्या ब्रह्मणि चेतनधर्मस्य जगद्रचनविषयकेक्षणधर्मस्य च प्रतिपादनात्, ब्रह्मणः निमित्तकारणत्वम्। एवं "बहुस्यां प्रजायेय" इति ब्रह्मणः बहुभवनेच्छाप्रकाशनेन बहुभवनेन च उपादानकारणत्वं च तत्र प्रकृत्यधिकरणे निरूपितम्। एवमग्रे प्रकृत्यधिकरणे निरूपयिष्यमाणमपि इह स्मृतं जगत् प्रति ब्रह्मणः अभिन्ननिमित्तोपादनत्वं जगज्जन्मादिकारणत्वस्पुटीकरणाय इह व्याख्यायां प्रकाशितमिति न पौनरुक्त्यम्। (र.प्र.पृ.46.)

जन्मादिकारणत्वं ब्रह्मणः तटस्थलक्षणम् :- ननु "अथातो ब्रह्मजिज्ञासा" इत्यत्र निर्गुणस्यैव ब्रह्मणः जिज्ञासितत्वेन निरूपणात् तस्य कार्यकारणानात्माकत्वेन, जगज्जन्मादिकारणत्वं कथं लक्षणमिति चेत् उच्यते। लक्षणं द्विविधं स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्। रूपशब्दस्य असाधारणधर्मात्मकत्वेऽपि तस्य धर्मिस्वरूपत्वं

In Public domain. Digitization Muthulakshmi Research Academy

कथमिति चेत् स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनात्। यथा आनन्द-विषयानुभव-नित्यत्वानां धर्मिभूतब्रह्मस्वरूपाव्यतिरिक्तत्वेऽपि धर्मत्वेन कल्पनात् स्वरूपलक्षणत्वम्। तच्च "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुत्या निरूपितम्। इह भाष्ये "सर्वज्ञात् सर्वशक्तेः" इत्यत्र यद्यपि इतरनिरूप्यत्वलक्षणं तटस्थलक्षणं सम्भावनीयम्, तथापि अनेन "सर्वज्ञशब्देन सर्वावभासनक्षमविज्ञप्तिमात्रं विवक्ष्यते" (वे.प.व्या.शिखामणिपृ.180) इति विवरणाचार्यवचनात् तदपि स्वरूपलक्षणमेव भवितुमर्हतीति मन्तव्यम्। प्रकृते तटस्थलक्षणं "यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव"। यथा पृथिव्यां "उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठती"ति न्यायेन उत्पत्तिकाले गन्धगुणस्य प्रागभावस्यैव सत्त्वात्, महाप्रलये च गन्धादिगुणानां नाशाच्च, पृथिवीकालं यावत् गन्धस्याभावात् तटस्थलक्षणम्। शिशवे मात्रा गगनतलवर्तिन चन्द्रस्य प्रदर्शनवेलायां शाखाग्रं प्रदर्श्य चन्द्र इति ज्ञापनमपि तटस्थलक्षणमेव भवति। वृक्षसम्बन्धिना शाखाग्रेण गगनतलवर्तिनः चन्द्रस्य लक्ष्यमाणत्वात्। एवं च इतरनिरूप्यत्वेन इदं लक्षणं तटस्थलक्षणं भवति, न स्वरूपलक्षणम्। प्रकृते च जगदुत्पत्ति-स्थिति-लयकारणत्वेन ईश्वरगतेन शुद्धब्रह्मणो लक्षणात्, अन्यनिष्ठधर्मैः अन्यस्य लक्षणनिरूपणात् तटस्थलक्षणमेव। यथा

In Public domain. Digitization Muthulakshmi Research Academy

शुक्तिरजतभ्रमानन्तरं तन्निरासाय "यद्रजतं सा शुक्ति"रित्याप्तवचने भ्रान्त्या पूर्वगृहीतं रजतं शुक्तेः यथालक्षणं, तद्वत् यद् जगत्कारणं तद्ब्रह्म इति कल्पितं जगत्कारणत्वं शुद्धब्रह्मावृत्ति सत्, अन्यवृत्ति सत्-ईश्वरवृत्ति सत् तटस्थं लक्षणं भवति। (र.प्र.पृ.46.)

शा.भा.:-जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानोबहुव्रीहिः। जन्मस्थितिभङ्गं समसर्थः। जन्मनश्चादित्वं श्रुतिनिर्देषापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत् 'यतो वा एमानि भूतानि जायन्ते' (तै.उ.3.1) इत्यस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य धर्मिणः स्थिति-प्रलय-सम्भवात्। अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमानिर्देशः। षष्ठी जन्मादिधर्मसम्बन्धार्था। यत इति कारणनिर्देशः।

जन्मादिसूत्रव्याख्यानम्- जन्मादि इति बहुव्रीहिविचारश्च :-जन्म उत्पत्तिः आदिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः इति भाष्यम्। जन्म आदि-अद्यवयवतया अस्य समूहस्य अस्तीति जन्मादि इति अन्यपदार्थप्रधानः बहुव्रीहिः। अयं च बहुव्रीहिः तद्गुणसंविज्ञानः। तस्य बहुव्रीह्यर्थस्य अंन्यपदार्थस्य गुणानां संविज्ञानं समभि व्याहृतपदार्थे अन्वयित्वतज्ज्ञानंयस्मिन् बहुव्रीहौ स बहुव्रीहिः तद्गुणसंविज्ञानबहुव्रीहिः। यथा "लम्बकर्ण मानय" इत्यत्र अन्यपदार्थभूतलम्बकर्णविशिष्टस्य देवदत्तादेः विवक्षायां लम्बौ कर्णौ

In Public domain, Digitization Muthulakshmi Research Academy

यस्य सः इत्यर्थक बहुव्रीहिघटकगुणभूतयोः लम्बकर्णपदार्थयोः स्वधर्मिणा देवदत्तेन सह आनयनक्रियान्वयात्, तद्गुणानां समविज्ञानमस्तीति तद्गुणसंविज्ञानो बहुव्रीहिः। चित्रगुमानय इत्यत्रतु चित्राः गावः यस्य सः इत्यर्थकबहुव्रीहौ घटकयोः चित्रगवोः गुणयोः आनयनक्रियायां अन्यपदार्थेन तत्स्वामिना सह अन्वयाभावात् अतद्गुणसंविज्ञानो बहुव्रीहिः। रत्नप्रभायां चित्रगुः इत्युदाहरणे यथा चित्रागोर्देवदत्तस्य चित्रा गावः गुणभूताः तद्वत् जन्म अन्यपदार्थस्य गुणभूतं इत्येव प्रतिपादने तात्पर्यम्। न तु चित्रगुमित्यस्य तद्गुणसंविज्ञानत्वोदाहरणे इत्यवधेयम्। (र.प्र.पृ.46)

प्रकृते जन्मादि इत्यत्र आदिशब्दस्य प्रभृत्यर्थकत्वाभावात्, अद्यावयववाचित्वात् आद्यावायवभूतं जन्म यस्य जन्मस्थितिभङ्गरूपसमाहारस्य इत्यर्थस्य समासेन लाभात्, तत्र च गुणभूतस्य आद्यवयवभूत जन्मपदार्थस्य यतश्शब्दस्थपञ्चमीवाच्य-कारणत्वेनान्वयः तद्गुणसंविज्ञानबहुव्रीहेः लभ्यते। एवं च समसार्थैकदेशस्य जन्मन एव कारणं ब्रह्म इत्येतत् सूत्रात् पर्यवस्येत्, न तु जन्म-स्थिति-लय-भङ्गसमाहारकारणम्। एवं च सति एतल्लक्षणं परिच्छिन्नस्य अन्यस्यैव केवलसृष्टिकर्तुः ब्रह्मणः लक्षणं भवेत्, न तु अद्वितीयस्य ब्रह्मणः इति शङ्कायां सञ्जातायां तादृशशङ्कानिवारणार्थं स्मरयति भगवान् भाष्यकारः "जन्मस्थितिभङ्गं समासार्थः" इति। समाहारस्य नपुसकत्वेन

In Public domain. Digitization Muthulakshmi Research Academy

जन्मादि इति सूत्रे नपुंसकलिङ्गप्रयोगश्च। जन्म आदिर्यस्य तत्- इति विग्रहवाक्ये यस्य इत्यनेन जन्माद्यवयवकस्य इत्यर्थं ग्रहणात् जन्मस्थितिभङ्गलक्षणसमाहारार्थकत्वं च अस्तीति जन्मस्थितिलय-कारणस्य अद्वितीयब्रह्मणः लक्षणसिद्धिः निष्प्रत्यूहा। एवं च जगज्जन्मकारणं ब्रह्म, जगत्स्थितिकारणं ब्रह्म, जगल्लयकारणं च ब्रह्म इति त्रयाणां कारणत्वानां पृथक् लक्षणत्वे वक्तव्येऽपि मिलितान्येव कारणत्वानि ब्रह्मलक्षणमिति ज्ञापनाय अत्र अन्यपादार्थतया समाहारः द्योतित इत्यवधेयम्। (र.प्र.पृ.46-47.)

जन्मनः आदित्वविचारः- ननु जन्मनः आदित्वं त्रिषुमध्ये कथमित्युक्ते श्रुतिनिर्देशापेक्षं वस्तुनिर्देषापेक्षं चेति भाष्ये समाधानम्। "यतो वा इमानि भूतानि जायन्ते इति ब्रह्मलक्षणनिरूपिकायां मूलश्रुतौ जायन्ते इति जनिक्रियायाः प्रथमतः, ततः स्थितेः ततो लयस्य च क्रमदर्शनात् श्रुतिनिर्देशापेक्षत्वम्। वास्तविकलोकवृत्तानुसारेणापि जन्मना लब्धसत्ताकस्य स्थितिप्रलयसम्भवात्, वस्तुवृत्तनुसारेणापि क्रमः। ततश्च सूत्रकृतापि स एव क्रमः आदृतः। अस्य इत्यत्र इदंसर्वनाम्नः प्रत्यक्षार्थमात्रवचित्वात् प्रत्यक्षसंनिधापितधर्मी एव अर्थः इति शङ्कामा भूदिति भाष्ये आदिपदं योजयित्वा प्रत्यक्षादिसन्निधापितस्य धर्मिणः अस्येति इदमा निर्देशः इत्युक्तम्। एवं च अनुमानादिप्रमाणान्तरग्राह्यस्यापि जगतः इदं शब्दार्थता। अस्य

In Public domain. Digitization Muthulakshmi Research Academy

इत्यत्र षष्ठ्याः को वा अर्थः? इत्युक्ते "षष्ठीजन्मादिसम्बन्धार्था" इति भाष्यम्। शेषषष्ठ्या सम्बन्धबोधानात् जन्मदिभिः सम्बन्धः अस्य (इदं पदार्थस्य) जगतः अस्तीति ज्ञायते। न च वियदादिप्रपञ्चस्य नित्यत्वात् कथं जन्मदि सम्बन्धः इति चेत्, "वियदुत्पद्यते सावयवत्वात् विभक्तत्वात् घटादिवत्" इत्याद्यनुमनैः वियदधिकरणे सूत्रकृता वियदादिप्रपञ्चस्य स्वयमेव अनित्यत्वस्य साधयिष्यमाणत्वात्। (र.प्र.पृ.47)

यत इति पदसार्थक्यम् :- तर्हि जगतः जन्मदेर्वा सम्बन्धस्यैव ब्रह्मणो लक्षणत्वेन उपपत्तौ सूत्रे यत इति पदं किमर्थम् इति चेत् ब्रह्मसम्बन्धस्य जन्मदिब्रह्मसम्बन्धस्य वा लक्षणत्वाऽयोगात्, अवश्यं जगतः जन्मदेः कारणत्वस्यैव लक्षणत्वं वक्तव्यमिति यतः इत्यत्र यच्छब्दोपरि पञ्चम्यर्थकारणत्वबोधकः "पञ्चम्यास्तसिल्" इति सूत्रविहितः तसिल् प्रत्ययः। तसिल् प्रत्ययप्रकृतिभूत-यच्छब्दस्य तु सत्यं ज्ञानमनन्तं आनन्दरूपं वस्तु अर्थः। "अनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इति (तै.उ.3.6.1.) इति श्रुत्या निर्णीतत्वात्। तथा च यच्छब्देन स्वरूपलक्षणं ब्रह्मणः उक्तं भवति। एतच्च यतः सर्वज्ञात् सर्वशक्तेरित्यदि अग्रिमभाष्यग्रन्थात् प्रागेवनिर्णीतम्। (र.प्र.पृ.47.)

In Public domain. Digitization Muthulakshmi Research Academy

अस्यपदार्थविचारः

शा.भा.:- अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफला-श्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणात् भवति तद्ब्रह्मेति वाक्यशेषः।।

र.प्र.प्र. :- 'अस्य' पदस्य अर्थस्तु विस्तृततयाव्याख्यास्यते। तत्र भाष्ये सूत्रवाक्यार्थपरिज्ञानाय तद्ब्रह्मेति वाक्यशेषमनुषज्य भाष्यकारैः अर्थः व्याख्यास्यते। लक्षणसूत्रे तद्ब्रह्म इति पदस्य आभावात्, अस्य सूत्रस्य लक्षणवाक्यत्वज्ञानाय "किं पुनस्तद् ब्रह्म" इत्यतः भाष्यवाक्यात् "तद्ब्रह्म" इत्यनुषङ्गः कर्तव्यः। अस्य जगतो नामरूपाभ्यां इत्यादि भाष्यम्। अत्र च भाष्ये 1)नामरूपाभ्यां व्याकृतस्य 2)अनेककर्तृभोक्तृसंयुक्तस्य 3)प्रतिनियतदेशकाल-निमित्तक्रियाफलाश्रयस्य 4)मनसाप्यचिन्त्यरचनारूपस्य इति चत्वारि विशेषणानि कारणस्य ब्रह्मणः सर्वज्ञत्वादिधर्मसम्भावनार्थानि। नामरूपाभ्यां व्याकृतस्य इति तु प्रकृतेः शून्यस्य च अचेतनास्य च निरासार्थम्। तत्र अनेककर्तृभोक्तृसंयुक्तस्य इति विशेषणं हिरण्यगर्भादिजीवव्यावृत्यर्थम्। प्रतिनियतेत्यादिविशेषणं तु सर्वज्ञत्वसम्भावकम्। मनसाप्यचिन्त्यरचनारूपस्य इति तु सर्वशक्तित्वसम्भावनार्थम्।

In Public domain. Digitization Muthulakshmi Research Academy

1)नामरूपाभ्यां व्याकृतस्य यथा हि कुम्भकारः कुम्भशब्दादिभेदेन विकल्पितं पृथुबुध्नोदराकारस्वरूपं कुम्भं बुद्धावालिख्य बहिः प्रकाटयति, एवमेव परम कारणम् ब्रह्मापि स्वेक्षितं नामरूपाद्यात्मना व्याकरोति। तथा च जगतः ब्रह्मणा नामरूपप्रकारेण जगत् व्याकृतमिति सिद्धम्। तथा चानुमानं-"आद्यं कार्यं चेतनजन्यं कार्यत्वात्कुम्भवत्" इत्यनुमानेन कार्ये जगति चेतनजन्यत्वस्य सिद्धेः जगज्जनकतया प्रकृतेः अचेनस्य शून्यस्य च निरासः।

2)अनेककर्तृभोक्तृसंयुक्तस्य इति द्वितीयं जगतो विशेषणम्। इदं च जगतः हिरण्यगर्भादिजीवजन्यत्वनिरासार्थम्। यतः जगत् अनेककर्तृभोक्त्रात्मकहिरण्यगर्भसंयुक्तम्। अतः तज्जन्यं न भवति। स्वस्य स्वजन्यत्वाऽभावात्। ननु यः कर्ता स एव भोक्ता भवति। अतः अनेककर्तृसंयुक्तस्य इत्यनेनैव अनेकभोक्तृसंयुक्तस्य इत्यस्यापि लाभे सिद्धे, पुनः द्वयोः पृथक् ग्रहणं किमर्थं? इति चेत्, पुत्रकृतश्राद्धे पुत्रः कर्ता एव न भोक्ता। एवं पुत्रार्थं पित्रा क्रियमाणे वैश्वानरेष्टौ पिता कर्ता एव न भोक्ता। अतः एतादृशभिन्न-भिन्नकर्तृभोक्त्रात्मा नैकसूक्ष्मदेहात्मा हिरण्यगर्भः। तदात्मकं जगदिति तस्य हिरण्यगर्भजन्यत्वं न सिद्ध्यति। "यो ब्रह्माणं विदधाति पूर्वम्" (श्वेता.6.18) "सर्व एते व्युच्चरन्ती"ति श्रुत्या च स्थूलसूक्ष्मदेहोपधिद्वारा जीवानां परमात्माकार्यत्वेन प्रकशितत्वात्, तेषां सूक्ष्मदेहानां जगन्मध्यपतितत्वात्, तदात्मकस्य हिरण्यगर्भस्य

In Public domain. Digitization Muthulakshmi Research Academy

जगत्कारणत्वायोगात्। यद्यपि जीवानां स्वरूपतो नित्यत्वेन तस्य परमात्मकार्यत्वं नास्ति, तथापि उपाधीनां स्थूलसूक्ष्मदेहानां परमात्मना जायमानत्वात्, तद्विशिष्टचैतन्यात्मकजीवानामपि जन्मव्यवहारोऽमुख्यः। एवं च स्वात्मककर्तृभोक्तृजीवकर्तृत्वस्य हिरण्यगर्भे अभावात् तद्वारणाय अनेककर्तृभोक्तृसंयुक्तस्येति जगतो विशेषणम् ।

3)प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य इदं च कारणस्य सर्वज्ञत्वसम्भावनार्थं विशेषणम्। प्रतिनियतानि व्यवस्थितानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः। क्रियाफलस्य स्वर्गस्य मेरुपृष्ठं देशः। देहपातादूर्ध्वं कालः उत्तरायणमरणादि निमितं च प्रतिनियतम्। एवं ऐहिकफलेषु राजसेवाफलत्वेन प्राप्तग्रामदिः देशः। तत्फलप्राप्तियोग्यः कालश्च कलः। तथा च यथा "सेवाफलं ऐहिकं यथा देशाद्यभिज्ञदातृकं भवति फलत्वात्, तथा यागादिकर्मफलमपि प्रतिनियतदेशकालाभिज्ञदातृकं भवति फलत्वात्" इति कर्मफलदातुः ब्रह्मणः सर्वज्ञत्वसिद्धिः।

4)मनसाप्यचिन्त्यरचनारूपस्य अतिगभीरमहोदधीनां दुष्प्रवेश-महारण्यानां तत्र विलसतां महावृक्षादीनाम्, एकैकस्मिन् एव देहे सृष्टानां नैकसहस्रनाडीनां दर्शने, तस्य परमात्मनः रचनायाः स्वरूपं मनसापिचिन्तयितुमशक्यं इति, तस्य

In Public domain. Digitization Muthulakshmi Research Academy

सर्वज्ञसर्वशक्तित्वसिद्धिः। एवं च पूर्वोक्तविशेषणविशिष्टं जगत् यतस्सर्वाज्ञात् सर्वशक्तेः भावति तद् ब्रह्म इति ब्रह्मलक्षणसूत्रार्थः। सर्वज्ञं सर्वशक्ति इति द्वयं ब्रह्मणः स्वरूपलक्षणत्वेन विभावनीयम्। तयोः सर्वावभासनक्षमत्वसर्वशक्तियोग्यत्वस्वरूपत्वात्। र.प्र.पृ.47-48.

सूत्रस्य श्रुत्यनुसारित्वमेव न निरुक्तानुसारित्वम् :-

शा.भा.-अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थिथिकाले सम्भाव्यमानत्वात् मूलकारणादुत्पत्तिस्थितिनाशाः जगतो न गृहीताः स्युरित्याशङ्केत, तन्माशाङ्कीति योत्पत्तिर्ब्रह्मणः तत्रैव स्थितिःप्रलयश्च त एव गृह्यन्ते।

र.प्र.प्र.- ननु निरुक्ते देहो "जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति" (निरुक्तम्1.1.1.) इति यास्कमुनिना जन्मस्थिथिभङ्गातिरिक्तनां वृद्धि-परिणाम-अपक्षयाख्यानामन्येषां त्रयाणां परिगणितत्वात्, तदनुक्तेः तत्कारणत्वस्यापि ब्रह्मलक्षणेऽप्रवेशात् न्यूनता किल? इति प्रश्ने "अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भावः" इत्यभिप्रायेण भाष्ये समाधानम्। वृद्धि-परिणामयोः जन्मनि, अपक्षयस्य नाशेचाऽन्तर्भावात्, तेषामपरिगणने न काचिन्न्यूनता। यस्केन पठितानां जायते अस्ति इत्यादि षड्भावविकाराणां ग्रहणे तेषां पञ्चभूतोत्पत्त्यनन्तरं जगतः

 In Public domain. Digitization Muthulakshmi Research Academy

स्थितिकाले भौतिकेषूपलभ्यमानत्वात्, भौतिकपदार्थगताः जन्यादयः षट्भावविकाराः उक्ता इति, तेषामेव भौतिकानां उत्पत्त्यादेः कर्तृत्वं लक्षणं निरूपितं स्यात्, न तु पञ्चमाहाभूतानाम् उत्पत्त्यादिकमिति, न सर्वजगत्कर्तुः लक्षणं निरूपितं स्यात्। तादृशी शङ्का यथा न स्यात् तथा सूत्रे जन्मादयः श्रुत्युक्ता एव प्रतिपादिताः, न निरुक्तोक्ताः। "यतो वा इमानि भूतानि' इत्यादिश्रुतौ भूतानि इति पदेन पञ्चमहाभूतानां परामर्शात्, सूत्रकृतोऽपि तदुत्पत्तिरेव अभिमतेति श्रुतिसूत्रययोः एकार्थविषयत्वं सिद्धम्। अन्यच्च यतः ब्रह्मणः जगतः उत्पत्तिः, तत्रैव स्थितिप्रलययोः कथनेन ब्रह्मणः अभिन्ननिमित्तोपादनत्वबोधा-दद्वितीयत्वसिद्धिः। यदि निरुक्तस्यापि श्रुतिरेव मूलमिति माहाभूतजन्मदिकमेव निरुक्तास्याप्यर्थः इत्युच्येत, एवमपि निरुक्तस्य या श्रुतिर्मूलं, सा श्रुतिरेव अस्माकं सूत्रस्य मूलमस्तु। किमन्तर्गडुना निरुक्तग्रन्थेन? अद्वितीयब्रह्मणि च युक्तिरेवं सम्भावनीया। यदि जगतः ब्रह्मातरिक्तं कारणमस्तीति सम्भाव्येत, तर्हि जगत्कारणत्वस्य ब्रह्मलक्षणस्य ब्रह्मणोऽन्यत्र सद्भावादतिव्याप्तिदोषः प्रसज्येत। तथा च सूत्रकारोक्तब्रह्मलक्षणे दोषस्य सम्भावयितुमशक्यत्वात्, तल्लक्षणस्य निर्दुष्टत्वसम्भावनाय ब्रह्मातिरिक्तं नास्त्येवेति कल्पनीयमिति, श्रुत्यनुसारं सूत्रं रचयता

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रकारेण युक्तिः सूचिता। एतच्च तर्कपादे विस्तरेण वक्ष्यते। (र.प्र.पृ.48-49)

प्रधानादीनां जगत्कारणत्वनिरासः

शा.भा:-न च यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वाऽन्यतः प्राधानादचेतनात्, अणुभ्यः अभावात् संसारिणोवा उत्पत्त्यादि सम्भावयितुं शक्यम्। न च स्वभावतः, विशिष्टदेशकालनिमित्तादीनामिहोपादानात्।।

र.प्र.प्र. :- ब्रह्मलक्षणप्रतिपादनपरात्सूत्रात्, अस्य पदस्य विशिष्टव्याख्यानपरात् भाष्यात्, ब्रह्मणः सर्वज्ञत्व-सर्वशक्तित्वनिरूपणपरात्, यत इति भाष्याच्च, प्रधान-अणु-अभाव-संसारिभ्यः उत्पत्त्यादि सम्भावयितुं न शक्यमिति लभ्यते। एतदेव "यथोक्तविशेषणस्य जगतः यथोक्तविशेषणं ईश्वरं मुक्त्वा" इति भाष्येण स्फुटीकृतम्। परमाणूनामचेतनानां स्वतः प्रवृत्त्ययोगात्, उत्पत्त्यादिहेतुत्वं परमाणुषु न सम्भावयितुं शक्यते। यदि परमाणुद्वयसंयोगविषयकज्ञानवता सर्वज्ञेन पर्मेश्वरेण चालितयोः परमाण्वोः संयोगः उत्पद्यते, ततः सृष्टिरिति व्याख्यायेत, एतदपि न सम्यक्। यतः जीवादन्यस्य ईश्वरस्य शरीरेन्द्रियाद्युपाध्यभावेन ज्ञानमेव नास्ति, कुतः सर्वज्ञत्वं? अतः सर्वज्ञेश्वरासिद्धौ परमाणूनां प्रेरकाभावात्, जडानां परमाणूनां जगदारम्भकत्वं नास्तीति परमाणुकारणत्वनिरासः। एवं साङ्ख्याभिमतप्रकृत्यपरपर्याय-

In Public domain. Digitization Muthulakshmi Research Academy

प्रधानास्यापि जडत्वात्, अभावस्य तुच्छत्वाच्च, नस्ति जगदारम्भकत्वम्। हिरण्यगर्भात्मकब्रह्मणः संसारिणोऽपि जगदन्तःपातित्वेन नास्ति जगदारम्भकत्वम्। चार्वकाभिमातस्वभवस्यापि नास्ति जगत्कारणत्वम्। तत्र स्वभावः इत्युक्ते, किंस्वस्मात् भावः अथवा कारणान्तराऽनपेक्षा उत्पत्तिर्वा? नाद्यः। स्वस्मात् स्वस्य भावस्य उत्पत्तेः आत्मश्रयदोषग्रस्तत्वात्। प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य इति विशेषण-व्याख्यानसन्दर्भे कर्यार्थिभिः तत्तदसाधारणकारणानां देशकालादीनाम् उपादीयमानत्वेनवर्णनात्, कारणानापेक्षा जगदुत्पत्तिः नास्त्येव। यदि कारणानापेक्षा प्रवृत्तिः तर्हि धान्यर्थिनां भूविशेषे वर्षादिकाले च बीजावापादौ प्रवृत्तिः न स्यात्। ततश्च पूर्वोक्तसर्वज्ञत्वादिविशेषणम् ईश्वरं मुक्त्वा जगतः उत्पत्यादिकं न सम्भवति इति भाष्येण कर्तारं विना कार्यं नास्तीति व्यतिरेक उक्तो भवति। (र.प्र.पृ.49-50) यत्कार्यं तत् सकर्तृकं इति अन्वयव्याप्तिस्तु अस्त्येव।

ब्रह्मलक्षणविषये नानुमानं मूलप्रमाणम् अपि तु श्रुतिः तदर्थसम्भावकमनुमानादि च प्रमाणम्

शा.भा:-एतदेवानुमानं संसारव्यतिरिक्तास्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः। नन्विहापि तदेवोपन्यस्यं जन्मादिसूत्रे। न। वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्। वेदान्तवाक्यानि हि

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रैरुदाहृत्यविचार्यन्ते। वाक्यार्थविचारणाऽध्यवसाननिर्वृत्ताहि ब्रह्मकारणत्वावगतिः, नानुमनादिप्रमाणान्तरनिर्वृत्ता। सत्सु हि वेदन्तवाक्येषु जगतो जन्मदिकारणवादिषु तदर्थग्राहण-दार्ढ्यायानुमानमपि वेदान्तवाक्याऽविरोधि प्रमाणं भवन्न निवार्यते, श्रुत्यैव सहायत्वेन तर्कस्याभ्युपेतत्वात्। तथाहि-'श्रोतव्यो मन्तव्यः'(बृ.उ.2.4.5) इति श्रुतिः "पण्डितो मेधावी गन्धारानेव उपसम्पद्येत, एवेमेवेहाचार्यवान् पुरुषो वेद" (छा.उ.6.14.2) इति च परुषबुद्धिसाहाय्यमात्मनो दर्शयति। न च धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणम्, ब्रह्मजिज्ञासायाम्। किन्तु श्रुत्यदयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम्। अनुभवाऽवसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्पुरुषाधीनात्मलाभाच्च कर्तव्यस्य।

र.प्र.प्र.- एतदेव व्याप्तिज्ञानं जगति पक्षे कर्तारं साधयत्, कर्तुरनेकत्वे गौरवात् एकमेव सर्वज्ञेश्वरं साधयति इति श्रुत्या किं प्रयोजनमिति तार्किकाणां भ्रान्तिरुपन्यस्यते भाष्यकारैः। 1)"एतदेवानुमानम् संसारव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः" इति भाष्यम्। एतदेवानुमानमित्यत्र एतदेव अनुमानमेव ईश्वरास्तित्वसाधनमिति ग्रहणेन तार्किकाः श्रुतिर्न प्रमाणम् इति मन्यन्ते इत्यर्थः फलति। व्याख्यानमिदम् अवैदिकानां

In Public domain. Digitization Muthulakshmi Research Academy

तार्किकाणाम्। 2)यद्वा अनुमानं श्रुत्यर्थाऽनुग्राहकमपि स्वतन्त्रमिति वैदिकानां तार्किकाणां मतमन्यत्। अर्थात् अनुमानप्रमाणमेव जगतः सकर्तृकत्वम्, लाघवात्सर्वज्ञेश्वारकर्तृकत्वं च साधयति, श्रुतिस्तु तदर्थानुवादिका। इदमेव अनुमानस्य स्वातन्त्र्यम्। "अनुमानं स्वतन्त्रम्" इति अथवा इति मतनिरूपणे रत्नप्रभाकाराणामपि अयमेव आशयः। एषा च उपर्युक्तभाष्यपङ्क्तेः द्वितीया व्याख्या। भाष्ये संसारिव्यतिरिक्तेश्वरास्तित्वादि-साधनमित्यत्र आदिपदस्य सर्वज्ञत्वमित्यर्थः।

3) यद्वा व्याप्तिज्ञानसहकृतं एतल्लक्षणमेव जन्मादिसूत्रोक्त-जगत्कारणत्वलक्षणमेव कर्तुः सर्वज्ञत्वसिद्धौ साधकमनुमानं मन्यन्ते इति तृतीयः उपर्युक्तभाष्यवाक्यस्य अर्थः। यद्यत् कार्यं तत्तत् सकर्तृकमिति व्याप्तिज्ञानसहकृतात् कार्यत्वलिङ्गकानुमानात् जगतः कर्ता कश्चिदस्तीति जगत्कर्तृत्वसिद्धिः। पश्चात् च स कर्ता सर्वज्ञः, सर्वजगत्कारणत्वात् व्यतिरेकेण कुलालादिवत् इति द्वितीयानुमानेनसर्वज्ञत्वसिद्धिः। अत्र च भाष्यकरैः मन्यन्ते इति पदमुपयुञ्जानैः पूर्वोक्तानुमनयोः अभासत्वं सूचितम्। तथाहि 'अङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत्' इति कार्यत्वलिङ्गकप्रथमानुमाने अङ्कुरस्यकर्ता जीवो न भवाति। तत्र जीवस्य असम्बन्धात्। जीवाद्भिन्नः कर्ता चेत् तस्य घटवदचेतनत्वात् न कर्तृत्वसम्भवः। ततश्च कार्यत्वलिङ्गकानुमाने

In Public domain. Digitization Muthulakshmi Research Academy

यद्यत् कार्यं तत्तत् सकर्तृकमिति व्याप्तिज्ञानासिद्धिः। लक्षणलिङ्गकानुमाने तु पक्षीभूते कर्तरि ईश्वरे शरीरादेरभावेन, यद्यद् ज्ञानं तन्मनोजन्यमिति व्याप्तिविरोधेन जन्यज्ञानस्यैव असम्भवे, नित्यज्ञानस्य कुतस्तस्मिन् सम्भवः। एवं च नित्यज्ञानासिद्धेः पक्षे ईश्वरे सर्वज्ञत्वसाध्यस्याभावात् बाधः। तस्मादतीन्द्रिये ईश्वरे तद्गतसर्वज्ञत्वेवा श्रुतिरेव प्रमाणम्। पूर्वोक्तयोः द्वयोरप्यनुमानयोः व्याप्त्यभाव-बाधभ्यामाभसीकृतत्वात्। तस्मात् श्रुत्यैव ईश्वरसाधनम्। अनुमानस्य तु श्रुत्युक्तार्थानुभावकत्वमिति तृतीया व्याख्या (र.प्र.पृ.50)।

नन्विदमयुक्तम्। श्रुतेः अनुमानान्तर्भावमभिप्रेत्य भवदीयसूत्रकृता अनुमानस्यैवोपन्यस्तत्वात्, तदेव इहापि जन्मादिसूत्रे उपन्यस्तमिति वैशेषिकः शङ्कते नन्विहापीत्यादिभाष्येण। ततश्च मन्यन्ते इति भाष्यकाराणामनुमानस्य आभासोक्तिरयुक्तेति शङ्का। यदि श्रुतीनां स्वतन्त्रमानत्वं न स्यात्, 'तत्तुसमन्वयात्' इत्यादिना सूत्रकृत् तासां तात्पर्यविचारे न प्रवर्तेतेति शङ्कासमाधानम्। तस्माद् उत्तरसूत्राणां श्रुतिविचारार्थत्वेन जन्मादिसूत्रेऽपि श्रुतिरेव स्वातन्त्र्योण विचार्यते नानुमानम् इत्यभिप्रायेण " न वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्" इत्यादिना समाहितवान्भाष्यकारः। ब्रह्मसूत्राणां सूत्रत्वं प्रतिपाद्यब्रह्मविषयकलक्षण-प्रमाण-युक्ति–साधन-फलादि-

In Public domain. Digitization Muthulakshmi Research Academy
प्रतिपादकश्रुतिकुसुमग्रथनार्थत्वेन नान्यथा। यतः तत्तत्सूत्रैः वेदान्तवाक्यानि उदाहृत्य विचार्यन्ते। किञ्च मुमुक्षोः ब्रह्मणः स्वरूपावगतिः अभीष्टा। तदर्थमेव हि शास्त्रस्यारम्भः। सा च ब्रह्मावगतिः नानुमानात्, 'तन्त्वौपनिषदम्' (बृ.उ.3.9.26) इति श्रुतेः ब्रह्मणः उपनिषदेकवेद्यत्वात्। अतः सूत्रेऽस्मिन् ब्रह्मलक्षणबोधकश्रुतिरेव विचारणीया न ब्रह्मलक्षणात्मनुमानम्। "वाक्यार्थविचारणाऽध्यवसाननिर्वृत्ता हि ब्रह्मकारणत्वावगतिः, न अनुमनादिप्रमाणान्तरनिर्वृत्ता" इति भाष्यम्। वाक्यस्य तदर्थस्य च विचारणात्, यदर्थाध्यवसानं तात्पर्यनिश्चयः प्रमेयसम्भवनिश्चयश्च, तेन जाता ब्रह्मावगतिः मुक्तये भवति। आगमात्मकशब्दप्रमाणात्, तदवबुद्धार्थस्य विचारात्तात्पर्यनिश्चये जाते, शब्दादपि अज्ञाननिवृत्तिद्वारा अपरोक्षब्रह्मावगतिः जायते। अनुमानविचारणे तु अनुमानस्य परोक्षार्थनिश्चायकप्रमाणत्वेन ततः परोक्षब्रह्मबोध एव, नात्वपरोक्षब्रह्मावगतिरिति विवरणसम्प्रदायः। एवं तर्हि अनुमानप्रमाणं सर्वात्मानोपेक्षितमेव वेति शङ्कायां' सत्सु वेदान्त वाक्येषु' इत्यादिना भाष्ये समाधानम्। "विमतं अभिन्ननिमित्तोपादानकं कार्यत्वात् सुखवत्"। अथवा "विमतं चेतनप्रकृतिकं कार्यत्वात् सुखादिवत्" इत्यनुमानं च 'यतो वा इमानि भूतानि' इत्यादिश्रुतिनिरूपितार्थे दार्ढ्यसम्पादनाय उपयुज्यते। दार्ढ्यं नाम संशयविपर्ययनिवृत्तिः। तत्र 'मन्तव्यः' इति

In Public domain. Digitization Muthulakshmi Research Academy

श्रुत्योक्तात् मननात् ब्रह्मगतसंशयनिवृत्तिः। एवं 'निदिध्यासितव्यः' इति विहितप्रत्ययप्रवाहरूपनिदिध्यासबलात् विपर्ययज्ञाननिवृत्तिः। एवं च श्रुत्यर्थःमननेन तर्केण सम्भावनीयः इति फलितम्। तर्कोऽपि श्रुतिसम्मतः श्रुत्यविरोधी एव ग्राह्यः इति कथनाय भाष्ये 'वेदान्तवाक्याविरोधि प्रमाणं भवत् न निवार्यत' इत्युक्तम्। 'श्रोतव्यो मन्तव्यः' इति श्रुत्यैव मन्तव्यः इत्यनेन तर्कस्य सहायत्वेनाभ्युपगतत्वात्। (र.प्र.पृ. 50-51)

किञ्च "पण्डितो मेधावी गन्धारानेवोपसम्पद्येत एवमेवाहाचार्यावान् पुरुषो वेद"(छा.उ.6.14.2) इति श्रुतिः पुरुषबुद्धिसहाय्यमात्मनः दर्शयति। यथा कश्चित् गन्धारदेशेभ्यः चोरैरन्यत्रारण्ये बद्धनेत्र एव त्यक्तः केनचित् करुणामयेन मुक्तबन्धः, तदुक्तमार्गग्रहणसमर्थः, स्वतर्ककौशलेन उपदिष्टपरिवर्तनानि जानानः, मेधावी स्वदेशानेव प्राप्नुयात्, एवमेव अविद्याकामकर्मादिभिः सत्यस्वरूपानन्दात् प्रच्याव्य, इह संसारारण्येक्षिप्तः केनचित् परवशेन आचार्येण नासित्वं संसारी, किन्तु 'तत्त्वमसि' (छा.उ.6.8.7-15) इत्युपदिष्टस्वरूपोऽपि स्वयं तर्ककुशलश्चेत् आत्मनः स्वरूपं जानीयात्, नान्यथेति श्रुतिः स्वस्याः पुरुषमतिरूपतर्कापेक्षां दर्शयति।भाष्ये आत्मनो दर्शयति- इत्यत्र आत्मनः इत्यस्य श्रुतेरित्यर्थः। एवं च एतादृशश्रुत्या श्रुतेः पुरुषबुद्धिरूपानुमानसाहाय्यं न वारितम् (र.प्र.पृ.51)

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मणो मननाद्यपेक्षत्वं न तु कर्मणः- ननु ब्रह्मणः मननाद्यपेक्षा न युक्ता। यतो धर्मवत् ब्रह्मवेदार्थः। न हि वेदार्थे धर्मे अनुष्ठेये मननापेक्षा अस्ति। किन्तु श्रुत्यादिषड्प्रामाणैः तत्र वेदार्थनिर्णयः जायते। तुल्यं ब्रह्मविचारेऽपि तत्। तथा चानुमानम् "ब्रह्मनमननाद्यपेक्षम् वेदार्थत्वात्, धर्मवत्" इति चेत्, न इत्यादिना भाष्ये समाधानम्। यथा हि धर्मजिज्ञासायां जिज्ञास्ये धर्मे श्रुत्यादय एव प्रमाणम्। यतोहि धर्मविचारात् परं जायमानस्य धर्मानुष्ठानस्य साक्षात्कारोपयोगिनी मननद्यपेक्षा नास्ति। कृतेऽपि मनने अतीन्द्रियधर्मस्य साक्षात्काराविषयात्वात्, तद्योग्यतायाः असम्भवाच्च। इह तु ब्रह्मजिज्ञासायां जिज्ञास्यं ब्रह्मस्वयं साक्षात्कारात्मकम्। ''यत्साक्षादपरोक्षाद्ब्रह्म"(बृ.उ.3.4.1.) इति श्रुतेः। तद्विषयिणी वृत्तिरपि साक्षात्कारात्मिका। तदर्थं संशयविपर्ययाद्यात्मगतभ्रमनिवृत्तेः अपेक्षिततया ब्रह्मजिज्ञासायाः अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च, ब्रह्मज्ञानस्य तत्साक्षाकारर्थं आचर्यस्वबुद्धिप्रयुक्ततर्कादिसाहाय्यम् अवश्यमपेक्षते। न च केवलं श्रुत्यादय एव ब्रह्मजिज्ञासायां प्रमाणम्। धर्मविचरेतु अङ्गाङ्गिभवादिनिर्णयाय श्रुत्यादयः एव प्रमाणम्। न च तत्र मनननिदिध्यासनाद्यपेक्षा। अनुभवावसनत्वस्य तत्र अभावात्। नित्यपरोक्षे साध्ये असिद्धे च धर्मे साक्षात्कारस्य अनपेक्षितत्वादसम्भवाच्च। केवलं श्रुत्यादिभिः प्रमाणैः धर्मनिर्णयः

In Public domain. Digitization Muthulakshmi Research Academy

अनुष्ठानाय अपेक्ष्यते। निरपेक्षश्शब्दश्श्रुतिः। शब्दस्य अर्थप्रकाशनसामर्थ्यं लिङ्गम्। योग्य इतरपदाकांक्षाविशिष्टं पदं वाक्यम्। अङ्गवाक्यसापेक्षं प्रधानवाक्यं प्रकरणम्। क्रमपठितानामर्थानां क्रमपठितैः यथाक्रमं सम्बन्धः स्थानम्। यथा ऐन्द्रग्न्यादिभिः क्रमेण पठिताभिः दश इष्टिभिः "इन्द्रागीरोचनादिवः" इत्यादिक्रमेण पठितानां यज्यानुवाक्यामन्त्राणां क्रमेण अङ्गत्वं स्थानप्रमाणाद्विज्ञायते। समाख्या च संज्ञासाम्यम्। यथा अध्वर्यवमिति योगिकसंज्ञायाः तत्संज्ञितेषु मन्त्रेषु, अध्वर्यवसंज्ञके कर्मणि च समानत्वात्, तत्समाख्यया मन्त्राणां तत्समाख्याके कर्मणि विनियोगः इति श्रुत्यादिप्रमाणानां लक्षणानि सङ्ग्रहेण केषाञ्चिदुदाहरणानि च। एतेषामेव श्रुत्यादीनां धर्मे प्रमाणतया अपेक्षा न मननादेः। ब्रह्मणि तु मननादीनामप्यपेक्षा इत्युक्तम्।

न च "ब्रह्म न मननाद्यपेक्षम् वेदार्थत्वात् धर्मवत्" इत्यनुमानेन ब्रह्मण्यपिनास्ति मननापेक्षा इति वच्यम्। धर्मस्य साध्यत्वेन अनुभवायोग्यत्वस्य अनपेक्षितानुभवत्वस्य वा उपाधित्वात्। तथाहि मननाद्यपेक्षत्वाभावरूपसाध्याधिकरणे धर्मे अनुभवायोग्यत्वरूपः अनपेक्षितानुभवत्वरूपधर्मश्च अस्त्येवेति साध्यव्यापकत्वम्। एवं वेदार्थत्वरूपहेत्वधिकरणे ब्रह्मणि अनुभवायोग्यत्वस्य अनपेक्षतानुभवत्वस्य चाभावात्

In Public domain. Digitization Muthulakshmi Research Academy

साधनाव्यापकत्वं चास्तीति तयोर्धर्मयोरुपधित्वम्। तादृशोपाध्यभावाच्चब्रह्मणि मननाद्यपेक्षाभावरूपसाध्यासिध्यासिद्धिः। यदि च वेदार्थत्वमात्रेण ब्रह्मणः धर्मेण साम्यं उच्येत, तर्हि ब्रह्मणि धर्मवत् कृतिसाध्यत्वम्, विधि-निषेध-विकल्प-उत्सर्गापवादाश्च प्रसज्येरन्। न ह्यत्र वेदार्थत्वरूपहेतुरस्तु मननाद्यपेक्षत्वभावरूपः यत्साध्यं, तन्मास्त्विति व्यभिचारशङ्कायां सञ्जातायां तत्पराहतिप्रयोजकः अनुकूलतर्कसहायः अस्ति। ब्रह्मणि मननाद्यपेक्षात्वाभावरूपसाध्यस्य अभावेऽपि, हेतोः वेदार्थत्वस्य सत्वेन, यदि साध्यं न स्यात्तर्हि हेतुरपि न स्यादिति तर्कसहायाभावात्। धर्मे कर्तव्यत्वं तु पुरुषाधीनात्मालाभत्वात् सिद्धम्। आत्मालाभो नामस्वस्य उत्पत्तिः। सा च पुरुषाधीनापुरुषकृत्यधीना। एतदेवोक्तं भाष्ये पुरुषाधीनात्मलाभात्वाच्च कर्तव्यस्य इति। (र.प्र.पृ.51.)

पुरुषाधीनात्मलाभे कर्मणि कर्तव्याकर्तव्यत्वादीनां विकल्पोत्सर्गापवादानां च सम्भवेऽपि वस्तुतन्त्रे ब्रह्मज्ञाने न तेषां सम्भवः-

शा.भा.-कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं कर्म, यथा अश्वेन गच्छति, पद्भ्यामन्यथा वा, न वा गच्छतीति। तथा 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति' 'अनुदिते जुहोति' इति विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः,

In Public domain. Digitization Muthulakshmi Research Academy

विकल्पोत्सर्गापवादाश्च। न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते। विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः, न वस्तु याथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्, किं तर्हि वस्तुतन्त्रमेव तत्। न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषः अन्योवेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानम, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात्।।

र.प्र.प्र.- लौकिकं वैदिकं च कर्मपुरुषकृत्यपेक्षम्। अत एव कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं कर्म। तत्र लौकिककर्मणि 'अश्वेन गच्छति पद्भ्यां वा गच्छति' इति कर्तुं शक्यतायाः उदाहरणम्। 'न वा गच्छतीति' भाष्योक्तं तु अकर्तुं शक्यमित्यस्योदाहरणम्। 'अन्यथा वा गच्छती'त्यस्य उन्मत्तादिसादृश्येन गच्छतीत्युदाहरणमुन्नेयम्। एवं वैदिककर्मविषयेऽपि "अतिरात्रेषोडशिनं गृह्णाति" इति कर्तुं शक्यतायाः, "नातिरात्रेषोडशिनं गृह्णाति" इति विशिष्टफलेच्छायाः अभावेन कर्तुमशक्यतायाः उदाहरणम्। यजेत इति विहितस्य यागस्य व्रीहिभिः पुरोडाशनिष्पत्तिद्वारा सम्पाद्यत्वात्, यागसधनत्वेन व्रीहीणां यवानांवाऽन्यतरस्य विकल्पेन स्वीकारे, यावज्जीवं व्रीहियवयोरन्यतरस्यैव यागसाधनत्वेन स्वीकर्तव्यत्वात्,

 In Public domain. Digitization Muthulakshmi Research Academy

व्रीहीणामलाभे तद्विकृतिभूतानां नीवाराणां यागसाधनत्वेन यदा स्वीकारः, तदा अन्यथाकर्तुं शक्यत्वस्य उदाहरणं सम्भावति।

"अतिरात्रे षोडशिनं गृह्णाति"(मै.सं.4.7.6.)"नातिरात्रेषोडशिनं गृह्णाति" "उदिते जुहोति"(तै.ब्रा.6.8.16.) "अनुदिते जुहोति" (श.ब्रा.1.3.1.2) इत्यादिवचनानि विकल्पस्य उदाहरणभूतानि। अयं च विकल्पः सम्भावितविकल्पः ऐच्छिकविकल्पः व्यवस्थितविकल्पश्चेति त्रिविधः रत्नप्रभायां दर्शितः। तत्र "व्रीहिभिर्यवै र्वा यजेत" इत्यत्र सम्भावितविकल्पः। द्वयोरपि यागसाधनत्वात्, पाक्षिकपरिग्रहविषयत्वाच्च। "अतिरात्रे षोडशिनं गृह्णाति" इत्यादि तु ऐच्छिको विकल्पः। अतिरात्रिनामके यागे सोमरसपानाख्यं षोडशिनामकं ग्रहं ग्रहणरूपेण व्यापारेण संस्कुर्यादिति तद्वाक्यार्थः। एवं नातिरात्रे इत्यादिवाक्यस्यतु षोडशिपात्रस्यग्रहणेन संस्काराभावेपि न कश्चिद्दोषः इति तद्वाक्यस्य अर्थः। ग्रहणाग्रहणे उभे अपि वेदोक्ते पुरुषेच्छाधीने विकल्पविषयौ भवतः। 'षोडशिग्रहणं कर्तव्य' मित्युक्ते विधिप्रत्ययेन इष्टसाधनतायाः बोधनात्, षोडशिग्रहणमिष्टसाधनमित्यर्थः प्रतीयते। 'नातिरत्रे षोडशिनं गृह्णाति' इत्यत्र तु यद्यपि षोडशिग्रहणं इष्टसाधनं न इत्येव अर्थः व्याख्यातव्यः, तथापि श्रुत्यैव ग्रहणे इष्टसाधनत्वस्य, इष्टसाधनत्वाभावस्य च बोधने, द्वयोरपि श्रुत्योः श्रुतित्वाविशेषात् विरोधः अभ्युपगन्तुं न शक्यते। अतोऽत्र

In Public domain. Digitization Muthulakshmi Research Academy

षोडशिग्रहणाभावेऽपि अतिरात्रयागः इष्टसाधनम् इत्येव पर्यन्तिकोऽर्थः वर्णनीयो भवति, येन श्रुत्योः विरोधः परिह्रियेत। ग्रहणग्रहणाभ्यामिष्टनिष्पत्तौ वेदेन द्वयं तत्पर्यविषयतया व्यक्तव्यत्वेन समापतितम्। "साधनभूयस्त्वात् फलभूयस्त्व"मिति न्यायेन ग्रहणेन षोडशिपात्रस्य संस्कारे सति फलाधिक्यम्। ग्रहणेन संस्कारस्य अभावे तु फलसामान्यमेव, न फलाधिक्यमिति सिद्धान्तात्। एवं च फलाधिक्येच्छाप्रयुक्तत्वादैच्छिकः ग्रहणाग्रहणविकल्पः।

उदितनुदितहोमयोस्तु व्यवस्थितविकल्पः। अत्र शाखाभेदेन केषाञ्चित् उदितहोमः, केषाञ्चिच्च अनुदितहोमः इति व्यवस्थया विकल्प इति व्यवस्थितविकल्पं केचित् कथयन्ति। मीमांसाशिरोमणयः अस्मद्गुरुवराः श्रीकुप्पारामसुब्रह्मण्यशास्त्रि-महोदयास्तु अत्र व्यवस्थितविकल्पमेवं व्याचक्षते। अग्निहोत्रहोमे दशाहुतयः। दशाक्षराविराट् इति विराट् छन्दसः दशाक्षरत्वमिवअग्निहोत्रहोमे दशाहुतयः विराड् रूपाश्च। तत्रद्वे आहुतीगार्ह्यपत्ये। द्वे आहुती अन्वाहार्यपचने (दक्षिणाग्नौ) अन्याः षडाहुतयस्तु आहवनीये। तासामाहुतीनामस्तिकश्चित् प्रतिनियतः कालः। उदितः कालः अनुदितकालो वा। "अधानानन्तरम् प्रथमाग्निहोमानुष्ठानवेलायां य एव श्रुत्युपदिष्टः कालः उदितः अनुदितो वा स्वीकृतः, स एव कालः यावज्जीवम्,

 In Public domain. Digitization Muthulakshmi Research Academy

अग्निहोत्राहुत्यनुष्ठानवेलायां स्वीकर्तव्यः "इति व्यवस्थया उदितानुदितहोमयोः विकल्पत्वेन स्वीक्रियमाणत्वात् अयं व्यवस्थितः विकल्पःइति। यजेतस्वर्गकामः इत्यादिविधिः। न कलञ्जं भक्षयेत् इति निषेधः।

"एवं मा हिंस्यात्सर्वाभूतानि" इति निषेधः उत्सर्गः। तस्य चापवादः "अग्नीषोमीयं पशुमालभेत" इति। आहवनीये जुहोतीत्युत्सर्गः। अश्वमेधाश्वपदप्रक्षेपः यत्र यत्र भवति तत्र होतव्यमित्यर्थकः "अश्वस्य पदे पदे जुहोती"त्यपवादः। एवं पुरुषकृतिसाध्ये कर्मणि विधि-निषेध-विकल्प-उत्सर्ग-अपवादाः अर्थवन्तः स्युः। पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य" इति भाष्योक्तवचने शास्त्रीये कर्मणि पुरुषस्य सर्वात्मना स्वेच्छा अस्ति इति तु नार्थः। किन्तु धर्मो हि यथा यथा ज्ञायते, तथा तथा कर्तुं शक्यते। यदि शास्त्रेणैव विकल्पश्चोदितः, पुरुषबुद्ध्यपेक्षाः विकल्पाः शास्त्रधीनाः जायन्ते। ननु प्राग्भाष्यकारैः "आचार्यवान् पुरुषो वेद' इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति" इति ग्रन्थेन ब्रह्मणः मननांशे पुरुषबुद्धिसाहाय्यं प्रदर्शितम्। वस्तुतोऽपि वस्तुतन्त्रस्याऽपि ब्रह्मज्ञानस्य प्रमाणाधीनत्वेन पुरुषबुद्धिस्तत्रानिवार्या। एवं सति "न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्" इत्यग्रे भाष्यकारैर्वक्ष्यमाणं वचनं कथं संगच्छते इति चेदत्रोच्यते। मननं ज्ञानं वा चित्तव्यापाररूपं कर्म। तत्र च

In Public domain. Digitization Muthulakshmi Research Academy

कर्मणि पुरुषबुद्धेरपेक्षितत्वेऽपि, श्रुत्या एकरूपेण बोधिते ब्रह्मणि कर्मणीवातिरात्रादौशास्त्राधीनविकल्पाप्रसक्तेः पुरुषेच्छाधीन-बुद्ध्यविषयत्वात्, शास्त्राधीनपुरुषेच्छानधीनबुद्धिविषयत्वलक्षणं वस्तुतन्त्रत्वमेव, न तादृशबुद्धिसापेक्षत्वलक्षणं पुरुषतन्त्रत्वमिति न पूर्वोत्तरभाष्ययोर्विरोध इत्यवधेयम्। ते च सर्वे विकल्पाः पुरुषाधीना अपि, प्रमारूपा एव भवन्ति न भ्रमात्मकाः। यदि ब्रह्मज्ञाने तादृशपुरुषाधीनोत्पत्तिकत्वं धर्म इव स्वीक्रियेत, ब्रह्मण्यपि धर्म इव जायमानाः सर्वे विकल्पाः यथार्था स्युः। विकल्पना एव पुरुषबुद्ध्यपेक्षाः, न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। कथं तर्हि ब्रह्मत्मकपरिनिष्ठितवस्तुनः ज्ञानम् इति चेत् तद्वस्तुतन्त्रमेव भवतिन पुरुषबुद्ध्यपेक्षम्। तस्यापि पुरुषबुद्ध्यपेक्षत्वस्वीकारे सिद्धवस्तुनि ब्रह्मणि विकल्पः, तस्य प्रमात्वं च स्यात्। न हि स्थाणुपुरुषसंशयानन्तरं स्थाणुरितिनिश्चये जाते तत्र "स्थाणुर्वा पुरुषो वा" इति विकल्पस्य अस्त्यवकाशः। जायमानोऽपि विकल्पः तत्त्वज्ञानं भवति, पुरुषः अन्यो वेति संशयात्मकज्ञानस्य मिथ्याज्ञानत्वात्। स्थाणुरेवेति ज्ञानन्तु वस्तुतन्त्रत्वात् वस्तुकारणकत्वात् तत्त्वज्ञानमेव। एवं भूतवस्तुविषयाणाम् सिद्धवस्तुविषयाणां प्रमाण्यं वस्तुतन्त्रम्। तत्रैवं सति सिद्धार्थे ज्ञानप्रमात्वस्य वस्तुतन्त्रत्वे सति, ब्रह्मज्ञानमपि वस्तुजन्यमेव यथार्थम्, न पुरुषतन्त्रम्। भूतार्थविषयत्वात् स्थाणुज्ञानवत्। एवं च

In Public domain. Digitization Muthulakshmi Research Academy
साध्ये अर्थे धर्मादौ सर्वे विकल्पाः पुरुषतन्त्राः, न सिद्धे अर्थे इति वैलक्षण्यात्, धर्मसाम्यं ब्रह्मणः न भवतीति ब्रह्मणि मननाद्यपेक्षा सिद्धा, न धर्मे। (र.प्र.पृ.52-53.)

ब्रह्मणः अनुमानादिमानान्तराऽगम्यत्वात् वेदान्तार्थविचारस्यार्थवत्त्वम्-

शा.भा.-ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणैवानर्थिका प्राप्ता। न। इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात्। स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रयविषयत्वे ब्रह्मणः, इदं ब्रह्मणा सम्बद्धं कार्यमिति गृह्येत। कार्यमात्रमेव हि गृह्यमाणं किं ब्रह्मणा सम्बद्धं? किमन्येन केन चिद्वासम्बद्धमिति न शक्यते निश्चेतुम्। तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि? वेदान्तवाक्यप्रदर्शनार्थम्। किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम्। "भृगुर्वै वारुणिः वरुणं पितरमुपससार, अधीहि भगवो ब्रह्मेति" इत्युपक्रम्याह "यतो वा मानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्मेति"। (तै.उ.3.1.) तस्य च निर्णायकवाक्यम् "आनन्दाद्ध्येवखल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्तीति। "(तै.उ.3.6.) अन्यान्यप्येवंजातीयकानि

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यानिनित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि।।2।। जन्माद्यधिकरणं समाप्तम्।।

र.प्र.प्र.:-नन्वेतावताग्रन्थेन ब्रह्मणः भूतवस्तुत्वेन प्रमाणान्तरविषयत्वमेवेति वेदवेदवाक्यविचारणा, अनर्थिकैवस्यात्। "ब्रह्म प्रत्यक्षादिगोचरम् धर्मविलक्षणत्वात्" इत्यनुमानेन ब्रह्मणः प्रात्यक्षादिप्रमाणगोचरत्वं साध्यते। तथा च जन्मदिसूत्रे जगत्कारणम् अनुमानेनैव विचार्यम्। सिद्धे अर्थे अनुमानदेरेव प्रमाणत्वात् श्रुतिस्तु न। "अनन्यलभ्यशब्दार्थः" इति न्यायेन श्रुतेः मनान्तरावगतार्थे अमानत्वेन, श्रुतिचरस्य निष्फलत्वात् इति शङ्कायां" न इन्द्रियाविषयत्वेन "इत्यादिना भाष्ये समाधानम्। सिद्धस्य अनुमानात्मकप्रमाणान्तरविषयत्वेन अनुमानमेवात्र विचारणीयमिति वक्तुं न शक्यते। यद्यनुमानमेव प्रमाणं स्यत्, किं तदनुमानं इति पृच्छामः। यदि "जगत् ब्रह्मजं कार्यत्वात्" इति ब्रह्मसाधकमनुमानमित्युच्येत, ब्रह्मणः रूपदिहीनत्वात् "पराञ्चिखानि व्यतृणत् स्वयम्भूः" (क.उ.4.1) इति श्रुत्या च इन्द्रियाणां बह्योन्मुखत्वेन सृष्टत्वात्, हृदयदेशस्थप्रत्यागात्म-ग्रहणासमर्थत्वाच्च प्रत्यक्षेण ब्रह्मणः अग्राहणात् ब्रह्मजत्वरूपसाध्यनिरूपिता व्याप्तिः कार्यत्वहेतौ न सम्भवति , न गृह्यते च।

 In Public domain. Digitization Muthulakshmi Research Academy

यदि च "जगत् सकारणकं कार्यत्वात्" इत्यनुमानं विचारणीयमित्युच्येत, अनुमानात् कारणस्य सिद्धावापि, तस्य ब्रह्मत्वं श्रुतिं विना ज्ञातुमशक्यम्। अतश्च कार्यत्वहेतोः कारणेन व्याप्तिग्रहेऽपि तत्कारणं ब्रह्मवा अन्यद्वा इत्यज्ञानात्, व्याप्त्यग्रहात् ब्रह्माऽसिद्धेः तद् ब्रह्मैवेति निश्चयार्थं श्रुतिरेव प्रधानतया विचारणीया न अनुमानम्। तस्मात् जन्मदिसूत्रं न अनुमनोपन्यासार्थं किं तर्हि वेदान्तवाक्यप्रर्शनार्थम्। तर्हि अनुमानस्य क्वोपयोगः? इत्युक्ते रत्नप्रभायां एवं व्याख्यातम्।

"अनुमानं तु उपादानत्वादिसामान्यद्वारा मृदादिवत् ब्रह्मणः स्वकर्यात्मकत्वादिश्रौतार्थसम्भावनार्थं गुणतया विचार्यमित्युपसंहरति तस्मादिति"। (र.प्र.पृ.54) अस्यां च पङ्क्तौ स्वकार्यात्मकत्वादि इत्युक्तं तेन पदेन किमभिप्रेतमिति न ज्ञायते। तत्र च आदिपदस्य को वा अर्थः इति विवरणसापेक्षम्। श्रौतर्थसम्भावनार्थं अनुमानं गुणतया उपसर्जनत्वेन विचारणीयमिति तु ज्ञायते। अतः पूर्णानन्दीयव्यख्यानुसारेण किञ्चिदत्र विव्रियते। (पूर्णानन्दीयम् पृ.113) ब्रह्मणि उपादानत्वनिमित्तत्वसर्वज्ञत्वादिधर्माः सन्ति गुणभूताः। तेषामनुभवाय अनुमानं विचारणीयं, न तु प्रधानतया धर्मिणः ब्रह्मणः ज्ञानाय। तत्र च किन्नाम उपदानत्वम्? किं कार्यैक्यम् अथवा कार्यतादात्म्यम् उत कार्याधिष्ठानत्वम् इति शङ्कायां ब्रह्मणः कार्यैक्ये

In Public domain. Digitization Muthulakshmi Research Academy

व्यावहारिकदशायामपि तुच्छत्वापत्तेः, कार्येण ब्रह्मणः भेदप्रधानतादात्म्ये अद्वैतब्रह्माऽसिद्धेः, ब्रह्मनिष्ठं जगदुपादानत्वं जगदधिष्ठानत्वं इति वक्तव्यम्। तथा चानुमानम् "ब्रह्मनिष्ठं जगदुपादनत्वं जगदधिष्ठानत्वात्मकम्, ऐक्यतादात्म्याद्य-नात्मकत्वात्"। एवं "ब्रह्मनिष्ठं जगन्निमित्तत्वं तत्कर्तृत्वात्मकं जगत्कर्तृत्वभिन्नत्वानात्मकत्वात्" इत्यनुमानेन कर्तृत्वमेव निमित्तत्वम्। तस्यैव चेतनत्वात् चेतनस्यैव जगत्कर्तृत्वात्। न च घटं प्रति दण्ड-चक्र-सलिल-चीवराणामपि कुलालस्येव निमित्तत्वे तार्किकैरभ्युपगते, कर्तुरेव किमिति निमित्तत्वमुच्यत इति वाच्यम्, कर्तृव्यापारानारूढानाम् एकत्रकोणे अवस्थापितानां दण्डादीनामनिमित्तत्वात्तेषां कर्तृमुखेनैव निमित्तकारणत्वस्य स्वीकर्तव्यत्वात्। एवं ब्रह्मनिष्ठं सर्वज्ञत्वं किमात्मकमित्युक्ते सर्वज्ञानाश्रयत्वम् इति यद्युच्येत, ब्रह्मणः ज्ञानस्य विकारत्वेन अनित्यत्वं प्रसज्येत। अतः "ब्रह्मनिष्ठं सर्वज्ञत्वं सर्वावभासनक्षमविज्ञानात्मकं ज्ञानरूपविकारानाश्रयत्वात्" इत्यनुमानेन सर्वावभासनविज्ञानात्मकमभ्युपेयम्। एवं गुणभूतधर्मनिर्णये अनुमानस्य उपयोगः इति स्वकर्यात्माकत्वादिश्रौतार्थसम्भावनार्थं गुणतया विचार्यम् इति रत्नप्रभापङ्क्तेः भावः स्यत्। (र.प्र.पृ.54.)

 In Public domain. Digitization Muthulakshmi Research Academy

किं पुनस्तद् वेदान्तवाक्यमित्यादिभाष्यम्। एतत्सूत्रस्य विषयवाक्यम् यत् लिलक्षयिषितम् लक्षयितुं इष्टं किमित्युक्ते भृगुवल्लीस्थं "भृगुर्वैवारुणिः (वरुणपुत्रः) वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति" (तै.उ.3.1) इति ब्रह्म अधीहि ब्रह्मस्मारय उपदिश इति ब्रह्मणा जिज्ञासितेन उपक्रम्य, "यतो इमानि भूतानि जायन्ते, येन जतानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति" (तै.उ.3.1) इति ब्रह्मणो लक्षणं श्रुत्यैव प्रतिपादितम्। यत् ब्रह्म प्रयन्ति गच्छन्ति, अभिसंविशन्ति तादात्म्यापन्नानि भवन्तीत्यर्थः। अत्र "अधीहि भगवो ब्रह्म" इत्यनेन "तद्विजिज्ञासस्व" इत्यनेन च कर्तव्या ब्रह्मजिज्ञासा प्रतिपादिता। यतो वा इत्यादिना ब्रह्मणोलक्षणं प्रकाशितम्। अनेनैवक्रमेण ब्रह्मसूत्रेष्वपि अथतो "ब्रह्मजिज्ञासा" जन्माद्यस्य यतः" इति सूत्राभ्यां कर्तव्यब्रह्मजिज्ञासा ब्रह्मलक्षणे निरूपिते। अत एव श्रौतक्रमानुसरित्वं सूत्रस्य निरूपयितुं 'भृगुर्वैवारुणिः' 'अधीहि भगवोब्रह्मेति' 'यतो वा इमानि भूतानि' इत्यादि सोपक्रममेव भगवान् भाष्यकारः श्रुतिं पपाठ। तस्य च ब्रह्मणः आनन्दस्वरूपत्वेन निर्णायकं लक्षणवाक्यं च "आनन्दाध्येव खल्विमानि भूतानि जायन्ते" इत्यारभ्य आनन्दं प्रयन्त्यभिसंविशन्ति इत्येतत्पर्यन्तम्। यतो वा इत्यादि श्रुतिवाक्ये यच्छब्देन "यः सर्वज्ञः" (मु.उ.1.1.10) इत्युक्तसर्वज्ञत्वादि-

In Public domain. Digitization Muthulakshmi Research Academy

स्वरूपलक्षणं परामृश्यते। "तस्मादेतत् ब्रह्मनामरूपमन्नं च जायते" (मु.उ.1.1.10) इति तु तटस्थलक्षणम्। "विज्ञानमानन्दं ब्रह्म" (बृ.उ.3.9.28) इत्यादिश्रुतयः लक्षणवाक्यत्वेन नित्य-शुद्ध-बुद्ध-मुक्तत्वप्रतिपादिकाः उदाहर्तव्याः।

यतो वा इत्यादिश्रुतौ, "येन जातानि जीवन्ति" इत्यत्र "यत् प्रयन्ति" इत्यत्र च एकवचनस्य विवक्षितत्वात् जनि-स्थिति-प्रलय हेतोः नानात्वे तद् ब्रह्म इति ब्रह्मत्वविधानायोगात्, ब्रह्मत्व-एकत्वयोः जगत्कारणानुवादेन विधाने वाक्याभेदापत्तेः, यज्जगत्कारणं तदेकं इत्यवान्तरवाक्यं कल्पनीयम्। ततः यदेकं जगत्कारणं, तद्ब्रह्मेति, यत्कारणमेकत्वविशिष्टं तद्ब्रह्मेति माहावाक्यं परिकल्पनीयम्। तदेवं सर्वशाखासु लक्षणद्वयवाक्यानि जिज्ञास्येऽद्वितीये ब्रह्मणि समन्वितानि। तादृशलक्षणलक्षित-ब्रह्मज्ञानादेवमोक्षः। (र.प्र.54,55.)

इति चतुस्सूत्रीशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशे पञ्चमवर्णकं जन्माद्यधिकरणं च समाप्तम्

In Public domain. Digitization Muthulakshmi Research Academy

शास्त्रायोनित्वाधिकरणम् (षष्ठं वर्णकम्)

ब्रह्मणः शास्त्रकारणत्वविचारः

न कर्तृ ब्रह्म वेदस्य किं वा कर्तृ न कर्तृतत्।
विरूपनित्यया वाचेत्येवं नित्यत्वकीर्तनात्।।

कर्तृ निःश्वसिताद्युक्तेः नित्यत्वं पूर्वसाम्यतः।
सर्वावभसिवेदस्य कर्तृत्वात्सर्वविद्भवेत्।।

अस्त्यन्यमेयाताऽप्यस्य किं वा वेदैकमेयता।
घटादिवत्सिद्धवस्तुत्वाद्ब्रह्मान्येनापि मीयते।।

रूपलिङ्गदिराहित्यान्नास्य मान्तरयोग्यता।
तन्त्वौपनिषदेत्यादौ प्रोक्ता वैदैकमेयता।।

शा.भा.- जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं, तदेवद्रढयान्नाह शास्त्रयोनित्वात्।।3।।

र.प्र.प्रः-सङ्गतिः अधिकरणरचना च- वृत्तं विषयमनूद्य सङ्गतिं वदन् भाष्यकारः जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम् इत्यादिना उत्तरसूत्रमवतारयति। सर्वज्ञस्यचेतनस्य चैतन्यरूपस्य ब्रह्मणः जन्मादिसूत्रे जगत्कारणत्वोक्त्या सर्वज्ञत्वमर्थात्प्रतिज्ञातम्। ज्ञानं विना चेतनाचेतनसृष्टेरसम्भवात्। तथा चानुमानम् ब्रह्मसर्वज्ञं सर्वकारणत्वात्। "योत्कर्ता स तद्ज्ञ इति व्याप्तिः। यथा कुलालः घटकर्तृत्वात् घटनिर्माणविषयकज्ञानवान्, तथा ब्रह्मापि

In Public domain. Digitization Muthulakshmi Research Academy

सर्वकर्तृत्वात् सर्वविषयकज्ञानवान् इत्यर्थिकं ब्रह्मणः सर्वज्ञत्वं सर्वकर्तृत्वहेतुकम्। एवं सति यदि ऋग्वेदादेः कर्तृत्वमप्यस्ति ब्रह्मणोऽपि, तद्विषयकज्ञानस्यापिसत्त्वात्, ब्रह्मणिसर्वज्ञत्वं दृढीकृतं भवति। तदेव वेदकर्तृत्वहेतुना दृढयन् भाष्यकारः शास्त्रयोनित्वात् इति सूत्रमवतारयति ।

1)प्रागुक्तस्य जन्मदिकरणत्वस्य, वक्ष्यमाणस्य वेदकर्तृत्वलक्षणस्य वेदकारणत्वस्य च सर्वज्ञत्वरूपैकार्थसाधकत्वात् एकविषयत्वमेवान्तरसङ्गतिः। यद्वा अक्षरव्यक्तिरूपपदानां, पदव्यक्तिरूपस्य वाक्यस्यअनित्यत्वेऽपि 'वाचाविरूपनित्यया' इति (ऋग्वेदः8.75.6) श्रुत्या वर्णात्मस्य वेदस्यनित्यत्वात्, नित्यवेदस्य अपौरुषेयस्य ब्रह्मजन्यत्वाभावेन ब्रह्मणः वेदं प्रति कारणत्वाभावात्सर्वकारणत्वमसिद्धमित्याक्षेपसङ्गत्या एतदधिकारणपूर्वपक्षोत्थानम्।

2)अत्र च "अस्य महतो भूतस्य निःश्वसितमेतद्यद् ऋग्वेदो यजुर्वेदः समवेदोऽथर्वाङ्गिरसः"(बृ.उ.2-4-10) इति वाक्यं विषयः।

3)तच्च विषयवाक्यं ब्रह्मणः वेदहेतुत्वं प्रतिपादयत् सर्वज्ञत्वं साधयति न वा इति सन्देहः।

4)पूर्वपक्षस्त्वित्थम्। यदि ब्रह्मणः सर्वज्ञतासाधनाय वेदकर्तृत्वमभ्युपगम्येत, तर्हि पाणिन्यादिविरचितस्य व्याकणस्य पौरुषेयत्वेन तद्गतप्रामाण्यस्य मूलप्रमाणसापेक्षतया, तदभावे

अप्रामाण्यापत्तिवत्, ब्रह्मकर्तृकवेदस्याऽपि पौरुषेयत्वेन-तद्गतप्रामाण्यस्यापि मूलप्रमाणसापेक्षत्वेन, स्वतः प्रामाण्याभावे वेदकर्तुः ब्रह्मणोऽपि अन्यानधीनं सर्वज्ञत्वं न स्यादिति साङ्ख्यादीनामिवाचेतनकारणवादः प्रसज्येत। ततश्च वेदकर्तृकत्वाद्ब्रह्मणः सर्वज्ञत्वं न सिद्ध्यतीति पूर्वपक्षः। पूर्वपक्षस्य फलं तु जगद्धेतोः चेतनत्वासिद्धिः।

5)सिद्धान्तः-“प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्यशास्त्रस्य योनिः कारणं ब्रह्म” इति भाष्यवचनम्। ब्रह्म सर्वज्ञम्। तत्कारणको वेदस्तु सर्वज्ञकल्पः। एतद्भाष्यवचनानुसारेणैव अनुमानरचनापुरस्सरं रत्नप्रभाकारैः वेदस्य सर्वज्ञत्वकल्पत्वं एवं प्रसाधितम्। वेदे सर्वार्थप्रकाशनशक्तिरुपलभ्यते। ”सा च वेदनिष्ठा सर्वार्थप्रकाशनशक्तिः तदुपादानब्रह्मगतशक्तिपूर्विका तद्गता वा वेदगता वा, प्रकाशनशक्तित्वात्, कार्यगतशक्तित्वाद्वाप्रदीपशक्तिवत्, प्रदीपप्रभागतशक्तिवद्वा” (र.प्र.55) इत्यनुमानेनब्रह्मणः प्रदीपस्येव स्वसंबद्धसर्वार्थावभासकत्वलक्षणसर्वज्ञत्वं सिद्धम्। एवं प्रदीपप्रभायाः यथा स्वसंबद्धसर्वार्थावभासकत्वम्, तथा वेदस्यापि ब्रह्मोपादानकस्य प्रदीपप्रभास्थानीयस्य सर्वार्थावभसकत्वम्। ब्रह्मणः सर्वज्ञत्वं तु स्वसंबद्धाशेषार्थप्रकाशनसामर्थ्यरूपं सर्वसाक्षित्वमेव, न तु सर्वज्ञानाश्रयत्वम्। यद्यपि भाष्ये प्रदीपवत् इति, सर्वज्ञकल्पस्य शास्त्रशब्दशब्दितस्य वेदस्यैव विशेषणम्, न तु

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मणः, तथापि, व्याख्याकृता उपादानस्य ब्रह्मणः सर्वज्ञत्वोपपादनाय प्रदीपदृष्टान्तः, तत्कार्यस्य वेदस्य सर्वज्ञकल्पत्वोपपादनाय प्रदीपप्रभादृष्टान्तश्च कल्पनया विभज्य दर्शितः।

एवं "न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञादन्यतः संभवोऽस्ति" इत्याद्यग्रिमभाष्यग्रन्थः सर्वज्ञत्वलक्षणसम्पन्नवेदस्य सर्वज्ञाद्ब्रह्मण एव सम्भवं सम्भावयन्, ब्रह्मणः सर्वकर्तृत्वलक्षणसर्वशक्तित्वोपपादकः। रत्नप्रभायामप्यग्रे वक्ष्यमाणेन" वेदः स्वविषयादधिकार्थज्ञानवज्जन्यः प्रमाणवक्यत्वात् व्याकरणरामायणादिवत्" (र.प्र.पृ56) इत्यनुमानेन वेदस्य स्वविषयादधिकार्थज्ञानवज्जन्यत्वे प्राकारान्तरेण ब्रह्मणः अधिकार्थज्ञानवतः वेदकर्तृत्वात् सर्वकर्तृत्वं सर्वशक्तिमत्वं च सिद्धमित्यवधेयम्। "यो यद्वाक्यप्रामाणकर्ता स ततः अधिकार्थज्ञः ज्ञेयैकदेशार्थविषयकव्याकरणादिशास्त्रप्रणेतृपाणिन्यादिवत्" इत्यादिसामान्यमुखीयव्याप्तिः अपि अत्र सहकरोति। एवं च पक्षेऽस्मिन् सर्वज्ञकल्पस्य वेदस्य सर्वज्ञं ब्रह्म कारणम्। वेदस्तु पौरुषेयः।

एवं वेदस्य ब्रह्मकर्तृकत्वेऽपि, पुरुषकर्तृकेषु मूलप्रमाणसापेक्षत्वदर्शनेन, "यद्यत्पौरुषेयं तत्तन्मूलप्रमाण-सापेक्षम्" इति व्याप्त्या पौरुषेयेवेदे मूलप्रमाणसापेक्षत्वस्य सत्त्वात्,

In Public domain. Digitization Muthulakshmi Research Academy

तत्र अप्रामाण्यशङ्कोदयात्, तन्मूलभूते ब्रह्मण्यपि अप्रामाण्यप्रसङ्गः। ततश्च वेदस्य ब्रह्मात्मकपुरुषकर्तृत्वम् अप्रामाण्यशङ्काकवलितमिति चेत्, वेदस्य ब्रह्मकर्तृकस्यापि अपौरुषेयात्वमास्थाय रत्नप्रभाकरैः यद्वा (र.प्र.55) इत्यादिना समहितम्। वेदः ब्रह्मकर्तृकोऽपि न पौरुषेयः। तथाहि यथा अध्येतारः पूर्ववेदक्रमं गुरुमुखात् ज्ञात्वा वेदं कुर्वन्ति सम्पादयन्ति, तैस्सम्पादितस्यापि वेदस्य यथा नास्ति पौरुषेयत्वम्, एवमेव विचित्रगुणवन्मायासहायेन अनावृतानन्त-स्वप्राकाशचिन्मात्रेण परमेश्वरेण कृतस्यापि वेदस्य नास्ति पौरुषेयत्वम्। "यः कल्पस्य कल्पपूर्वः" इति न्यायेन एतत्कल्पस्य कल्पान्तरपूर्वकत्वात् पूर्वकल्पीयवर्णक्रमस्वरसजातीयक्रमस्वरवन्तं वेदराशिं तदर्थांश्च युगपज्जनन्नेव करोतीति न वेदस्य पौरुषेयता। यत्र हि अर्थज्ञानपूर्वकं वाक्यज्ञानम् वाक्यसृष्टौ कारणम् तत्र पौरुषेयता। अत्र च वाक्यज्ञानस्य, अर्थज्ञानस्य च ईश्वरस्य समकालमेवजायमानत्वात् वेदस्य पुरुषनिर्मितरचनाधर्माभावात् अपौरुषेयत्वमेव। वेदकर्तुः वेदस्येव तदर्थज्ञानस्याऽपि स्वसम्बद्धस्य नान्तरीयकतया समकालेसत्त्वात्, विलक्षणं सर्वज्ञत्वमेति सिद्धान्तः। सिद्धान्ते फलं तु जगद्धेतोः चेतनत्वसिद्धिः। न च निःश्वसितन्यायेन वेदानामाविर्भावयितुः ईश्वरस्य पूर्वकल्पीय-क्रमस्वराद्यपेक्षा किमर्था? प्रत्युत तदपेक्षाभ्युपगमे ब्रह्मणः स्वतंत्र्यं भज्यतेति वाच्यम्। वैषम्य-नैर्घृण्यपरिहाराय ब्रह्मणः स्वतन्त्रस्यापि

In Public domain. Digitization Muthulakshmi Research Academy

कर्मापेक्षया इव "सवाग्वज्रोयजमानं हिनस्ति" इति स्वनिःसृतवचसः अविरोधाय पूर्वकल्पीयवर्णक्रमस्वराद्यपेक्षायाः कल्पनेऽपि, ब्रह्मणः स्वातन्त्र्याऽहानेः, प्रत्युत तदपेक्षायाः भूषणत्वाच्च। अपौरुषेयत्वेऽपि वेदस्य, पौरुषेयात्वाङ्गीकारात्। "वाचानिरूपनित्यया" इति श्रुतिवैरुध्यपरिहारः कथमित्युक्ते वेदस्य प्रावाहिकनित्यत्वस्वीकारेण पूर्ववर्णस्वरादिसाम्यात् प्रत्यभिज्ञया नित्यत्वं स्वीकर्तव्यम्। न च ब्रह्मसमकोटिकं नित्यत्वम्। "अस्य महतो भूतस्येति" श्रुतेः अद्वितीयसर्वज्ञसर्वशक्तिब्रह्मणि तात्पर्य-निश्वाकत्वात्, श्रुतिप्रतिपादितसर्वज्ञत्व-सर्वशक्तित्वरूपलिङ्गयोः स्पष्टब्रह्मलिङ्गत्वेन सूत्रस्यापि तदृशार्थप्रतिपादकत्वात् श्रुति-शास्त्र-अध्यायपादसङ्गतयः। (र.प्र.पृ .55)

षष्ठवर्णकभाष्यम्-

शा.भा.-महतः ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्सम्भवति, यथा व्याकरणादिपाणिन्यादेः ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति लोके प्रसिद्धं लोके, किमुवक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णा-श्रमादिप्रविभागहेतोः ऋग्वेदाख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव

 In Public domain. Digitization Muthulakshmi Research Academy

लीलान्यायेन पुरुषनिःश्वासवद्यस्मान्हतो भूताद्योनेः सम्भवः, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ.उ.2.4.10) इत्यादिश्रुतेः, तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं चेति।।

र.प्र.प्र.:-**षष्ठवर्णकव्याख्या**-शास्त्रयोनित्वाधिकरणं जन्माद्यधिकरण-निरूपितसर्वज्ञसर्वकारण (सर्वशक्ति) विषयकमिति समानविषयकत्वसङ्गत्या प्रादुर्भूतमिति प्रागेव आवेदितम्। तदनुसारेणैव सूत्रस्थपदानां योजनामभिप्रेत्यपदानि व्याचष्टे भाष्यकारः महत इत्यादिना। वर्णकेऽस्मिन् शास्त्रस्ययोनिः कारणम्, शास्त्रयोनिः तस्य भावः शास्त्रयोनित्वमिति विग्रहः। ऋग्वेदादिशास्त्रस्य योनिः। ब्रह्मणः शास्त्रयोनित्वेन हेतुना सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेत्येतत्द्वर्णकान्त्यस्थभाष्यपदैः पञ्चम्यन्त-योनित्वादित्यस्याभिसम्भन्धः। शास्त्रं नाम ऋग्वेदादि। 'शास्त्रत्वं हितशासनात्' इयुक्तदिश हितशासकं शास्त्रम्। शास्त्रस्य इत्यस्य महतः इति विशेषणम्। महत्त्वादीनि विशेषणानि च ऋग्वेदादेः, हेतोः ब्रह्मणः सर्वज्ञत्वसिद्धये। महत्त्वं च ग्रन्थतः अर्थतश्च। शास्त्रस्य इत्यत्र शास्त्रशब्दः हितशासकशब्दमात्रोपलक्षकः इति मत्वा भाष्यकारः अनेकविद्यास्थानोपबृंहितस्य इत्याह। पुराण-न्याय-मीमांसा-धर्मशास्त्राणि, शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषाणीति षडङ्गानिचेत्याहत्य दशविद्यास्थानानि। एतानि च

In Public domain. Digitization Muthulakshmi Research Academy

वेदार्थज्ञानहेतवः। तैः उपबृंहितस्य उपकृतस्य इत्यर्थः। पुराणादीनां विद्यास्थानानां व्यासदिभिः ऋषिभिः, मन्वादिभिश्च वेदविज्ञानहेतुत्वेन रचितत्वात्, वेदस्य मन्वादिशिष्टपरिगृहीतत्वेन प्रामाण्यम् अनेकविद्यास्थानोपबृंहितस्य इत्यनेन सूचितम्। प्रदीपवत्सर्वार्थावद्योतिनः इति विशेषणन्त्वबोधकत्वाभावादपिवेदस्य प्रामाण्यमिति निरूपणाय। प्रदीपदृष्टान्तेन वेदस्य सर्वावभसकत्वे उपपादितेऽपि, तस्य अचेतनत्वात् ब्रह्मण इव न पूर्णं सर्वज्ञत्वमिति ज्ञापनाय शास्त्रविशेषणतया सर्वज्ञकल्पत्वमित्युक्तम्। "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" (पा.सू.5.3.67.) इति सूत्रेण विहितस्य कल्पप्रत्ययस्य ईषदस्माप्त्यर्थकत्वात् सर्वज्ञकल्पस्य इत्यस्य सर्वज्ञसदृशस्येत्यर्थः। सूत्रे योनिपदेन उपादानं कर्तृ च उभयमपि परामृश्यते। 'तद्भूतयोनिं परिपश्यन्ति धीराः' (मु.उ.1.1.6.) इति श्रुतौ तथैव प्रयोगात्। ननु सर्वज्ञस्य यो गुणः सर्वार्थज्ञानशक्तिमत्त्वं, वेदस्य तदन्वितत्वेऽपि, तद्योनेः ब्रह्मणः सर्वज्ञत्वं कुतस्समागतम्? इति शङ्कायां "नहीदृशस्य शास्त्रस्य"इत्यादिना भाष्ये समाधानम्। उपादाने सर्वज्ञत्वं सर्वशक्तिमत्त्वं विना ब्रह्मोपादानके वेदे तयोर्गुणयोरयोगात्, शास्त्रयोनेः ब्रह्मणोऽपि सर्वज्ञत्वम्। एतच्च अनुमानप्रमाणेन अधिकरणसिद्धान्तप्रदर्शनवेलायां प्रागेव दर्शितम्। न च वेदगतसर्वार्थप्रकाशनशक्तेः उपादानगतशक्तिपूर्वकत्वेऽपि ब्रह्मगतशक्तिपूवकत्वमेव कुतः अनुमानेन सिद्ध्यति?

अविद्यागतशक्तिपूर्वकत्वेनापि अन्यथासिद्धत्वादिति वाच्यम्। अविद्यायाश्शक्तिमत्त्वेपि तस्याः अचेनत्वेन तद्गतया शक्त्या वेदगतसर्वार्थप्राकाशनशक्तेः अलाभात्। एतत्स्पष्टीकरणायैव "वेदः स्वविषयदधिकार्थज्ञानवज्जन्यः प्रमाणवाक्यत्वात् व्याकरण-रामायणादिवत्" इत्यनुमानानन्तरं रत्नप्रभायामुपन्यस्तम्। एतदेवोक्तं भाष्ये न हीदृशस्य शास्त्रस्यर्ग्वेदादिसर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतस्सम्भवति। यद्यद्विस्तरार्थं शास्त्रमित्यादिना। भाष्ये विस्तरार्थमित्यत्र विस्तरशब्दस्य शब्दाधिक्यमित्यर्थः टीकाकारैर्व्यख्यातः। तदनुसारेण विग्रहकल्पनायां विस्तरः शब्दाधिक्यरूपः अर्थः धर्मविशेषः यस्य तदिति विग्रहः अवधेयः। तथा च शब्दबाहुल्यम्, अर्थस्य अल्पताच शास्त्रेभवति। एकस्यैव अर्थस्य प्रतिपत्तिसौकर्येण बोधयिषितस्य आनुगुण्येन शब्दबाहुल्यदर्शनात्। एतादृशं संक्षिप्तार्थं विस्तृतशब्दवच्छास्त्रं यस्मात् पुरुषविशेषात्सम्भवति, सः पुरुषः ततोऽपि शब्दार्थाभ्यामपि अधिकतरविज्ञानः इति लोके प्रसिद्धम्। यथा व्यकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि। व्याकरणप्रणेतापाणिनिः स्वानुशासनविषयसाधुत्ववच्छब्दार्थादपि, अधिकतरार्थज्ञानवान्। ज्ञेयैकदेशर्थविषयशास्त्रकर्तुः पाणिनेरेव तदीयशास्त्रजन्य-ज्ञानादधिकार्थज्ञानवत्त्वे, किमवक्तव्यं अनेकशाखाभेदभिन्नस्य' इमे देवाः', 'इमानितिर्यञ्चि, ''इमेमनुष्याः' ईदृशावर्णधर्माः' ईदृशाश्च

In Public domain. Digitization Muthulakshmi Research Academy

आश्रमधर्माः' इति प्रविभागहेतोः ऋग्वेदादिलक्षणस्य सर्वज्ञानाकरस्य उपादानभूतस्य ब्रह्मणः स्वसृष्टवेदजन्य-ज्ञानापेक्षयाऽधिकज्ञानवत्त्वं सर्वज्ञत्वलक्षणमस्तीति कैमुतिकन्यायेन ब्रह्मणः सर्वज्ञत्वं सिद्धम्। 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः' इति श्रुत्या अप्रयत्नेनैव पुरुषनिःश्वसितन्यायेन महतः अपरिच्छिन्नात् भूतात्सिद्धाद्ब्रह्मणः सत्यात्योनेः, अनेकशाखाभिन्नस्याऽपि वेदस्य सम्भवप्रतिपादनात्, सर्वशक्तिमत्त्वं चोपपादितं भवति। एवं सर्वज्ञत्वं सर्वशक्तिमत्वं चेति द्वयं कैमुतिकन्यायलभ्यम्। वेदानां ब्रह्मणः निःश्वसितन्ययेनोत्पन्नत्वात्, प्रमाणान्तरेणार्थज्ञानप्रयासाभावात् पौरुषेयत्वशङ्काऽपि निरस्ता। अत्र च वेदः स्वविषयादधिकार्थज्ञानवज्जन्यः इत्याद्यनुमानेन प्रकारान्तरेण वेदकर्तरि अधिकार्थज्ञानसत्तामात्रं साध्यते, न तु तदीयज्ञानस्यवेदमूलत्वं निःश्वसितश्रुतिविरोधादेव। "तेन च यः सर्वज्ञः" (मु.उ. 2.2) इत्युक्तसर्वज्ञत्वं दृढीकृतं भवति। ईश्वरस्य वेदमनपेक्ष्यैवाध्यापकादध्येतुरिव वेदज्ञानमात्रेण कर्तृत्वोपपत्तेः (सम्पादकत्वपपत्तेः)। एवं च पुरुषेण सम्पादितत्वमात्रं पौरुषेयत्वं, न तु प्रमाणान्तरापेक्षया पुरुषकृतिविषयत्वम्। एतावतैव पौरुषेयात्वमिति वदामः। अयं तु विशेषः अध्येता परापेक्षः गुर्वपेक्षः वेदं सम्पादयति। ईश्वरस्तु स्वकृतानुपूर्वीं स्वयमेवास्मृत्य कल्पादौ

 In Public domain. Digitization Muthulakshmi Research Academy

हिरण्यगर्भादिभ्यः उपदिशति। अनावृतज्ञानत्वादीश्वरस्य वेदार्थमप्यवर्जनीयतया जानातीति, इतरानपेक्षं तस्य ज्ञानं सर्वज्ञत्वं चेति शम्। (र.प्र.पृ.55-58.)

इति षष्ठं वर्णकम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

शास्त्रयोनित्वाधिकरणम् (सप्तमं वर्णकम्) ब्रह्मणः शास्त्रप्रमाणकत्वविचारः

शा.भा.- अथवा यथोक्तं ऋग्वेदादि शास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे "यतो वा इमानि भूतानि जायन्ते" इत्यादि। किमर्थं तर्हीदं सूत्रम्? यावता पूर्वसूत्र एवैवं जातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्। उच्यते तत्रपूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जगतो जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत, तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते, शास्त्रयोनित्वादिति।।3।। शास्त्रयोनित्वाधिकरणं समाप्तम्।।

र.प्र.प्र—**सप्तमवर्णकव्याख्या**- 1)"लक्षणप्रमाणाभ्यां वस्तुसिद्धिः" इति न्यायेन जन्माद्यधिकरणेन लक्षणे निरूपिते, इदानीं शस्त्रयोनित्वाधिकरणद्वितीयवर्णकेन प्रमाणं निरूप्यते। एवं च लक्षणप्रमाणयोः ब्रह्मरूपैकार्थनिर्णायकत्वात् एकफलत्वसङ्गत्या जन्मद्यधिकरणानन्तरम् एतदधिकरणं उत्थितम्। 2)"तन्त्वौषनिषदं पुरुषम्"(बृ.उ.3.9.26) इति वाक्यं विषयः। 3)संशयः "तन्वौपनिषदम्" इति वाक्यं ब्रह्मणः वेदैकवेद्यत्वं वेदैकप्रमाणकत्वं ब्रूतेन वा? इति संशयः। 4)'जगत्सकर्तृकं कार्यत्वात्, घटवत्' इति कार्यत्वलिङ्गकानुमानेनैव लाघावज्ञानसहकृतेन ब्रह्मसिद्धौब्रह्मणः शास्त्रैकप्रमाणकत्वाभ्युगमः व्यर्थ एवेति पूर्वपक्षः प्राप्तः।

 In Public domain. Digitization Muthulakshmi Research Academy

5.)पूर्वपक्षफलम् अनुमानेनैव ब्रह्मणः सिद्धत्वात्, "तन्त्वौपनिषदम्" "यतो वा इमानि" इत्यादि शास्त्रस्यप्रमाणत्वेन ब्रह्मणि समन्वयाऽसिद्धिः।

6.)सिद्धान्तः :- "शास्त्रयोनित्वात्"। एतद्वर्णकानुसारेण शास्त्रं योनिः यस्य तत् शास्त्रयोनि, तस्य भावः शास्त्रयोनित्वात् इति विग्रहः। योनिशब्दस्य कारणमित्यर्थः। कारणं च भाष्ये प्रमाणमिति विवृतम्। ब्रह्मणः यथावत्स्वरूपधिगमे शास्त्रं प्रमाणमित्यर्थः। "शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्म अधिगम्यते" इत्यभिप्रयं विवृण्वद्भिः भाष्यकारैः "शास्त्रादेव" इति कथनेन अनुमानस्य ब्रह्मस्वरूपधिगमेप्रमाणत्वं वारितम्। न च 'जगत् सकर्तृकं कार्यत्वात्' इति पूर्वोक्तानुमनात् ब्रह्मणः सिद्धिरिति वाच्यम्। "विचित्रं जगदनेककर्तृकम् विचित्रकार्यत्वात् तक्षाद्यनेककर्तृकप्रसादादिवत्" इति सत्प्रतिपक्षानुमानेन कार्यत्वहेतोः सहकारिणः एकत्वरूपलाघवतर्कस्य भङ्गात् जगत्कर्तुरेकस्य ब्रह्मणः असिद्धेः। न च ब्रह्मणः एव सर्वज्ञत्वात् बहुनां सर्वज्ञानां असम्भवात्, जगत्कर्तुः एकत्वसम्भवः इति वाच्यम्। एकत्वज्ञानात् सर्वज्ञत्वज्ञानम्, सर्वज्ञत्वज्ञानाच्चैकत्वज्ञानम् इत्यन्योन्याश्रयदोषग्रस्तत्वात्। एतदेव भाष्ये "शास्त्रादेवप्रमाणात् जगत्कारणं ब्रह्माधिगम्यते" इत्यभिप्रेतम्। किन्तच्छास्त्रमित्युक्ते पूर्वसूत्रोदाहृतमेव "यतोवा इमानि भूनानि जायन्ते" इति शास्त्रं

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मणि प्रमाणम्। तच्च पूर्वसूत्रेणैवावगतमिति, नेदानीं पुनस्सूत्रारम्भः कर्तव्यः इति चेत्, भष्ये "उच्यते" इत्यादिना समाधानम्। पूर्वसूत्राक्षरेण जन्मादि इत्यादिना यतः इत्यनेन च "यतो वा" इत्यादि श्रुतेः स्पृष्टत्वेऽपि स्पष्टं शास्त्रपदेन शास्त्रस्य तत्र अनुपादानात्, इहाचोपादानात्, शास्त्रप्रमाणकत्वरूपस्पष्ट-ब्रह्मलिङ्गस्य पूर्वसूत्रे अनुपादानात्, शास्त्रयोनित्वात् इति सूत्र एव उपदानात्, स्पष्टब्रह्मलिङ्गकश्रुतिसमन्वयस्यपादे अत्र विवक्षिततत्वात् शास्त्रप्रमाणाकत्वरूपस्पष्टब्रह्मलिङ्गत्वप्यत्र सिद्ध्यति। अन्यथा तु पूर्वसूत्रे जन्माद्युदाहरणमात्रेण जन्मादिकर्तृत्वहेतुकानुमानं ब्रह्मणि प्रमाणतया उपन्यस्तमिति आशङ्क्येत। तच्छङ्कावारणार्थमेव शास्त्रयोनित्वात् इति सूत्रं प्रवर्तयाम्बभूव सूत्रकारः। न च जन्मादिसूत्रे जन्मदि यतः इति अनुमनस्यापि स्पष्टत्वात्, अनुमानमपि स्वतन्त्रं प्रामाणमिति शङ्कानीयम्, अतीन्द्रियार्थे श्रुतेरेव स्वतन्त्रप्रमाणमिति प्रागेव आवेदनात्। तथा चात्र सूत्रार्थः ब्रह्मशास्त्रप्रमाणकं शास्त्रैकगम्यत्वात् इति ।।(र.प्र.पृ58.)

इति चतुस्सूत्रीशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशे सप्तमवर्णकं शास्त्रयोनित्वाधिकरणं च समाप्तम्

In Public domain. Digitization Muthulakshmi Research Academy

समन्वयाधिकारणम् (अष्टमं वर्णकम्) भाट्टमतनिरासात्मकम्

र.प्र.प्र.-**समन्वयाधिकरणवर्णकपरिचयः** समन्वयधिकरणे अस्ति वर्णकद्वयम्। तत्र सिद्धे अर्थे शक्तिमभ्युपगच्छतां कर्तृदेवतादि-प्रकाशनद्वारा क्रियाशेषतया सिद्धार्थं प्रतिपादयतां भाट्टमीमांसकानां मतं दूषयित्वा, सिद्धब्रह्मणि प्राधान्येन वेदान्तानां तात्पर्यवर्णनात्मकम् अष्टमं वर्णकम्। अस्मिन्नेवाधिकरणे नवमवर्णके तु सुदीर्घतया कार्यान्वितशक्तिवादिनां वृत्तिकारादीनां मतम् "अत्रापरेप्रत्यवतिष्ठते" (ब्र.सू.शा.भा.पृ.66) इत्यादिना न्यरूपि। ततः कार्यान्वितशक्तिवादिनां प्राभाकारणां मतस्य च "यदपिकेचिदाहुः" (ब्र.सू.शा.भा85-86) इत्यादिना निरूपणं कृत्वा, तत्तन्मतान्ते पदानां सिद्धेऽप्यर्थेसङ्गतिग्रहात् सिद्धपदार्थज्ञानस्यापि संसारनिवृत्तिहेतुत्वात् पुरुषार्थसधकता अस्तीति नवमे वर्णके च निरूपितम्। तत्रापि सिद्धार्थे सङ्गतिग्रहवादिभाट्टमतस्य सिद्धार्थसङ्गतिग्रहविद्वेषिकार्यान्वित-शक्तिवादिवृत्तिकारादिमतापेक्षया वेदान्तिमतसंन्निहितत्वात्, आदावेव निरूपणम्। न च कार्यान्वितशक्तिवादे व्यवहारस्य शक्तिग्राहकस्य मूलस्तम्भायमानत्वात् तस्यैवादौ निरूपणं भवत्विति वाच्यम्। व्यवहारप्रमाणावष्टब्धकार्यान्वितशक्तिवादापेक्षयापि, षड्विधतात्पर्य-लिङ्गावष्टब्धवेदप्रमाणमूलसिद्धार्थवादिवेदान्तिमतं प्रति

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धार्थसङ्गति ग्रहवादिभाट्टमतस्यैव संनिहिततरत्वात्। न च कार्यान्वितशक्तिवादिवृत्तिकारमतेऽपि, उपासनाविध्याक्षिप्त-प्रत्यक्ब्रह्मैक्यस्य वेदान्तिप्रीतिकरस्य सद्भावात्तन्मतस्यापि अद्वैतिमतसंनिहितत्वमस्त्येवेति वाच्यम्। करिष्यमाणविचारदिशा द्वैतिभाट्टमते सिद्धे ब्रह्मणि पदशक्तिग्रहं स्वीकृत्यैव, स्वद्वैतवादपोषणाय कर्तृक्रियास्तुत्यर्थं वा असद्ब्रह्माभेदस्य तैः स्वीकारात्तेषां नेदिष्ठत्वम्। कार्यन्वितशक्तिवादिभिर्वृत्तिकारैस्तु पदशक्यत्वस्यैव ब्रह्मण्यसमर्थनात्, तन्मतस्य वेदान्तिमतदवीयस्त्वम्। अत एव व्यवहारमार्गे संनिहितस्य भाट्टमतस्य आदौ भाष्यकारैर्निरूपणम्, खण्डनं च।

वृत्तिकारप्राभाकरयोः उभयोस्तु कार्यान्वितशक्तिवादित्वेन विशिष्टत्वेऽपि वृत्तिकारमतं कियताचिदंशेन वेदन्तिमतसन्निहितम्। यद्यपि प्रत्यगभिन्नं ब्रह्मयूपाऽहवनीयादिवदप्रसिद्धं लोके, तथापि कार्योपासनाविधेर्विषयातया तस्याक्षिप्तत्वात् वेदप्रसिद्ध-यूपाहवनीयादिवत् तत्प्रसिद्धमेवेति, वेदान्तिनां सिद्धब्रह्मवादस्यापि कियदचिदंशेनाभ्युपगम एव वृत्तिकृन्मते। प्राभाकरमते सिद्धब्रह्मवादस्य सर्वात्मना निरासः। मतद्वयेऽपि श्रौतयुक्तिनिरूपणपुरस्सरं ब्रह्मणः कार्यानुप्रवेशः भगवत्पादैः खण्डितः। प्राभाकरमातखण्डनान्ते च "न ब्रह्मणो हन्तव्यः" इति

In Public domain. Digitization Muthulakshmi Research Academy

निषेधवाक्यस्थले कार्यपरत्वाभावः भाष्यकरैः सयुक्तिकं नवमे वर्णके निरूपितः।

अत्र च समन्वयाधिकरणप्रथमवर्णके पूर्वपक्षे आदौ मीमांसकानाम् अर्थवादाधिकरणपूर्वपक्षानुसारेण अर्थवादवाक्यानामिव क्रियाऽबोधकानां वेदान्तवाक्यानामपि आनर्थक्यमापादितम्। ततः अर्थवादवाक्यानामपि विधेयनिषेध्य-स्तुतिनिन्दान्यतरफलकतया क्रियाशेषत्वेन प्रामाण्यम्, अर्थवादाधिकरणसिद्धान्तानुरोधेन स्वीकृत्येव वेदान्तानामापि कर्माणि कर्तृदेवताद्यात्मना शेषत्वेन ब्रह्मरूपार्थप्रतिपादकत्वात्, (वेदान्तानां) तेषां नास्ति स्वतन्त्रतया ब्रह्मबोधकत्वं, किन्तु कर्मशेषत्वेन। यदि च वेदान्ताः कर्मप्रकणे अपठिताः; इति तेषां कर्मशेषत्वं न युज्यत इति सम्भाव्येततर्हि उपासनारूपक्रियाङ्गतया सिद्धस्य ब्रह्मणः अङ्गत्वं भवत्विति भाट्टानां पूर्वपक्षसारांशः।

अष्टमवर्णकाधिकरणरचनोपक्रमः- 1)विषयः:-वेदान्ताः किं सिद्धब्रह्मपराः? उतकार्यपराः? इति अधिकरणेऽस्मिन् संशयः। विषयवाक्यानि तु अग्रे सूत्रार्थविवरणसन्दर्भे उदाहरिष्यन्ते। सिद्धब्रह्मपराः इत्यस्य सिद्धब्रह्मतात्पर्यकाः, अथवा प्राधान्येन सिद्धब्रह्मबोधकाः इत्यर्थः। एवं कार्यपराः इत्युक्ते पूर्वपक्षिणः भाट्टस्य सिद्धे अर्थे सङ्गतिग्रहं स्वीकुर्वतः मते कर्मपरा इत्येवार्थः। तथा च वेदान्ताः किं प्राधान्येन सिद्धं ब्रह्मबोधयन्ति? अथवा कर्मशेषत्वेन

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मस्वरूपबोधकाः? इति संशयस्वरूपं पर्यवस्यति। तत्र च संशायकं बीजं किमित्युक्ते 'निष्फलत्वसापेक्षत्वयोः प्रसङ्गाप्रसङ्गाभ्यां संशये 'इतिरत्नप्रभायामुक्तम्। (र.प्र.पृ.58.) वेदान्तिमते "अहं ब्रह्मास्मी"त्यनुभवे प्रत्यक्षस्य, ब्रह्मणि सर्वज्ञत्वसर्वकारणत्वादीनां श्रुत्युक्तानां अनुभवे, जीवे चाध्यस्तत्वप्रमायाः अनुभवे च अनुमानस्य अपेक्षितत्वात्, सापेक्षत्वप्रसङ्गः। यदि वेदन्तेभ्यः अहेयस्य अनुपादेयस्य सिद्धब्रह्मणो बोधः, तर्हि तस्य निष्फलत्वप्रसङ्गः। एवं च निष्फलत्व-सापेक्षत्वयोः प्रसङ्गो वेदान्तिमते। वेदान्तानां क्रियापरत्वं प्रतिपादयतां भाट्टानां मते तु नास्ति तयोर्दोषयोः प्रसङ्गः। रत्नप्रभोक्तनिष्फलत्व-सापेक्षत्वप्रसङ्गाऽप्रसङ्गादित्यस्यत्वयमर्थः वेदान्तानां कर्मपरत्वे कर्मफलस्यैव वेदान्तानां अथवा ब्रह्मणः फलत्वेन, भाट्टमते निष्फलत्वप्रसङ्गो नास्ति। तथा कर्मणः अथवा धर्मस्य वेदैकवेद्यत्वेन तत्र कर्मस्वरूपज्ञाने प्रत्यक्षानुमनुमानदीनां साहाय्याभावेन सापेक्षत्वप्रसङ्गोपि नास्ति। सिद्धब्रह्मणोमानान्तरमेयत्वत्, वेदान्तिमते तु श्रुत्या केवलमनुवादात् श्रुतेरनुवादकत्व-लक्षणाप्रामाण्यप्रसङ्गः। वेदान्तानां क्रियापरत्ववादिनां भाट्टानां मते तु मानान्तरानवगतक्रियाभावनायाः एव प्रतिपादनात् न सापेक्षत्वप्रसङ्गः। तथा कर्मणः अथवा धर्मस्य वेदैकवेद्यत्वेन तत्र कर्मस्वरूपज्ञाने प्रत्यक्षानुमनुमानदीनां साहाय्याभावेन

 In Public domain. Digitization Muthulakshmi Research Academy

सापेक्षत्वप्रसङ्गोपि नास्ति। एवं निष्फलत्वसापेक्षत्वयोः प्रसङ्गाप्रसाङ्गाभ्यां संशयः उपपादितः रत्नप्रभायामिति मन्तव्यम्। द्वैकोटके संशये "सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं द्रष्टव्यम्" इति रत्नप्रभावचनात् (र.प्र.पृ.58) पूर्वोत्तरपक्षव्यवस्थापक-युक्तीनामेव संशयबीजत्वस्य नैकत्र दर्शनाच्चनिष्फलत्वप्रसङ्गाप्रसङ्गौ, सापेक्षत्व-प्रसङ्गाप्रसङ्गौ च संशायकौ।

शा.भा.-कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" (जै.सू.1.2.1.)इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्। अतोवेदान्तानामानर्थक्यम्, अक्रियार्थत्वात्। कर्तृदेवतादिप्रकाशनार्थत्वेनवा क्रियाविधिशेषत्वम्, उपासनादिक्रियान्तरविधानार्थत्वं वा। न हि परिनिष्ठितवस्तु-प्रतिपादनं सम्भवति, प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्।

र.प्र.प्र-पूर्वपक्ष-सङ्गति-फलानि :- पूर्वसूत्रे द्वितीयवर्णके ब्रह्मणः प्राधान्येन शास्त्रप्रामाणकत्वमुक्तम्। इदानीन्तु पूर्वसूत्रान्तिम-वर्णकोक्तार्थमाक्षिप्य "कथम् पुनः ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते" इत्यादिभाष्यग्रन्थेन आक्षेपसङ्गत्या भाट्टमीमांसकानां पूर्वपक्ष उपस्थाप्यते। "सदेवसोम्य" इत्यादीनां सर्वात्मत्वादिस्पष्ट-ब्रह्मलिङ्गानां अद्वितीये ब्रह्मणि समन्वयोक्तेः श्रुतिपाद-अध्यायसङ्गतयो बोध्याः। स्वातन्त्र्येणवेदान्तानां ब्रह्मप्रतिपादकत्वं

In Public domain. Digitization Muthulakshmi Research Academy

नास्तीति प्रतिपादनपरे पूर्वपक्षे, वेदान्तेषु मुमुक्षोः वेदान्तेषु प्रवृत्त्यसिद्धिः फलम्। सिद्धान्ते तु मुमुक्षोः वेदान्तेषु प्रवृत्तिसिद्धिरितिफलम्। उपर्युक्तभाष्यवाक्ये कथमित्यस्य आक्षेपार्थकत्वात् ब्रह्मणः शास्त्रप्रमाणकत्वं न वक्तव्यमित्यर्थः पर्यवस्यति। कथं पुनः इत्यत्र पुनः शब्दस्तु वर्णाकान्तरत्वद्योतकः। (र.प्र.पृ.-58)

अर्थवादाधिकरणपूर्वपक्षन्यायेन वेदान्तानामानर्थक्यम्-भाट्टमीमांसकपूर्वपक्षः :-

"अम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् तस्मादनित्यमुच्यते" (जै.सू.1.2.1) इति जैमिनिसूत्रेण क्रियापरत्वं शास्त्रस्यप्रदर्शितम्। आम्नायस्य वेदस्य क्रियार्थत्वात् आख्यातवाच्यार्थभावना-रूपक्रियार्थत्वात्, अतदर्थानां क्रियापरत्वरहितानाम्, आनर्थक्यम्-अप्रामाण्यम्, तस्माद् क्रियापरत्वरहितस्य अप्रामाण्यात् अनित्यम् वेदप्रामाण्यमनित्यमित्युच्यते। वेदत्वावच्छेदेन प्रामाण्यं वक्तुं न शक्यते इति अर्थवादाधिकरणपूर्वपक्षसूत्रार्थः। फलवदर्थबोधकमेव वाक्यं प्रमाणं न तदितरत्, अनर्थकं हि तत्। सोऽयमर्थः प्रमाणलक्षणे, प्रथम-द्वितीयसूत्राभ्यां विज्ञायते। "अथातोधर्मजिज्ञासा" इति प्रथमं सूत्रम्। धर्मज्ञानाय वेदार्थविचारः कर्तव्यः इति तदर्थः। "स्वाध्यायोऽध्येतव्यः" इति तद्विषयवाक्यम्। अध्येतव्यः इत्यत्र अधिपूर्वकइङ् धातुः। सर्वलकार-

साधारणाख्यातत्वं विधिबोधकतव्यत्त्वमिति अंशद्वयविशिष्ट-तव्यत्प्रत्ययः श्रूयते। तत्र तव्यत्प्रत्ययः विधि-प्रेरणा-नियोगदि-शब्द-वाच्यान्यतमार्थकः। आख्यातत्वांशने तु आर्थभावना (प्रयत्नलक्षणा) उच्यते। अधिपूर्वक"इङ्"धात्वर्थस्तु अध्ययनम्। आख्यातेन भावयेदिति बोधो जायते। आर्थभावनायां वशीकृताक्षरादिमान्वेदः साध्यत्वेनसम्बध्यते। भावनायाः करणाकांक्षयान्तु अध्येतव्यः इत्यत्र अधिपूर्वक-इङ्धातूपस्थाप्याध्ययनस्य धात्वर्थस्य कारणत्वेन अन्वयः। एवं च वेदभाव्यिका अध्ययनकराणिकाभवाना इत्यर्थः तस्माद्वाक्यात् विधेयतया प्रतीयते। तथा च वशीकृतशब्दराश्यात्मक-वेदफलकभावनाबोधः प्रथमसूत्रोदाहृतविधिवाक्यादायातीति फलवदर्थबोधकस्य वेदस्य प्रामाण्यम् सुस्थम्। एवं "चोदना लक्षणोऽर्थोधर्मः" इति द्वितीयसूत्रेणापि कार्ये कर्मणिधर्मेचोदना प्रमाणमित्युक्तम्। सूत्रे लक्षणपदस्य प्रमाणमित्यर्थः। अर्थपदस्य यद्यपि फलमित्यर्थो वक्तव्यः। तथापि फलवानर्थः अत्र अर्थपदस्य अर्थः। फलवनित्यत्र मतुप् प्रत्ययस्यजनकत्वमित्यर्थः। तथा च फलजनक इत्यर्थः। फलं च दुःखाभावः, सुखं च। एवं च इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं फलजनकत्व-मित्यस्मात् फलति। तथा च चोदनाप्रमाणकः अर्थ्यमानः फलजनकः धूमादिजनितदुःखाधिकदुःखाजनकः स्वर्गादि-

In Public domain. Digitization Muthulakshmi Research Academy

फलजनकः यागादिरेव द्वितीयसूत्रात् धर्मतया फलति। एवं च फलवदर्थकबोधकत्वेन द्वितीयसूत्रेणापि वेदप्रामाण्यम्। अतश्च कार्यपरत्वं यत्र यत्रास्ति तत्र वेदप्रमाण्यमिति ज्ञायते। "वायुर्वै क्षेपिष्ठा इत्यर्थवादवाक्ये, सिद्धब्रह्मपरे वेदान्तवाक्येवा वेदप्रामाण्यव्यापकस्य कार्यपरत्वस्य फलवदर्थभावनापरत्वस्य चाभावात् व्याप्यस्य प्रमाण्यस्याप्यभावः। न च अध्ययनविध्युपात्तानाम् अर्थवादनां सिद्धे अर्थे प्रामाण्यं युक्तम्। तस्मात् अनित्यमेषां प्रामाण्यम्। तथा वेदान्तानामपि सिद्धब्रह्मबोधकत्वे फलवत्कार्यबोधकत्वाभावात् अक्रियार्थत्वात् अप्रामाण्यमिति पूर्वपक्षः। (र.प्र.पृ.59)

अर्थवादाधिकरणसिद्धान्तन्यायेन भाट्टोक्तं वेदान्तार्थवत्त्वम्:-

"विधिनात्वेकवक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति (जै.सू.1-2-7) सिद्धान्तसूत्रम्। विधिना विधिवाक्येन एकवक्यत्वात् एकवक्यत्वापन्नात्वात्, विधीनां स्तुत्यत्यर्थेन विधेयार्थस्तुतिरूपप्रयोजनेन, स्युः अर्थवादवाक्यानि प्रमाणानि स्युः इति तस्य सूत्रस्यार्थः। तथाहि "वायव्यँ श्वेतमालभेत भूति कामः" इति विधिवाक्यसंनिधौ वायुर्वै क्षेपिष्ठा देवता" इति अर्थवादवाक्यं पठितम्। वायुः क्षिप्रतमगामिनी देवता इति तद्वाक्यार्थः। तद्वाक्ये च कर्मणःकस्यचित् अनुपदेशोऽपि,विधि-वाक्यसंनिधौ पठितत्वेन, वायुः क्षिप्रतमगमिनीतथा तद्देवताकं कर्मक्षिप्रमेव फलं

In Public domain. Digitization Muthulakshmi Research Academy

दास्यतीत्यर्थः प्रतीयते। अतश्च "वायुर्वैक्षेपिष्ठा देवता" इति वाक्ये वाक्यलक्षणया समर्पितस्य प्रशस्तपदस्य "वायव्यं श्वेत"मित्यादि-विधिवाक्ये पदैकवाक्यतया अन्वयेन अर्थवादसहकारेण प्रशस्तवायुदेवताकपश्वालम्भनकर्मणः कर्तव्यतया प्रतीतेः, विधिवाक्ये भूतिरूपफलस्य पुरुषविशेषणतया श्रवणात्, विधिफलेनैव अर्थवादनां फलसिद्धेः फलवदर्थबोधकत्वलक्षणप्रमाण्यं व्यवस्थापितं पूर्वमीमांसायाम्। एवमध्ययनविधिपरिगृहीनां वेदान्तानामानर्थक्यं मा भूदिति, कर्तृदेवताप्रकाशनार्थत्वेन क्रियाविधिशेषत्वमभ्युपगन्तव्यम्। किन्तु सिद्धस्य ब्रह्मणः मानान्तरवेद्यत्वात्, हेयोपादेयभिन्नस्य ब्रह्मणः निष्फलत्वाच्च, वेदान्तिरीत्या सिद्धब्रह्मवस्तुपरत्वे मानान्तर -सापेक्षत्व-निष्फलत्वयोः प्रसङ्गेन,अनधिगतफलवदर्थबोधकत्वाभावेन वेदान्तानामप्रामाण्यप्रसङ्गात्, कार्यशेष -कर्तृदेवताफलप्राकाशनद्वारा कार्यपरत्वमेवेति ब्रूमः। तत्त्वमसीत्यादौ त्वम्पदेन प्रकाशितस्य कर्तुः, तत्पदेन प्रकशितया देवतयाश्च कर्माङ्गभावोपगमात् यज्ञादिकर्म तादृशं विशिष्टं महत्, यत्र त्वम्पदार्थः जीवः कर्ता साक्षाद् ब्रह्मैव देवता इति कर्मणः स्तुतिः लभ्यते। एवमेव "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन, तपसाऽऽनशकेन" (बृ.उ.4.4.22) इति श्रुत्या यज्ञ-दान-तपांसि तादृशानि यद् ज्ञानमपि साधयितुं प्रभवन्ति" इति ज्ञानेन यज्ञ-दानादिकर्मणां स्तवः

In Public domain. Digitization Muthulakshmi Research Academy

विविदिषावाक्यात् प्रतीयते। एवं च क्रियाविधिशेषकर्तृकर्मादिप्रकाशनद्वारावेदान्तानां साफल्यं सिद्धमिति अर्थवादधिकरणसिद्धान्तानुरोधेन कर्मशेषतया वेदान्तानां प्रामाण्यमास्थेयम्। यदि च वेदान्ताः कर्मविशेषमनारभ्य उपासनाप्रकरणे अधीता इति सम्भाव्यन्ते, तर्हि वेदान्तानाम् उपासनात्मकमानसक्रियार्थत्वं वा अस्तु। न तु शुद्धब्रह्मबोधकत्वम्। मोक्षकामः असद्ब्रह्माभेदमारोप्य अहं ब्रह्मास्मीत्युपासीत इति उपासनाविधिपदरहितेषु अहं ब्रह्मास्मीत्यादिषु विधिः कल्पनीयः। एवं तत्त्वमसीत्यादावपि "उपासीत" इति पदकल्पनया उपासनापरत्वमेव। एवं क्वचित् "आत्मावारे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः" इत्यादौ कार्यान्तरं श्रूयते, तत्र सिद्धस्य आत्मनः श्रवणादिक्रियापरत्वमवसेयम्। (र.प्र.पृ 59)

ननु तत्त्वमसि, अहं ब्रह्मास्मीत्यादौ समानधिकरणपादाभ्यां श्रुतमभेदं अथवा प्रत्यगभिन्नं सिद्धं ब्रह्मपरित्यज्य अश्रुतोपासनात्मककार्यपरत्वकल्पनं किमर्थम्? श्रुतहान्यश्रुत-कल्पना प्रसङ्गात् इति चेत्" न हि परिनिष्ठितवस्तुप्रतिपादनं सम्भवतीत्यादिना" भाष्ये समाधानम्। परिनिष्ठितं नाम परिसमन्तात् निश्चयेन स्थितम्। निश्चितं हि वस्तु साध्यत्वाभावात् कृत्यनपेक्षं सिद्धमेवभवति। तस्य च वेदेन प्रतिपादनं न सम्भवति ज्ञातत्वात्। मनान्तरयोग्ये अर्थे वाक्यस्य संवादकत्वे सति

 In Public domain. Digitization Muthulakshmi Research Academy

अनुवादकत्वप्रसङ्गात्। यथा हिमनाशकत्वेन प्रसिद्ध स्याग्नेः "अग्निर्हिमस्यभेषजमिति"वाक्येन पुनरनुवादः। यदि च सिद्धं वस्तुप्रमाणान्तरेण विसंवादान्नज्ञायत इति पुनर्वेदेन ज्ञाप्यत, इत्युच्येत,तर्हि "आदित्यो यूपः" इत्यादौ आदित्यसदृशः यूपः इतिवत् गौणार्थः एव स्यात्,न तेन मुख्यार्थः प्रतिपादितः भवति। किञ्चहेयोपादेयशून्यस्य सिद्धस्य ब्रह्मणः पुरुषार्थाऽनात्मकत्वात्, तत्प्रतिपादनमपि न युज्यते।तथाचानुमानम्"सिद्धो न वेदार्थः मनान्तरायोग्यत्वात्, घटादिवन्निष्फलत्वाच्च" इति सिद्धज्ञापने फलाभावः प्रतिपाद्यते। कथमिति चेत् फलं नाम सुखावाप्तिः, दुःखनिवृत्तिश्च। तत्र सुखावप्तिः प्रवृत्तिसाध्या, दुःखनिवृत्तिश्च निवृत्तिसाध्या। ते च प्रवृत्तिनिवृत्ती उपादेयस्य प्रवृत्तिप्रयत्नकार्यस्य ज्ञानात् तथा हेयस्य निवृत्तिप्रयत्नकार्यस्य ज्ञानाच्च भवतः, न तु सिद्धज्ञानात्। (र.प्र. प्र.59-60)

शा.भा.:- अत एव "सोऽरोदीत्" इत्येवमादीनामानर्थक्यं मा भूदिति "विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः" (जै.सू.1.2.7.) इतिस्तावकत्वेनार्थवत्त्वमुक्तम्।मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनसमवायित्वेन कर्मसमवायित्वमुक्तम्। न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः सम्भवति, क्रियाविषयत्वाद्विधेः। तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं

In Public domain. Digitization Muthulakshmi Research Academy

वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते।

र.प्र.प्र.-भाट्टमते सिद्धार्थबोधकवाक्यप्रामाण्यम् ब्रह्मवाक्यप्रामाण्यं च तर्हि सिद्धार्थबोधिवेदवाक्यानां कथं प्रमाण्यमिति चेत् अत एव "सोऽरोदीत्" इत्येवमदीनामिति भाष्ये समाहितम्। तथा हि "बर्हिषु रजतं न देयम्" इति वेदे निषेधवाक्यं किञ्चिच्छ्रूयते। दानार्थं निषेध्यस्य रजतस्य निन्दा च "सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं यदश्रवशीयत तद्रजतँ हिरण्यमभवत्। तस्माद्रजतँ हिरण्यमदक्षिण्यमश्रुजं यो बर्हिषि ददति पुरास्य संवत्सराद् गृहे रुदन्ति"(तै.सं.1.5.1,2.) इति। याज्ञिकक्रियाकलापे रजतं न देयमिति निषेधश्रुतौ सत्यामपि, पुरुषस्य स्वाभाविकी प्रवृत्तिः व्यतिरेकदिशा "रजतमहं दद्यामेव" इत्येवं रूपेण भवति। तदा एतदर्थवादकृतोपाख्यानश्रवणजनितरजतगताग्निरोदनपरिणामात्मकत्वज्ञानेन, संवत्सरकालं गृहजनानां रजतदानस्य दुःखसम्पादकतया च, सद्य एव पुरुषः रजतदानान्निवर्तेते। अतः निषेधस्थलेऽपि निन्दितार्थवादैः समर्पितस्य निन्दितपदस्य पदैकवाक्यतया निषेधाङ्गत्वेन निन्दारूपार्थस्य निषेधफलकत्वमिति, निन्दार्थवादनामपि नाप्रामाण्यमशङ्कानीयम्। एतदेव "विधिनात्वेकवाक्यत्वा"दिति सूत्रे विधिपदस्य निषेधोपलक्षकत्वेन

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यातम्। भाष्ये "स्तावकत्वेन अर्थवत्त्वमुक्तमि"त्यत्र स्तावकत्वेनेति निन्दकत्वेन इत्यस्याऽप्युपलक्षणम्। (र.प्र.पृ.60)।

ननु वेदान्तानामर्थवादवत् पदैकवाक्यतया अर्थवत्त्वं मास्तु। किन्तु मन्त्राणां यथा स्वतन्त्रतया अर्थप्रकाशकत्वं विना अदृष्टद्वारा यज्ञादिक्रियाङ्गत्वं, तथैव स्वतन्त्रतयैवार्थबोधकत्वमस्तु वेदान्तानामिति चेद्भाट्टमतानुसारेण समाधानात्मकं वचनम्। "मन्त्राणां च इषेत्वा इत्यादीनाम्" इत्यादिभाष्यवचनेन समाधानम्।

पूर्वमीमांसाशास्त्रे प्रमाणलक्षणे अर्थवादचिन्तानन्तरं मन्त्रविषये चिन्ता एवं कृता। तैत्तिरीयसंहितायां "इषेत्वोर्जेत्वा" इत्यादिमन्त्रः श्रूयते। तत्र इषे त्वा इत्यत्र क्रियापदाभावात् छिनद्मि इत्यध्याहार्यम्। एवं च हे पलाशशाखे त्वाम् इषे फलरूयान्नाय छिनद्मि इति तस्यार्थः। एवमग्निर्मूर्धा इत्यादावग्निपदेन क्रियासाधनभूता देवता प्रकाश्यते। ततश्च श्रुत्यादिप्रमाणैः एते मन्त्राः छेदनादिक्रियाप्रकाशने, कर्माङ्गदेवताप्रकशने च विनियुक्ताः। तत्र च मन्त्रधिकरणे अयं सन्देहः यत् एते मन्त्राः किं उच्चारणमात्रेणादृष्टं सम्पादयन्तः स्वतन्त्रतया क्रतौ विनियुक्ताः, अथवा दृष्टेनैव छेदनक्रिया-देवतास्मरणद्वाराक्रतौ उपकारं कुर्वन्ति इति संशयः। चिन्तादिनापि अध्ययनकालावगतमन्त्रार्थस्य स्मृतिसम्भवात्, मन्त्रेण क्रियादेवतादिप्रकशनस्यानपेक्षितत्वात्

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्राः स्वतन्तन्त्रतया विनियुक्ताः अदृष्टं सम्पादयन्तः क्रतूपकारं कुर्वन्तीति पूर्वपक्षः ।

सिद्धन्तस्तु "अविशिष्टस्तु वाक्यार्थः" (जै.सू.1.2.40) इति सूत्रेण आविष्कृतः। लोकवेदयोः वाक्यार्थस्य अविशेषाल्लोकेवाक्यानां दृष्टार्थप्रकाशनद्वारैव उपयोगदर्शनात्, वेदेऽपि दृष्टद्वारैव वाक्योपयोगः कल्पनीयः। "सम्भवति दृष्टफलकत्वे अदृष्टकफलकल्पनायाः अन्याय्यत्वात्" मन्त्रवाक्यानां क्रियातत्साधनस्मरणात्मकदृष्टद्वारेणैव कर्माङ्गत्वं कल्पनीयम्। न च चिन्तादिनापि अध्ययनकालावगतार्थस्मरणेनैवोपपत्तौ मन्त्रेणैव मन्त्रार्थस्मरणं किमर्थमिति चेत् "मन्त्रैरैवस्मर्तव्य"मिति नियमविध्याश्रयणात् अदृष्टक्रतूपकारः लभ्यते। मन्त्रैः क्रियादेवतास्मरणात् दृष्टविधायाक्रतूपकारः लभ्यत इति, उभयधापि मन्त्राणां कर्माङ्गत्वेनैव विनियोगात्, स्वातन्त्र्येण फलभावस्यान्न्याय्यतया, न मन्त्रन्यायेन ब्रह्मणः स्वतन्त्रतयावेदार्थत्वं सिद्ध्यति। स्वयं फलाभावात्। एवं च अर्थवादानां स्तुतिनिन्ददिद्वारेण विधिभिस्स्यहपदैकवाक्यत्वम्। मन्त्राणां तु "इषे त्वा" "अग्निर्मूर्धा" इत्यादीनां स्वार्थबोधे परिसमाप्तानां विधिवाक्यैः यजेत इत्यादिभिः पुनस्सम्बन्धात्, "स्वार्थबोधे समाप्तानाम् अङ्गाङ्गित्वव्यपेक्षया। वाक्यानामेकवाक्यत्वम्पुनस्संहत्यजायते।। "इति न्यायेन

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यैकवक्यतया अन्वयः इति मन्त्रार्थवादयोर्विशेषः। भाष्ये "क्रियातत्साधनाभिधायित्वेन कर्मसमावायित्वमुक्तम्" इत्यत्र कर्मसवायित्वमित्यस्य कर्मविधिशेषत्वम्, अथवा कर्मविध्यन्तः पतित्वमित्यर्थः। ननु कर्मप्रकरणस्थवाक्यानां विध्येक-वक्यत्वमस्तुनाम। वेदान्तेषु तत्त्वमसीत्यादौ विधेरदर्शनात् विध्येकवाक्यत्वस्य असम्भवात् इति चेत् भाष्ये पूर्वपक्षिभाट्टमतानुसारेण "न क्वचिदपि वेदवाक्यानाम्" इत्यादिना समाधानम्। न हि वेदवाक्यानां मन्त्रार्थवादादीनां विध्येकवाक्यत्वमनापद्य अर्थवत्ता दृष्टा, उपपन्नायुक्तियुक्तावा। तद्वत् वेदान्तवाक्यानामपि कथंचिद्विध्येकवाक्यतयैवार्थवत्त्वमभ्युप-गन्तव्यम्। सिद्धे फलाभावस्य उक्तत्वात्। न च तर्हि ब्रह्मण्येव स्वार्थे विधिः कल्प्यताम् किमर्थं वृथा वेदान्तानां विध्यन्तरशेषत्वकल्पनम् इति वाच्यम्। क्रियाविषयत्वात् विधेः। न हि ब्रह्मस्वरूपं साक्षात् विधातुं शक्यम्। दध्ना जुहोति इत्यादावपि अग्निहोत्रं जुहोतीति वाक्यन्तरप्राप्तहोमानुवादेनैव दध्नः होमसाधनतताविधानात्। निष्क्रियस्य ब्रह्मणस्तु कथमप्यसाध्यत्वात् न विधेयत्वम्। तस्माद् यागादिकर्मापे क्षितकर्तृस्वरूपदेवताप्रकाशनद्वारा तत्त्वमसीत्यादि-वाक्यानां क्रियाविधिशेषत्वम् अवश्यमभ्युपेयम्। अथ वेदान्ताः न कर्मप्रकाणस्थाः इति यदि सम्भाव्येत, तर्हि वेदान्तप्रकरणस्थोपासनादिकर्मपरत्वमेव अभ्युपेयमिति, न ब्रह्मणः

In Public domain. Digitization Muthulakshmi Research Academy

प्राधान्येन शास्त्रप्रामाणप्रतिपाद्यत्वंविद्यत इति भाट्टानां महापूर्वपक्षः। (र.प्र.पृ.60-61.)

प्राधान्येन वेदान्तनां ब्रह्मपरत्ववादिनां वेदान्तिनां सिद्धान्तः-

तत्तु समन्वयात्।।4।।

वेदान्ता कर्तृदेवादिपराब्रह्मपरा उत।

अनुष्ठानोपयोगित्वात्कर्त्रादिप्रतिपादकाः।।

भिन्नप्राकरणाल्लिङ्गषड्काच्च ब्रह्मबोधकाः।

सति प्रयोजनेऽनर्थहानेऽनुष्ठानतोऽत्रकिम्।।

प्रतिपत्तिं विधित्सन्ति ब्रह्मण्यवसिता उत।

शास्त्रत्वात्ते विधातारः मननादेश्च कीर्तनात्।।

नाकर्तृतन्त्रेऽस्ति विधिः शास्त्रत्वं शंसनादपि।

मननदेः पुराऽबोधात् ब्रह्मण्यवसितास्ततः।।

शा.भा.—तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः। तद् ब्रह्म सर्वज्ञंसर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि "सदेव सोम्येदमग्र आसीत्," "एकमेवाद्वितीयम्" (छा.उ.6.2.1) "आत्मा वा इदमेक एवाग्र आसीत्" (ऐ.उ.1.1.1.) 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ.2.5.19.) 'ब्रह्मैवेदममृतं पुरस्तात् '(मु.उ.2.2.11) इत्यादीनि।

र.प्र.प्र.:- **सूत्रार्थविचारः** :- तत्, तु, समन्वयात् इति त्रिपदं सूत्रम्। तच्छशब्दस्य पूर्वोक्तपरमर्शकत्वात् तेन शास्त्रयोनित्वाधिकरण-द्वितीयवर्णकेन प्रतिज्ञातं वेदान्तप्रमाणकं ब्रह्मपरामृश्यते। तु शब्दः पूर्वपक्षव्यावृत्यर्थः। ब्रह्मवेदान्तप्रमाणकमित्ययमर्थः। कथमित्युक्ते समन्वयादिति हेतुनिर्देशः। एवं च "सर्वज्ञम्, सर्वशक्ति, जगदुत्पत्तिस्थितिलयकारणं ब्रह्मवेदान्तप्रमाणकं समन्वयात्" इत्यनुमानेन पूर्वोक्तब्रह्मणि शास्त्रप्रमाणकत्वं साध्यते। समन्वयादित्यत्र सम्, अन्वयः इति द्वौ भागौ स्तः। तत्र अन्वयो नाम तात्पर्यविषयत्वम्। तात्पर्यस्य अखण्डार्थविषयकत्वालक्षणं सम्यक्त्वं सूचयितुं सम्पदं उपयक्तम्। सम्पददोक्तमण्डत्वं पक्षान्तर्गतमेव, न तु हेतुकुक्षिघटकम्। तथा च "अखण्डं ब्रह्म वेदान्तप्रमाविषयः, वेदान्ततात्पर्यविषयत्वात्" इति पर्यवसितम्। योयद्वाक्यतात्पर्यविषयः सः तद्वाक्यप्रमेयः। यथा कर्मवाक्यप्रमेयो धर्मः इत्यनुमानप्रयोगः। भाष्ये "सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येण एकार्थस्य प्रतिपादकत्वेन सामनुगतानि" इति ग्रन्थेन अखण्डार्थबोधकत्वं समर्थितम्। रत्नप्रभायां चोपपादितम्। एवं समनुगतानि सदेव सोम्य इदमग्र आसीत्" इत्याद्यारभ्य "ब्रह्मैवेदममृतं पुरस्तात्" इत्यन्तं भाष्यकारैः ऋग्वेद-अथर्ववेद-सामवेद-यजुर्वेदक्रमेण सर्वेषां वेदान्तवाक्यानामुपक्रमादिलिङ्गैः ब्रह्मणः तात्पर्यविषयत्वम् वर्णितम्। एवं च पक्षकोटौ

In Public domain. Digitization Muthulakshmi Research Academy

प्रविष्टाखण्डार्थत्वोपादनं पक्षाप्रसिद्धिवारणार्थम्, एवमुपक्रमादिलिङ्गैः तात्पर्यविषयत्वस्योपपादनं च हेत्वप्रसिद्धिवारणायेतिमन्तव्यम्। भाष्ये एकस्यार्थस्य प्रतिपादकत्वेन, इत्यनेन वचनेन तत्त्वमसीत्यादिवाक्यार्थे अखण्डत्वं सूचितम् (र.प्र.पृ.61.62.)

ब्रह्मणः अखण्डार्थत्वम्:- तत्त्वमसीत्यादिवाक्यार्थः अखण्डं ब्रह्म। तत्त्वं पदोपस्थाप्यौ तु सखण्डौ। तत्पदस्य सर्वज्ञत्वविशिष्टचैतन्ये, त्वम्पदस्य किञ्चिद्ज्ञत्वविशिष्टचैतन्ये च शक्तिस्वीकारात्। द्वयोरभेदः न सङ्घटत इति भागत्यागलक्षणया सर्वज्ञत्वकिञ्चित्ज्ञत्वांशयोः त्याग इति वाक्यार्थस्य एकचैतन्यरूपत्वम्। तत्र पदार्थद्वयस्याभावात् वाक्यार्थस्य अखण्डत्वम् असंसृष्टत्वस्वरूपम्। वाक्यस्य अखण्डार्थप्रतिपादकत्वं तु स्वपदोपस्थापितपदार्थसंसर्गागोचरप्रमाजनकत्वम्। तथाचोक्तं चित्सुखाचार्यैः--

"संसर्गासङ्गिसाम्यग्धीहेतुता या गिरामियम् उक्ता अखण्डार्थता". इति । (वे.प.पृ.52-53.)

स्वपदोपस्थापितपदार्थः चैतन्यमेव। पदद्वयेन उपस्थापनात् चैतन्यद्वयमिवाभाति। किन्तु एकमेव चैतन्यमिति, तत्र संसर्गभानस्य अवकाशः नास्ति। तस्य चाखण्डचैतन्यस्य सम्बन्धितया सर्वज्ञत्वादेर्भेदकस्य बाधितत्वात्, अबाधितैकार्थ-विषयकप्रमाजनकत्वेन, तत्त्वमसीत्यादिवाक्यस्य संसर्गा-

In Public domain. Digitization Muthulakshmi Research Academy

संसङ्गिसम्यग्धीहेतुत्वेन अखण्डार्थप्रतिपादाकत्वमिति लक्षणसमन्वयः। न च वाक्ये द्वयोः पदयोः सद्भावे तदुपस्थापितपादार्थयोः संसर्गं विना वाक्यस्य अर्थबोधकत्वमेव न सम्भवतीत्यतः अखण्डार्थबोधकत्वं वाक्यस्य अप्रसिद्धमिति वाच्यम्। "प्रकृष्टप्रकाशश्चन्द्र" इत्यादिलक्षणवाक्यानां लोके, "सत्यंज्ञानमनन्तं ब्रह्म" इत्यादिब्रह्मलक्षणवाक्यस्य च वेदे अखण्डार्थबोधकत्वेन प्रसिद्धेः। प्रकृष्टप्रकशश्चन्द्र इत्यादि-वाक्याल्लक्षणया चन्द्रादिव्यक्तिमात्रप्रमायाः अनुभवसिद्धत्वात्। अर्थवादवाक्यस्थैः सर्वैः पदैः एकस्याः स्तुतेरिव, प्रकृष्टप्रकाश-श्चन्द्रः इत्यादिवाक्ये लक्षणया सर्वैः पदैश्चन्द्रव्यक्तेरेकस्याः अखण्डायाः बोधस्य अनुभवसिद्धत्वात्। भाष्योक्तस्य वेदान्तवाक्यानां तात्पर्येणैकार्थप्रतिपादकत्वेनसमनुगतत्वस्य निरूपणाय च प्रकृष्टप्रकाशवाक्यमवश्यविचारणीयम्।

प्रकृष्टप्रकाशश्चन्द्रः इति वाक्ये अखण्डार्थकत्वविचारः :-

वाक्यवृत्तिव्याख्याने रामानन्दीये अयमर्थः विस्तरेण निरूपितः प्रकृतव्याख्यतृभिरेव। स चार्थः पूर्णानन्दीयात्संक्षिप्येह प्रकृतोपयोगाय निरूप्यते। (पूर्णानन्दीयम्131-132) तथाहि नतावद्वाक्यस्य संसृष्टार्थकत्वनियमः। प्रकृष्टप्रकाशश्चन्द्रः इति वाक्ये व्यभिचारात्। अस्मिन् ज्योतिर्मण्डले कश्चन्द्रः? इति प्रश्ने प्रकृष्टप्रकाशश्चन्द्र इति वाक्यम् समाधानम्। तत्र तावत् चन्द्रस्य

प्रकृष्टप्रकाशरूपः अर्थः, प्रकृष्टप्रकाशेन संसर्गांशोवान जिज्ञासितः। तथा सति प्रश्नवाक्यं कः संसर्गः? इत्येव भवेत् न तु कश्चन्द्रः?- इति। प्रकृष्टप्रकास्य तु पूर्वमेव ज्ञातत्वेन नास्ति जिज्ञास्यत्वम्। प्रकृष्टप्राकाशनिरूपिताभेदसंसर्गस्य तात्पर्यविषयत्वमपि वक्तुं न शक्यते। तथासति प्रश्नवाक्ये कीदृशश्चन्द्रः? इत्येव आकारस्य युक्तत्वात्, नतु कश्चन्द्रः इति। तर्हि कोऽत्र प्रतिपादनीयोऽर्थः? इत्युक्ते चन्द्ररूपाखण्डार्थ एवात्र वक्तव्यः। कश्चन्द्रः?- इति प्रश्नोऽपि अखण्डार्थ विषयकतयैव जिज्ञासितत्वेन योजनीयः। न च वाक्ये सर्वपदलक्षणां विना अखण्डार्थबोधाऽयोगात्, ततो वरं किंशब्दस्यैवैकस्य लक्षणा इति वाच्यम्। एकस्यापि किं पदस्य उपक्रमस्थत्वात् असञ्जातविरोधित्वन्यायेन उपक्रमे लक्षणाया स्वीकर्तुमशक्यतया, अनायत्या कृत्स्नस्यैव वाक्यस्य लक्षणास्वीकारे बाधकाभावात्। कः इति पदस्य कीदृशः? इति लक्षणया विशेणमात्रार्थस्वीकरे जहल्लक्षणाया एव अभ्युपगम्यतया ततोवरं वाक्ये मुख्यार्थमपरित्यज्य उपादानलक्षणया सर्वपदानां अखण्डव्यक्तिबोधकत्वम्।

एवं कश्चन्द्रः इति प्रश्नवाक्यस्य कश्चन्द्रपदवाच्यः इत्यर्थे कश्चन्द्रेतरव्यावृत्तः इत्यर्थे वा चन्द्रपदस्य जहल्लक्षणया नार्थान्तरपरिकल्पनं युक्तम्। जहल्लक्षणापेक्षया अजहल्लक्षणास्वीकारे लाघवात्। अन्यच्च अत्र प्रष्टुरभिप्रायः अयम्-

 In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रोनाम कश्चिचन्द्रपदवाच्यः चन्द्रत्वजातिमान् चन्द्रेतरव्यावृत्तः इति जानामि, किन्तु स एवकः? इति तु न जानामि इत्यखण्डार्थविषयस्यैवात्र जिज्ञासितत्वात्। यद्यखण्डार्थ-विषयकजिज्ञासैव प्रष्टुरभिमता, तर्हि समाधानवाक्ये "प्रकृष्टप्रकाशः इति अधिकपदयोजनानापेक्षिता किल? इत्युक्ते एवं समाधानमवगन्तव्यम्। प्रश्नवाक्ये समाधानवाक्ये च केवलं चन्द्रः इति पदमेव यदि स्यात्, तर्हि किं पृष्टं किं समाहितमिति जनाः नावबुध्येरन्। प्रष्टुः संशयः कथमपाकृतः इत्यपि न ज्ञायेत। प्रकृष्टप्रकाशः इति समाधानवाक्ये चन्द्रविशेषणस्य सद्भावे तु प्रकाशपदेन अप्रकाशघटादीनां व्यावृत्त्या, एवं प्रकृष्टपदेन प्रकाशस्वरूपत्वेऽपि अप्रौढप्रकाशस्वरूपानां नक्षत्रादीनां च व्यावृत्त्या, अखण्डचन्द्रव्यक्तिः तस्माद्वाक्यात् सुलभतया ज्ञातुं शक्यते। न चैवं सति चन्द्रे वैशिष्ट्यस्यैव अनेन वाक्येन भानात्, संसर्गासङ्ग्यखण्डवाक्यार्थप्रमाऽजनकत्वेन अखण्डार्थत्वं कथमस्य वाक्यस्येति वाच्यम्। प्रथमतः चन्द्रे प्रकृष्टप्रकाशसंसर्गवैशिष्ट्यावगाहि चन्द्रविषयकावन्तरवाक्यार्थ-बोधस्य जातत्वेऽपि, ततः वाक्यलक्षणया द्वाभ्यां पदभ्याम् अखण्डार्थबोधस्य संसर्गानवगाहिनः प्रमारूपस्य जायमानत्वात् , तस्य च माहावाक्यार्थरूपेण स्वीकाराच्च अस्त्येवास्य वाक्यस्याखण्डार्थप्रतिपादकत्वम्। (पूर्णानन्दीयम्.पृ.131-132.)

In Public domain. Digitization Muthulakshmi Research Academy

एवमेव वेदेऽपि "सत्यं ज्ञानमनन्तं ब्रह्म" इति वाक्ये अन्यतः आनन्दपदोपसंहारवति सत्यपदेन अनृतत्वस्य, ज्ञानपदेन जाड्यस्य, उपसंहृतानन्दपदेन दुःखस्य च व्यावृत्ता प्रथमतः अनृतभिन्नम्, जडभिन्नं दुःखभिन्नं ब्रह्म इत्यावन्तरवक्यार्थबोधेऽपि, पश्चात् वाक्यलक्षणया ब्रह्मरूपाखण्डार्थबोधकत्वमस्तीति ब्रह्मणः अखण्डत्वप्रसिद्धेः अखण्डं ब्रह्म इत्याद्यनुमाने न पक्षाप्रसिद्धिः दोषः।

एवं समन्वयात् तात्पर्यविषयत्वादिति हेतुनिर्देशे "सदेवसोम्य इदमग्र आसीत्" इत्यादौ उपक्रमदिषड्विधतात्पर्यलिङ्गैः अखण्डस्य ब्रह्मणः तात्पर्यविषयत्वात् स्वरूपासिद्धिरपि नास्ति।(र.प्र.पृ.62.)

छान्दोग्यषष्ठाध्यायानुसरेण षड्विधतापर्यलिङ्गोपपादनम्-

1)उपक्रमोपसंहारौ 2)अभ्यासः 3)अपूर्वता 4)फलम् 5)अर्थवादः 6)उपपत्तिश्चेति षड्विधतात्पर्यलिङ्गानि। तेषु लिङ्गेषु उपक्रमोपसंहारौ इत्युभयमपि मिलित्वा एकं लिङ्गम्। उपक्रमोपसंहारयोः ऐककण्ठ्यमित्यर्थः।

1)उपक्रमः-"सदेव सोम्येदमग्र आसीत् एकमेवाऽद्वितीयम्" (छा.उ.6.2.1.)इत्यपक्रमः। "ऐतदात्म्यमिदं सर्वं तत्सत्यं स अत्मा तत्त्वमसि श्वेतकेतो"इत्यपसंहारः। पिता उद्दालाकः पुत्रं श्वेतकेतुमेवमुवाच। हे सोम्य ! हे प्रियदर्शन इदं सर्वं जगत्, अग्रे

In Public domain. Digitization Muthulakshmi Research Academy

उत्पत्तेः प्राक् काले सत् अबाधितं ब्राह्मैव असीत् इति प्रथमवाक्यस्य अर्थः। एवं एकमेवाद्वितीयम् इत्यत्र सन्ति त्रीणि अवधाराणार्थकानि पदानि एकम्, एव, अद्वितीयम् इति। तत्र एकपदेन सजातीयभेदः, एवपदेन विजातीयभेदः, अद्वितीयपदेन स्वगतभेदश्च व्यावर्त्यते। स्वगतभेदो नाम वृक्षे स्वावयवभूतानां पत्रशाखादीनां भेदः। स इवात्र तु ब्रह्मणः अवयवभेदः नास्ति, ब्रह्मणो निरवयवत्वात्। एवं च सजातीय-विजातीय-स्वगतभेदशून्यमित्यर्थः एकमेवाद्वितीयमिति वाक्याल्लभ्यते। एवं छान्दोग्यसद्विद्याप्रकारणे अबाधितसद्रूपं एकं ब्रह्म उपक्रम्य ऐतदात्म्यमिदं सर्वम् इति वाक्येऽपि एतदात्मस्वरूपं ब्रह्म उपसंहृतम्। एवं उपक्रमोपसंहारयोरैककठ्यात् अद्वितीये ब्रह्मणि तत्पर्यनिर्णयः।

2)अभ्यासः-उक्तस्यैवार्थस्य विशेषबुबोधयिषया कृतं पौनःपुन्यम्। पुत्राय श्वेतकेतवे पित्रा उद्दालकेन नवकृत्वः तत्त्वमसीत्युपदिष्टम्। एकैकस्मिन्पर्याये स्वापादुत्थितः जीवः स एव वा? अन्योवा?। प्रत्यगात्मा ब्रह्म चेत्कथमस्मिन् प्रत्यगात्मनि एतावदनन्तं जगन्निक्षिप्तम्? इत्यादयः सन्देहाः पुत्रस्य शिष्यस्य निवारिताः।

3)अपूर्वता-रूपादिहीनस्य ब्रह्मणः मानान्तरावेद्यत्वेन अपूर्वत्वमेव। तदेव तत्र श्रुत्या "अत्र वाव किल सत्सोम्य न निभालयसे" (छा.उ.6.12.2)इत्यादिश्रुत्या निभालनायोग्यस्य श्रुत्या अपूर्वतया उपन्यासात् अद्वितीयब्रह्मणः सङ्घाते स्थितस्य अपूर्वत्वमाविष्कृतम्।

In Public domain. Digitization Muthulakshmi Research Academy

4)फलम्-"तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ संपत्स्ये"(छा.उ.6.14.2) इति श्रुत्या ब्रह्मज्ञानात् मोक्षाख्यं फलं प्रकाशितम्। तस्य विदुषः तावदेव चिरम् तावानेव विलम्बः, यावन्नविमोक्ष्ये इत्यत्र विमोक्ष्ये इति उत्तमपुरुषान्तं विमोक्ष्यते इति परिवर्तनीयम्। एवं अथ संपत्स्ये इत्यत्रापि सम्पत्स्यते इति। एवं च विदुषः यावत्कालं देहपातो न भवति तावत् न विमोक्ष्यते अथ-देहपातानन्तरम्, विद्वान् ब्रह्मसम्पत्स्यते विदेहकैवल्यमनुभवतीति श्रुतिवाक्यस्यार्थः।

5)अर्थवादः-स्तावाकं निद्रकं वा वैदिकं वाक्यमर्थवादः यथा- "अनेन जीवेनात्मना अनुप्रविश्य नामरूपेन व्याकरवाणि" (छा.उ.6.3.2) इति श्रुत्या सृष्टेः प्राक् अप्रकटितनामरूपत्मना अवस्थितस्य जगतः प्राणधारयितृपरमात्माभावमापन्नेन प्रतीचा अनुप्रविश्य इदमेवहम् इति भावं प्राप्य, प्रकटीकरणं कुर्याम् इति सङ्कल्पः उक्तः। तत्र व्यापकस्य अनवच्छिन्नस्य प्रवेशवर्णनेन परमात्मा किमपि किमपि कर्तुं समर्थः इति वेद्यस्य परमात्मनः स्तुतिरुक्ता ।

6)उपपत्तिः-उपपादकयुक्तिः। अद्वितीयत्वेन परिज्ञातस्य ब्रह्मणः अद्वितीयत्वसर्वोपादनत्वादौ विश्वासलाभाय "यथा सोम्यैकेनमृत्पिण्डेनसर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भाणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा.उ.6.1.4) इति श्रुत्या यथा

In Public domain. Digitization Muthulakshmi Research Academy

घटशरावदीनां मृन्मूलानां मृद्रूपत्वं, घटादिनाम्नः, कम्बुग्रीवदिमद्व्यक्तिविशेषरूपार्थस्य च विकारत्वमेव, तथा सर्वस्य जगतः ब्रह्माधिष्ठानाकमायापरिणामत्वेन विकरत्वमेव, न घटादिविषये मृद इव सत्यत्वम्। सर्वजागत्परिणाम्युदानभूत-मायाधिष्ठानब्रह्मणस्तु विवर्तोपादानत्वम्। मृदतिरेकेण घटस्य अभाव इव, ब्रह्मव्यतिरेकेण प्रपञ्चस्य अभवोऽपि तया युक्त्या प्रदर्शितः। एवं षड्विधतात्पर्यलिङ्गैः वेदान्तैः अखण्डं ब्रह्मप्रातिपाद्यते। यत्र तु वेदान्ते तात्पर्यलिङ्गानि समस्तानि न दृश्यन्ते तत्र व्यस्तैरपि तात्पर्यलिङ्गैः तात्पर्यनिश्चयः। (र.प्र.पृ.62.)

ऋग्वेदादिवेदान्तेवाक्येष्वपि वेदन्तानां सिद्धब्रह्मणि तात्पर्यम् :-

र.प्र.प्र.:-एवं ऋग्वेदीय ऐतरेयोपनिषद्यपि "आत्मा वा इदमेकमेवाग्र आसीत्" (ऐ.उ.1.1.1.)इत्युपक्रमः। "प्रज्ञानं ब्रह्म"(ऐ.उ.3.3.) इति प्रज्ञाप्तिस्वरूपेण ब्रह्मणा उपसंहारः। "स एत मेव सीमानं विदार्य एतयाद्वारा प्रपद्यत" (ऐ.उ.1-3-12)इत्यर्थवादः। अत्र अत्मावा इत्यद्युपक्रमवाक्यस्यायमर्थः। अग्रे सृष्टेःप्राक् इदं विश्वं, 'एकम्, एव' इत्यत्र एकशब्देन सजातीयभेदः, 'नान्यत्किञ्चमिषत्' इत्यनेन विजातीयभेदः, एव शब्देन स्वागतभेदश्च व्यावर्त्यते। आत्मा वा इत्यत्र वा शब्दः च शब्दार्थः इत्यानन्दगिरिस्वामिनः। (ऐ.उ.आनन्दगिरीयम्.पृ.640) आत्मनः एकत्वे किमत्र समुच्चीयत इति शङ्कायां भाष्यकारैः ऐतरेयोपनिषदि आत्मा अप्नोतेः, अत्तेः,

In Public domain. Digitization Muthulakshmi Research Academy

अततेर्वा आत्मशब्दनिष्पन्नः इति व्याख्यातम्। तत्र च आप्नोतीत्यत्मा इति व्युत्पत्या सर्वज्ञत्वेन सर्वशक्तित्वेन व्याप्तः आत्मा, इत्यर्थः। आदत्त इत्यात्मा इति व्युत्पत्त्या, आत्मा 'ब्रह्म प्रत्यक्त्वेनादत्ते' इत्यर्थः। अत एव अशनायादि-सर्वसंसारधर्मविवर्जितः अह्रियमाणान्याभावात् इति लभ्यते। एवं अत्तीत्यनेन सर्वसंहर्तृत्वमुच्यते। एतत्त्रयं आत्मपदनिर्वचनात्, लभ्यत इति तत्त्रयमेवात्र आत्मावा इत्यत्र समुच्चयार्थकेन वाकारेणोक्तं समुच्चीयते इति भाष्यकारनन्दगिरिस्वामिनौ। एवमवधारणत्रयघटितोपक्रमेण अद्वितीयात्मलाभः।

"तदेतद्ब्रह्ममनपरमनन्तरमबाह्यं" अयमात्मा ब्रह्मसर्वनुभूः इति बृहदारण्यकद्वितीयाध्यायस्थमधुकाण्डोप संहारवचनमपि उपसंहाररूपतात्पर्यलिङ्गस्योदाहरणम्। तत् मायाभिः बहुरूपम्, एतत् अपरोक्षम्, अनपरम् कार्यरहितम्, अनन्तरम् न विद्यते जात्यन्तरमस्य इत्यनन्तरम्, एकरसम् एकस्वभावमित्यर्थः। अबाह्यम्-बहिर्भवं बाह्यम्, न विद्यते बाह्यम्। अद्वितीयमित्यर्थः। तदनन्तरोदाहृतवाक्येन च ब्रह्मणः अपरोक्षत्वं सामर्थ्यते। 'अयमात्मा' इति आत्मनः हृदयदेशे हस्तं निधाय प्रत्यक्षतो निर्देशः। स एतत् ब्रह्म। तच्च सर्वानुभूः सर्वानुभवस्वरूपम्। एवं चात्र मधुकाण्डे निर्विशेषं ब्रह्म चिन्मात्रमुपसंहृतम् शुक्लयाजुषोपनिषदि। तथा आथर्वणोपनिषद्यपि "ब्रह्मैवेदममृतं

In Public domain. Digitization Muthulakshmi Research Academy

पुरस्तात्" (मु.उ.2.2.11) यत् पुरस्तात् पूर्वदिग्वस्तुजातम्, इदं अब्रह्मेवाभाति, तत् ब्रह्मैकवस्तु विदुषाम् इत्यर्थः। भाष्ये आथर्वणश्रुत्युदाहारणन्तरं उपयुक्तेन इत्यादीनि इति पदेन। "सत्यं ज्ञानमनन्तंब्रह्म" इत्यादि वाक्यानि अखण्डब्रह्मपराणिगृह्यन्ते। (र.प्र.पृ.62.)

भाट्टपूर्वपक्षखण्डने सिद्धान्तयुक्तयः :-

शा.भा.- न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते, "तत्केन कं पश्येत्" (बृ.उ.2.4.13.) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छा.उ.6.8.7.) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्य-मानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः। हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः। न तु तथा ब्रह्मणः उपासनाविधिशेषत्वं सम्भवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानविमर्दोपपत्तेः। न ह्येकत्वविज्ञानेनोनमथितस्य द्वैतविज्ञानस्य पुनः सम्भवोऽस्ति, येनोपसनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत।

In Public domain. Digitization Muthulakshmi Research Academy

र.प्र.प्र. :- न च पूर्वोक्तोपक्रमादिलिङ्गैः सिद्धे ब्रह्मणि तात्पर्यनिर्णयेऽपि, वेदान्तानां कार्ययागादिपरत्वमप्यस्ति को दोषः? इति वाच्यम्। "यत्परः स शब्दार्थः" इति न्यायेन वाक्यस्य एकस्मिन्नेवार्थे तात्पर्यविषयभूते तात्पर्यकल्पनात्। श्रुतहानि अश्रुतकल्पनाप्रसङ्गात् इति भाष्येण समाधानम्। कर्मपरत्वे वेदान्तानां वाक्यार्थतया श्रुतस्य ब्रह्मणः हानम्, तात्पर्यविषयतया अश्रुतस्य कर्मणः परिकल्पनम् इति द्वौ दोषौ प्रसज्येयाताम्।

न च तेषां वेदान्तानां ब्रह्मप्रतिपादकत्वेऽपि, अर्थवादवाक्येषु कर्माङ्गदेवाताया इव, कर्माङ्गस्य कर्तुः ब्रह्मणा स्तुतेः प्रतिपादनात्, कर्तृस्वरूपप्रतिपादनमिति वाच्यम्। 'तत्तेन कं पश्येत्'? (बृ.उ.2.4.13) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। तत् तत्र-विद्याकाले, कःकर्ता? केन कारणेन कम् कं विषयं पश्येत् इति पूर्वोक्तश्रुत्यर्थात् अद्वितीयब्रह्मज्ञाने सति स्तुत्यस्यकर्तुरप्यभावात् कर्मतत्साधनानां नाशात् ब्रह्मणा कर्तुः स्तुतेरसम्भवात्। कर्मकाण्डे चेत् पुरुषस्य तादृशज्ञानाभावात्, तेषामर्थवादानां स्वार्थे फलाभवाच्च, कर्माङ्गदेवतादिस्तावकत्वं युक्तम्।

यत्तूक्तं ब्रह्मणः परिनिष्ठितवस्तुस्वरूपत्वेन सिद्धस्य च प्रामाणान्तरवेद्यत्वेन प्रत्यक्षादिविषयात्वापत्तेर्ब्रह्मणः न वेदार्थत्वं इति। तन्न। तत्त्वमासीति शास्त्रमन्तरेण आत्माभेदेन प्रत्येयस्य ब्रह्मणः अनवगम्यमानत्वात्। यदि च सिद्धत्वेन

In Public domain. Digitization Muthulakshmi Research Academy

मनान्तरवेद्यत्वमेवेत्याग्रहः भवद्भिः प्रदर्श्येत, तर्हि वयमपिप्रतिबन्दीयुक्त्यासध्यस्यापि धर्मस्य मानान्तरवेद्यत्वमस्त्विति वदामः। साध्ये पाकादौ मनान्तरवेद्यत्वदर्शनात्। यदि धर्मस्य वेदं विना मनान्तरवेद्यत्वं नास्ति, तर्हि ब्रह्मण्यपि वेदान्तैकवेद्यत्वस्य तुल्यत्वात्, वेदन्तिषु सिद्धस्य प्रामाणान्तरवेद्यत्वं नापादनीयम्। यदप्युक्तम् "हेयोपादेयरहितत्वात्"(भिन्नत्वात्) ब्रह्मणः उपदेशानर्थक्यमिति। न एषोऽपि दोषः, हेयोपदेयभिन्न ब्रह्मात्मतावगमादेव अविद्यारागादिसकलक्लेशप्राहाणात्, स्वस्वरूपानान्दलक्षणस्य पुरुषार्थस्य सिद्धेः। अन्यच्च यदप्युक्तं वेदान्तानां उपासनापरत्वमिति तत्र वयं पृच्छामः, किं प्राणपञ्चाग्न्याद्युपासनापराणां वेदान्तवाक्यानां उपासनापरत्वम्? उत "सत्यं ज्ञानमनन्तं ब्रह्म' तत्त्वमसी' इत्यादिवेदान्तानामपि? इति। प्रणाद्युपासनापराणां ज्येष्ठत्वश्रेष्ठत्वादिगुणफलकानां वाक्यानाम् उपासनापरत्वे न कश्चित् दोषः। सत्यं ज्ञानमित्यादिवेदान्तानां तु अनर्थनिवृत्तिफलानां स्वार्थतात्पर्यवतां उपासनापरत्वकल्पनं न युज्यते। एतदेव "देवतादिप्रतिपादनस्येत्यादिभाष्येणाविष्कृतम्। किञ्च पूर्वपक्षिणा ब्रह्मणः उपासनाविधिशेषत्वं प्रतिपद्यते वेदान्तेषु। किं तदर्थस्य ब्रह्मणः ज्ञानात्प्राक् उपासनाविधिशेषत्वम् उत ब्रह्मज्ञानात् ऊर्ध्वं वा? आद्ये समस्तगुणवतो ब्रह्मणः उपासनाविषयतया शेषत्वमिष्टमेव। न द्वितीयः। ज्ञानादूर्ध्वं न तथा

In Public domain. Digitization Muthulakshmi Research Academy

उपास्यदेवतावत् ब्रह्मणः उपासनाविधिशेषत्वं सम्भवाति। ब्रह्मणः एकत्वविज्ञानेन क्रियाकारकादिद्वैतविज्ञान स्योपमर्दात्। अहं ब्रह्मास्मीत्येकत्वविज्ञाने सति ब्रह्मणः हेयोपादेयशून्यतया, उपासनां प्रति कारणीभूतस्य उपास्योपसकलक्षणद्वैतभावस्य नशात्, फलाभवाच्च न उपासनाविधिशेषत्वं ब्रह्मणः। न च द्वैतविज्ञानस्य नाशेऽपि, संस्कारस्य सत्त्वात्, ब्रह्मणः उपासनाशेषत्वमस्त्विति वाच्यम्। न ह्येकत्वविज्ञानेनोन्माथितस्य (दृढ भ्रान्तित्वेन निश्चितस्य) द्वैतविज्ञानस्य सम्भवो अस्ति। यदा हि समूलं द्वैतविज्ञानस्य नाशः, तदा पुनः उपास्योपासकादिद्वैतविज्ञानस्य उदयः नास्ति, येन उपासनायां कारणस्य सत्त्वेन ब्रह्मणः उपासनाविधिशेषत्वं स्यात्। न च संस्कारेण जातं भ्रान्तित्वेन निश्चितं द्वैतविज्ञानं उपासनाविधिनिमित्तं भवति। (र.प्र.पृ.62-65.)

शा.भा.—यद्यप्यन्यत्र वेदान्तवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेत। तस्मात्सिद्धंब्रह्मणः शास्त्रप्रमाणकत्वम्।

र.प्र.प्र. :-**आत्मविज्ञानस्य फलवत्त्वेन वेदान्तानां स्वतः प्रामाण्यम्-**

यद्यपि, अन्यत्र अर्थवादादिस्थले वेदवाक्यानां विधिसंस्पर्शमन्तरेण विध्येकवाक्यतामनापद्य प्रमाणत्वं न दृष्टमित्युक्तम्, तथापि वेदान्तेषु

In Public domain. Digitization Muthulakshmi Research Academy

तथैव विधिवाक्यैकवाक्यतया प्रामाण्यं वक्तव्यमिति नास्ति नियमः। आत्मनि विज्ञानस्य फलपर्यन्तत्वात्, तद्विषयस्य फलकरणस्य शस्त्रस्य प्रामाण्यं न शक्यं प्रत्याख्यातुम् इति भाष्ये समाधानम्। 'व्यापकभावाद्व्याप्याभावः' इति न्यायेन व्यापकस्य क्रियार्थत्वस्याभावात्, व्यप्यप्रामाण्यस्याप्यभावः इति यदुक्तं तदपिन, वेदान्तानां फलवदज्ञाताबाधितब्रह्मरूपार्थबोधकत्वेन प्रामाण्यस्य व्यवस्थापयितुं शक्यत्वात्। यदि "वेदान्ताः न स्वार्थेमानम् अक्रियार्थत्वात्, 'सोऽरदीदित्यादि' वाक्यावदित्यानुमानमारच्येत, हेतौ निष्फलार्थकत्वमुपाधिं ब्रूमः। स्वार्थे प्रामाण्याभावरूपसाध्यवातिदृष्टान्तेऽर्थवादवाक्ये निष्फलार्थत्वरूपोपाधिरस्ति। अतः साध्यव्यापकत्वम्। अक्रियार्थत्वरूपसाधनवतितत्त्वमसीत्यादिवेदान्तवाक्येष्वनर्थनिवृत्तेः फलस्य सद्भावेन निष्फलार्थकत्वरूपोपाधिर्नास्तीति निष्फलार्थकत्वस्योपाधित्वम्। ततश्चतेन अक्रियार्थत्वरूपहेतोः व्याप्यत्वासिद्धम्।

ननु वेदप्रामाण्यं प्रतिव्यापकस्य अभावेऽपि प्रामाण्यं भवतु नाम। तथाऽपि क्रियार्थत्वाभावेन प्रामाण्यं दुर्विज्ञानं भवति। अतः वेदानां वेदान्तानां वा क्रियार्थत्वमिष्यते इति चेत्-न चानुमानगम्यंशास्त्रप्रामाण्यम् इत्यादिना भाष्ये समाधानम्। इदं जलम् इत्यादिलौकिकवाक्ये ज्ञानगतं प्रमाण्यं" जलं ज्ञानं प्रमा सफलप्रवृत्तिजनकत्वात् पूर्वोत्पन्नजलज्ञानवत्" इत्यनुमानेन

In Public domain. Digitization Muthulakshmi Research Academy

तद्गतदृष्टान्तेन च ग्राह्यं भवति। वेदप्रामाण्यं तु ज्ञानग्राहकसामग्र्या स्वत एव ज्ञायते। अतः अनुमानादिप्रमाणानपेक्षत्वात् वेदगतप्रमाण्यग्रहणे न क्रियार्थत्वादिलिङ्गापेक्षा, न वा अर्थवादप्रामाण्यादिदृष्टान्तापेक्षा। एतदेव भाष्ये 'येन अन्यत्र दृष्टं निदर्शनमपेक्षेत' इति वचनेन विवक्षितम्। येन-शास्त्रप्रमाण्स्य अनुमानगम्यत्वेन, अन्यत्र दृष्टं निदर्शनं अर्थवादिप्रामाण्य-दृष्टान्तमपेक्षेत इति तदर्थः। किञ्च चक्षुरादिवत् वेदस्य स्वतः प्रमाणत्वात्, न व्याप्ति-लिङ्ग-दृष्टान्तद्यापेक्षा। यदि च वेदवाक्ये कुत्रचित् प्रामाण्यसंशयः स्यात्, फलवदज्ञाताबाधितार्थतात्पर्यदेव सः निराक्रियते, न क्रियार्थत्वात्। यदि क्रियार्थत्वेनैव प्रामाण्यमित्याग्रहः 'कूपेनपतेत्' इत्यत्र क्रियायाः अभानात् तद्वाक्यस्य अप्राण्यापत्तिः। कूपेपतेदितिवाक्यस्य प्रामाण्यं च प्रसज्येत। तस्मात् समन्वयात् फलवदज्ञाताबाधितार्थे तात्पर्यनिश्चयात्, ब्रह्मणः शास्त्रप्रामाणकत्वम्। यथा फलवदज्ञातार्थत्वेन विधिवाक्यानां प्रामाण्यम्, एवं वेदान्तानामपीति वेदान्तानां प्राधान्येन सिद्धब्रह्मबोधनमिति भाट्टमतविदलनात्मक-वेदान्तसिद्धान्तः।। (र.प्र.पृ.65.)

इति

चतुस्सूत्रीशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशसमन्वयाधिकरणस्य

अष्टमं वर्णकं भाट्टमततन्निरासात्मकंसमाप्तम्

In Public domain. Digitization Muthulakshmi Research Academy

नवमवर्णकोपक्रमः वृत्तिकारमतोपस्थापानम्:-

शा.भा.-अत्रापरे प्रत्यवतिष्ठन्ते। यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्मसमर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि शास्त्रेण समर्प्यन्ते तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रास्य।

र.प्र.प्र.:- **भाट्टवृत्तिकारमतयोर्भेदः:-** एतावता सन्दर्भेण सिद्धार्थे पदानां सङ्गतिग्रहम् इच्छाताम्, भाट्टमीमांसकानां मतं निरूपितम्। भाट्टमीमांसकमतनिरासोपसंहारे 'भाट्टनां ब्रह्मनास्तिकाना'मिति विशेषणं दत्तं रत्नप्रभायाम्। सिद्धार्थे यदि भाट्टाः शक्तिं स्वीकुर्वन्ति, तर्हि ब्रह्मापि सिद्ध एव अर्थः इति कृत्वा ते कथं ब्रह्मनास्तिकाः?-- इति किञ्चित् विचारणीयम्। यदि ब्रह्मणः सर्वात्मना वेदान्तपदवाच्यत्वं नाभ्युपगच्छन्ति, तर्हि यजेत इत्यादौ कर्तुः केन स्तुतिं कुर्वन्ति? अन्यच्च उपासनाविधिष्वपि ब्रह्मणः अनभ्युपगमे कथं ब्रह्मणः उपास्यत्वम् ? इति शङ्का अस्त्येव। किञ्च"मोक्षकामः असद्ब्रह्माभेदमारोप्य अहं ब्रह्मास्मीत्युपासीत" इत्युपासनाविधिप्रस्तावे रत्नप्रभायां (र.प्र.पृ.59) मोक्षकामे असद्ब्रह्माभेद एव अभ्युपगतः। किमिदमसत्त्वं ब्रह्मणि? उत ब्रह्मभेदे? इति विचारे सुलभतया मोक्षकामस्य ब्रह्माभेदः असन्नति वक्तुं शक्यते। यतः भाट्टाः अपि द्वैतिनः। किन्तु "यद्यपि भाट्टमते ब्रह्म असदेव तथापि जीवे तदभेमरोप्य" इति (पूर्णानन्दीयम्.पृ.126) पूर्णानन्दीयोल्लेखात् भाट्टमते ब्रह्म असन्,

In Public domain. Digitization Muthulakshmi Research Academy

मोक्षकामे तदभेदोऽप्यसन् इति ज्ञायते। यदि ब्रह्मणः असत्त्वम् ,तर्हि शून्यार्थे वेदान्तपदीयशक्तिग्रहस्वीकारात्, भाट्टनां मतस्य शून्यवादे प्रवेशः स्यात्। असतो ब्रह्मणः तुच्छस्य उपासनाविध्यङ्गत्वमपि कथमम्? इति शङ्का समुदियाच्च। अतः कर्तृस्तुत्यर्थं साधनी भूतस्य, उपासनाविषयस्य च लाभाय पदार्थतया अवश्यं ब्रह्मस्वीकरणीयमेव, न तु वाक्यार्थतया। भाट्टमते क्रियाविषयकभावनायाः वाक्यार्थत्वात्। अतः रत्नप्रभोक्तब्रह्मनास्तिकपदस्य वाक्यार्थतया प्राधान्येन ब्रह्म नास्तित्वाभ्युपगन्तृत्वपरमिति सम्भावनं युक्तमित्युत्पश्यामः। कार्यान्वितशक्तिवादिनां वृत्तिकारादीनां प्राभाकराणां मते पदानां स्मारकताशक्तेस्सत्वेऽपि, आनुभाविकताशक्तेरभावात् सिद्धं ब्रह्मवेदान्ततत्पदवाच्यतयानास्ति। किन्तु 'अहं ब्रह्मास्मी'ति वाक्यस्य विधिसंनिधौ आनयनात्, उपासनाविधेर्विषयापेक्षया कार्यविध्यङ्गतयाप्रतीतस्य प्रत्यग्ब्रह्मरूपस्य पदार्थस्य आक्षेपतो लाभः। "प्रत्यगभिन्नं ब्रह्म उपासीत" इत्याद्युपासनावक्यार्थे वेदान्त्यभिमतस्य प्रत्यगभिन्नब्रह्मणः भानमिति भाट्टप्रभाकरमतयोर्भेदः। एवमपि तस्य न प्राधान्येन भानम्, अपि तु कार्योपासनाशेषतया इत्यभिप्रायेण कार्यान्वितशक्तिवादि-प्राभाकरैकदेशिनां वृत्तिकारादीनां मतमिदानीम्

 In Public domain. Digitization Muthulakshmi Research Academy

'अत्रापरेप्रत्यवतिष्ठन्ते' इत्यादिना अवतारयन्ति भाष्यकाराः। (र.प्र.पृ.65.66.)

वर्णकान्तराधिकरणरचना :- 1)विषयः :- वेदान्ताः। 2)संशयः वेदान्ताः किमुपासनाविधिशेषत्वेन ब्रह्मबोधयन्ति? उत स्वातन्त्र्येण? इति। संशायकं बीजं तु सिद्धे पदानां व्युत्पत्तिग्रहा (सङ्गतिग्रहा)ऽभावात् प्राधान्येन ब्रह्मबोधकत्वाभावः। यदि सिद्धेअर्थे सिद्धान्तरीत्या सङ्गतिग्रहः स्वीक्रियेत, तर्हि वेदान्तानां ब्रह्मपरत्वमपि सिध्यति। एवं सिद्धार्थे व्युत्पत्तिभवाभावौ संशायकौ। 3)पूर्वपक्षः- उपासनाविधिशेषत्वेनैव वेदान्तानां ब्रह्मप्रतिपादकत्वमिति पूर्वःपक्षः। 4)सिद्धान्तः- क्रियासम्बन्धंविना असङ्गस्य कूटस्थस्य ब्रह्मणः प्रत्यगात्मत्वेन ज्ञानमेव वेदन्तेभ्यो भवति, न तु उपासनाविधिशेषस्य ब्रह्मणः ज्ञानम्। 5)फलम्- उपासनातो मुक्तिरिति पूर्वपक्षस्य फलम्। सिद्धान्ते तु तत्त्वज्ञानदेव फलं मुक्तिः।(र.प्र.पृ.66)

यूपाहवनीयादीनामिव ब्रह्मणः कार्यशेषतयैव बोधः र.प्र.प्र. :- यद्यपि शास्त्रप्रामाणकं ब्रह्म अभ्युपगच्छामः, तथापि प्रतिपत्तिविधिविषयतयैव वेदान्तैः ब्रह्मप्रतीयते। प्रतिपत्तिर्नाम उपासना। विधिः, नियोगः, कार्यम् इत्यादिपदानि पर्यायपदानि। तत्र विधेः नियोगस्य कः विषयः? इत्युक्ते प्रतिपत्तिशब्दशब्दितोपासनैव विषयः। अस्याः उपासनायाः कः

In Public domain. Digitization Muthulakshmi Research Academy

विषयः इत्युक्ते 'सत्यं ज्ञानमनन्तंब्रह्म' इति ब्रह्मविधिपरैः ब्रह्मतत्पर्यकैः समर्प्यमाणं ब्रह्मैव। विधिपरैः वाक्यैः कथं सिद्धस्य वस्तुनः लाभः इत्युक्ते भाष्ये "यूपाहवनीयादीनि अलौकिकाकन्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत्" इत्युक्तम्। तथाहि "यूपे पशुं बध्नाति" इति वाक्ये यूपे पशुबन्धनं विहितम्। तत्र यूपपदस्य कोवा अर्थः? इति जिज्ञासायां लोके यूपपदस्य शक्तिग्राहकव्यवहाराभावात् "यूपं तक्षति" "अष्टाश्री करोति" इति श्रुतेः तक्षण-अश्रीकरणादिदृष्टसंस्कारेण, अदृष्टसंस्कारेण च संस्कृतः दारुविशेषः यूप इति ज्ञायते। यदाहुः मीमांसकाः "दृष्टादृष्टसंस्कारगणोयूपः" इति। एवं च "यूपे पशुं बध्नाति" इति विधौ यूपशब्देन लोके अप्रसिद्धोऽपि वैदिकप्रसिद्धिमापन्नः तक्षाणादिसंस्कृतदारुविशेषः बन्धनक्रियाविधिना आक्षिप्तस्सन्, यथा सिद्धोऽपि पदार्थः बन्धनकार्ये अन्वयित्वेन आधारतया अन्वयित्वेन प्रतिभाति, एवमेव "ब्रह्मवेद ब्रह्मैव भवति" इत्याद्युपासनाविधिपरेषु वाक्येषु विधिविषयज्ञानाङ्गतया 'अहं ब्रह्मास्मी'ति वाक्यान्तरं विधिना आक्षिप्तं सत् सिद्धमपि ब्रह्म विधिवाक्यजन्यबोधे कार्ये विषयतया भासते। "आहवनीये जुहोति"(तै.ब्रा.1.1.10.5.) इति वक्येऽप्याहवनीयपदस्य लोके कस्मिंश्चित् अर्थविशेषे प्रसिद्ध्यभावेऽपि, 'अग्नीनादधीत'- इति आग्न्याधानविधिना संस्कृतः यः अग्निविशेषः सः आहवनीयपदवाच्य इति,

In Public domain. Digitization Muthulakshmi Research Academy
होमक्रियाकार्यतासम्बन्धात्, सिद्धोऽप्याहवनीयः आधारतया विधीयते। एवं 'इन्द्रं यजेत' इत्यत्र इन्द्रशब्दस्य कः देवाता विशेषः अर्थः? इति जिज्ञासायां 'वज्रहस्तः पुरन्दरः' इत्यद्यर्थवादैः "इन्द्रं यजेत" इति विधिविधेययागोद्धेश्यस्य देवताविशेषस्य इन्द्रस्य स्वरूपप्रकाशनात् सिद्धमपिवस्तु यजेत इति विधिना आक्षिप्यते। एवं विधिपरवाक्येषु शुद्धवस्तुतात्पर्यमपि स्वोपपादकतया अवश्यं अङ्गीकर्तव्यम्। अयमेवाभिप्रायः "आहवनीयादीन्यलौकिकान्यपि विधिशेषतया" इत्यादिभाष्यवाक्ये अपिशब्देन सूचितः। प्रमाणान्तरज्ञातान्यपि शेषतया उच्यन्ते, न प्रधानत्वेन। अतो न वाक्यभेदः प्राधानार्थभेदस्यैव वाक्यभेदप्रयोजकत्वात्। प्रकृते च कार्यान्वितशक्तिवादे सिद्धस्य प्रत्यागभिन्नब्रह्मणः कार्यशेषत्वेन उपासनाकार्यस्य च प्राधान्येन अभ्युपगमेन वाक्यभेदाभावात्। (र.प्र.पृ.66-67.)

कार्यान्वितशक्तिवादे युक्तिः:- ननु पदानां वाक्यस्थानां कर्यान्विते शक्तिरयुक्ता। अत्र च उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गैः ब्रह्मण एव प्राधान्येन सिद्धत्वात्, कुतस्तस्य विधिशेषत्वमिति? शङ्का "कुत एतत्" इत्यादिनाभाष्यकारैः क्रियते। "प्रवृत्तिनिवृत्ति-प्रयोजनत्वाच्छस्त्रस्य" इति भाष्यकारणांवृत्तिकारपक्षतः समाधानम्। तथाहि शास्त्रतात्पर्यनिर्णयोऽपि न केवलं षडविधतात्पर्यलिङ्गैः कर्तुं शक्यते, किन्तु वक्यस्थपदानां

In Public domain. Digitization Muthulakshmi Research Academy

वृद्धव्यवहारेण। लोके वृद्धव्यवहारात् श्रोतुः प्रवृत्तिनिवृत्ती जायेते। यतः तदुद्देश्येनैवहि वाक्यप्रयोगः। एवं शास्त्रस्यापि प्रवृत्ति-निवृत्ती एव प्रयोजने। ते च कथं भवतः इत्युक्ते ते कार्यज्ञानजन्य एव। अतश्च शास्त्रफलस्य प्रवृत्तिनिवृत्त्यन्यतरस्य कार्यताज्ञानजन्यत्वात् सिद्धपदघटितेभ्यः वक्येभ्यः कार्यातायाः अप्रतीतेः लिङ्-लोट्-तव्यत् एतदन्यतमघटितवाक्यादेव कार्याताप्रतीतेः जायमानत्वात्, वाक्यस्य कार्यपरत्वम्। वाक्यस्थपदानां च कार्यान्वितस्वार्थपरत्वं च अवश्यमभ्युपेयम्। लोके शाब्दः व्यवहारः प्रयोजक-प्रोयोज्यवृद्धाभ्यां प्रचलति। तत्र प्रयोजकवृद्धेन 'घटमानय' इत्युक्ते प्रयोज्यवृद्धः घटमानयति। एतद्व्यवहारं परिशीलयन् व्युत्पित्सुः बालः' घटानयनरूपं कार्यं घटमानये'ति शब्दप्रयोज्यमिति घाटमानयेत्यादिवाक्यस्थ घटादिपदनां कार्यान्वित-अनयानान्वितघटे शक्तिरितिच गृह्णाति। एवं वेदेऽपि 'ब्रह्म वेद ब्राह्मैव भवति' इत्याद्युपासनावाक्येषु "ब्रह्मभावकामः प्रत्यगभिन्नब्रह्मोपासनं कुर्यात्" इत्युपासनायां कार्यताबोधः, प्रत्यगभिन्नब्रह्मणश्च तद्विषयतया भानमिति वेदान्तवाक्यस्यापि प्राधान्येन कार्यतपरत्वमेव। (र.प्र.पृ.67.)

शा.भा.:-तथाहि शास्त्रतात्पर्यविदः आहुः 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति। 'चोदनेति क्रियायाः प्रवर्तकं वचनम्'। 'तस्य ज्ञानमुपदेशः' (जै.सू.1.1.5.) 'तद्भूतानां क्रियार्थेन समाम्नायः'

 In Public domain. Digitization Muthulakshmi Research Academy

(जै.सू.1.1.25) 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै.सू.1.2.1.) इति च। अतः क्वचिद्विषयविशेषे प्रवर्तयद्विषयविषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्, तच्छेषतया- चान्यद्युक्तम्, तत्सामान्याद्वेतान्तानामपि तथैवार्थवत्त्वं स्यात्। सति विधिपरत्वे यथा स्वर्गकामस्याग्निहोत्रादिसाधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम्।

कार्यन्वितशक्तिवादस्य जैमिनसूत्रभाष्यारूढत्वम् :-

र.प्र.प्र :- अत्र च भाष्यग्रन्थे भाष्यकाराः 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इत्यादि शबरस्वामिवचनमादाय शास्त्रस्यकार्ये कर्मणि भावनायां तत्पर्यम् इति, समनन्तरमेव 'चोदनेति क्रियायाः प्रवर्तकं वचन'मिति वाक्येन अवबुध्यमाने कर्मणि चोदनायाः प्रमाण्यं निरूपयितुं प्रवृत्ताः। 'तस्य ज्ञानमुपदेशः' इति जैमिनिसूत्रांशः भाष्यकारैः उदाहृतः। पूर्वमीमांसायां चोदानायाः प्रामाण्यंनिरूपयितुं "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इत्युक्त्वा' तस्य ज्ञानमुपदेशः' इति जैमिनिरचार्यः सूत्रितवान् (जै.सू.1.1.5.)। अव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणम् इति सूत्रस्य परिशिष्टो भागः।

अयमाशयः- धर्मविषये प्रत्यक्षस्य अनिमित्तत्वेऽपि, शब्दश्चोदानात्मकः प्रमाणमित्युक्तम्। शब्दादर्थप्रत्ययस्य सङ्गतिग्रहसापेक्षत्वेन, तस्य च पुरुषाधीनतया चोदनात्मकस्य

In Public domain. Digitization Muthulakshmi Research Academy

शब्दस्य अप्रमाण्ये प्रसक्ते, शब्दस्य अर्थेन सह विद्यमानः वाच्यवाचकभावसम्बन्धः न सङ्केतयितृपुरुषसपेक्षः, किन्तु औत्पत्तिकः। नाम स्वाभाविकः नित्यः। तथा च नित्यः शब्दर्थसम्बन्धः अस्त्येवेति, नास्ति तत्र पुरुषापेक्षेति चोदनायाः प्रामाण्यम्। ननु तथापि शब्दार्थयोःसम्बन्धस्य नित्यत्वेन चोदनायाः इतरानपेक्षातया प्रामाण्येऽपि, संबन्धज्ञानस्य उपदेष्टृपुरुषसापेक्षत्वेन पुनः चोदनात्मकस्य वेदस्य अप्रामाण्यमेवेति शङ्कायां 'तस्य ज्ञानमुपदेशः' इति सूत्रभागः समधानाय प्रवृत्तः। तस्य स्वाभाविकस्य सम्बन्धस्य नित्यस्य ज्ञानम्-ज्ञापकं वचनं उपदेशः-आप्तोपदेशः। एवं च आप्तोपदेशः शब्दार्थसम्बन्धज्ञापक एव न कारक इति पुरुषधीनकृत्यपेक्षायाः अभावात् चोदनायाः प्रामाण्यम्। एवं च 'प्रमाणभूता चोदना' इत्यर्थनिरूपणाय भाष्यकारैः एतत् सूत्रभगः उदाहृतः। ततः "तद्भूतानां क्रियार्थेन समाम्नायः अर्थस्य तन्निमित्तत्वात्" (जै.सू. 1.1.25) "आम्नायस्य क्रियार्थात्वादानर्थक्यमतदार्थनाम्" (जै सू 1.2.1.) इति सूत्रद्वयं तु कार्यान्वितशक्तिवादव्यवस्थापनाय उदाहृतं भाष्यकरैः। भाष्ये-शास्त्रतात्पर्यविदः इत्युक्ते जैमिनीयसूत्रभाष्यकाराः शबरस्वामिनः इत्यर्थः। तैः प्रथमवाक्येन वेदस्य कर्मावबोधः प्रयोजनमित्युक्तम्। तैरेव चोदनापदस्य चोदनेति क्रियायाः प्रवर्तकं वचनमिति व्याख्यातम्। रत्नप्राभायान्तु क्रियायाः नियोगस्य ज्ञानद्वारा प्रवर्तकं

 In Public domain. Digitization Muthulakshmi Research Academy

वाक्यं चोदना इति विवरणात् क्रिया, कार्यम्, नियोगः, विधिः, धर्मः, अपूर्वम् इति शब्दैः व्यवह्रियमाणं कार्यमेव वेदर्थ इति शबरस्वामिनां वचनस्य तात्पर्यमाविष्कृतम्। भष्योदाहृतस्य'तस्य ज्ञानमुपदेशः'- इति वाक्यस्य तु रत्नप्रभायां एवं विवरणं दत्तम्। तस्य धर्मस्य ज्ञानं ज्ञापकं अपौरुषेयं विधिवाक्यं उपदेशः तस्य धर्मेण अव्यतिरेकात् इति व्याख्यातम्। वस्तुतः इदं स्वतान्त्रव्याख्यानमाभाति। सूत्रैकदेशे तस्य इत्यत्र तत्पदेन तसूत्रे एव उक्तस्य स्वाभाविकसम्बन्धग्रहणस्यैव न्याय्यत्वात्। तस्य सूत्रैकदेशस्य प्रङ्गस्तु चोदनायाः प्रामाण्यव्यवस्थापनाय इति तु प्रागेव उक्तम्। 'तद्भूनां क्रियार्थेन' इत्यादिसूत्रं तु वेदस्य अर्थप्रत्यायकत्वाधिकरणान्तर्गतम्। तत् तेषु पदार्थेषु, भूतनाम् वर्तमानानां पदनां क्रियार्थेन कार्यवचकलिङादिपदेन समाम्नायः सह पाठः, अर्थस्य तन्निमित्तत्वात् वाक्यार्थप्रतिपत्तेः पदार्थप्रतिपत्तिनिमित्तकत्वात् इति तद्वाक्यार्थः। वाक्यस्थैः पदैः तत्तपदार्थानां स्मारणेऽपि, तैः वाक्यप्रतिपत्त्यर्थं कार्यवाचकपदेन सह पाठः। एवं च कार्यातबोधकलिङादिपदसान्निध्यात् पदैः शक्त्या पदार्थानामपस्थापनेऽपि, लक्षणया वाक्यार्थबोधः। बोध्यसम्बन्धस्य वाक्यर्थे सत्त्वात्। तदर्थं च कार्यवाचकलिङादिपदापेक्षा इति सूत्रार्थः। एवं कार्यान्वितशक्तिवादः जैमिनिसूत्रारूढः, भाष्यतात्पर्यविषयश्च। (र.प्र.पृ.67-68.)

In Public domain. Digitization Muthulakshmi Research Academy

जैमिनिभाष्यकारोक्तिभ्यां पर्यवसितपूर्वपक्षः :-अतः पुरुषमित्यादि भाष्यम्। यतः सूत्रभाष्यकाराः वाक्यस्थ -पदानांलिङादिसम्बन्धेन कार्यान्वितशक्तिमाहुः,अतःपुरुषं क्वचित् विषयविशेषे पुरुषं प्रवर्तयत् ,कुतश्च निवर्तयत् विधिनिषेधबोधकमेव शास्त्रम्। तच्छेषताया-विधि-निषेधशेषतया अन्यत् अर्थवादादिकमुपयुक्तम्। तत्सामान्यात्-कर्मविधायकशास्त्रेण शास्त्रत्वसादृश्यात् ,वेदान्तानामपि कार्यपरत्वेनैनैवर्थवत्वं न प्राधान्येन सिद्धब्रह्मबोधकतया-इति वृत्तिकारपूर्वपक्षः।

ननु 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्याद्यग्निहोत्रहोमकार्यपरे वाक्येकार्यस्य नियोगस्य, स्वर्गकमात्मकनियोज्यस्य च सद्भावात् कार्यप्रतीतिः भवतु नाम, "अहं ब्रह्मास्मीति" वाक्ये कार्यता प्रतीत्यर्थं उपासीत इत्यध्याहारेऽपि कर्योपासनायां नियोज्यस्याभावात् कथं कार्यता बोधः? इति शङ्कायां "एवममृतत्व कामस्य ब्रह्मज्ञानं विधीयत इति युक्तम्" इति भाष्ये वृत्तिकृन्मतानुसारेण सामाधानम्। अहं ब्रह्मास्मी -त्याद्युपासनापरवाक्ये नियोज्यादर्शनात् अमृतत्वकामः- इति नियोज्यपदकल्पनम्। "ब्रह्मवेद ब्रह्मैव भवति इत्यादौ तु कामपदमत्राध्यहारकल्पनं ब्रह्मभवनपदस्य सद्भावात्। (र.प्र.पृ.68.)

In Public domain. Digitization Muthulakshmi Research Academy

वेदान्तिकृतशङ्कानां वृत्तिकारोक्तसामाधानम्:-

शा.भा.--नन्विह जिज्ञासावैलक्षण्यमुक्तम्- कर्मकाण्डे भव्यो धर्मः जिज्ञास्यः,इह तु भूतं नित्यनिर्वृत्तं ब्रह्मजिज्ञास्यमिति। तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानं फलं भवितुमर्हति। नार्हत्येवं भवितुम्। कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्। "आत्मा वा अरे द्रष्टव्यः" (बृ.उ.2.4.5.)"य आत्मा अपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छा.उ.8.7.1.0) "आत्मेत्येवोपासीत"(बृ.उ.1.4.7.)"आत्मानमेव लोकमुपासीत" (बृ.उ.1.4.15.)"ब्रह्म वेद ब्रह्मैव भवति" (मु.उ.3.2.9) इत्यादिविधानेषु सत्सु 'कोऽसावात्मा?''किं तद्ब्रह्म'? इत्याकांक्षायां तत्स्वरूपसमर्प -णेन सर्वे वेदान्ता उपयुक्ताः-"नित्यः सर्वज्ञःसर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म" इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टः मोक्षःफलं भविष्यति। कर्तव्य-विध्यननुप्रवेशे वस्तुमात्रकने हानोपादानासम्भवात्, 'सप्तद्वीपा वसुमती''राजासौ गचछती'त्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात् ।ननु वस्तुमात्रकथनेऽपि 'रज्जुरियं नायं सर्प' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं, तथेहाऽप्यसंसार्यात्म-वस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवम्, यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिः ब्रह्मस्व -

In Public domain. Digitization Muthulakshmi Research Academy

रूपश्रवममात्रेण निवर्तेत,नतु निवर्तते, श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारित्वधर्मदर्शनात्। "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ.उ.2.4.5.) इति श्रवणोत्तरकालयोर्मनन-निदिध्यासनयोर्विधिदर्शनात्। तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।।

र.प्र.प्र. :-इतः परं भाष्यकारैः 1)जिज्ञास्यवैलक्षण्यनिर्वाहाय कार्यान्वितशक्तिवादःत्यागः कर्तव्यः इति शङ्कायाः वृत्तिकृतां सामाधानम्, 2)ब्रह्मणः ज्ञानात्मकोपासनाविधिशेषत्वनिर्वाहाय विविधश्रुत्युद्धारः 3)ततः वस्तुमात्रकथनस्यापि अनर्थनिवर्तकत्वेन प्रामाण्यमिति वेदान्तिकृतशङ्कायाः वृत्तिकारपक्षेण निरासश्च वृत्तिकृन्मतपूर्वपक्षपरे भाष्ये प्रधानविषयाः।

ननु तथापि वेदान्तानां कार्यपरत्वं नाभ्युपगन्तुं शक्यते। यतः धर्मब्रह्मजिज्ञासासूत्रकाराभ्यां इह काण्डद्वये अर्थभेदः उक्तः। कर्मकाण्डे भव्यो धर्मः जिज्ञास्यः, इह तु वेदान्तशास्त्रे नित्यनिर्वृत्तं ब्रह्मजिज्ञास्यमित्युक्तम्। विधिकाण्ड इव ब्रह्मकाण्डेऽपि कर्यस्यैव शास्त्रार्थत्वे, शास्त्रभेदानुपपत्तेः, काण्डद्वये च जिज्ञास्य भेदाभ्युपगमे फलवैलक्षण्यमप्यवश्यं वाच्यम्। धर्मज्ञानं अनुष्ठानसापेक्षं अभ्युदयफलसाधकं ब्रह्मज्ञानं तु अनुष्ठाननिरपेक्षमेव अनर्थनिवृत्तिं साधयति। यदि मुक्तिफलोद्धेश्येन ब्रह्मज्ञानं अनुष्ठेयतया विधीयेत, तर्हि मुक्तेः विधेयक्रियाजन्यत्वेन स्वर्गदेरिव अनित्यत्वं स्यात्। अतः

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानविधिर्नयुक्तः- इति, वेदान्तिकृता शङ्का भाष्ये-"नन्विह जिज्ञासावैलक्षण्यम्"इत्यारभ्य "भवतितुमर्हति" इत्येतत्पर्यन्तं कृता। नार्हत्येवंभवितुमित्या -दिना—समाधानञ्च,वृत्तिकृताम्।

1.जिज्ञासावैलक्षण्यनिर्वाहायापि न कार्यान्वितशक्तिवादपरित्यागः-

"कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमनत्वात्"। ब्रह्मज्ञानविधेरेव प्रतिपाद्यमानत्वात्-इति तदर्थः। सर्वासु उपनिषत्सु नैके ब्रह्मज्ञानविधयःउपलभ्यन्ते। तद्यथा-'आत्मावारे द्रष्टव्यः ''सोऽन्वेष्टव्यः 'इत्यादिना। यदि एभिरपि वेदान्तैःआत्माज्ञानमनुष्ठेयतया विधीयते, तर्हि कर्मकाण्डात् ज्ञानकाण्डस्य अविशेषः प्रसज्येतेति प्रागुक्तं किल? स्वर्गादेः यागविषयककार्यभावनासाध्यत्वे तत्फलमनित्यं स्यात्। अविधेयज्ञानाभिव्यङ्ग्यायाः मुक्तेस्तु वेदन्तिमते नित्यत्वं सेत्स्यति इति चेत् सर्वत्र कार्यविधिप्रयुक्तार्थवत्त्ववादिनामस्माकम् अयमविशेषः अभीष्ट एव। अस्मन्मते च कार्यविधिप्रयुक्तं स्वर्गादिफलम्। ज्ञानविधिप्रयुक्तस्तु मोक्षः इति तावता जिज्ञासा-तद्विषयफलानां भेदः सिध्यति। अत एव ब्रह्मज्ञानविचारार्थं पृथक् शास्त्रारम्भः। भवदभिमतः प्रत्यक्ब्रह्माभेदोऽपि ज्ञानविधिपरेषु वाक्येषु सिद्धयतीति, तेन सर्वानर्थनिवृत्तिसिद्धेः अस्मन्मते वाक्यमर्यादोल्लङ्घनमपि न भविष्यति इत्याशयेन वृत्तिकृन्मतानुसारेण

In Public domain. Digitization Muthulakshmi Research Academy

नार्हत्येवं भवितुमित्यादिना भाष्यकारैः समाहितम्। (र.प्र.पृ.68-69.)

2) ज्ञान विधित्वपरविविधश्रुत्युद्धरणं वृत्तिकृन्मतानुसारेणः-

अ)आत्मादर्शनविधायकेषु वाक्येषु 'आत्मावारेद्रष्टव्यः' (बृ.उ.2.4.5)इति वाक्यमेकम्।"अरे मैत्रेयि आत्मावै द्रष्टव्यः" इति दर्शनात्मकज्ञानकार्यताविधौ आत्मा विषयतया वृत्तिकृन्मतानुसारेण प्रतिपाद्यते।

आ)एवं "य आत्मा अपहतपाप्मा...सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छा.उ.8.71)यच्छब्देन अपहतपाप्मत्वादि-गुणाष्टकोपेतः, यस्य उपासनया उपलब्ध्यर्थं हृदयपुण्डरीकं स्थानतया उक्तम्, इत्याद्यर्थः ग्राह्यः।"सः आत्मा अन्वेष्टव्यः "शास्त्राचार्योपदेशैः ज्ञातव्य इत्यर्थः। सः, विजिज्ञासितव्यः-दीर्घकाल-नैरन्तर्य-सत्कारपूर्वकमानसव्यापारापरपर्यायध्यानेन विषयीकर्तव्यः अर्थः।

इ)"आत्मेत्येवोपासीत" (बृ.उ.1.4.7) इत्यन्यत् कार्योपासना सम्बन्धेन आत्मबोधकं वाक्यम्। अस्य वाक्यस्याऽयमभिप्रायः। सृष्टेः प्राक् अव्याकृतात्मना अवस्थितः आत्मा, असौनामा, इदं रूपमिति व्याक्रियते। स एवाऽनखाग्रेभ्यःकार्यकरणसङ्घाते क्षुरधाने क्षुर इव एकत्र,(विश्वम्भरः-अग्निः)विश्वम्भरकुलाये अग्निनीडे काष्ठादाविव सर्वतश्च, प्रविष्टः।अत एव जनाः तं न जानन्ति।तम्-

In Public domain. Digitization Muthulakshmi Research Academy

प्राण-वाक्-श्रोत्र-मनस्सु अन्यतमं वदामश्चेत्, सः अकृत्स्न एव भवति। अत एव एतेषु यः एकैकमुपस्ते सः अकृत्स्नविदेव भवति। अतश्च अन्यतमस्मिन् आत्मत्वोपासनां परित्यज्य, कृत्स्नात्मा एव उपासनीयः इति बृहदारण्यके आत्मेत्येव उपासना कर्तव्या इत्युक्तमिति वृत्तिकृन्मतेनास्यार्थः। एवं च कार्योपसनाविधिशेषत्वमेव कृत्स्नात्मनः प्रतिपदितमिति, न प्राधान्येन आत्मनः ज्ञानम्। (बृ.उ.1.4.7)।आत्मेत्येवेत्यदिवाक्ये एवकारस्तु अकृत्स्नोपासनाव्यावृत्यर्थः।

ई)एवम्"आत्मनमेव लोकमुपासीत"- इति श्रुतिः।(बृ.उ.1.4.15) इति बृहदरण्यके "स य आत्मानमेव लोकमुपस्ते नहास्य कर्मक्षीयते"इत्येव वाक्यम्।ततः कल्पितं भाष्ये उद्धृतं श्रुतिवाक्यम्। अयं तु सन्दर्भः। तदेतत् सृष्टं चातुर्वर्ण्यम्,ब्रह्मक्षत्रं विड्शूद्र इति।तत्र देवेषु ब्रह्मणजातेरभावात् ब्रह्म अग्निरूपेण, ब्रह्म-ब्रह्मणजातिरभवत्। मनुष्येषु ब्रह्म ब्रह्मणः।स च समान्येषु कर्मसु लोकस्य-कर्मफलस्य दाता।अग्निसाध्येषु कर्मसु ब्रह्मभावापन्नःअग्निरेवफलदाता।किमेवं ब्रह्मणानुग्रहात् अग्निदेवतायाः प्रसादादेव कर्मफलवत् मोक्षमपि प्राप्तुं शक्नुयाद्वा? इति जिज्ञासायां स्वं लोकम्- आत्मानमेव अदृष्ट्वा अस्माल्लोकात् यः प्रैति,स आत्मदर्शनशून्यः ब्राह्मणोपासनया अग्न्युपासनया वा मोक्षं न प्राप्नुयात्।यथा अनभ्यस्तो वेदः अकृतं कर्म वा रक्षितुं न प्रभवति।अतःअन्यलोकम्- कर्मफलं स्वर्गादि

In Public domain. Digitization Muthulakshmi Research Academy

परित्यज्य,स्वं लोकम्-फलमात्मनमेव तात्पर्येण विजानीयात् इति,"आत्मानमेव लोकमुपासीत" इत्युपासनाविधिशेषतयात्म-प्रतिपादकमिदं वाक्यम्। रत्नप्रभयातु "आत्मानमेवलोकमुपासीत" इति वाक्ये लोकपदस्य ज्ञानस्वरूपमित्यर्थःव्याख्यातः। 'सत्यं ज्ञानमित्यादिश्रुतौ ज्ञप्तिरूपं यच्चैतन्यमुपदिष्टम्, तदात्मना" आत्मानमुपासीत"इति पूर्वोक्तवाक्यस्यार्थः।उपासनायाः अपि चित्त -वृत्तिविशेषज्ञानविशेषरूपत्वेन उपसनाविधिष्वपि ज्ञानविधिशेषतया आत्म-लोकपदाभ्यां प्रत्यग्ब्रह्मैक्यरूपस्य सिद्धार्थस्य वेदान्त्यभिमतस्यापि बोध इति न वेदान्तमतेनापि वृत्तिकृन्मतस्य विरोधः।

उ)"ब्रह्मविद् ब्रह्मैवभवति" (मु.उ.3.2.9) इति श्रुतावपि कामपदाध्याहारेण, विधिकल्पनयाच ब्रह्मभावकामः इति नियोज्यस्य लाभात्, ब्रह्मज्ञानविषयकनियोगोपपत्तिरिति ब्रह्मज्ञान-विधिशेषतयैव ब्रह्मवित्पदेन विधे प्रत्यग्ब्रह्मैक्यज्ञानसमर्पणमिति तत्रापि सिद्धस्य कार्यशेषत्वमेव।(र.प्र.पृ.69)

ऊ) एवं "परब्रह्मप्राप्तिकामः ब्रह्मवेदनं कुर्यात्" इत्यर्थकम्" ब्रह्मविदाप्नोति परम्" (तै.उ.2.1.1) इति विधिशास्त्रम्। ब्रह्म च वेदान्तेषु तत्र तत्र अवगतनित्य-सर्वज्ञ-सर्वगत-नित्यतृप्त-नित्यशुद्ध-मुक्तस्वभाव-नित्यविज्ञानानन्दत्वादिवक्ष्यमाणब्रह्मगतविशेषमिति, ब्रह्मगतविशेषप्रतिपादकानां वेदान्तानां ब्रह्मस्वरूपपराणां सम्बन्धात्

In Public domain. Digitization Muthulakshmi Research Academy

तद्धर्मवद्ब्रह्माभिन्नतया प्रतीचःउपासनात्" ब्रह्मविदाप्नोति पर"मिति शास्त्रदृष्टः मोक्षःअदृष्ट एव स्वर्गवत्फलतया सिध्यतीति,सर्वत्र उपासनाविधिपरतयैव वेदान्तानामर्थबोधकत्वम्। एवं श्रुतिलोकप्रसिद्धं कार्यान्वितशक्तिवादं परित्यज्य, वेदान्तानां कर्तव्यविध्यनुप्रवेशं परित्यज्य,यदि सिद्धार्थे संगतिग्रहमास्थाय वस्तुमात्रकथनपरत्वमास्थीयेत,वस्तुमात्रस्य ब्रह्मणः हानोपादेय-भिन्नत्वात् "सप्तद्वीपा वसुमती" "राजासौ गच्छती"त्यादिसिद्धपरवाक्यानामिव आनर्थक्यमेव स्यात्। फलाभावाद्वेदान्तानामप्रामाण्यमित्यर्थः। 3. **वस्तुमात्रकथनस्यानर्थ-निवर्तकत्वमिति भाष्योक्तेः वृत्तिकृन्मतेन निरासः।** ननु वस्तुमात्रकथनपरेऽपि वाक्ये "रज्जुरियं नायंसर्पः" इत्यादौ ,सर्पभ्रान्तिजनितभीतिनिवर्तनेन यथा अर्थवत्त्वं, तथा वेदान्तेषु सिद्ध -ब्रह्मणः वस्तुनः कथनेऽपि तस्यासंसारित्वात् ,असंसारिब्रह्मज्ञानात् जीवस्यासंसारित्वभ्रान्तिनिवर्तनेन अर्थवत्त्वं स्यादिति द्वितीया वेदान्तिशङ्का भाष्ये कर्तव्यविध्यनुप्रवेशेतु- इत्यादिनोपस्थापिता। वृत्तिकारसमाधानन्तु' स्यादेतदेवम्' इत्यादिना भाष्ये यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः ब्रह्मस्वरूपश्रवणमात्रेण संसारित्वभ्रान्तिः निवर्तेत, तर्हि सिद्धस्य विधिशेषत्वं विना ज्ञानादनर्थनिवृत्तिपरत्वं वक्तुं शक्येत। श्रुतब्रह्मणोऽपि कृतब्रह्मविचारस्यापि यथापूर्वसुखदुःखादिसंसारित्वधर्मदर्शनात्।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यथा' श्रोतव्य'इति श्रवणविध्युपदेशानन्तरंभगवती श्रुतिः मन्तव्यः, निदिध्यासितव्यः श्रवणोत्तरकालयोः मनननिदिध्यासनयोः विधिं नावक्ष्यत्। विचारजनितज्ञानादेवानर्थ-निवृत्तिसिद्धेः मनननिदिध्यासनयोः वैयर्थ्यात्। तस्मादुत्तरोत्तर-मननादक्रियापरंपरायाः दर्शनात्, विधिसंबन्धं विना सिद्धार्थज्ञानमात्रेणानर्थानिवृत्तेः, अपूर्वलाभार्थं च ज्ञानादकार्यानु-प्रवेशेनैव सिद्धार्थब्रह्मतात्पर्यकत्वं वेदान्तानामस्थेयमिति वृत्तिकारपूर्वपक्षः। (र.प्र.पृ.69.)

वृत्तिकारपूर्वपक्षस्य भाष्यकाराणां समाधानम् –

शां.भा.-अत्राभिधीयते। न। कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं ,यद्विषया जिज्ञासा"अथातो धर्मजिज्ञासा"(जै.सू.1.1.1.)इति सूत्रिता। अधर्मो -ऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात् जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोः अर्थानर्थयोः धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखेशरीरवाङ्मनोभिरुपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिस्थावरान्तेषु प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु प्रसिद्धे। ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते, धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं चार्थित्वसामर्थ्यादिकृत-मधिकारितारतम्यम्। तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनम्। तत्रापि सुखतारतम्ये,

In Public domain. Digitization Muthulakshmi Research Academy

तत्साधनतारतम्यं च शास्त्रात्, 'यावत्सम्पातमुषित्वा' (छा.उ.1.10.5.) इत्यस्माद्गम्यते। तथा च मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। तथोर्ध्वं गतेषु च देहवत्सुदुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःख-तारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्। तथा च श्रुतिः- "न ह वै सशरीरस्य सतः प्रियाप्रिययोरुपहतिरस्ति"इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः'(छा.उ.8.12.1.) इति प्रियाप्रियस्पर्शप्रतिषेधाच्चोदना-लक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते। अशरीरत्वमेव धर्मकार्यमिति चेन्न। तस्य स्वाभाविकत्वात्। "अशरीरं शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो नशोचति"।।(क.उ.1.2.21.)'अप्राणोह्यमनाश्शुभ्रः'(मु.उ.2.1.2) 'असङ्गोह्ययंपुरुषः'(बृ.उ.4.3.15)इत्यादिश्रुतिभ्यः। अतएवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्।।

र.प्र.प्र.-भाष्ये 'अत्राभिधीयते' इत्यादिना सिद्धान्तः प्रतिपाद्यते। सिद्धान्तिनां भाष्यकाराणामयमाशयः। "वेदान्ताः न

In Public domain. Digitization Muthulakshmi Research Academy

विधिपराः स्वार्थे फलवत्त्वे सति नियोज्यविधुरत्वात् नायं सर्पः इति वाक्यवत्" इत्यनुमानेन वेदान्तानां विधिपरत्वाभावे सिद्धे सिद्धब्रह्मपरत्वमेवास्थेयम्। हेतौ नियोज्यविधुरत्वमात्रोक्तौ 'सोरोदी'दित्याद्यर्थवादवाक्येष्वपि नियोज्यविधुरत्वस्य सत्त्वात्,तत्र च स्वतः विधिपरत्वाभावरूपसाध्याभावेन व्यभिचारः। तद्वारणाय'स्वार्थे फलवत्त्वे सती'ति हेतुविशेषणम्। 'स्वार्थे फलवत्त्वे सती'त्येतावन्मात्रोक्तौ, विधिपरत्वाभावरूपसाध्याभाववति 'स्वर्गकामो यजेत' इत्यादिविधिवाक्ये स्वार्थे यागभावनायां फलवत्त्वस्य सत्त्वात्,तत्र व्यभिचारः। अतः 'नियोज्यविधुरत्वात्' इति दलम्। तत्र स्वर्गकामात्मकनियोज्यवत्त्वस्यैव सत्त्वात्, नियोज्यविधुरत्वस्याभावान्न व्यभिचारः। भाष्ये न इत्यस्यायमर्थः। "मोक्षो न विधिजन्यः कर्मफलविलक्षणत्वात् आत्मवत्" इति। विवृतं च भाष्ये कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्- इत्यादिना,संसारस्वरूपमनुवदतीत्यन्तेन,अशरीरत्वं नित्यमित्यन्तेन ग्रन्थेन च। कर्मविधेः फलं सुखदुःखादिकमनित्यम्। ब्रह्मविद्या - यास्तु फलं मोक्षाख्यमशरीरत्वम्। तच्च न विधिजन्यम्,अपि तु ब्रह्मविद्याभिव्यङ्ग्यमेव। कर्म चशारीरं,वाचिकम्,मानसिकं चेति त्रिविधं श्रुतिस्मृतिप्रसिद्धं धर्माख्यम्। तज्जिसार्थमेव- धर्मजिज्ञासार्थमेव 'अथातो धर्मजिज्ञासा'-इति जैमिनिसूत्रं प्रवृत्तम्। अथ-वेदाध्ययनानन्तरम्,अतः-वेदस्य फलवदर्थपरत्वात्,

 In Public domain. Digitization Muthulakshmi Research Academy

'धर्मनिर्णयाय कर्मवाक्यविचारः कर्तव्यः' इति सूत्रार्थः। एवमधर्मोऽपि निषेधवाक्यप्रमाणकत्वात्,परिहाराय जिज्ञास्यः- इत्यपि सूत्रार्थो विज्ञेयः।चोदनाप्रमाणकयोःधर्माधर्मयोः फले सुखदुःखे विषयेन्द्रियसंयोगजन्ये इत्यनित्ये।अवच्छेदकेन शरीरेण,करणैः वाङ्मनोभिरुपभुज्यमाने प्रत्यक्षिद्धे, हिरण्यगर्भादिस्थावरान्तेषु प्रसिद्धे च। अशरीरत्वाख्यो मोक्षस्तु विषयेन्द्रियसंयोगाजन्यः, विशोकः केवलसुखात्मा नित्यः, शरीरवाङ्मनोभिरभोज्यः, अनात्मवित्स्वप्रसिद्धश्च इति द्योतनाय, भाष्ये धर्माधर्मफलयोः फलयोः सुखदुःखयोः प्रत्यक्षे, शरीरवाङ्मनोभिरेवोपभुज्यमाने, विषयेन्द्रियसंयोगजन्ये, ब्रह्मादिस्थावरान्तेषु प्रसिद्धे इति विशेषणानि।किञ्च धर्माधर्मयोः फलयोः सुख-दुःखयोस्तारतम्यं श्रुतिप्रसिद्धम्।तत्तारतम्येन धर्माधर्मयोः तारतम्यं गम्यते। धर्माधर्मतारतम्याच्च अधिकारितारतम्यं श्रुतिप्रसिद्धं च। एवं दुःखतारतम्यादधोगतेषु देहवत्सु अधिकारितारतम्यम्,अधर्मानुष्ठातृतारतम्यमपि गम्यत इति,श्रुतिस्मृतिन्यायप्रसिद्धं सुखदुःखतारतम्यरूपमनित्यं फलमिति, मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु इत्यादिना स्वयमेव भाष्यकारैर्व्याख्यातम्।(र.प्र.पृ.69-70)

अस्याः भाष्यपङ्क्तेरवगाहनाय रत्नप्रभाकाराः–"सामान्येन कर्मफलमुक्त्वा धर्मफलं पृथक्प्रपञ्चयति"-(र.प्र.पृ.70.)

In Public domain. Digitization Muthulakshmi Research Academy

इत्याहुः। अयमाशयः। तथा हि-तैत्तिरीयोपनिषदि ब्रह्मवल्ल्यां" सैषानन्दस्य मीमांसा भवति"(तै.उ. 8.1-4.)इत्यादिना' सएको मानुष आनन्दः' इत्यारभ्य, मानुषानन्दप्रभृति हिरण्यगर्भानन्द-पर्यन्तमानन्दाः तरतमभावापन्नाः उत्तरोत्तरशतगुणोत्कृष्टाः पूर्वपूर्वमपकृष्टाश्च निरूपिताः। तेषामानन्दानामुत्तरोत्तरोत्कर्षे अविद्याकामकर्मह्रास एवकारणम्। तच्च कथमिति किञ्चिद्विवेक्तव्यम्। मानुषानन्द-मनुष्यगन्धर्वानन्द-देवगन्धर्वानन्द-चिरलोकपित्रानन्द-आजानजदेवानन्द-कर्मदेवानन्द-इन्द्रानन्द-बृहस्पत्यानन्द-विराड्रूपप्रजा-पत्यानन्द-हिरण्यगर्भगर्भ-ब्रह्मानन्दाख्याः एकादशानन्दाः श्रुतौ परिगणिताः। एष्वानन्देषु यूनः साधुवृत्तस्य,वेदाध्येतुः,आशास्तृतमस्य,क्षिप्रकार्यकारिणः विप्रस्य, तादृशस्यैव दृढगात्रस्य, युद्धादिस्वधर्मनिर्वहणक्षमबलातिशयोपेतस्य क्षत्रियस्य चपृथिव्यां वित्तलाभादिना जनितः आनन्दः मानुषानन्दः। तल्लाभाय बाह्याध्यात्मिकसाधनसम्पत्तिः, यज्ञादि-कर्मानुष्ठानञ्चापेक्ष्यते। सर्वेष्वेव लोकेषु तत्तदानन्दरूपफलार्थिनः श्रोत्रियत्वावृजिनत्वरूपधर्मौ समौ। पूर्वपूर्वकामानां तत्तल्लोकेष्वेवावाप्त्या तृप्तत्वात्, उत्तरोत्तरानन्दावाप्तौ पूर्वपूर्वकामान-भिहतत्वं कारणं भवति। एतत्सूचनायैव, द्वितीयपर्यायमारभ्य एकादशपर्यायान्तं श्रोत्रियस्य चाकामहतस्य इत्युक्तम्। मनुष्यगन्धर्वानन्दाः अकामहतश्रोत्रियस्य प्रत्यक्षसिद्धा इति

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञापनाय च। प्रथमपर्याये तु बाह्याध्यात्मिकसाधन-फलानामुपभोगयोग्यानां सद्भावात्, अकामहतस्येति नोक्तम्। प्रथमपर्यायोक्तानन्दापेक्षया द्वितीयाद्येकादशपर्यायान्तमुक्ताः आनन्दाः क्रमेण शतगुणोत्कृष्टाः। मानुषलोके कृतैः कर्मभिरेव तत्तदानन्दावाप्तिः, लोकान्तराणां भोगप्रधानत्वात्। "ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम्"।।(वनमाला.पृ.552.) इति तैत्तिरीयोपनिषद्व्याख्यो-दाहृतस्मृतेः हिरण्यगर्भब्रह्मणः कर्म , तज्जनितधर्मौ वा सहजसिद्ध इति ज्ञायेते। "चिरलोकलोकाः तेऽपि स्युः पितृश्राद्धादिकारिणः" (तै.उ.वा.2.8.33)इति तैत्तिरीयोपनिषद्वार्तिकवचनादपि, स्मार्तकर्मषण्णवतिश्राद्धकारिणामेव, चिरलोकपितृलोकावाप्तिः तदानन्दश्च। अतःपितृलोकावाप्तौ सत्यां तेषामन्यद्विधिविहितं नास्तीति प्रतीयते। शतक्रतुनाम्ना केन चित्कृतस्य शतक्रतुसमुदायस्य इन्द्रत्वसम्पादकत्वं प्रसिद्धमेव। एवमिहलोक एव वापीकूपतटाकादिस्मार्तकर्मकारिणाम्- "आजानजो देवलोकस्तज्जा आजानजाःस्मृताः। स्मार्तकर्मकृतस्तत्र जायन्ते देवभूमिषु"।। (तै.उ.वा.2.8.34.)इति तैत्तिरीयवार्तिककारवचनात्,ततः प्रागेव तज्जन्मोपयोगिकर्मैति ज्ञायते। एवं तदनन्तरवार्तिककारवचनात्, केवलकर्मणा सुरसद्मसु ये जातास्ते कर्मदेवाः। 'देवांश्चोत्तरमार्गगान्' (तै.उ.वा.2.8.35.) इति वार्तिककारवचनात्,

In Public domain. Digitization Muthulakshmi Research Academy

कृतोपासनानामुत्तरायणमार्गेण देवलोकं गतानां देवानन्दप्राप्तिः। अतः तत्रापि कर्माभावःअथवा कर्मह्रासः। "सुगन्धिनः कामरूपाः अन्तर्धानादिशक्तयः। नृत्तगीतादिकुशलाः गन्धर्वास्स्युर्नृलौकिकाः" ।।(तै.उ.वा.2.8.23.)इति वार्तिककारोक्तमनुष्यगन्धर्वलक्षणात्, अन्तरिक्षविहारिणः यक्षगन्धर्वाप्सरः प्रभृतिभिः नृत्तगीताद्युपासनां कुर्वाणाः अन्तर्धानादिशक्तिमन्तश्च मनुष्यगन्धर्वाः।अतः तेषां सृष्टिकाल एव देवलोके समुत्पन्नानां गायकानां देवगन्धर्वाणां च नादब्रह्मोपासकानामतिशयेनैवानन्दातिशय इति, तेषामपि तत्तज्जन्मनि कर्मह्रास एव। विशिष्टसाधनसम्पत्त्या मानुषगन्धर्वाद्यानन्दातिरेकश्च। ततश्च सिद्धमेतत् ब्रह्मानन्दस्यैव लेशः मनुष्यजन्मन्यनुभूयत इति। ततः मनुष्यगन्धर्वादि-हिरण्यगर्भान्तजन्मसु अविद्या-काम-कर्मणां पूर्वपूर्वापेक्षया ह्रासात्, प्रायशः हिरण्यगर्भब्रह्मजन्मनि अविद्या-काम-कर्मणां नाममात्रावशिष्टत्वात्, आनन्दातिरेकः सूपपन्नः। तेषामाधिक्ये आनन्दाधिक्याभावात्। अथः-पूर्वपूर्वजन्मापेक्षयोत्तरोत्तरजन्मनि ह्रास इत्यनु -मेयम्।अत एव रत्नप्रभाकृतः"कर्मफलमुक्त्वा धर्मफलं पृथक्प्रपञ्चयती"त्युक्तवन्तः। उत्तरोत्तरजन्मनि कर्माभावेऽपि, पूर्वकर्मजन्यधर्मतारतम्यस्य सद्भावात्, तत्फलभूतानन्दातिरेक-तारतम्यम्। (र.प्र.पृ.70.)

In Public domain. Digitization Muthulakshmi Research Academy

एवं मनुष्यादिहिरण्यगर्भान्तेष्वेव आनन्दतारतम्यम्। ब्रह्मानन्दरूपः मोक्षस्तु निरतिशयः। तत्साधनन्तु तत्त्वज्ञानमेकरूपमेवेति मोक्षे वैलक्षण्यम्। यतः साधनचतुष्टयसम्पन्नः एकरूप एव तत्राधिकारी, कर्मणि तु नानाविध इत्यधिकारिवैलक्षण्यम्। अन्यच्च यादृशं यादृशं फलमभिलष्य, यादृशं कर्म अनुतिष्ठति, तादृशतादृशफलावाप्तिः। अर्थित्वतारतम्यं तत्तत्फलहेतुरिति लोके प्रसिद्धमेव। पुत्रादिसाधनसम्पत्त्याधिक्यादपि, अधिकतया कर्मस्वरूपनिष्पादनात् सामर्थ्यातिशयात् फलतारतम्यम्। भाष्ये सामर्थ्यादिकृतमधिकारितारतम्यमित्यत्र आदिपदेन विद्वत्वम्,अनिन्दितत्वं चाधिकारितारतम्यहेतुतया विज्ञायते। (र.प्र.पृ.71.)तथा च ये यागाद्यनुष्ठायिनः तेषामेव विद्यासमाधिवशात्-उपासनाप्रयुक्तचित्तैकाग्र्यात्, उत्तरायणेनोपास्य ब्रह्मलोकावाप्तिः-इति। तथाच यागाद्यनुष्ठायिनामेव विद्यासामर्थ्यवशादुत्तरेण पथा गमनम् इति भाष्यवाक्यस्यार्थः। न चात्र भाष्यवाक्ये, यागाद्यनुष्ठायिनामेव उपासनासम्बन्धादेवोपास्य लोकावाप्तिः, यागादिकमकृत्वा केवलोपासनया देवलोकावाप्तिर्न भवतीति शङ्का कार्या। "विद्यया देवलोकः"-इति श्रुत्या केवलोपासनादपि देवलोकस्य सिद्धत्वात्। किन्तु अधिकारितारतम्यनिरूपणपरत्वादस्य वाक्यस्य केवलयागे अधिकृतस्य दक्षिणायनमार्गेण चन्द्रलोकावाप्तिः,यागस्योपासनया

In Public domain. Digitization Muthulakshmi Research Academy

योजनं तु यागकारिणःविद्यावतःउत्तरायणमार्गेण ब्रह्मलोकावाप्तिः फलमिति, अधिकारितारतम्यात्फलतारतम्यनिरूपणपरमिदं भाष्यवाक्यमित्यनुसन्धेयम्। एवञ्चात्र भाष्यवाक्यस्य, सुलभतया-र्थावगाहनाय यागाद्यनुष्ठायिनामेव-इत्यत्र एवकारं भिन्नक्रमेण विद्यासमाधिविशेषादित्यत्र विद्यासमाधिवशादेवेति योजना युक्तेत्याभाति। अत एव "केवलैरिष्टापूर्तदत्तसाधनैः धूमादिक्रमेण दक्षिणेन पथा गमनमि"ति समनन्तरभाष्यपङ्क्तिरप्यत्र सहकरोति। केवलैः- उपासनारहितैः इष्टापूर्तदत्तैः चन्द्रलोक-गमनमेव, नोपास्य ब्रह्मलोकावाप्तिरिति हि तदर्थः। केवलैरिति कथनात्, उपासनासहितैस्तु तैः देवलोकावाप्तिः सुसाधैवेति ज्ञायते। सर्वथा तु इहजन्मानुष्ठितयागाद्यभावे केवलोपासनया न देवलोकावाप्तिरिति तु न। "अग्निहोत्रं तपस्सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते"।।1।।

"वापीकूपतटाकादि देवतायतनानि च। अन्नप्रदानमारामः पूर्तमित्यभिधीयते"।।2।।

"शरणागतसंत्राणं भूतानाञ्चाप्यहिंसनम्। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते"।।3।।

इति रत्नप्रभोदाहृतस्मृतिभिःइष्ट-पूर्त-दत्तकर्मणां स्वरूपं न्यरूपि। (र.प्र.पृ.71.)

In Public domain. Digitization Muthulakshmi Research Academy

ननु इष्टापूर्तादिसाधनैः चन्द्रलोकं गतानां निरतिशयमेव सुखं भवतु, कस्सुखप्रतिघाते हेतुः? इति चेत्, तत्रापि सुखतारतम्यमित्यादिभाष्येण समाधानम्। "यावत्सम्पातमुषित्वा" (छा.उ.5.10.5.) इति शास्त्रादेव चन्द्रलोके सुखतारतम्यम् ,तत्प्राप्तिहेतुसाधनतारतम्यं च गम्यते। 'सम्पतति-गच्छति अस्माल्लोकादमुं लोकमनेन कर्मणा' इति सम्पातशब्दव्युत्पत्तेः, लोकान्तरगमनहेतुभूतं कर्म सम्पातशब्दार्थः। यावत्सम्पातम्-यावत्परलोकारम्भकं कर्म भोक्तव्यम्, तावत्पर्यन्तम्,उषित्वा-परलोके स्थित्वा,पुनरायातीति तस्याःश्रुते- रर्थः। तत्र फलमनुभूय पुनरायातीति श्रुत्यैवोपदेशात् ,तरतमभावापन्नमिदं फलमिति ज्ञायते। सम्पातशब्दो- क्तस्य कर्मणः सुखभोगपर्यन्तमेव सामर्थ्यात् ,अश्वमेधादियागफलवत् कल्पान्तस्थायित्वाभावसूचनात्, तादृशयागाधिकृते अश्वमेधाद्यधिकृततारतम्यमस्मादेव शास्त्रात् ज्ञायते ।एवमूर्ध्वलोकं गतवतां यथा सुख- तारतम्यम्, तथा मनुष्यादिषु नारकस्थावरान्तेषु योऽयं दृश्यते सुखलवः,सोऽपि चोदनालक्षणधर्मसाध्यःतारतम्येन वर्तते। तथा ऊर्ध्वं नरकादिलोकं गतानां देहवतां तत्र दुःखतारतम्यदर्शनात्,तद्धेतोरधर्मस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवम् अविद्या-अस्मिता-काम-क्रोध-भयादिदोषवतां शरीरोपादानपूर्वकं सुखदुःखतारतम्यात्मकं फलमनित्यं श्रुति-स्मृति-न्यायप्रसिद्धम्। तत्र "ते तं भुक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

स्वर्गलोकं विशालम्"-(भ.गी.9.21)इति भगवद्गीतास्मृतिः कर्मफलस्यसंसारस्यानित्यत्वज्ञापिका।ज्वालोपचयदर्शनात् काष्ठोप -चयस्येव,फलतारतम्यात् साधनतारतम्यानुमानं न्यायः।"न हवै सशरीरस्य प्रियाऽप्रिययोरुपहतिरस्ति"(छा.उ.8.12.1.)इति श्रुतिरपि अनित्यं संसाररूपमनुवदति।सशरीरस्य-शरीरमेवाहम्, अहमेव शरीरम्-इति भावनावतः,प्रियाप्रिययोः बाह्यविषयसंयोगवियोगनिमित्तयोः सुखदुःखयोरित्यर्थः। (र. प्र. पृ.71.)

एवं "मोक्षो न कर्मफलं कर्मफलविरुद्धातीन्द्रियत्व-विशोकत्व-शरीराद्यभोग्यधर्मवत्त्वात् व्यतिरेकेण स्वर्गादिवत्" इति न्यायरूपानुमानानुग्राह्या,"अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" (छा.उ.8.12.1.)इति श्रुतिरपि अशरीरत्वलक्षणमोक्षस्य धर्मकार्यत्वं प्रतिषेधति। वावेत्यवधारणे।अशरीरत्वे-ज्ञानेन शरीरा - त्मभावनापरित्यागे सत्येव प्रिया-प्रियस्पर्शाभावः।न हि चोदनालक्षणधर्मेण प्रियाप्रियस्पर्शप्रतिषेधः शरीरात्मभावत्याग-लक्षणाशरीरत्वं वा सिद्ध्यति। अतः अनया श्रुत्या अशरीरत्वाख्यमोक्षस्य ज्ञानाभिव्यङ्ग्यत्वमेव, प्रकाश्यते,न विधिप्रतिषेधलक्षणधर्मकार्यत्वम्। ततश्चाशरीरत्वस्य नित्यत्वं सिद्धम्।अशरीरत्वं यदि धर्मकार्यं स्यात्, तस्य शरीरतादात्म्यभावनावतैव अनुष्ठेयत्वात्, "न ह वै

In Public domain. Digitization Muthulakshmi Research Academy

सशरीरस्यप्रियाप्रिययोरुपहतिरस्ति" इति श्रुत्या पुनः सुखदुःखप्रसङ्गः। तदेतदुक्तं भाष्ये-धर्माधर्मकार्यत्वे हि प्रियाप्रियनिषेधो नोपपद्यते इति।

ननु कर्मफलानि द्विविधानि विचित्राणि च। कानिचिच्छरीरेणैवोपभोगयोग्यानि, किञ्चिच्च शरीरसम्बन्धं परित्यज्यैवोपभोगयोग्यम्। तत्र आद्यं स्वर्गादि। द्वितीयस्तु मोक्षः। तत्र शरीरसम्बन्धरहितेन अनुभवयोग्य एवायं प्रियाप्रियप्रतिषेधः। स्वर्गादिस्तु न तथा। अतः 'प्रियाप्रिये न स्पृशतः'–इति निषेधः उपपद्यत एवेति चेत्,-इति भाष्ये पुनश्शङ्का ।न स्वाभाविकत्वात्-इत्यादिना समाधानं च। अशरीरत्वमेव धर्मकार्यमेव-इति भाष्योक्तशङ्कावाक्ये अशरीरत्वमेव इत्यत्रैवकारः अप्यर्थकः। अशरीरत्वमपि धर्मकार्यमिति तदर्थः। आत्मनः देहासङ्गित्वमेवाशरीरत्वम्। तस्यानादित्वात्, अशरीरत्वस्य न कर्मसाध्यता। तथा चोक्तं कठोपनिषदि- "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति" ।।(क.उ.1.2.21.) अशरीरम्-स्थूलदेहशून्यम्,अनवस्थेषु शरीरेषु –अनेकेषु अनित्येषु शरीरेषु, अवस्थितम्-एकं नित्यत्वेनचावस्थितम्, महान्तम्-व्यापिनम्, आत्मानं मत्वा-ज्ञात्वा ,धीरस्सन्, न शोचति-शोकोपलक्षितं संसारं नानुभवति। महान्तमित्युक्ते, आपेक्षिकमहत्त्वमपि प्रसक्तम्। तद्वारणाय विभुमिति श्रुतावुक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वव्यापकमित्यर्थः। एवमत्र कठे अशरीरमित्यनेन स्थूलदेहसम्बन्धाभावः आत्मनः उक्तः। तथा "अप्राणोह्यमनाश्शुभ्रः" (मु.उ.2.1.2.)इति मुण्डकश्रुत्या क्रिया-ज्ञानशक्तिप्रधानयोः प्राणमनसोरात्मनः निषेधात्, सूक्ष्मदेहसम्बन्धाभावोऽ प्युपपादितः। प्राणमनसोः सम्बन्धाभावात्, तदधीनकर्म-ज्ञानेन्द्रियाणामप्यभावात्, शुभ्रः-शुद्धः-इति विज्ञायते। "असङ्गो ह्ययं पुरुषः" (बृ.उ.4.3.15.,नृसिंहोत्तर-तापनीयोपनिषत्.9.) इति श्रुतिरपि, आत्मनः स्थूलसूक्ष्मात्मकदेह-द्वयासम्बन्धलक्षणमशरीरत्वमेव बोधयति। अतश्च उपर्युक्तश्रुतिभिः निर्देहात्मस्वरूपमोक्षस्य अनादिभावत्वे सिद्धे, अनुष्ठेयकर्मणः विलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्। कर्मानुष्ठानब्रह्मविद्याफलयोः वैलक्षण्यात्, ब्रह्मणः कार्यशेषत्वं न युज्यत इति च सिद्धान्तः। (र.प्र.पृ.71-72.)

ब्रह्मणः परिणामिनित्यत्वखण्डनपुरस्सरं कूटस्थत्वव्यवस्थापनम्, तस्यकर्तव्यविध्यननुप्रवेशश्च- ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये क्रियान्तराभावश्च

शा.भा.-तत्र किञ्चित्परिणामिनित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते। यथा पृथि-व्यादिजगन्नित्यत्ववादिनाम्, यथा च सांख्यानां गुणाः। इदं तु पारमार्थिकं कूटस्थं नित्यं व्योमव-त्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं

 In Public domain. Digitization Muthulakshmi Research Academy

स्वयंज्योतिःस्वभावम्। यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तते। तदेतदशरीरत्वं मोक्षाख्यम्। "अन्यत्र धर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च" (क.उ.2.14.) इत्यादिश्रुतिभ्यः। अतस्तद्ब्रह्म ,यस्येयं जिज्ञासा प्रस्तुता। तद्यदि कर्तव्यशेषत्वेनोपदिश्येत,तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत,अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः। अपि च "ब्रह्म वेद ब्रह्मैव भवति"(मु.उ.3.2.9.)"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"(मु.उ.2.2.8.) "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन"(तै.उ.2.9.) "अभयं वै जनक प्राप्तोऽसि" (बृ.4.2.4.)"तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्" (वाजसनेयब्राह्मणोपनिषत् 1.4.10.)"तत्र को मोहःकःशोक एकत्वमनुपश्यतः"(ई.उ.7.)इत्येवमाद्याः श्रुतयःब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति ।तथा "तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" (बृ.उ.1.4.10)इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्। यथा 'तिष्ठन्गायतीति'- तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते।।

In Public domain. Digitization Muthulakshmi Research Academy

र.प्र.प्र.-ननु मोक्षस्य नित्यत्वेऽपि, नित्यत्वस्य परिणामिनित्यतया स्वीकारात्, तस्य धर्मकार्यत्वसम्भवेन, मोक्षस्यापि धर्मकार्यत्वमस्तु। अतः पुनः वेदान्तानां कार्यशेषत्वमेवेतिशङ्कायां तत्र किञ्चिदित्यादिना भाष्ये समाधानम्। नित्यत्वं द्विविधम्। परिणामिनित्यत्वम्, कूटस्थनित्यत्वं चेति। तत्र परिणामि सत् यत् नित्यम्, तत्परिणामिनित्यम्। यस्मिन् विक्रियमाणे सत्यपि, तदेवेदमिति बुद्धिः न विहन्यते तत्परिणामि नित्यम्। यथा पृथिव्यादिजगन्नित्यत्ववादिनां मते। अस्माकं पितृपितामहैः अनुभूता या पृथिवी, सैव पृथिवी-इति इदानीमस्माभिरनुभूयते इति भावः जायते। वस्तुतः पृथिव्यां जायमानेभ्यः परिणामेभ्यः सा इयं च पृथिवी अन्यैव। प्रत्यभिज्ञाबलात् कल्पितं यन्नित्यत्वं,तत् मिथ्याभूतमेव, न वास्तवम्। एवमेव सांख्योक्तगुणानामपि, सुखदुःखमोहाद्यात्मना परिणामशीलत्वात्,तेषां परिणामात्मकेषु कार्येषु प्रत्यभिज्ञायमानत्वेऽपि,न वास्तवं नित्य -त्वम्,अपि तु परिणामि नित्यत्वमेव। पृथिव्यादीनां सांख्यीयगुणानां च तत्तज्जीवीयपुराकृतसुकृतजन्यत्वेन एतेषां परिणामिनित्यानां धर्मकार्यत्वं भवतु नाम। कूटस्थनित्यस्य पारमार्थिकस्यात्मनो मोक्षाख्यस्याऽ नित्यत्वं तु न सम्भवति। कूटस्थस्य नाशकाभावात्, नित्यत्वं पारमार्थिकमेव,न परिणामिनित्यत्वम्। यतःकूटस्थं ब्रह्म व्योमवत्सर्वव्यापि। ततः तस्य परिस्पन्द एव न भवति,कुतो वा

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वरूपत्यागपूर्वकरूपान्तरस्वीकारलक्षणःपरिणामः?।अत एव भाष्ये-ब्रह्म सर्वविक्रियारहितमित्युक्तम्। न च तस्य स्वतः क्रियाभावेऽपि, फलापेक्षया क्रिया अस्तीति वाच्यम्। नित्यतृप्तत्वात्। तृप्तिर्नाम अपेक्षाऽभावः।नित्यं तादृशापेक्षाभाव-शून्यं नित्यतृप्तम्।अथवा शोकरहितम्।सुखैकस्वरूत्वं च नित्यतृप्तत्वम्।आत्मनः अथवा ब्रह्मणः निरवयवत्वादपि क्रिया न सम्भवति।न च तस्य ब्रह्मणःअथवा मोक्षस्य स्वभानार्थमपि क्रियापेक्षा अस्ति।स्वयंज्योतिष्ट्वात्।अतः ब्रह्मणः कूटवत् निश्चलत्वेनावस्थिततत्वात् ,मोक्षः कर्मसाध्यः न भवति।

किञ्च कर्मणः आत्मसम्बन्धेन फलदाने कश्चित्प्रतिनियतः कालसम्बन्धः अपेक्षित इति लोके दृष्टम्।किन्तु अशरीरत्वाख्यस्य मोक्षस्य धर्माधर्माभ्यां कालत्रयेण च सम्बन्धः नास्ति।मोक्षस्य कालानवच्छिन्नत्वात्।भाष्ये –यत्र धर्माधर्मौ कार्येण सह नोपावर्तेते- इति योजना च कर्तव्या।कालत्रयं चनोपावर्तते इत्यपि भाष्ये योजनीयम्।शुद्धात्मनः धर्माधर्माभ्यां कार्यकारणाभ्यां भूत-भविष्यद्वर्तमानैश्च सम्बन्धो नास्तीति नचिकेतसः यमं प्रति तृतीयप्रश्ने विज्ञायते।"अन्यत्र धर्मात् अन्यत्राधर्मात् अन्यत्रास्मात्कृताकृतात्।अन्यत्र भूताच्च भव्याच्च यत्पश्यसि तद्वद"।।(क.उ.2.14.) इति श्रुतेः।अस्यां श्रुतौ अन्यत्रेति चतुर्वारमुपात्तं त्रल् प्रत्ययान्तं सार्वविभक्तिकं प्रथमान्ततया गृह्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यदिति तस्यार्थः। तथा च धर्माधर्मभिन्नं, कृताकृतभिन्नं, (कार्यकारणभिन्नं) भूतभविष्यद्वर्तमानभिन्नं यत्पश्यसि इति नचिकेतसः प्रश्नस्याभिप्रायः। भूताच्च भव्याच्च इत्यत्र चशब्देन वर्तमानाच्चेति लभ्यते। (र.प्र.पृ.72-74.)

ननु पूर्वोक्तश्रुतियुक्तिभिः ब्रह्मणः कूटस्थासङ्गित्वस्य प्रतिपादनेऽपि, मोक्षस्य नियोगफलत्वं किं न स्यात्–इति शङ्कायां,"अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता"-इति भाष्ये गम्भीरं समाधानम्। अस्य वाक्यस्य रत्नप्रभायां त्रेधा अर्थः प्रदर्शितः। (र.प्र.पृ.74.)

1.अतः-कर्मफलविलक्षणत्वात्,तत्-कैवल्यम,ब्रह्म-ब्रह्मैव इत्येकोऽर्थः। मोक्षस्य ब्रह्माभेदात् कूटस्थत्वं धर्माद्यसङ्गित्वं च।

2.यद्वा-यज्जिज्ञास्यं तत् ब्रह्म, अतः-पृथक् जिज्ञास्यत्वात्, धर्माद्यसंसृष्टमित्यर्थः।

3.अथ वा यदत्र वेदान्तैःस्वतन्त्रतया ब्रह्म उपदिश्यते,तत् ब्रह्मैव, अतःसमन्वयात् इति तृतीयोऽर्थः। केषु चिद्भाष्यपाठेषु उपर्युक्तभाष्ये अतःशब्दो न दृश्यते। तथाप्यध्याहृत्यायमेवार्थः वर्णनीयः। प्रथमव्याख्याने अतश्शब्दार्थः कर्मफलविलक्षणत्वम्-नियोगफलविलक्षणत्वम्। ब्रह्मणः नियोगफलत्वासम्भवात् मोक्षस्यापि नियोगफलत्वं न सम्भवति। ब्रह्मणः विधिस्पर्शो यदि स्यात्, तर्हि शास्त्रपृथक्त्वं न स्यात्। कार्यविलक्षणानधिगत-

In Public domain. Digitization Muthulakshmi Research Academy

विषयालाभात्। अन्यच्च वृत्तिकारोक्तरीत्या कार्यविषयतया ब्रह्मात्मैक्यमपि विधिपराद्वाक्याल्लब्धुं न शक्यम्। यतः'नाहं ब्रह्मे'ति भेदग्राहि प्रत्यक्षमस्ति। न च ब्रह्मात्मैक्यस्य अनाक्षेपे विधिविषयस्यालाभ इति वाच्यम्। असता ब्रह्माभेदेनापि विधिविषयत्वस्य भाट्टमतवदुपपत्तेः। "योषा वाव गौतमाग्निः" (छा.उ.5.8.1.)इत्यादौ योषिति अग्न्यभेदस्य वास्तविकतया अभावेऽपि,कल्पिताभेदेन उपासनाया उपपत्तेः,उपास्य-उपासक-उपासनात्मकभिन्नवस्तुतन्त्रायाः उपासनायाः विषयत्वेन, वास्तविकब्रह्मात्मैक्यस्य विषयत्वायोगाच्च।(र.प्र.पृ.74.)अतश्च कर्मफलविलक्षणत्वादिपूर्वोक्तहेतुभिःपृथग्ब्रह्मैव वेदान्तैरुपदिश्यत इति मन्तव्यम्।यदि च कर्तव्यशेषत्वेनैव ब्रह्मणः उपदेशः क्रियेत,तेन चोपदेशेन साध्यश्चेन्मोक्षःअभ्युपगम्येत,तर्हि स मोक्षः अनित्य एव स्यात्। तथा सति,यथोक्तकर्मफलेष्वेव तरतमभावेनावस्थितेषु अनित्येषु कश्चिदतिशय एव मोक्ष इति वक्तव्यं स्यात्।नित्यश्च सर्वैर्मोक्षवादिभिः अभ्युपगम्यते।अतः नित्यस्य मोक्षस्य,तत्स्वरूपस्य ब्रह्मणः कर्तव्यशेषत्वेनोपदेशःन युक्तः। एवं मुक्तेः नियोज्याफलत्वादपि कर्तव्यनियोगाभावः अभ्युपगन्तव्यः।"अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशःयुक्तः"-इति भाष्यवाक्येऽपि,अतः-इत्यस्य मुक्तेःनियोगासाध्यत्वेन नियोज्या - लाभात् इत्यर्थः।अतः-इत्यस्यमुक्तेः नियोगासाध्यत्वं कथमित्युक्ते-

In Public domain. Digitization Muthulakshmi Research Academy

एवं सम्भावनीयम्। अविद्यानिवृत्तौ स्वस्वरूपसुखावाप्तिः मोक्षः। तत्र अविद्यानिवृत्त्यत्मकमोक्षःप्रदीपस्य तमोनिवृत्तिवत् दृष्टमेव फलम् दृष्टमेव भवति,नाऽदृष्टम्। आत्मज्ञाने नियोगस्वीकारे तु नियोगस्य फलमदृष्टरूपमेव भवति। अतः अज्ञाननिवृत्तिरूपफलस्य, दृष्टफलत्वसम्पादनार्थं मोक्षस्य नियोगफलत्वं त्यक्तव्यम्। र.प्र.पृ.74.)

अपि च "ब्रह्म वेद ब्रह्मैव भवति"-(मु.उ.3.2.9.) इति श्रुतेः वृत्तिकारोक्तरीत्या ब्रह्मभावकामः ब्रह्मज्ञानं सम्पादयेत्-इत्यर्थः वक्तुं नशक्यते,मोक्षविषये नियोज्यालाभादेव। किंतु यः ब्रह्माहऽमिति वेद,स ब्रह्मैव भवति-इत्यर्थः वर्णनीयः। तथा "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"(मु.उ.2.2.8.)इति श्रुत्यापि परावरे कार्यकारणाधिष्ठानात्मके,तस्मिन्-ब्रह्मणि दृष्टे सति,अस्य द्रष्टुः अनारब्धफलानि कर्माणि नश्यन्तीत्यु -क्तम्। तथा"आनन्दंब्रह्मणो विद्वान् न भिभेति कुतश्चन"(तै.उ.2.9.)इति श्रुत्यापि ब्रह्मणःस्वरूपभूतं आनन्दं विद्वान् द्वितीयाभावात् कुतश्चन नबिभेतीत्युक्तम्। एवं "अभयं वै जनक प्राप्तोऽसि" (बृ.उ.4.2.4.) श्रुत्यापि, अज्ञानहानात् हे जनक, ब्रह्म प्राप्तोऽसि इत्युक्तम्। "तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्" (वा.ब्रा.उ.1.4.10) इतिवाजसनेयब्राह्मणोपनिषद्वचनादपि, तत्-जीवाख्यंब्रह्म, गुरूपदेशादात्मानमेवअवेत्-विदितवान्,इति,तस्मात्-

In Public domain. Digitization Muthulakshmi Research Academy

वेदनात्,तत्-ब्रह्म,सर्वम्-पूर्णम्, परिच्छेदभ्रान्तिहानादेकमिति च विज्ञायते।

एवं "तत्र को मोहः कः शोकएकत्वमनुपश्यतः" (ई.उ.7)श्रुतेः अहं ब्रह्मास्मीत्यनुभवतः तत्र-अनुभव -काले शोकमोहौ न स्तः-इति ज्ञायते।एवं'ब्रह्म वेद'-इत्याद्यारभ्योदाहृताः श्रुतयः ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यःब्रह्मज्ञानमोक्षयोः मध्ये कार्यान्तरं वारयन्ति। मोक्षस्य विधिफलत्वे तु स्वर्गादिवत्कालान्तरभाविफलत्वमेव स्यात्,न सद्यःफलत्वम्।तथा च पूर्वोक्तश्रुतिबाधः।एवमेव "तद्धैतत्पश्यन् ऋषिः वामदेवःप्रतिपेदे अहं मनुरभवं अहं सूर्यश्च" (बृ.उ.1.4.10.)इति श्रुत्या ब्रह्मदर्शन-सर्वात्मभावयोः मध्ये किमपि कार्यान्तरं नास्तीति प्रतीयते।तत् ब्रह्म,एतत्-प्रत्यगस्मीति,पश्यन्-ज्ञानात् वामदेवः मुनीन्द्रः शुद्धं ब्रह्म प्रतिपेदे ह।तत्र ज्ञाने तिष्ठन् अहं मनुरभवम्,अहं सूर्यश्च इति-ज्ञानप्रकाशकान्मन्त्रान् प्रतिपेदे इति तस्याःश्रुतेरर्थः।एतच्छ्रुत्य -र्थसमन्वयाय च"यथा तिष्ठन्गायती"ति दृष्टान्तवाक्यमेकंभाष्ये उदाहृतम्।अयमभिप्रायः।'तिष्ठन् गायती'ति दृष्टान्तवाक्ये-"लक्षणहेत्वोः क्रियायाः"(पा.सू.3.2.126.)लक्षणरूपार्थे स्थाधातोः परस्य लटःशत्रादेशे, स्थाधातोः तिष्ठादेशे,तिष्ठन्निति रूपं भवति।क्रियां प्रति लक्षण -हेत्वर्थयोः वर्तमानाद्धातोःपरस्य लटः शतृ-शानजादेशौ भवतः- इति तत्सूत्रार्थः।तत्र लक्षणं नाम ज्ञापकं

In Public domain. Digitization Muthulakshmi Research Academy

व्यावर्तकं सत्परिचायकं वा। प्रकृते 'तिष्ठन् गायती'त्यत्र गानक्रियायाःचलता स्थितेन वा सम्पादयितुं शक्यत्वात्,गानक्रियां प्रति स्थितिक्रिया न हेतुः। किन्तु स्थितिक्रिया, गानक्रियायाः अन्यथाक्रियमाणायाः व्यावर्तिका। अतः स्थितिकाले गानक्रिया निर्वर्त्यत इति देवदत्तगमनस्य गोदोहनकालवदुपलक्षणम्। अतोऽत्रस्थितिगान-क्रिययोर्मध्ये न कार्यान्तरप्रसक्तिः। पश्यन्वामदेवःप्रतिपेदे-इतिवाक्ये तु पश्यन्निति शतृप्रत्ययः हेत्वर्थे निष्पन्नः। ज्ञानादेव सर्वात्मभावप्रतिपत्तेः ज्ञानस्य हेतुत्वम्। हेतोश्चाव्यवहितोत्तरक्षणे फलनिष्पत्तेः ज्ञान-प्रतिपत्तिक्रिययोर्मध्ये न कार्यान्तरप्रसक्तिः। अतःशतृप्रत्ययस्य लक्षणहेतूभयार्थकत्वेऽपि, कार्यकारणयोर्वा,उपलक्ष्योपलक्षकयोर्वा, कार्यान्तरव्यवधानाभावस्य तुल्यत्वात्, तदंशएव तिष्ठन्गायतीत्युदाहरणमिति मन्तव्यम्। एवं च वृत्तिकृन्मते ज्ञानतत्फलयोर्मध्ये कर्तव्यस्यानुप्रवेशसम्भावनायाः श्रुतिविरुद्धत्वाद्ब्रह्मणः प्रतिपत्तिविधिशेषत्वपक्षः उपेक्षणीयः। र.प्र.पृ.74-75.)

ज्ञानादेव मोक्षः-

शा.भा.-"त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि"(प्र.उ.6.8.)"श्रुतंह्येवमे भगव -द्दशेभ्यःतरसि शोकमात्मवित् इति,सोऽहं भगवश्शोचामि तन्मा भगवाञ्शोकस्य

In Public domain. Digitization Muthulakshmi Research Academy

परं पारं तारय- तु" (छा.उ.7.1.3.) "तस्मै मृदितकषायाय तमसः परं पारं दर्शयति भगवान् सनत्कुमारः"(छा.उ.7.26.2.)इति चैवमाद्याःश्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति। तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्। दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायाद-पवर्गः (न्या.सू.1.1.2.) इति। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्व-विज्ञानाद्भवति।

र.प्र.प्र.-"तस्मै मृदितकषायाय तमसः परं पारं दर्शयति भगवान् सनत्कुमारः'(छा.उ.7.26.2.)इति । इदं च ज्ञानेन नारदस्य कृतार्थत्वज्ञापनात्मकम्। "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" (प्र.उ.6.8.) इति वचनं तु प्रश्नोपनिषदन्तिमवाक्येष्वन्यतमम्।तत्र षष्ठप्रश्ने षोडशकलात्मक-पुरुषस्य विज्ञानस्योपदेशानन्तरं भगवन्तं गुरुमुपसन्नाः भारद्वाजादयः षडृषयःपादयोः प्रणम्यैवमूचिरे।"त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" (प्र.उ.6.8.)इति।त्वं हि नःपिता,यस्त्वमस्माकमविद्यायाः महोदधेः, परम् पुनरावृत्तिशून्यम्, पारम् ब्रह्म,तारयसि-विद्याप्लवेन प्रापयसि इतितद्वाक्यस्यार्थः।अत्रच पितेति पिप्पलादस्य विशेषितत्वात्,अविद्यायाःपरं पारमित्युक्तेश्च ज्ञानप्लवेन-इत्यध्याहार्यम्।तथा च ज्ञानेन अज्ञानं नाशयसीत्यर्थ-लाभात्, ज्ञानस्यैवाज्ञाननाशकत्वं, न तु ज्ञानविधेः इतिस्पष्टीभवति।

In Public domain. Digitization Muthulakshmi Research Academy

एवं"**श्रुतंह्येवमे भगवद्दृशेभ्यः तरसि शोकमात्मवित् इति,सोऽहं भगवश्शोचामि तन्मा भगवाञ्शोकस्य परं पारं तारयतु** "(छा.उ.7.1.3.)इति छान्दोग्यसप्तमाध्यायोपक्रमे भगवन्तं सनत्कुमारं प्रति नारदोक्तेश्च शोकोपलक्षितसर्वसंसारनिवृत्तिः आत्मज्ञानसाध्यैवेति ज्ञायते। तत्रैव सोऽहं भगवश्शोचामीत्यादि-भागेन नारदेन स्वानर्थप्रकाशनात्,तस्य च निवर्तनाप्रार्थनया आत्मज्ञानस्य बन्धनिवर्तकत्वं च सिद्धम्। श्रुतेस्त्वयमर्थः। आत्मविच्छोकं तरतीति भगवद्दृशेभ्यः,मे-मया,श्रुतमेव हि-न दृष्टम्,यतः मम एतादृशःअनुभवः नास्ति।भगवः-हे भगवन्, सोऽहं केवलं ऋग्वेदादिमन्त्रविद्यावानेव अहमज्ञत्वात् शोचामि– दुःखमनुभवामि।तं शोचन्तं मां भगवानेव शोकस्य परंपारं तारयतु इति।संवादान्ते च"**तस्मै मृदितकषायाय तमसः परं पारं दर्शयति भगवान् सनत्कुमारः**"(छा.उ.7.26.2.)इति स्वयमेव श्रुतिः नारदस्य कृतार्थतां ज्ञापयति। मृदितकषायाय-दग्धकिल्बिषायेत्यर्थः। अनेनापि सन्दर्भेण ज्ञानेन मोक्षप्रतिबन्धकीभूताज्ञाननिवृत्तिरेव साध्यत इति ज्ञायते। अतः मोक्षरूपफलार्थं न ज्ञानातिरिक्ततया कश्चिदपि विधिरपेक्ष्यते। (र.प्र.पृ.75.)

गौतमीयन्यायदर्शनद्वितीयसूत्रेणापि तत्वज्ञानान्मिथ्याज्ञानापाये मोक्षः इति प्रतिपादितम्। तथाहि-"दुःखजन्मप्रवृत्तिदोषमिथ्या-

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"-इति न्यायसूत्रम्। तथाच आचार्य -प्रणीतं न्यायोपबृंहितं सूत्रमिति भाष्यकारैरत्यन्तगौरवास्पदतया युक्तियुक्तत्वेन च भासमानमिदं सूत्रमुट्टङ्कितम्। अस्यायमर्थः। 'गौरोऽहम्'-इति शरीरे आत्मत्वाभिमानरूपमिथ्याज्ञानस्यापाये, तत्कार्यभूतानां राग-द्वेष-मोहादि-दोषाणामपि नाशः। तन्नाशे प्रवृत्तिकारणस्याभावात्, धर्माधर्मात्मक-स्वप्रवृत्तेरपि नाशः। धर्माधर्मरूपप्रवृत्त्यनुत्पत्तौ च पुनर्देहप्राप्तिरूप-जन्मनोऽप्यपायः। जन्मनोऽभावे च दुःखध्वंसरूपःमोक्षो भवति। तदनन्तरापायादपवर्गः इति सूत्रशेषभागस्य तु अयमक्षरार्थः। दुःखादिपाठक्रमेण अन्तिमस्यमिथ्याज्ञानस्य हेतोः तत्त्वज्ञानस्य तत्पदेनग्रहणे,तदनन्तरस्य अव्यवहितपूर्वस्यमिथायाज्ञानस्य अपाये, तदव्यहितकार्याणां दोषाणां रागद्वेषादीनां नाशे,तदनन्तरस्य धर्माधर्मादिप्रवृत्तेःअप्यपाये,तदपायात् जन्मापाये, दुःखध्वंस-लक्षणःदुःखापायस्सिध्यति-इति। ननुद्वितीयसूत्रमिदम्। तत्तवज्ञानान्निश्श्रेयसाधिगमः इतिप्रथमसूत्रेत्वात्मनः इतरपदार्थ-भिन्नत्वलक्षणतत्त्वलक्षणतत्त्वज्ञानात् मोक्षः इति प्रतिपादितम्। तस्यैव विवराणात्मकमिदं सूत्रमिति, भिन्नात्मदर्शनादेव मोक्षस्सिध्यतीति फलति। एवं सति आचार्यप्रणीतमिति, न्यायोपबृंहितमितिचात्यन्तगौरवेण सूत्रस्योट्टङ्कनं कथं स्वमतसाधकमिति चेत्? मिथ्याज्ञानापायश्च

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मात्वैकत्वविज्ञानाद्भवतीति भाष्ये उक्तम्। भेदज्ञानस्य तु 'यत्र तु द्वैतमिव भवति'(बृ.उ.2.4.14.)इति श्रुत्या मिथ्याज्ञानत्वेन निर्णीतत्वात्,'मृत्योस्समृत्युमाप्नोति य इह नानेव पश्यति' (बृ.उ.4.4.19.)श्रुत्याऽनर्थहेतुत्वेन निर्णीतत्वाद्भेदज्ञानस्य न मोक्षसाधकत्वमभ्युपेयते। एतत्सूत्रोक्ते मिथ्याज्ञानापाये मोक्षः-इत्यत्र तु अस्माकमपि संवादोऽस्तीति तु तदुट्टङ्कनम्। अतः औपनिषन्मतं परित्यज्य मतान्तरप्रवेशःइति तु न मन्तव्यम्। तथा च मिथ्याज्ञानस्य ज्ञानापनेयत्वमेव,न कर्मविध्यपनेयत्वम्। कर्मणोऽविद्यारूपत्वेन अज्ञाननिवर्तकत्वाभावात्। (र.प्र.पृ.75-76.)

आत्मज्ञानस्य सम्पदाद्युपासनारूपत्वाभावः

शा.भा.-नचेदं ब्रह्मात्मैकत्वविज्ञानं सम्पद्रूपम्,यथा "अनन्तं वै मनो अनन्ता विश्वे देवा अनन्तमेव सतेन लोकं जयति" (बृ.उ.3.1.9.) इति। न चाध्यासरूपम्, यथा "मनो ब्रह्मेत्युपासीत" (छा.उ.3.18.1.)"आदित्यो ब्रह्मेत्यादेशः"(छा.उ.3.19.1.)इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तं वायुर्वावसंवर्गः (छा.उ.4.3.1.) प्राणोवावसंवर्गः (छा.उ.4.3.3.) इतिवत्। नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम्, सम्पदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युप-गम्यमाने "तत्त्वमसि" (छा.उ.6.8.7.)"अहं ब्रह्मास्मि"(बृ.उ.1.4.10.) "अयमात्मा ब्रह्म" (बृ.उ.2.5.19.) इत्येवमादीनां वाक्यानां ब्रह्मात्वैकत्व-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपादनपरः पदसमन्वयः पीड्येत। 'भिद्यते हृदय-ग्रन्थिः छिद्यन्ते सर्वसंशयाः' (मु.उ.2.2.8) इति चैवमादीन्यविद्यानिवृत्तिपल-श्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ.3.2.9.) इति चैवमादीनि तद्भावापत्तिवचनानि सम्पदादिपक्षे न सामञ्जस्येनोपपद्येरन्। तस्मान्न सम्पदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्। अतो न पुरुषपरतन्त्रा ब्रह्म -विद्या। किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुपरतन्त्रा। एवंभूतस्यब्रह्मणः तज्ज्ञानस्य च नकया चिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्।।

शा.भा.-ननु तथापि ब्रह्मात्मैकत्वविज्ञानमपि, भेदज्ञानवन्न प्रमा ।तस्य सम्पदाद्युपासनत्वेन भ्रान्तिरूपत्वात्। उपासनाश्च-सम्पत्-अध्यासविशिष्टक्रियायोगनिमित्तकत्वेनानेकविधाः। तत्र सम्पदुपासनं नाम 1.अल्पालम्बनतिरस्कारेण उत्कृष्टवस्त्वभेदज्ञानम्। यथा- "अनन्तं वै मनो अनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति" (बृ.उ.3.1.9.) इत्युपासनम्। मनः स्ववृत्त्यानन्त्यात् अनन्तम्। एवं विश्वे देवा अप्यनन्ताः। एवमनन्तत्वसाम्यादल्पे आलम्बने मनसि ,तत्तिरस्कारेण उत्कृष्टविश्वेदेवत्वेनोपासनं प्रचलति। तथा आत्मनः अपेक्षया ब्रह्मणः उत्कृष्टत्वात्, व्यापकत्वादिधर्मसाम्येन जीवतिरस्कारेण ब्रह्मप्राधान्येन सम्पदुपासनमेव ब्रह्मात्मैकत्वविज्ञानं भवतु –इत्येका आशङ्का।

In Public domain. Digitization Muthulakshmi Research Academy

2.अथवा इदं ज्ञानमध्यासोपासनं भवतु। यथा "मनो ब्रह्मेत्यु पासीत" (छा.उ.3.18.1.) "आदित्यो ब्रह्मेत्यादेशः" (छा.उ.3.19.1.) इति च मन आदित्यादिषु ब्रह्मदृष्ट्यध्यासः। अध्यसोपासनं नाम आलम्बनस्य प्राधान्येन ध्यानम्, अथवा प्रतीकोपासनम्। मनसः आदित्यस्य वा आलम्बनस्य,प्राधन्येन अतिरस्कारेण ब्रह्मदृष्ट्या उपासनम्। अस्यैवोपासनस्य प्रतीकोपासनमिति नामान्तरम्। प्रतीको नामअवयवः। ब्रह्मान्तर्भूतस्य अथवा ब्रह्मैकदेशस्य मनसः आदित्यस्य च कृत्स्नब्रह्मत्वेनोपासनम्। तथा वेदान्तेष्वपि अहं ब्रह्मास्मीति एकदेशप्राधान्येन ब्रह्मदृष्ट्या उपासनं किं न स्यात् ?-इति द्वितीया शङ्का।

3.विशिष्टक्रियायोगनिमित्तमुपासनं क्वचिदुपासनाप्रकरणे दृश्यते। यथा –'वायुर्वाव संवर्गः' (छा.उ.4.3.1) 'प्राणो वाव संवर्गः'(छा.उ.4.3.3.)इति। संवृणोति-संहरतीति संवर्गः। वायुः प्रलयकाले अग्न्यादीन् स्वात्म -रूपेण संहरति। एवं स्वापकाले प्राणः वागादीनीन्द्रियाण्युपसंहरति। अतः वायोःसंहरणक्रियायोगादधिभूतं संवर्गत्वेनोपासनं कर्तव्यम्। अध्यात्मं च प्राणस्य संवर्गत्वेनोपासनम्। एतद्विविधोपासनमपि ,यथा भेदज्ञान-त्वात्प्रमा न भवति,तथा ब्रह्मात्मैकत्वविज्ञानमपि भिन्नविषयकत्वादप्रमारूपं किं न स्यात्? इत्यन्या आशङ्का।

In Public domain. Digitization Muthulakshmi Research Academy

4.अथवा उपांशुयागाङ्गतया 'पत्न्यवेक्षितमाज्यं भवति' इति श्रुत्या प्रतिपादितं पत्नीकर्तृकाज्यावेक्षणात्मकं कर्म यथा यागाङ्गाज्यसंस्कारकं,तद्वत् ज्ञानात्मके कर्मणि आत्मनः ब्रह्मणा संस्कृतत्वात् उक्तं ब्रह्मात्मैकत्व -विज्ञानमपि संस्कारात्मकं कर्म कुतो न स्यात्? इत्यपरा शङ्का। (र.प्र.पृ.76-77.)

1.सर्वासामासां शङ्कानां भाष्यकारोक्तंसमाधानम्-'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म' इत्येवमादीनांब्रह्मात्मै-कत्ववस्तुप्रतिपादनपरः समन्वयः पीड्येतेत्याहत्यैकमेव।उपक्रमादिलिङ्गैः उक्तानां वाक्यानां ब्रह्मात्मैकत्ववस्तुनि प्रमाजननाय हेतुभूतः पदनिष्ठः यः समन्वयः अर्थात् यन्निश्चितं तात्पर्यं तत्पीड्येत।सर्वेष्वेव समानाधिकरणपदघटितेषु वेदान्तवाक्येषु ब्रह्मात्मैक्यपरेष्वयं दोषस्समापतेत्।(र.प्र.पृ. 77)

2."भिद्यते हृदयग्रन्थिःछिद्यन्ते सर्वसंशयाः।क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" (मु.उ.2.2.8.) इति श्रुत्या ज्ञानस्य अविद्यानिवृत्तिफलकत्वमुक्तम्।तस्मिन् परावरे-कारणकार्याधिष्ठाने ब्रह्मणि दृष्टे सति,अर्थात् तज्ज्ञानात्, हृदयग्रन्थिभेदनं भवति।हृदयस्य-आज्ञानिकस्य अज्ञाननिष्पन्नस्य अन्तःकरणस्य यः रागादिग्रन्थिः दृढतरबन्धः,स भिद्यते। अथवा चिन्मनस्तादात्म्य-रूपाहङ्कारग्रन्थिः नश्यति।एवं सर्वसंशय-सर्वकर्मनाशः भवतीत्यस्याः श्रुतेरर्थः।यदि आत्मज्ञानं सम्पदाद्युपासनारूपं स्यात्

In Public domain. Digitization Muthulakshmi Research Academy

,तर्हि तस्य अप्रमात्वात्,अज्ञानग्रन्थिनाशकत्वरूपफलं न युज्यते। अतः ज्ञानस्य सम्पदादिरूपत्वस्वीकारे पूर्वोक्तश्रुत्यर्थबाधः स्यात्। नच सम्पदुपासनया जीवस्यब्रह्मत्वसम्पत्तिः। पूर्वरूपे स्थिते नष्टे वा अन्यस्य अन्यात्मताऽयोगात्। अतः 'अहं ब्रह्मास्मी'ति वाक्यं प्रमाणरूपेण ब्रहात्मैक्यप्रमाजनकमेव,नोपासनापरम्।

अतश्चब्रह्मविद्यायाः सम्पदादिरूत्वाभावे न साब्रह्मविद्या पुरुषव्यापारपरतन्त्रा,किं तर्हि इति चेत,प्रत्यक्षादिप्रमाणवस्तुज्ञानवत् वस्तुतन्त्रैव। ज्ञानस्य वस्तुतन्त्रत्वं नाम वस्तुनि सति तदधीनतया निष्पत्तिविशिष्ट -ज्ञानत्वम्। नचैवं शुक्तिरजतात्मकज्ञानमपि, रजतात्मकवस्त्वधीनमिति वाच्यम्। रजतस्यावस्तुत्वात्। प्रमाणेन ज्ञातमेव हि वस्तु भवति। अत्र चइन्द्रियदोषस्य, पुरुषदोषस्य, वस्त्वावारकदोषाणां च बहूनां सत्त्वान्न प्रमाण -ज्ञातत्वं रजतस्य। अतः रजतज्ञानं पुरुषतन्त्रमेव भवति। शुक्ति-स्थाणुज्ञानादितु प्रमाणजनितत्वात् वस्तु -तन्त्रम्। एवं प्रकृतेऽपि ब्रह्मात्मैकत्वविद्या वेदान्तप्रमाणजनितत्वात् ,वस्तुतन्त्रैव। अतः साप्रमात्मिका। एवं च सिद्धब्रह्मरूपस्य मोक्षस्य पुरुषकृतिसाध्यत्वं, ब्रह्मज्ञानस्य नियोगविषयत्वं च न कयाचिदपि युक्त्या कल्पयितुं शक्यम्। नच ब्रह्मणः कार्यानुप्रवेशः। (र.प्र.पृ.78)

ब्रह्मणः विदि-उपासनाक्रियाऽसम्बन्धः-अविषयत्वसमर्थनं च-

In Public domain. Digitization Muthulakshmi Research Academy

शा.भा.-न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणःकल्पयितुं शक्यः। "अन्यदेव तद्वितादथोऽविदितादधि" (के.उ.1.3.) इति विदिक्रियाकर्मत्वप्रतिषेधात्,"येनेदं सर्वं विजानाति तं केन विजानी - यात्" (बृ.उ.2.4.13.) इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति। "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" (के.उ.1.4,) अविषयत्वे ब्रह्मणःशास्त्रयोनित्वानुपपत्तिरितिचेत्,न। अविद्याकल्पि -तभेदनिवृत्तिपरत्वाच्छास्त्रस्य। नहि शास्त्रमिदन्तया विषयभूतं वस्तु प्रतिपिपादयिषति। किं तर्हि ? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्य-वेदितृ-वेदनादिभेदमपनयति। तथा च शास्त्र -म्-'यस्याऽमतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्।'(के.उ.2.3.)"नहि दृष्टेर्द्रष्टारं पश्येःनहि विज्ञातेर्विज्ञातारं विजानीयाः" (बृ.उ.3.4.2.) इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्म-स्वरूपसमर्पणान्नमोक्षस्यानित्यत्वदोषः।।

र.प्र.प्र.-ननु तथापि "ब्रह्म कार्याङ्गं कारकत्वात्, पत्न्यवेक्षणकर्मणि कारकवत्" इत्यनुमानेनब्रह्मणः कार्याङ्गक्रियाकर्मत्वमस्त्विति चेत्, अत्रोच्यते। किं ब्रह्मणः कर्मकारकत्वं ज्ञानक्रियायाम्?उत उपासनाक्रिया -याम् ?उभयमपि न सम्भवति। "अन्यदेव तद्विताद्थोऽविदितादधि"(के.उ.1.3.)इति विदिक्रियाकर्मत्वप्रति - षेधात्। वेदनं-शाब्दज्ञानंविद्-धात्वर्थः। विदितम्-कार्यम्,अविदितम्-

In Public domain. Digitization Muthulakshmi Research Academy

कारणम्,तस्मात्तस्माच्च,अधि-अन्यत्-इति विदिताविदितान्यत्व-प्रतिषेधात्। एवं येन-आत्मना,इदं सर्वं दृश्यं विजानाति,तत्केन विजानीयात् ?- इत्यर्थिकया"येनेदं सर्वं विजानाति तं केन विजानीयात्"(बृ.उ.2.4.13.) इति श्रुत्या चात्मनःअथवा ब्रह्मणः विज्ञातिक्रियाकर्मत्वनिषेधात् ।"यद्वाचानभ्युदितम्, येनवागभ्युद्यते" (के.उ.1.5.)इति ब्रह्मणः वागविषयत्वं प्रतिपाद्य-"तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"(के.उ.1.4.)इति श्रुत्या ब्रह्मणः उपासनक्रियाऽविषयत्वमुक्तम्। 'यन्मनसा न मनुते'(के.उ.1.6.)इति श्रुत्या ब्रह्मणः मत्यविषयत्वं प्रतिपाद्य,"तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"(के.उ.1.4,)इत्युक्तं केने। यदुपाधिविशिष्टं देवतादिकमित्युपास्यते न तद्ब्रह्म इत्यर्थः। तथा चोपासनक्रियाऽविषयत्वमत्र प्रतिपादितम्। ननु ब्रह्मणः शाब्दबोधाविषयत्वे, यदुक्तं शास्त्रयोनित्वाधिकरणद्वितीयवर्णकेन शास्त्रप्रमामणकत्वं तन्नोपपद्यते इति चेन्न। शास्त्रस्याविद्याकल्पित-भेदनिवृत्तिपरत्वात्,अविष -यतयैव शास्त्रं ब्रह्म प्रतिपादयति। यतः शास्त्रमिदन्तया विषयभूतं ब्रह्म न प्रतिपादयति। किं तर्हि बहिरव-स्थित्यनपेक्षप्रत्यगात्मस्वरूपेणैव ब्रह्म प्रतिपादयति। प्रत्यगात्मतया ब्रह्मणः ज्ञाने ,वेद्यवेदितृभावः ज्ञानमाहात्म्यादेव नश्यति। अयं भावः-यथा दीपेन घटावच्छिन्नचैतन्यावारके तमसि विनाशिते घटाधिष्ठानचैतन्यं स्वयमेव समुन्मिषति, तस्य स्वयंप्रकाशत्वात्,

 In Public domain. Digitization Muthulakshmi Research Academy

नच घटाधिष्ठानचैतन्यसमुन्मेषे प्रदीपसाहाय्यम्,एवं वेदान्त - शब्दजन्यवृत्त्यात्मकप्रमाणेन प्रत्यग्ब्रह्मैक्यबोधे जाते,तत्प्रमाणम् आत्मावारकवेद्यवेदित्रादिभेदज्ञानमेवापनयति,नतु आत्मप्रकाशमपि सम्पादयति। आत्मनःस्वयंप्रकाशत्वेन तत्प्रकाशस्यानपेक्षितत्वात्। तस्मादात्मनः शास्त्रप्रमाणकत्वस्य अविद्याकल्पितभेदनिवृत्ति-मात्रफलकत्वात् ,तस्य वेदान्तशास्त्राविषयत्वम्,अविद्यानिवृत्त्यंशेन शास्त्रप्रमाणविषयत्वं चेति सिद्धम्। एतदेव रत्नप्रभायाम्- "वेदान्तजन्यवृत्तिकृताविद्यानिवृत्तिफलशालितया,शास्त्रप्रमाणकत्वम्,वृत्ति(त्त्य)विषयत्वेऽपि,स्वप्रकाशब्रह्मणःवृत्त्यभिव्यक्तस्फुरणाविषयत्वादप्रमेयत्वम्"(र.प्र.पृ.79.)-इत्युक्तम्। भाष्ये अविद्यानिवृत्ति-परत्वाच्छास्त्रस्य इत्यस्याविद्यानिवृत्तिफलत्वादिति, निवृत्तिरूपब्रह्म-तात्पर्यात्, इति च रत्नप्रभायां व्याख्यातम्। ब्रह्मणःदर्शनाविषयत्वे श्रुत्यन्तरसंवादोऽप्स्ति। "यस्याऽमतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्"।।(के.उ.2.3.) इति श्रुतिरपि ब्रह्मणः ज्ञानाविषयत्वबोधिका ।अयं भावः-यस्य ब्रह्म,अमतम्-चैतन्याविषयः इति निश्चयः, तेन सम्यगवगतम्। यस्यत्वज्ञस्य ब्रह्म चैतन्यविषयः इति मतम्, सः ब्रह्म न वेद। उक्तार्थ एव दार्ढ्यायानूद्यते –अविज्ञातमित्यादिना। विजानताम्-इदन्तया चैतन्यविषयत्वेन ब्रह्म विजानताम्,अविज्ञातम्। चैतन्य -स्य स्वप्रकाशत्वेन,अविषयत्वात्। अविजानताम्-अविषयतया ब्रह्म

In Public domain. Digitization Muthulakshmi Research Academy

अदृश्यमिति ज्ञानवतां विज्ञातम् ।ननु ब्रह्म अदृश्यमिति ज्ञानवत्त्वे,कथं ते अविजानन्तः–इतिचेत्,-अज्ञानां लौकिकानां इन्द्र-चन्द्र-आदित्यात्मना ब्रह्मणःइदन्तया ज्ञायमानत्वात्, तद्वत्प्रत्यग्ब्रह्मैक्यानुसन्धानपराणां ज्ञानाभावात्, इदन्त्वेन ज्ञानराहित्यमेव लौकिकदृष्ट्या अविजानत्त्वं श्रुतिरनुवदति।अत एव विज्ञातमविजानतामित्युक्तम्।एवञ्च अविज्ञातं विजानता -मिति लौकिकानामज्ञानां पक्षः।विज्ञातमविजानतामिति तु विद्वत्पक्षः।(र.प्र.पृ.78.79.)

एवम्-"नहि दृष्टेर्द्रष्टारं पश्येःनहि विज्ञातेर्विज्ञातारं विजानीयाः"(बृ.उ.3.4.2.)इति चैवमादिवचनान्यपि, ब्रह्मणः दर्शनाविषयत्वे प्रमाणानि। दृष्टेः-चाक्षुषमनोवृत्तेः, द्रष्टारम्-साक्षिणम्,अनया दृष्ट्या न पश्येः।विज्ञातेः-बुद्धिवृत्तेर्निश्चयरूपायाः, विज्ञातारम्-साक्षिणम्,न विजानीयाः-न विषयं कुर्याः इति तदर्थः।ननु ब्रह्मणः शास्त्रविषयत्वानभ्युपगमेऽपि, शास्त्रेणाविद्या-निवृत्तेरभ्युपगतत्वात्, तस्याश्चानित्यत्वात्, अविद्यानिवृत्तिलक्षण-मोक्षस्यानित्यत्वं प्रसज्येत इति चेत्, 'अतोऽविद्याकल्पितसंसारित्व-निवर्तनेन'-इत्यादिनाभाष्यसमाधानम्।अतः-तत्त्वज्ञानादित्यर्थः। अविद्यानिवृत्तौ समर्पितस्य नित्यमुक्तात्मस्वरूपस्यैव मोक्षत्वात्, तस्य चानागन्तुकत्वमित्येकं समाधानम्। अथ वा अविद्यानिवृत्तेर्मोक्षत्वेऽपि तस्य ध्वंसरूपत्वेन परमतेऽपि

In Public domain. Digitization Muthulakshmi Research Academy

नित्यत्वेन,अथ वामीमांसकोक्तरीत्याभावानामधिकरणात्मकत्वेन नित्यात्मस्वरूपत्वेनच नागन्तुकत्वलक्षणानित्यत्वप्रसक्तिः। (र.प्र.पृ.79.)

मोक्षस्य चतुर्विधक्रियाफलभिन्नत्वेन अकार्यत्वम् उपासनाऽसाध्यत्वं च

शा.भा.-यस्य तूत्पाद्यो मोक्षस्तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्।तथा विकार्यत्वे च।तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं स्यात् ।न हि दध्यादि विकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके। नचाप्यत्वेनापि कार्यापेक्षा, स्वात्मरूपत्वे सत्यनाप्यत्वात्।स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम्, नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मणःआकाशस्येव।नापि संस्कार्यो मोक्षः,येन व्यापार -मपेक्षेत।संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्,दोषापनयनेन वा।न तावद्गुणाधानेन सम्भवति,अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन, नित्यशुद्धब्रह्मात्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रियया आत्मनिसंस्क्रियमाणेऽभिव्यज्यते, यथाऽऽ -दर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेत्, न।यदाश्रया हि क्रिया तमविकुर्वती नैवात्मानं लभते।यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत। अविकार्योऽयमुच्यते इति चैवमादिवचनानि बाध्येरन्।तस्मान्न स्वाश्रयक्रियऽऽत्मनः

In Public domain. Digitization Muthulakshmi Research Academy

सम्भवति। अन्याश्रयायास्तु क्रियायाः आत्मनः अविषयत्वान्न तयात्मा संस्क्रियते।।

र.प्र.प्र.-चतुर्विधानि कर्मणां फलानि दृश्यन्ते-उत्पत्तिः,विकारः,आप्तिः,संस्कारश्चेति। तदर्थं हि मानस-वाचिक-शारीरिकाणि कर्माणि क्रियन्ते। चतुर्विधकर्मफलविलक्षणत्वाच्च मोक्षस्य नोपासनासाध्यत्वम्। एतच्च -यस्यतूत्पाद्यो मोक्षःइत्यारभ्य तस्मात् ज्ञानमेकं मुक्त्वा क्रियागन्थमात्रस्याप्यनुप्रवेश इह नोपपपद्यते (शा.भा.पृ.82-83.)इत्यन्तं भाष्ये व्याख्यातम्।

1.मोक्षस्य दण्डादिना घटादेरिवोत्पाद्यत्वे,मानस-वाचिक-शारीरिकक्रियासम्बन्धः स्यान्नाम। किन्तु तस्य नित्यत्वेन, घटादाविवोत्पाद्यत्वं नाभ्युपगम्यते। अतः उत्पत्तिफलमपेक्ष्य क्रियासम्बन्धो नास्ति।

2.अथ क्षीरस्य दध्यातञ्चनादिना तत्र दधिरूपेण विकारः अभ्युपगम्यते यथा,तथा एकधावस्थितस्या त्मनः उपासनादिना मोक्षरूपविकारः-अवस्थान्तरमभ्युपगम्यते चेत्,अस्मिन्नपि पक्षे मोक्षस्य विकार्यत्वेना ऽनित्यत्वमापद्येत। अत एवोक्तं भाष्ये –न हि दध्यादि विकार्यम्,उत्पाद्यं वा घटादि नित्यं दृष्टं लोके –इति।

3.तथा पूर्वं स्थितस्यैव आत्मनः(जीवस्य)ब्रह्मणा प्राप्तिक्रियया संयोगरूपफलेन सम्बन्धात्, ब्रह्मणः प्राप्यत्वमस्तु इति पूर्वपक्षिशङ्कायां भाष्ये-स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् –इति

In Public domain. Digitization Muthulakshmi Research Academy

समाधानम्। ब्रह्म जीवाभिन्नं नवेति? पृच्छामः। यदि ब्रह्म जीवाभिन्नं स्यात्,स्वात्मस्वरूपाव्यतिरिक्तत्वात्, कस्य केन वा आप्तिः? इत्यनाप्यत्वमेव प्रसज्येत। यदि च ब्रह्म जीवाद्भिन्नं,तर्ह्यपि ब्रह्मणःसर्वगतत्वेन नित्याप्तस्वरूपत्वादाकाश-स्येवानाप्यत्वं प्रसज्येत। उभयथाप्यनाप्यत्वात्, ब्रह्मस्वरूपस्य मोक्षस्यानाप्यत्वमेव। (र.प्र.पृ 79-80.)

4.ननु ब्रह्मणि-मोक्षे माभूवन् उत्पत्ति-विकार-आप्त्यनुकूलाःक्रियाः,अथापि मोक्षस्य संस्कार्यत्वमस्तु। द्विविधो हि संस्कारः1,गुणाधानेन,दोषापनयनेनेति। गुणाधानात्मकसंस्कारोऽपि द्विविधः,1.गुणोत्पत्तिरूपः2.गुणाभिव्यक्तिरूप इति। तत्र गुणोत्पत्तिरूपसंस्कारो यथा-'व्रीहीन् प्रोक्षती'ति शास्त्रेण विहितः व्रीहिषु अपूर्वाख्यःकश्चिदतिशयःउत्पद्यते। तथा शास्त्रविहितया उपासनाक्रियया,आत्मनि ब्रह्माभेदोपयोगिसंस्कारः व्रीहिस्थानीये ब्रह्मणि अपूर्वः कश्चिदतिशयरूपः संस्काराख्यः गुणः उत्पद्यते। अयं च गुणाधानलक्षणःसंस्कारः। अथ वा दर्पणे भास्वरत्वरूपधर्मस्य स्वतःविद्यमानत्वेन नूतनतयानुत्पत्तावपि,चूर्णसंयोगेन निघर्ष - णक्रियया,तत्र भस्वरत्वरूपगुणः यथा अभिव्यज्यते,तथा आत्मनः ब्रह्मत्वेनोपासनया मलापनयनेन, ब्रह्मणि–मोक्षे आत्माभेदयोग्यः अतिशयरूपगुणः अभिव्यज्यतां नाम। उपासनया उत्पाद्यगुणकत्वम्,तया अभिव्यङ्ग्यगुणकत्वं वा मोक्षस्य किं

In Public domain. Digitization Muthulakshmi Research Academy

नस्यात्?इति शङ्का। तत्र गुणोत्पत्तिलक्षणगुणाधानपक्षः नोपपद्यते। ब्रह्मस्वरूपलक्षणस्य मोक्षस्य अनाधेयातिशयत्वात्। न चादर्शे भास्वरत्वस्येव मोक्षे अतिशयस्य व्यङ्ग्यताप्युपपद्यते। आत्मनः क्रियाश्रयत्वानुपपत्तेः। क्रिया यमाश्रित्य तिष्ठति, तमविकुर्वाणा नैवात्मानं लभते-उत्पद्यते। यदि उपासनाक्रियया आत्मा ब्रह्म वा, विक्रियेत, तर्हि आत्मनः अनित्यत्वं प्रसज्येत। आत्मनः विकारे च 'अविकार्योऽयमुच्यते'–इत्यादिस्मृतिवचनानि बाध्येरन्। तच्चानिष्टम्। असङ्गात्मनः अपनेयमलसंसर्गोऽपि नोपपद्यते। तस्मादात्मनि मोक्षे च गुणोत्पत्तिगुणाभिव्यक्तिलक्षण-संस्कारद्वयमपि उपासनाक्रियया न युज्यते। न च वस्त्रे क्षालनक्रियया मलापनयनेन यथा कश्चित्संस्कार आधीयते, तद्वत् मोक्षेऽपि,उपासनया मलापनयनेन कश्चित्संस्कारःआधीयतामिति वाच्यम्। मोक्षस्य नित्यशुद्धब्रह्मस्वरूपत्वात् दोषापनयनजन्य-संस्कारायोगात्। उत्पाद्याभिव्यङ्ग्यगुणयोरयं विशेषःयत्-वस्त्रे क्षालनयवागूसंयोजनादिना अपूर्व एव श्वेतिमा -गुणःउत्पद्यते। दर्पणे चूर्णसंयोगेन निघर्षणे तु उपरि मलापनयनेऽपि सहजभास्वरत्वगुण एवाभिव्यज्यते-इति विशेषः। तस्मादात्मनःगुणजनकसंस्कारक्रिया ,दोषापनयनेन गुणात्मकसंस्काराभिव्ञ्जकक्रिया,तेनैव गुणात्मक-संस्कारजनकक्रिया वा नोपपद्यत इत्यात्मनः क्रियाशेषत्वं नोपपद्यत इति भगवत्पादानामाशयः। अन्यच्च आत्मनि मलापनयनाय क्रिया

In Public domain. Digitization Muthulakshmi Research Academy

अभ्युपगम्यते । किमयं मलः सत्यः?उत कल्पितः?द्वितीये सत्यस्य मलस्य ज्ञानादेव निवृत्तिः,न क्रियया। आद्ये तु मलस्य सत्यत्वेऽपि,किमात्मनिष्ठक्रियया मलापनयनम्?, उतान्यनिष्ठ-क्रिययेति? विकल्पनीयम्। स्वात्मनि क्रियासम्भवस्य 'अविकार्योऽयमि'त्यादिस्मृत्या प्रागेवोपपादि तत्वात्,नाद्यः पक्षः। अन्याश्रयक्रियायास्त्वात्मनोऽविषयत्वात्,न तया आत्मसंस्करणम्। (र.प्र.पृ.80-81.)

अन्याश्रयक्रियया आत्मनः असंस्कार्यत्वशङ्कानिरासपूर्वकं सर्वधाऽऽसंस्कार्यत्वम्-

शा.भा.-ननु देहाश्रया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न, देहादिसङ्घातस्यैवाविद्या-गृहीतस्यात्मनःसंस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेः देहसमवायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिनः आरोग्यफलम्,अहमरोग इति यत्र बुद्धिरुत्पद्यते। एवं स्नानाचमनयज्ञोपवीतादिना अहंशुद्धः संस्कृत इति यत्र बुद्धिरुत्पद्यते, संस्क्रियते। स चदेहेन संहत एव। तेनैवचाहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रियाः निर्वर्त्य-न्ते। तत्फलं च स एवाश्नाति-"तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो

In Public domain. Digitization Muthulakshmi Research Academy

अभिचाकशीति" (मु.उ.3.1.1.) इति मन्त्रवर्णात्। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" (क.उ.1.3.4.) इति च। तथा "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।। "(श्वेता.6.11.)इति,"सपर्यगाच्छुक्रमकायमव्रणमस्नाविरँशुद्धमपापविद्धम्" (ई.उ.8.)इति च, एतौ मन्त्रावनाधेयातिशयतां दर्शयतः। ब्रह्मभावश्च मोक्षः।तस्मान्न संस्कार्योऽपि मोक्षः।अतोऽन्यन्मोक्षं प्रति क्रियाप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम्।तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।।

र.प्र.प्र-ननु आत्मनः अन्याश्रयक्रियया संस्कारः नभवतीत्युक्तम्, तदयुक्तम्। देहाश्रयया स्नानयज्ञोपवीतादिक्रियया देही यथा संस्क्रियते, तथामनोनिष्ठया उपासनाक्रियया, आत्मा ब्रह्माभेदयोग्यस्संस्क्रियते इत्युच्य तामिति चेन्न। सत्यम्। अन्याश्रयया क्रियया अन्यत्संस्क्रियत इति। यतः देहाश्रयस्नानाचमनादिक्रियया देही संस्क्रियते। किन्त्वविद्यापरिगृहीतः आत्मैव संस्क्रियते इति तु सत्यम्। आत्मनः मूलाविद्याप्रतिबिम्बितत्वेन, नरोऽहमिति गृहीतस्य,भ्रन्त्या देहतादात्म्यापन्नस्य,स्नानादिक्रियाश्रयत्वं भ्रमात्मकमेव। यतः स्नानाचमनादेः देहसमवायित्वं –देहान्तःपातित्वं प्रसिद्धमेव। अथ वा स्नानादेःसमवायेन वर्तमानत्वं प्रसिद्धमेव। तया च

 In Public domain. Digitization Muthulakshmi Research Academy

देहादितादात्म्यापन्नः कश्चिदनिश्चितब्रह्मस्वरूपः, अविद्यया आत्मत्वेनपरिगृहीतः क्रियाश्रयत्वेन भ्रम्यते। तादृशभ्रमप्रयुक्तः आत्मनि संस्कार्यत्वभ्रमः।प्रकृतेऽपि मनोनिष्ठया उपासनक्रियया उपासनादिक्रियावन्मनस्तादात्म्यापन्नः उपहित आत्मा उपासनावानिति भ्रम्यते। वस्तुतः आत्मनि उपासनाक्रिया नास्ति।न चतया ब्रह्म साधनीकृत्य आत्मनः ब्रह्माभेदविषयकस्संस्कारः।एवमविद्यापथे सर्वत्र संहतात्मन एव देहादिनिष्ठ क्रियाजनितसंस्कारः।यथादेहाश्रयेण चिकित्सयाजनितेन धातुसाम्येन,तत्संहतस्यैव देहतादात्म्यापन्नस्यैव देहाभिमानिनः आरोग्यफलम्-'अहमरोगः'- इतिबुद्धिरुत्पद्यते। सा बुद्धिः यत्र संहतात्मनि जायते,स एव संस्क्रियते।स्नानादिसंस्कृतोऽपि,'अहं शुद्धः संस्कृत' इति प्राप्तबुद्धिमान् देहद्वारा संस्कृत एव।ननु देहाभिन्ने आत्मनि कथं संस्कारः? तस्य आमुष्मिकफलभोक्तृत्वाभावात्-इति चेत्,तेनैवाहंकर्त्रा –इत्यादिना भाष्ये समाधानम्.।अयं भावः-य एवदेहतादात्म्यापन्नः स एवाहङ्कर्ता अन्तःकरणप्रतिबिम्बभूतः आत्मा। स च अहमितिप्रतिभासमानः अहंप्रत्ययविषयःप्रत्ययी च। यतःआत्मनःप्रत्ययाःमनस्तादात्म्यात्,मनसःप्रत्य -याः कामादयः वृत्तयः अस्य संहतात्मनःसन्ति।तेनैव सर्वाः क्रियन्ते।संहतात्मैव क्रियाफलमश्नाति।"तयोरन्यःपिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति" (मु.उ.3.1.1.)इति मन्त्रवर्णात्।अन्यः-एकः,

In Public domain. Digitization Muthulakshmi Research Academy

पिप्पलम्-कर्मफलम्, अभिचाकशीति आभिमुख्येन प्रकाशते इत्यर्थः। प्रमातृसाक्षिणोर्मध्ये प्रमाताकल्पितभोक्तृत्वादिमान् स्वादु पिप्पलम् कर्मपलम् अत्ति। स एव प्रमाता शोधितः अन्यः साक्षितया प्रकाशते-इति श्रुतेस्तात्पर्यार्थः। एवं च पूर्वोक्तमन्त्रवर्णात् प्रसिद्धमन्त्रात्, परिकल्पितस्यसंहतात्मनः फलभोक्तृत्वम्, अकल्पितस्य तु नास्तीत्युक्तत्वात्, वस्तुतः आत्मनि न कश्चिदतिशयः। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" (क.उ.1.3.4.) इति कठश्रुत्यापि शरीरेन्द्रियमनोयुक्तस्यैव भोक्तृत्वप्रतिपादनात्,भोक्तृत्वसंस्काराधानादिकं कल्पितस्यैवात्मनः इति ज्ञायते। (र.प्र.पृ81.82.) एवं सोपाधिकस्य चिद्धातोः मिथ्यासंस्कार्यत्वमुक्त्वा निरुपाधिकस्य तस्य असंस्कार्यत्वेऽपि प्रमाणभूते श्रुती भाष्ये उपन्यस्ते।

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।।"

(श्वेता. 6.11.) इति श्रुतिःनिरुपाधिकस्यात्मनः असंस्कार्यत्वे मानम्। अस्यायमर्थः। सर्वभूतेषु एकः अद्वितीयः,देवः स्वयंप्रकाशः। स्वयंप्रकाशत्वेऽपि कुतो न भातीत्युक्ते, समाधानम् गूढ इति। मायावृतत्वान्न प्रकाशत इत्यर्थः।न च ब्रह्मणः भानाय ज्ञाता कश्चिदपेक्ष्यते। ज्ञात्रा जीवेनासम्बन्धात्,जीवभिन्नत्वाद्वा ब्रह्मणो भानं नास्तीत्येवोच्यतामम् ,किं तस्याभाने मायावृतत्वं हेतुतया निर्दिश्यत

In Public domain. Digitization Muthulakshmi Research Academy

इति वाच्यम् ।यतः परमात्मा सर्वव्यापी सर्वभूतान्तरात्मा च।न चतादृशोऽस्ति देशः,यो हि ब्रह्माभाववान्।अतः सः सर्वव्यापकः, सर्वभूतान्तरात्मा, सर्वप्राणिप्रत्यक्त्वमापन्नश्च।जीवात्मनापि स एवास्तीति,जीवभिन्नत्वं,जीवासम्बन्धो वा हेतुर्वक्तुं न शक्यत इति,गूढत्वं मायावृतत्वमेव ब्रह्मणोऽभाने हेतुर्वक्तव्यः।ननु ब्रह्मणः प्रत्यक्त्वे कर्तृत्वं प्रसज्येतेत्युक्ते कर्माध्यक्षः क्रियासाक्षी इत्युक्तम्। तर्हि साक्ष्यम्-साक्षिविषयःकर्माप्यस्तीत्युक्ते पारमार्थिकतया तस्याभावप्रतिपादनाय,द्वैतापत्तिनिरासाय च सर्वभूताधिवासः इत्युक्तम्।सर्वभूतानामधि -वासो भूत्वा साक्षी भवति।साक्ष्यमधिष्ठाने कल्पितमेव,नपारमार्थिकमिति भावः।चेता केवलः-इति साक्षि - स्वरूपनिरूपणपरम्।केवलः-अकर्ता इत्यर्थः।चेता-बोद्धा।बोद्धृत्वे सति अकर्तृत्वं साक्षिणःस्वरूपं सिद्धम्।निर्गुणश्च-इत्यत्र चकारःदोषाभावसमुच्चयार्थः।तथा च दोषाभावात्, गुणाभावाच्च, दोषनाशगुणाधानलक्षण -संस्कारः आत्मनिनास्तीति, अनाधेयातिशयः आत्मा। स एवार्थः "सपर्यगाच्छुक्रमकाय-मव्रणमस्नाविरँ शुद्धमपापविद्धम्" (ई.उ.8.) इति श्रुत्यापि ज्ञायते। पर्यगात्-परितो व्याप्तः। शुक्रः-दीप्तिमान्,अकायः-लिङ्गशरीर - शून्यः,अव्रणः-क्षतशून्यः,अस्नाविरः-शिराविधुरः,अथवा अनश्वरः, अव्रणः, अस्नाविरः इत्यात्मनो विशेषणेस्थूलशरीरशून्यत्वं सूचयतः।शुद्धः रागद्वेषादिमलशून्यः, अपापविद्धः पुण्यपापाभ्या-

In Public domain. Digitization Muthulakshmi Research Academy

मस्पृष्टः। शुक्रमित्यादि- विशेषणानि नपुंसकलिङ्गे वर्तमानानि,स शुक्रः,अकायः-इत्यादिरूपेण पुंलिङ्गतया परिणेयानि।स्थूलसूक्ष्मा - दिदेहाभावात्,आत्मनोऽनाधेयातिशयत्वलक्षणमसंस्कार्यत्वंप्रतीयते ।उत्पत्ति-आप्ति-विकारसंस्कारलक्षण–चतुर्विधफलेभ्यः अन्यस्य पञ्चमस्य क्रियाफलस्य दर्शयितुमशक्यत्वात्, क्रियाद्वारा नप्रतिपत्तिशेषत्वं ब्रह्मणः।नच मोक्षस्यासाध्यत्वे,शास्त्रारम्भः व्यर्थ एवेति वाच्यम्।शास्त्रस्य ज्ञानार्थत्वात्। अत एवोक्तं भाष्ये- 'तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्थमात्रस्याप्यनुप्रवेश इह नोपपद्यते'-इति।(र.प्र.पृ.82.)

प्रमाणजन्यज्ञानस्य मानसक्रियात्वनिरासः

शा.भा.-ननु ज्ञानं न मानसी क्रिया। न। वैलक्षण्यात् । क्रिया हि नाम सा वस्तुस्वरूपनिरपेक्षैव चोद्यते,पुरुषचित्तव्यापाराधीना च।यथा "यस्यै देवतायै हविर्गृहीतं स्यात्तांमनसा ध्यायेद्वषट्करि - ष्यन्" इति,'सन्ध्यं मनसा ध्यायेत्'(ऐ.ब्रा.3.8.1.)इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा कर्तुं शक्यम्,पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानंकर्तुमकर्तुमन्यथा वा कर्तुमशक्यं ,केवलवस्तुतन्त्रं तत्, न चोदनातन्त्रम्। नापिपुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्।यथाच"पुरुषो वा व गौतमाग्निः"(छा.उ.5.7.1.) "योषा वाव गौतमाग्निः"

 In Public domain. Digitization Muthulakshmi Research Academy

(छा.उ.5.8.1.) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात्क्रियैव सा पुरुषतन्त्रा च। यातु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा। किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्।।

र.प्र.प्र.-ननु "आत्मा वा अरे द्रष्टव्यः"-इत्यादौ ज्ञानविधिदर्शनात्,विधेयज्ञानं प्रत्यात्मनः-ब्रह्मणः अङ्गत्व -दर्शनात् क्रियाशेषत्वमेवास्तु ।ज्ञानमुपासना वा मानसी क्रिया किल?– इतिचेन्मैवम्।क्रियातो विलक्षण -त्वात् ज्ञानस्य।क्रिया हि नाम सा,या वस्तुस्वरूपनिरपेक्षैव चोद्यते।किंच क्रिया चोदनापरतन्त्रा पुरुषव्यापार -परतन्त्रापि भवति।शास्त्रेण यथा यथा चोद्यते,तथैव पुरुषचित्तव्यापारपरतन्त्रा सती तदधीना भवति। शास्त्रचोदनानुसारेणैव क्रियायाः कर्तुमकर्तुमन्यथावा कर्तुं शक्यत्वात्। एतच्च विवृतं प्रागेव जन्माद्यधिकरणे। उपासनायाःवस्तुस्वरपनिरपेक्षत्वं ,पुरुषव्यापारपरतन्त्रत्वं च श्रुत्यैव ज्ञायते।यथा "यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्" इति,'सन्ध्यं मनसा ध्यायेत्' (ऐ.ब्रा.3.8.1.) इत्यादि श्रुत्या ध्यानं मानसं चिन्तनं यद्यपि विहितम्, तथापि तत् ध्यानं पुरुषेण कर्तुमकर्तुं शक्यत्वात् ,पुरुषतन्त्रत्वात्क्रियैव,न ज्ञानम्।ज्ञानस्य च करणाकरणान्यथाकरमानामशक्यत्वात्।

In Public domain. Digitization Muthulakshmi Research Academy

तस्याचोदकप्रमाणजन्यत्वात्, अपुरुषतन्त्रत्वाच्च। यस्यै देवतायै हविर्गृह्यते इत्यादिश्रुतेरयमर्थः। यस्यै सन्ध्यादेवतायै हविः अध्वर्युणा गृहीतं स्यात्, तां देवतां वषट्करिष्यन् मनसा ध्यायेदिति। सन्ध्याध्यानात्मकं ज्ञानं नवस्तुविषयकप्रमाणजनितम्,ध्यानस्य पूर्वोक्तावस्तुविषयकचोदनयापि सिद्धेः। पुरुषव्यापारपारतन्त्र्येणैवैतत् ज्ञानं जायते। पुरुषव्यापारे सत्येव जायते। वेदान्तप्रमामजनित-ब्रह्मज्ञानं तु ब्रह्मात्मकं वस्तु, अचोदकं प्रमाणमेवापेक्षते। न च प्रमाणेन वस्तुज्ञाने जायमाने काचिच्चोदना,पुरुषव्यापारो वा मध्ये अपेक्ष्यते। अतः ज्ञानं नचोदनातन्त्रं नापि पुरुषतन्त्रम्। तथा चानुमानम् "मानसमपिज्ञानं न विधियोग्या क्रिया, वस्तुतन्त्रत्वात्, पुरुषकृत्यसाध्यत्वाच्च"। इति। "ध्यानं न क्रिया मानसव्यापारत्वात्, ज्ञानवत्" इत्यनुमाने तु पुरुषकृत्यसाध्यत्वमुपाधिः। क्रियात्वाभावरूपसाध्याधिकरणे ज्ञाने पुरुषकृत्यसाध्यत्वरूपः उपाधित्वेनाभिमतः धर्मः अस्तीति साध्यव्यापकत्वम्। मानसव्यापाररूपत्वसाधनाधिकरणे ध्याने तु पुरुषकृत्यसाध्यत्वं नास्ति। अतो निरुक्तहेतोः क्रियात्वाभावासाधकत्वम्। अतो'ज्ञानं कर्तुमकर्तुम्' इत्यादिभाष्ये अतः ज्ञानस्य प्रमात्वात्, ध्यानस्येव अप्रमात्वाभावादित्यर्थः। भष्ये'न पुरुषतन्त्रम्'-इत्यत्र पुरुषः कृतिद्वारा हेतुःयस्यतत् इत्यर्थः

In Public domain. Digitization Muthulakshmi Research Academy

अनुसन्धेयः। अन्यथा अप्रमातृकस्यानाश्रयस्य चित्तवृत्तिरूपज्ञानस्य असम्भवात् ,ज्ञानस्यापि पुरुषतन्त्रत्वापत्तेः।

मानसक्रियारूपत्वेऽपि, ज्ञाने महद्वैलक्षण्यं कुतः?। तस्मादित्याद्युक्तं भाष्ये। तस्मात् वस्त्वव्यभिचारात्, अपुंतन्त्रत्वाच्च ध्यानात् ज्ञानस्य महद्वैलक्षण्यम्। यथा च 'पुरुषो वावगौतमाग्निः', 'योषा वावगौतमाग्निः (छा.उ.5.7,8,1.) इति पञ्चाग्न्युपासना-प्रकरणपठितवाक्याभ्यां जायमाना या पुरुषे अग्निबुद्धिः, या च योषित्यग्निबुद्धिःसा मानसीक्रियैव भवति,केवलचोदनाजन्यत्वात् ।योषित्पुरुषयोरग्नित्वस्याभावात्। किञ्चित्साम्येनापि तयोरग्नित्व-स्योपपत्तेः। अत एव तयोरग्निबुद्ध्योः साम्येन पुरुषेण सम्पादितत्वात् पुरुषतन्त्रत्वं च।या प्रसिद्धे अग्नौ अग्निबुद्धिः क्रियते, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा, प्रत्यक्षविषयवद्वस्तुतन्त्रैव, अतो नक्रिया। ननु प्रत्यक्षज्ञानस्य विषयजन्यत्वात्,तत्र वस्तुतन्त्रत्वस्य सद्भावेऽपि, शाब्दादिज्ञानेषु विषयजन्यत्व -स्याभावात्, कथं ज्ञानस्य वस्तुतन्त्रत्वमिति चेत्,'एवं सर्वप्रमाणवस्तुष्वेव वेदितव्यमि'ति भाष्ये समाधानम्। अयमभिप्रायः। यत्र यत्र वस्तुतन्त्रज्ञानत्वम्,तत्र प्रमाणवस्तुजन्यत्वम्। अत एव धूलीपटलानुमिते वह्निभ्रमे, धूमवस्तुनः वह्निज्ञापकस्याभावात्, व्यापकप्रमाणविषयकवस्तु-जन्त्वस्याभावात्, व्याप्यवस्तुतन्त्रज्ञानत्वस्याप्यभावः। अत एव तत्र

In Public domain. Digitization Muthulakshmi Research Academy

वह्नेः अप्रमाविषयत्वमेवेति प्रमात्मकज्ञानविषयत्वाभावः। (र.प्र.पृ.82-84)

आत्मा वा अरे द्रष्टव्यः इत्यादौ न ज्ञानविधिः, अपि तु ज्ञानोपदेशः शा.भा.-तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यवस्तुविषयत्वात्कुण्ठीभवन्त्युपलादिषुप्रयुक्तक्षुरतैक्ष्ण्यादिवत्अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्हि"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः"इत्यादीनि विधिच्छयानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः।योहि बहिर्मुखःप्रवर्तते पुरुषः'इष्टं मे भूयादनिष्टं मे माभूदि'ति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद्विमुखीकृत्यप्रत्यगात्मस्रोतस्तयाप्रवर्तयन्ति "आत्मा वारे द्रष्टव्यः" इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयञ्चात्मतत्त्वमुपदिश्यते "इदं सर्वं यदयमात्मा" (बृ.उ.2.4.6.)"यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानीयात् विज्ञातारमरे केन विजानीयात्" (बृ.उ.4.5.15.) "अयमात्माब्रह्म"(बृ.उ.2.5.19.)इत्यादिभिः। यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति तत्तथैवाभ्युपगम्यते। अलङ्कारोऽह्ययमस्माकं यद्ब्रह्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः "आत्मानं

In Public domain. Digitization Muthulakshmi Research Academy

चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्"।। (बृ.उ.4.4.12.) इति। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत। (भ,गी.15.20.)इति च। तस्मान्न प्रतिपत्तिविधिविषतया ब्रह्मणः समर्पणम्।।

र.प्र.प्र.-ज्ञानस्यैतावता क्रियात्वाभावं प्रसाध्येदानीं प्रमाणजन्यज्ञानस्याविधेयत्वं भाष्यकारःप्रसाधयति। तत्रैवं सति-ज्ञानस्याविधेयत्वे सिद्धे यथाभूतब्रह्मात्मविषयकमपि ज्ञानं,न चोदनातन्त्रम्।यथाभूतत्वं चाबाधितत्वम्। तथा चाबाधितब्रह्मात्म-विषयकमपि ज्ञानं न चोदनातन्त्रमित्यर्थः।ननु 'आत्मानं पश्येत्''ब्रह्म त्वं विद्धि''आत्मा वा अरे द्रष्टव्यः'–इत्यदौ लिङ्–लोट्–तव्यत्प्रत्ययाःज्ञानविषये श्रूयन्ते।अतःश्रुत्या ज्ञनस्य विधेयताप्रतीतौ ज्ञानस्य विधेयत्वमेव समापतति किल? इत्युक्ते, भाष्ये इदं समाधानम्।तद्विषये-ज्ञानविषये, श्रूयमाणा अपि लिङादयः अनियोज्यवस्तुविषयत्वेन कुण्ठीभवन्तीति। अनियोज्यवस्तुविषयत्वं नाम कृत्यसाध्यवस्तुविषयत्वम्, नियोज्यशून्यत्वं वा। ज्ञानस्य कृत्यसाध्यत्वात्, तत्र नियोज्यपुरुषस्यादर्शनाच्च, ज्ञानविषये विधयः कुण्ठीभूता भवन्ति। तत्रचोदाहरणमुपलादिप्रयुक्ततैक्ष्ण्यवत् इति। यथा अतितीव्रधारोऽपि क्षुरः पाषाणादिषु प्रयुक्तः विफल एव भवति,एवमसाध्ये नियोज्यपुरुषशून्ये ज्ञाने प्रयुक्तःविधिशब्दः विफल एव भवति।एवं

In Public domain. Digitization Muthulakshmi Research Academy

तर्हि ज्ञाने विधेरभावेऽपि,ज्ञेये ब्रह्मस्वरूपे विधिरस्तु-इति चेत्, 'अहेयानुपादेयब्रह्मविषयत्वात्' इति भाष्ये समाधानम्। निरतिशयस्य ब्रह्मणः असाध्यत्वेन, व्यापकस्य च तस्य हेयोपादेयभिन्नतया, ज्ञानविषये ब्रह्मस्वरूपेऽपि न विधिः। तर्हि विधिपदानां का गतिरित्युक्ते किमर्थानि तर्हि "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि? 'स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः'-इति भाष्ये शङ्कासमाधाने। अयमाशयः भाष्ये 'द्रष्टव्यः श्रोतव्यः' इत्यादीनां वचनानां विधिच्छायत्वेनैवोल्लेखः कृतः। न विधित्वेन। एवं तर्हि विधिप्रत्ययस्य को वा अर्थः इति जिज्ञासा जायते। 'अर्हे कृत्यतृचश्च' (पा.सू.3.3.169.)इति पाणिनीयानुशासनात् आत्मा दर्शनार्हः, 'आत्मा श्रवणार्हः' इत्यर्थबोधात् द्रष्टव्यत्वेन कीर्तितस्यात्मनः स्तुतिरेव। अथवा आत्मज्ञानमेव परमपुरुषार्थसाधनमिति ज्ञानस्तुत्या आत्मास्तूयते। यथा प्रसिद्धाः यागाः तत्तदर्थवादवाक्यैः स्तूयन्ते, तद्वत् ज्ञेयोऽप्यात्मा स्तूयते-इत्यन्यत्समाधानम्। (र.प्र.पृ84.)

अन्यच्च "स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः" इति भाष्येण ज्ञानविषये विधित्वाभावः नियमपरिसंख्ययोरन्यतरविधित्वं सूचितं वेति पर्यालोचनीयम्। तथा हि विधिरपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति त्रिविधः। तत्र

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानस्य कृत्यसाध्यत्वात्, न विधानमिति नापूर्वविधिसम्भवः। नियमविधौ तु अप्राप्तांशपूरण-इतरव्यावृत्तिरूपांशयोः सद्भावात्, ज्ञानं प्रति लोकतः प्राप्तानां बहूनां पुराणपर्यालोचनद्वैतदर्शन-पर्यालोचन-अद्वैतदर्शनपर्यालोचनादिसाधनानां प्राप्तौ, अद्वैतात्म-दर्शनपर्यालोचननियमः क्रियते इति नियमविधिर्भवतु?। पक्षेऽस्मिन् श्रवणं नाम विचारात्मा मानसव्यापार एव । न ज्ञानम्। तस्य च पुरुषकृतिसाध्यत्वात् विधित्वमिति विवरणकारादयः। किन्तु अद्वैतात्मदर्शन एव सर्वानर्थनिवृत्तिक्षमत्वस्य,अन्वयव्यतिरेकाभ्यां दर्शनात्,अद्वैतात्मदर्शनियमाभ्युपगमः व्यर्थ इति-नियमविधित्वाभ्युपगमः व्यर्थ इति, नियमविधित्वमप्यनुपपन्नमेव। ननु तर्हि परिसंख्याविधित्वपक्षोऽपि कथमुपपद्यते?, ज्ञानस्याविधेयत्वात्-इति चेत्,'उभयस्ययुगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः' इति लक्षणलक्षिते परिसंख्याविधौ, इतरव्यावृत्त्यंशस्यैव प्राधान्यात्, विध्यंशस्याभावात्,तस्यान्यत्र विधित्वव्यवहारेऽपि, वस्तुतो विधित्वाभावात् सूक्ष्मदृशां मतेन परिसंख्याविधित्वाभावस्यापीष्टत्वात्। अत एव स्वाभाविकप्रवृत्ति-विषयविमुखीकरणार्थानीति ब्रूमः-इति भाष्येण परिसंख्याविधेः स्वीकारेऽपि, विधिच्छायानीत्यविधिबोधकभाष्यकारवचनेन नास्ति विरोधः। स्वाभाविकविषयप्रवृत्तीत्यादिभाष्यस्य च अयमर्थः। स्वाभाविकी- अविद्यानिर्वृत्ता,या प्रवृत्तिः,तादृश -प्रवृत्तेर्विषयः बाह्यः

In Public domain. Digitization Muthulakshmi Research Academy

शब्दादिः, ततः विमुखीकरणार्थानि,विधिछायासदृशानि वचनानीत्यर्थः। यो हि पुरुषः बहिर्मुखस्सन्' इष्टं मे भूयात् अनिष्टं मे मा भूत्'–इति विषयेषु आत्यन्तिकेष्टहेतुत्वभ्रमेण,तत्रैव प्रवर्तते, नचात्मज्ञानाभिमुखतया प्रवर्तते,नच विषयेषु आत्यन्तिकपुरुषार्थं लभते,तमात्यन्तिकपुरुषार्थवांछिनं,स्वाभाविककार्यकरणप्रवृत्तिगोच रात्, विषयाद्विमुखीकृत्य,प्रत्यगात्मस्त्रोतस्तया-प्रत्यगात्मनि चित्तवृत्तिप्रवाहो यथा भवेत्, तथा ज्ञानसाधनश्रवणादौ प्रवर्तयन्ति- 'आत्मा वा अरे द्रष्टव्यः'-इत्यादीनि वचनानि। तस्यात्मान्वेषणाय- आत्मविचाराय प्रवृत्तस्य अहेयमनुपादेयञ्चात्मतत्त्वमुपदिश्यते-"इदं सर्वं यदयमात्मा" (बृ.उ.2.4.6.)"यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानीयात् विज्ञातारमरे केन विजानीयात्" (बृ.उ.4.5.15.)"अयमात्मा ब्रह्म"(बृ.उ.2.5.19.)इत्यादिभिः। एवं च आत्मान्यचिन्तनानिवृत्तिफलत्वात्,'आत्मा द्रष्टव्यः'-इत्यत्र, इतरनिवृत्तेरुपदेशात्,परिसंख्याविधिर्भवति। "नियमः परिसंख्या वा विध्यर्थोऽत्र भवेद्यदि। अनात्मादर्शनेनैव परात्मानमुपास्महे"।। (नैष्कर्म्यसिद्धः1.88.शा.सि.ले.स.पृ.28) इति वार्तिकवचनानुसार्यु- क्ताया अपि अविधिप्रधानायाः परिसंख्यायाः अविधित्वमुक्तमेव। विवरणकारादयस्तु-अविहितश्रवणगोचरे ब्रह्मणि मनन- निदिध्यासनयोर्विधानायोगात्,विहितश्रवणस्य स्वापूर्वद्वारा ज्ञानोत्पत्तिपर्यन्तं प्रभुत्वात्, श्रवणे विधिरास्थेय इति वदन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

तदेतत्सिद्धान्तलेशसङ्ग्रहादौ अप्पय्यदीक्षितादिभिः सम्यङ्निरूपितम्। (शा.सि.ले.स.329)भाष्येऽपि 'सहकार्यन्तरविधिः पक्षेण' इत्याद्यधिकरणे (ब्र.सू.3.4.47) पक्षेण इति पदस्वारस्यात्, भेददर्शनप्राबल्यपक्षे चित्तस्य ब्रह्मप्रवणत्वाभावे श्रवणादौ नियमविधिरभ्युपगतः। अत्र तु भाष्यकारैः 'श्रोतव्यः' इत्यस्यापि विधिच्छायत्वविशेषणात् श्रवणस्य विधित्वमनङ्गीकृतमेवाभाति। वैरुध्यपरिहारस्तु केवलमधिकारितारतम्यादेवेत्यवसेयः। पूर्वमेव क्षपितज्ञानोत्पत्तिप्रतिबन्धकीभूतसर्वकिल्बिषाणां श्रुतेः श्रवणमात्रेणैव, विनाप्यपूर्वसाहाय्यं,विनापि विधिं, ज्ञानोत्पत्तेः अन्वयव्यतिरेकाभ्यामेव निष्प्रत्यूहत्वात्। तस्माद्विषयेऽत्र भामतीकारादीनां पक्षः साधीयान् विवरणकारादीनां पक्षस्साधीयानिति विचारोऽप्यनावश्यकः। अधिकारिभेदेन पक्षद्वयव्यवस्थितेः। अतः एवैतदधिकरणसहकार्यन्तराधिकरण-वचनयोरापाततः प्रतीतविरोधयोरपिअधिकारिभेदान्नास्ति विरोध इति भाष्यद्वयमपि सामञ्जस्यमर्हतीति बोध्यम्।

'इदं सर्वं यदयमात्मा'-इत्यादिवाक्यानामयमर्थः। यदिदं सर्वं-विश्वं प्रत्यभात्, अयमात्मैव। यत्र विद्यादशायां, सर्वमात्मभावमाप्तवत्, तदा कः कर्ता, केन साधनेन कं पश्यति? । विज्ञातारम्-सर्वसाक्षिणं, केन कर्त्रा विजानीयात्? क्रियाकारकादिनिषेधस्य उपदेश्यात्मज्ञानविषयतया, नियोज्यफला-दीनामसम्भवे सुतरां ज्ञानविधेरसम्भवः। "अद्वितीयादृश्यात्मावबोधे

In Public domain. Digitization Muthulakshmi Research Academy

क्व विधिस्तपस्वी द्वैतवनोपजीवी स्थास्यती"?ति रत्नप्रभा। (र.प्र.85.)अयमात्मा ब्रह्मेति तु सिद्धवदेव ज्ञानोपदेशः,न ज्ञानविधिः। यदपि पूर्वपक्षिणा वृत्तिकृता हानोपादानरूपफलाभावात्, आत्मज्ञानं न युज्यत इति, तादृशोपादेयानुपादेयफलाभावः अस्माभिस्तथैवाभ्युपगम्यते। यस्मात् ब्रह्मावगतौ सर्वकर्तव्यता हानिः कृतकृत्यता च विशिष्टं फलमस्ति। तथा च श्रुतिः- "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्"। (बृ.उ.4.4.12.) इतिश्रुतिः "एतद्बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत"। (भ.गी.15.20.)इति स्मृतिश्च सर्वकर्तव्यताहानौ कृतकृत्यतायां च प्रमाणम्। अयं स्वयंप्रकाशानन्दः परमात्मेति यः कश्चिज्जानीयात्,तदा किं फलं कस्य वाफलमिच्छन्,तप्यमानं शरीरम्,अनु-अनुसृत्य,संज्वरेत्-तप्येत्। भोक्तृ-भोग्यद्वैताभावात्, कृतकृत्यः आत्मविद्भवेत् इत्यर्थः। भगवद्गीतायां च एतद्बुद्ध्वा-इत्यस्य गुह्यतमं तत्त्वं बुद्ध्वा इत्यर्थः। तस्मादविधिविषयादात्म ज्ञानात्,यतः सर्वकर्तव्यताहानिः, कृतकृत्यता च, अतः न ब्रह्मज्ञानस्य विधानमिति, प्रतिपत्तिविधविषयतया ब्रह्मणः समर्पणमिति वृत्तिकारमतं न चतुरस्त्रम्। (र.प्र.पृ. 84-85.)

इति भाष्यरत्नप्रभाप्रकाशे वृत्तिकारमततन्निरासात्मको भागः समाप्तः

In Public domain. Digitization Muthulakshmi Research Academy

प्राभाकरमतखण्डनम्-सिद्धार्थे पदानां व्यवस्थापनञ्च

शा.भा.- यदपि केचिदाहुः-"प्रवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति"इति,तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वात् ।योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नाऽसौ नास्तिनाधिगम्यत इति वा शक्यं वदितुम्,"सएष नेति नेत्यात्मा("बृ.उ.3.9.26.) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्। य एव निराकर्ता तस्यैवात्मत्वात् । नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्।न। तत्साक्षित्वेन प्रत्युक्तत्वात्। नह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थःसम एकःकूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केन चिदधिगतः सर्वस्यात्मा, अतः स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्।आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः।सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो हि विनाशहेत्वभावात् अविनाशी,विक्रियाहेत्व - भावाच्च कूटस्थनित्यः,अत एव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात्"पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" (क.उ.1.3.11)"तं त्वौपनिषदं पुरुषं पृच्छामि"(बृ.उ.3.9.26.)इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाशमानत्वे उपपद्यते।अतो भूतपरो वेदभागो नास्तीति वचनं साहसमात्रम्।।

In Public domain. Digitization Muthulakshmi Research Academy

र.प्र.प्र.-एतावता प्रबन्धेन भाष्यकारैः भाट्टमतं, कार्यान्वितशक्तिवादिनामपि सिद्धब्रह्मोपासनापरत्वमभ्यु -पगच्छतां वेदान्त्येकदेशिनां वृत्तिकाराणां च मतं दूषितम्।इदानीं यदपि केचिदाहुः-इत्यादिग्रन्थेन वृत्तिकार -मतस्य मूलस्तम्भेष्वन्यतमः कार्यान्वितशक्तिवादः निराक्रियते।व्यवस्थाप्यते च वेदान्तानां सिद्धब्रह्मणि तात्पर्यम्।वाक्यस्थानां पदानां कार्यान्विते अर्थ एव व्यवहारतः शक्तिः स्वीकार्या ।कार्यान्वितशक्तिवाद- स्वरूपं च प्रागेव वृत्तिकृन्मतनिरूपणावसरे निरूपितम्। वाक्यस्थपदानां न तावत् कर्त्रात्मा अर्थः, तस्य लोकसिद्धत्वात्।“अनन्यलभ्यः शब्दार्थः” इतिन्यायेन तस्य वेदान्तशब्दार्थत्वायोगात्।यदि कर्त्रात्मनः अन्यद्ब्रह्म वेदान्तशब्दार्थ-इति वदामः-,तर्हि तदपि नोपपद्यते।वाक्यस्थपदानां कार्यान्वितस्वार्थपरत्वेन, वेदान्तानामपि कार्यपरत्वस्यैव युक्तत्वात्।प्रवृत्तिफलकविधेः,निवृत्तिफलकनिषेधस्य तच्छेषस्य च व्यतिरेकेण केवलवस्तुवादिनः वेदभागस्याभावात्, वेदवाक्यस्थपदानाम् अभिधेयभूतं ब्रह्म नास्तीति वेदान्तवाक्य-स्योपासनापरत्वमेवास्थेयमिति कार्यान्वितशक्तिवादिनः प्राभाकराः। ‘तन्न’ इत्यादिना भाष्ये समाधानं च।अस्यायमभिप्रायः।अज्ञतस्य फलस्वरूपस्यात्मनःअथवा ब्रह्मणः उपनिषदेकवेद्यस्य कार्यशेषत्वाभावात्, कृत्स्नस्य वेदस्य कार्यपरत्वमसिद्धम्. वेदान्तात्मकप्रमाणेन अज्ञातफलरूपब्रह्मणः अवगमात्।

In Public domain. Digitization Muthulakshmi Research Academy

न च 'प्रवृत्तिनिवृत्ती कार्यताज्ञानजन्ये कार्यत्वात् प्रवृत्तिनिवृत्तित्वात् अस्मदादिप्रवृत्तिनिवृत्तिवत्' इत्यनुमानेन प्रवृत्तिनिवृत्त्योः कार्यताज्ञानजन्यत्वात्, कार्यताबोधस्य अन्वयव्यतिरेकाभ्यां लिङादिपदप्रयोज्यतया वक्तृवाक्यस्य कार्यतापरत्वं निश्चित्य,वाक्यस्थपदानां कार्यान्वितार्थे शक्तिग्रहःअभ्युपगम्यते। अतः सिद्धपदा -र्थस्य न वाक्यार्थत्वं युक्तमिति वाच्यम्।' पुत्रस्ते जातः' इति वाक्यश्रोतुः पितुः हर्षलिङ्गेन तस्येष्टं पुत्रजन्मानुमाय पुत्रादिपदानां सिद्धे अर्थे सङ्गतिग्रहात्।न च तत्र 'पुत्रस्ते जात' इत्यादौ कार्यतावाचि पदं श्रूयते।तदभावेऽपि तद्बोध इति चेत्, 'कारणाभावेऽपि कार्योत्पत्तिलक्षणः' व्यतिरेकव्यभिचारः प्रसज्येत। किं च वाक्यस्थपदानां किं कार्यान्विते शक्तिः? उत इतरान्विते शक्तिः?- इति विचारे कार्यान्वितशक्त्यपेक्षया इतरान्विते शक्तेरेव लाघवात्, कार्यान्वितशक्तिवादं परित्यज्य इतरान्वितशक्तिवादः स्वीकर्तव्यः। एवं च सिद्धस्यापि वाक्यार्थत्वं सिद्धमित्यभिप्रायेणभाष्ये तन्न-इत्यादिना भाष्यकारा आहुः।औपनिषदस्य पुरुषस्य अनन्यशेषत्वात् स एव वाक्यस्थपदार्थः।

किंच कार्यान्वितशक्तिवादिभिः कार्यस्यैव वाक्यार्थत्व-मुररीकृत्य ब्रह्मणः वाक्यार्थत्वं प्रतिषिध्यते। तत्कस्मादिति पृच्छामः?।1.किं ब्रह्मणः नास्तित्वादेव? 2.वेदान्तेषु ब्रह्मणः

In Public domain. Digitization Muthulakshmi Research Academy

अभानात् ? 3.अथवा ब्रह्मणः कार्यशेषत्वात्? 4.लोकसिद्धत्वाद्वा? 5.मानान्तरविरोधात् ?तत्र 'योऽयमात्मा उपनिषत्स्वेव समधिगतः' इत्यारभ्य 'य एव निराकर्ता तस्यैवात्मत्वात्' इत्यन्तेनग्रन्थेन आद्यं पक्षत्रयं निराकृतम्।1.'उपनिषत्स्वेव योऽयमधिगतः पुरुषः असौ नास्तीतिवदितुं नशक्य'मिति भागेन ब्रह्मणो नास्तित्वपक्षः निराकृतः।2.तादृशःपुरुषः नाधिगम्यत इति न शक्यं वदितुम्-इति भागेन वेदान्तेष्वभानात्कार्यपरत्वमिति पक्षः व्युदस्तः। 3."अनन्यशेषः पुरुषः नाधिगम्यते इति न शक्यं वदितुम्" इत्यनेन कार्यशेषत्वादिति तृतीयपक्षः निरस्तः।नास्तित्वाभावे च हेतुः उपनिषत्स्वेव अधिगतत्वादिति वेदान्तमानसिद्धत्वम्। उत्पाद्यादिचतुर्विधकार्यविलक्षत्वेन असंसारित्वेन स्वप्रकरणस्थत्वेन च ब्रह्मणः निराकर्तुमशक्यत्वात्, नास्तित्वाभावः प्रतिपादितः। अत एवविलक्षणतया अवगम्यमानत्वात् वेदान्तेषु तस्याभानमपि नास्ति।अनन्यशेषः इति तु कार्यशेषत्वनिराकरणायेत्युक्तमेव। अन्यच्च 'स एष नेति नेत्यात्मा' इति वचने आत्मशब्दोऽपि नास्तित्वाभावे मानम्।'इदं न,''इदंन,'इति सर्वदृश्यप्रतिषधेन य आत्मा उपदिष्टः, स एष आत्मा इत्यादिवाक्यस्यार्थः। निरधिष्ठानकनिषेधस्यायोगात्, आत्मशब्दाच्च तत्र सर्वनिषेधाधिष्ठानभूतः कश्चिदस्तीति विज्ञायते। य एव निराकर्ता तस्यैवात्मत्वात्।अन्यथात्मनः अप्यपरिशेषे सर्वनिषेधे च

In Public domain. Digitization Muthulakshmi Research Academy

शून्यवादापत्तेः ।आत्मनश्च प्रत्याख्यातु -मशक्यत्वात् ब्रह्मनास्तित्वं वक्तुं नशक्यते। 4.ननुब्रह्मास्तित्वप्रत्यायनाय "आत्मा उपनिषत्स्वेव समधिगतः" इत्युक्तम्। तन्नसङ्गच्छते। आत्मनः अहम्प्रत्ययविषयत्वेन लोकसिद्धत्वादिति चेत्, लोकसिद्धत्वलक्षणः चतुर्थः पक्षोऽपि नोपपद्यते। अहमिति प्रत्यये भासमानयोः अहङ्कार-तत्साक्षिणोर्मध्ये,आत्मा अहमित्यहङ्कारस्वरूपो न, अपि तु, अहंप्रत्ययस्य अहङ्कारवृत्तेः साक्षिरूप एवात्मा। तत्तु यावता 'अहं ब्रह्मास्मी'त्यादिश्रुत्या नोपदिश्यते, तावता न ज्ञायते।अतः लौकिकाहम्प्रत्ययाविषयात्वादात्मनः लोकप्रसिद्धत्वाभावात् उपनिषदेकगम्यत्वमेव। एतदेव भाष्ये 'तत्साक्षित्वेन प्रत्युक्तत्वादि'त्यनेनोक्तम्। तत्साक्षित्वेन अहम्प्रत्यय-साक्षित्वेनेत्यर्थः। न हि अहम्प्रत्ययविषय-कर्तृव्यतिरेकेण सर्वभूतस्थः, समः तारतम्यवर्जितः, अत एवैकः, सर्वस्यात्मा, कूटस्थनित्यः पुरुषः विधिकाण्डेतर्कसमये वा केनचिद्वादिना केनचित्प्रमाणेनवा समधिगतः।अतः निर्विशेषात्मनःअपूर्वत्वात् लोकासिद्धत्वाच्च वेदस्थपदैः ज्ञापनं युक्तमेव। 5.मानान्तरविरोधाद्वेदस्य ब्रह्मपरत्वं परित्यज्य कार्यपरत्वं स्वीक्रियते इति पक्षोऽपि न समीचीनः।यतः एतावता वेदान्तादृते ब्रह्मैव नज्ञातम्, अज्ञातार्थे मानान्तरविरोधः कथम् ? ततः विधिशेषत्वकल्पनमपि कथम्? एतदेवोक्तं भाष्ये –"स नकेन

In Public domain. Digitization Muthulakshmi Research Academy

चित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्" इति। अतः मानान्तरागम्यत्वान्न मानान्तरविरोधः। ननु साक्षी कर्माङ्गं चेतनत्वात्, कर्तृवत् इत्यनुमानेनसाक्षिणः कर्माङ्गत्वं सिद्धमिति चेत्,तदपि न युक्तम् ।किमयं साक्षी ज्ञातस्सन् कर्माङ्गम्? उत अज्ञातः? आद्ये ज्ञात -साक्षिणः अनुपयोगात्,न कर्माङ्गत्वम्। साक्षिज्ञानस्य अथवा ब्रह्मज्ञानस्य कर्मव्याघातुकत्वात्। सर्वशेषि -त्वादेव साक्षिणः न सर्वेषामुपादेयत्वम् ,न च हेयत्वम्। हेयोपादेयभिन्नस्य च कार्यशेषत्वं न युज्यते।

अथ आत्मनः अनित्यत्वेन हेयत्वमस्तीति, तस्य कार्याङ्गतया समर्पणं सम्भवतीति चेत्- तदपि न शोभनम्। यतः सर्वं विकारजातं विनश्यत् पुरुषान्तं(पुरुषं वर्जयित्वैव) नश्यति। पुरुषो हि विनाशहेत्वभावात् अविनाशी एव। अतः नित्यस्य तस्य कार्यशेषत्वं न युक्तम्। नच ब्रह्मणः परिणामिनित्यत्वमपि स्वीकर्तुं शक्यम् ,विकारहेत्वभावात्। अत एव ब्रह्म कूटस्थनित्यम् ,नित्य-शुद्ध-बुद्ध-मुक्तस्वभावं च। ननु परप्राप्त्यर्थं आत्माहेयः भवतु ,कार्याङ्गं च भवतु इत्युक्ते –तदपि न । "पुरुषान्नपरं किंचित् सा काष्ठा सा परा गतिः"- इति कठश्रुतेः,'तं त्वौपनिषदम्'-इत्यादिश्रुतेश्च उपनिषत्सु ब्रह्मणःप्राधान्येन प्रकाशनएवोपपत्तेः। 'इन्द्रियेभ्यः पराह्यर्था'– इत्यादिनोपक्रम्य ,इन्द्रियादिभ्यः सर्वोत्कृष्टत्वेन पुरुषस्य प्रतिपादनात् ,तस्यैव काष्ठा -शब्देन निर्देशात् सर्वावधित्वं पुरुषस्य

 In Public domain. Digitization Muthulakshmi Research Academy

प्रतीयते। पुरुषान्नपरं किं चिदिति निश्चित्य चोक्तम्। सा परा गतिः – इति, पुरुषस्यैवोत्तमोत्तमाश्रयत्वं प्रतिपादितम्। तादृशस्य उत्तमोत्तमत्वेनोपनिषत्सु ख्यातस्य ब्रह्मणः कार्य -शेषत्वप्रतिपादनं प्राभाकरमते महदन्न्याय्यम्। एवमात्मनः अथवा ब्रह्मणः 1.अनन्यशेषत्वात् 2.अबाध्य -त्वात् 3.अपूर्वत्वात् 4.वेदान्तेषु स्फुटभावाच्च वेदान्तैकवेद्यत्वम् ।तथा शाकल्यब्राह्मणे 'तं त्वौपनिषदं पुरुषं पृच्छामि'- इति शाकल्यं प्रति याज्ञवल्क्यवचनमपि ब्रह्मणः प्राधान्यनिरूपकम्। औपनिषदम्-उपनिषदेक -वेद्यम् ,तम्-सकारणसूत्राधिष्ठानम् ,पुरुषम्-पूर्णम् ,हे शाकल्य त्वां पृच्छामीति तद्वचनस्यार्थः। एवंच उपनिषद्वेद्यस्य पूर्णस्य पुरुषस्य स्वल्पे कार्ये अङ्गभावतानयनमपि अत्यन्तं तुच्छमेव। भूतवस्तुपरो वेदभागो नास्तीति कथनं च अत्यन्तसाहसम्। (र.प्र.पृ.85-88.)

सिद्धान्ते शास्त्रतात्पर्यविद्वचनेन जैमिनिसूत्रेण च विरोधपरिहारः

शा.भा.- यदपि शास्त्रतात्पर्यविदामनुक्रमणम् "दृष्टो हि तस्यार्थः कर्मावबोधनम्" इत्येवमादि, तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेध-शास्त्राभिप्रायं द्रष्टव्यम्। अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येकान्तमभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः, प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थं भूतं नोपदिशतीति को

In Public domain. Digitization Muthulakshmi Research Academy

हेतुः?। नहि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्क्रियार्थ एवोपदेशः इति चेत् ।नैष दोषः। क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वं तु प्रयोजनं तस्य। नचैतावता वस्त्वनु -पदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति। उच्यते-अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तुदेशेन।।

र.प्र.प्र.-वृत्तिकृन्मतेन कार्यान्वितशक्तिनिरूपणाय प्राक् शास्त्रतात्पर्यविदां शबरस्वामिनां वचनम्, महर्षेः जैमिनेः आम्नयस्येत्यादि सूत्रं च प्रमाणतया उपन्यस्तम्। तस्य चविरोधपरिहारः भाष्यकारैरिदानीं क्रियते। 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति शबरस्वामिभिरुक्तं कार्यपरताप्रतिपादकं किञ्चिद्वचनं प्रागुपात्तम्। इदानीं कार्यपरतात्यागे सिद्धब्रह्मपरत्वे च तादृशवाक्यविरोधः स्यादेव किल?–इति शङ्का जायते। तस्याः, तद्धर्मजिज्ञासाविषयत्वात् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्- इति भाष्ये समाधानम्। तत्-तादृशशबरस्वामिवचनमित्यर्थः। प्रमाणलक्षणे प्रामाण्यनिरूपणावसरे फलवदर्थबोधनं तस्यार्थः इति वक्तव्येऽपि, प्रकृते पूर्वमीमांसाशास्त्रे धर्मविचारः उपक्रान्त- इति कर्मावबोधनमित्युक्तं शबरस्वामिना। किन्तु शास्त्रमात्रस्य प्रामाण्ये वक्तव्ये फलवदबाधितार्थबोधकत्व लक्षणं प्रामाण्यमेव

 In Public domain. Digitization Muthulakshmi Research Academy

तैरप्याद्रियते। तत्तु वेदान्ताना -मप्यस्तीति न तेन वाक्येन फलवत्सिद्धब्रह्मप्रतिपादकस्य वेदान्तशास्त्रस्य विरोधः। अत एव सूत्रकारोऽपि 'अनुपलब्धे अर्थे तत्प्रमाणम्' इति फलवदज्ञातार्थज्ञापकत्वेनैव वेदार्थतां धर्मस्य दर्शयति। निषेधशास्त्रस्यापि निवृत्तिरूपकार्यपरत्वमस्तीत्यतः,यद्यपि 'दृष्टो हि तस्यार्थः कर्मावबोधन'मिति वचनं यथातथत्वेन प्रमाणी - कर्तुं शक्यते,तथाप्यौदासीन्यलक्षणायाः निवृत्तेरकार्यत्वात् मीमांसासूत्रभाष्याभ्यां कार्यपरत्वाभावः वर्णयितुं नशक्यते। एवं वाक्यस्य कार्यपरत्वे दूषिते लिङः कोऽर्थ इत्युक्ते-कार्यबोधकत्वमपि दूषयति रत्नप्रभाकारः।

वस्तुतस्तु कर्मकाण्डस्य लिङर्थे तात्पर्यम्। तच्च प्राभाकरोक्तरीत्या न नियोगः, नापूर्वम्,न कृतिसाध्य -त्वरूपकार्यम् ,किन्तु इष्टसाधनत्वमेव। लोके प्रवर्तकज्ञानगोचरस्य इष्टसाधनत्वादेः क्षीरपान-अन्नाशनादौ प्रवर्तकत्वेन क्लृप्तत्वात्, 'यजेत स्वर्गकाम' इत्यादावपि यागादिगतमिष्टसाधनत्वमेव प्रवर्तकम्। अतः स एव विध्यर्थः। न च क्रियातः अतिरिक्तत्वेन कार्यमिति कश्चिल्लिङर्थत्वेन प्रसिद्धोऽस्ति। किन्तु कूर्मलोमादिव–त्कार्यस्याप्रसिद्धत्वेन, नलिङ् पदशक्यता। इष्टसाधनत्वस्य लिङर्थत्वस्वीकारे तु दधिसोमादावपि तस्य सद्भावात्' दध्ना जुहोति' 'सोमेन यजेत'- इत्यादिसिद्धपदघटितानां वाक्यानामपि प्रामाण्यं सिद्ध्यति। अतश्च

In Public domain. Digitization Muthulakshmi Research Academy

लिङः कार्यार्थत्वं परित्यज्य इष्टसाधनत्वार्थकत्वमेव स्वीकर्तव्यम् भवति। ब्रह्मणो ज्ञानस्य चेष्टसाधनत्वात् 'आत्मा वा अरे द्रष्टव्यःश्रोतव्य'इत्यादौ आत्मदर्शनमिष्टसाधनमित्याद्यर्थबोधात् सिद्धब्रह्मपरत्वेऽपि तादृश -मेवप्रामाण्यं सिध्यति। यदा कर्मकाण्डस्यैव इष्टसाधनत्वेन प्रामाण्यम्, किमुत ज्ञानकाण्डस्य इष्टसाधनत्वात् प्रामाण्यं सिध्यतीति ।अतश्च "वेदान्ताः सिद्धवस्तुपराः फलवद्भूतशब्दत्वात् दध्यादिशब्दवत्"-इत्यनुमानेन सिद्धब्रह्मपरत्वेनैव वेदान्तानां प्रामाण्यं साधनीयम्। (र.प्र.पृ.85-88.)

जैमिनिसूत्रविरोधपरिहारः-अपि च'आम्नायस्य क्रियार्थत्वात्'-इत्यादिसूत्रेण अक्रियार्थानामानर्थक्यं प्रतिपाद्यते। अतः कार्यान्वितशक्तिवादः आस्थेय इत्यपि न। अतदर्थानामानर्थक्यमित्युक्ते अतदर्थप्रतियोगिभूतः अर्थः अभिधेयरूपः? फलात्मको वा? इति विकल्पनीयम्। तत्र अभिधेयाभावः आनर्थक्यमित्युक्ते' दध्ना जुहोति''सोमेन यजेत'-इत्यादिसिद्धवस्तूपदेशपराणाम् आनर्थक्यम्-अर्थशून्यत्वं स्यात्। ननु केनोक्तं भूतोपदेशस्थले आनर्थक्यमिति?। केवलमस्माभिः भूतस्य दध्यादेः कार्यशेषत्वमित्येव प्रतिपादितम्। "भूत -भव्यसमुच्चारणे भूतं भव्यायोपदिश्यते" इति न्यायेन भूतस्य दध्यादेः सिद्धस्यवस्तुनः,भव्याय-होमभावनायै उपकारकत्वेनोपदेशात्,

In Public domain. Digitization Muthulakshmi Research Academy

भूतस्यापि वस्तुनः दध्यादेः नानर्थक्यम् इति- भाष्ये भूतोपदेशानर्थक्यप्रसङ्गः इत्यनन्तरं योजना कर्तव्या अर्थबोधसौकर्याय, यदि च-इतिच। यदि कार्यातिरेकेण, अथवा प्रवृत्तिविधितच्छेष -व्यतिरेकेण 'दध्ना जुहोती'त्यादौ दध्यादिशब्दः भव्यार्थत्वेन सिद्धमर्थमुपदिशति,तर्हि सत्यादिवाक्ये सत्यादिशब्दः कूटस्थं ब्रह्म किमिति नोपदिशेत् ? तदेतदभिप्रेतं भाष्ये कूटस्थं ब्रह्म नोपदिशतीति को हेतुः? इति वचनेन। तत्र च कारणं पृच्छामः।1.किं कूटस्थस्य अक्रियात्वात्? उत क्रियाशेषत्वाभावाद्वा? इति। ननु दध्यादेः क्रियाशेषत्वेन कार्यत्वात् दध्यादेः उपदेशो युक्तः, तस्य शब्दप्रतिपाद्यत्वं चयुक्तम्। किंतु कूटस्थस्याकर्यत्वात् सत्यादिशब्दैरुपदेशो न युक्त-इति शङ्कायां – नहि भूतमुपदिश्यमानं क्रिया भवति- इति भाष्ये समाधानम्। दध्यादेः क्रियान्वयित्वेऽपि क्रियात्वं दुर्लभम्। दध्यादेः कार्यान्वयित्वमात्रेण कार्यत्वे कार्याभेदे अङ्गाङ्गिभावव्याघातापत्तेः। अतः भवतां दध्यादेः, अस्माकंसत्यादेश्च क्रियात्वाभावः तुल्यः। उभयोरपि भूतत्वाविशेषात्। अतः कार्याद्भिन्नस्य दध्यादेरिव ,कार्याद्भिन्नस्य सत्यादेरुपदेशो युक्तः।

अथ भाष्ये-भव्यार्थत्वेन इत्यस्य क्रियाशेषत्वादित्यर्थं परिकल्प्य, क्रियाऽशेषत्ववद्ब्रह्मवाचिना सत्यादिपदेन नास्ति ब्रह्मणः उपदेशः। दध्यादिपदेन क्रियाशेषत्वविशिष्टदध्यादिवाचिना सिद्धस्य

In Public domain. Digitization Muthulakshmi Research Academy

दध्नःउपदेशो युक्त इति शङ्का। इयमेवशङ्का भाष्ये—"अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेशः"- इति वाक्यतात्पर्यविषयभूता। भूतस्य(दध्यादेः)अक्रियात्वेऽपि,क्रियासाधन त्वात् क्रियार्थ एव-कार्यशेष एव भूतोपदेश(इति वाक्ययोजना)—इति चेदित्याशङ्क्य नैष दोषः-क्रियार्थत्वेऽपीत्यादिना भाष्ये समाधानम्। तत्र 'क्रियार्थत्वे क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव'- इति भाष्यवाक्यावगाहनाय आदौ रत्नप्रभाकृता विकल्पद्वयं क्रियते। किं भूतस्य कार्यशेषत्वम् 1.शब्दार्थत्वाय वा 2.फलाय वा ?इति, येन विकल्पसमाधानेन प्राभाकरा -णां कार्यान्वितशक्तिवादे आग्रहः शिथिलीक्रियते।1. तत्र शब्दार्थत्वायवेति विकल्पस्य क्रियार्थत्वेऽपीति वाक्यं समाधानम्-दध्यादेः कार्यशेषत्वे सत्यपि, होमक्रियानिर्वर्तनशक्तिमद्दधि उपदिष्टमेव दधिपदेन। अर्थात् दधिपदेन वस्तुमात्रमेवोपदिष्टं भवति, न कार्यान्वयी दधिपदार्थः। लाघवात् वाक्यस्थपदानांअन्वितमात्रे शक्तिग्रहात्, शब्दार्थत्वाय कार्यार्थत्वं न स्वीकर्तव्यम्।

2 अथ फलाय कार्यार्थत्वं स्वीक्रियते—इत्युक्ते दध्यादिवाक्ये तथा स्वीक्रियतां नाम। तत्र स्वर्गादिफलाय दध्यादेः क्रियाद्वारकत्वात्। दध्यादिशब्दैरुपदिष्टस्य क्रियार्थत्व एव प्रयोजनलाभात्। अत एवतस्य भूतविशे -षस्य दध्यादेः क्रियार्थत्वं तु प्रयोजनमित्युक्तं "क्रियार्थत्वं तु प्रयोजन" मित्यादिभाष्येण।

 In Public domain. Digitization Muthulakshmi Research Academy

वाक्येऽस्मिन् तुशब्दः ब्रह्मणः क्रियाशेषत्वं व्यवच्छिनत्ति। न हि क्रियाशेषत्व एव सिद्धस्योपदेशे फललाभः-इति कुलधर्मः। 'तरति शोकमात्मवित्' श्रुत्या क्रियारहितस्याप्यात्मज्ञानात् शोकनिवृत्तिलक्षणफललाभात्।

ननु दध्यादिपदस्थले भूतस्य-सिद्धस्यदध्यादेः कार्यशेषस्यैव दध्यादिपदेन लाभात्, सत्यादिपदस्थलेऽपि तथैव भाव्यं किल?-इति प्रश्ने "न चैतावता वस्त्वनुपदिष्टं भवति"—इति भाष्ये समाधानम्। फलाय दध्यादेः शेषत्वाङ्गीकारमात्रेण दधिशब्देन दध्यात्मकं वस्तु अनुपदिष्टंन भवति। अयमर्थः। नहि दधिपदशक्यतावच्छेदककुक्षौ क्रियाशेषत्वरूपस्यापि प्रवेशः, किं तु दधिपदस्य दधित्वविशिष्ट एव लाघवाच्छक्तेः स्वीकारात् दध्यादिपदस्थल इव सत्यादिवाक्येऽपि सिद्धवस्तूपदेशतौल्यात् कार्यान्वितशक्तिवादः दुर्बल एव।

अथ "आम्नायस्य क्रियार्थत्वा"दित्यासूत्रे –आनर्थक्यपदस्य निष्फलत्वमर्थ इत्युक्तम् ,तदपि न युज्यते-इति, "यदिनामोपदिष्टं स्यात् किं तव तेन स्यादिति"-उच्यते- इत्यादिभाष्येण समाहितम्। यद्यपि दध्यादि स्वतो निष्फलमपि, क्रियाद्वारासफलत्वेनोपदिष्टम्, तथापि कूटस्थब्रह्मवादिनः क्रियाद्वाराभावात्, किं तव तेन स्यात्-तेन दृष्टान्तेन किं फलं स्यात्। न हिभूतवस्तुसाफल्ये क्रियैव द्वारमिति नियमः। रज्वाः ज्ञानमात्रे -णापि, भ्रान्तिनिवृत्तिरूपसाफल्यदर्शनात्-

In Public domain. Digitization Muthulakshmi Research Academy

इत्यभिप्रायेण भाष्ये उच्यत इत्युक्तम्। यथा क्रियार्थत्वेनोपदिश्यमानः दध्यादिः सफलो भवति, तथा मानान्तरानवगतात्मवस्तूपदेशोऽपि सफल एव भवितुमर्हति। उभयत्र साफल्ये नास्ति विवादः। इयांस्तु विशेषः–यत् दध्यादेःक्रियाद्वारा साफल्यम्, वेदान्तप्रतिपाद्यब्रह्मणस्तु क्रियामद्वारीकृत्यैव, तदवगत्या मिथ्याज्ञानस्य संसारहेतोः निवृत्तिः प्रयोजनं सम्पाद्यत इति क्रियासाधन -वस्तूपदेशे सति यादृशमर्थवत्त्वं तादृशमर्थवत्त्वं समानमेव। ततोऽप्यधिकं तु अनपलपनीयमेव। तस्मात् सिद्धार्थे शक्तिवादिनामस्माकं "आम्नायस्यक्रियार्थत्वा"दित्यादिसूत्रेणापि न कश्चिद्विरोधः। (र.प्र.पृ.89-91.)

न ब्राह्मणो हन्तव्यः इत्यादौ कार्याप्रतीतेरपि वाक्यस्य कार्यपरत्वाभावः-

शा.भा.-अपि च 'ब्राह्मणो नहन्तव्यः' इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया, नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्य' इत्यादिनिवृत्त्युपदेशानर्थक्यम्। तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यनुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत्स्वसम्बन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौदासीन्यकारणम्। सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव,'न ब्राह्मणो

In Public domain. Digitization Muthulakshmi Research Academy

हन्तव्य' इत्यादिषु प्रतिषेधार्थं मन्यामहे,अन्यत्रप्रजापतिव्रतादिभ्यः। तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम् ।।

र.प्र.प्र.-अपि च 'ब्राह्मणो न हन्तव्यः'-इत्यादौ निवृत्तिः उपदिश्यते। यद्यपि सा निवृत्तिः क्रियेति परेण वक्तुंशक्यते। वस्तुतःसा क्रिया न। नञः हन् धातुना योगे नञा हननक्रियायाः अभावरूपायाः अक्रियारूपाया एव निवृत्तेःबोधनात्। न च अभावः क्रियासाधनम्। अभावस्य च कंचिद्भावपदार्थप्रत्यहेतुत्वात् । अतश्चाक्रियार्थानां यद्यानर्थक्यम्, 'नब्राह्मणो हन्तव्यः'इति निवृत्तिबोधकानामानर्थक्यं प्राप्तम्। तच्चास्माकमनिष्टम्। तर्हि कथमत्र वाक्यार्थबोधनिर्वाहः इत्युक्ते—नञ् घटितवाक्ये मीमांसकानां मर्यादा आदौ विज्ञेया।

नञः नाम्ना धातुना वा योगे नञ् न प्रसज्यप्रतिषेधं बोधयति, अपि तु पर्युदासमेव। 'नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः'। (मी.न्या.प्र.पृ.182.)'पर्युदासस्सविज्ञेयो यत्रोत्तरपदेन नञ्' इति। (मी.न्या.प्र.191.) उत्तरपदं च नाम धातुर्वा। पर्युदासस्थलेच विधिरेव वाक्यार्थः,न निषेधः। यथा 'नेक्षेतोद्यन्तमादित्यम्' इत्यादौ नञर्थस्याभावस्य विधातुमशक्यत्वात्, नञीक्षतिभ्यां मिलित्वा ईक्षणसङ्कल्पविरोधी कश्चनार्थः उपस्थाप्यते। तेन चतत्र 'आदित्यमनीक्षणसङ्कल्पेन

In Public domain. Digitization Muthulakshmi Research Academy

भावयेत्'–इति विधिरूपवाक्यार्थबोध एव। 'न ब्राह्मणो हन्तव्य'-इत्यत्रतुरागतः प्राप्तहननस्य निषेधात्, प्रसक्तस्य प्रतिषेधात् प्रसज्यप्रतिषेध एव। 'प्रतिषेधस्स विज्ञेयः क्रिययासह यत्र नञ्' इति तल्लक्षणात्। (मी.न्या.प्र.पृ.180.) प्रकृते च क्रिया नाम आख्याते विधिबोधकांशेन वाच्या प्रवर्तना। तद्वाचकस्यलिङादेः नञा सह योगे निवर्तना लभ्यत इति वस्तुस्थितिः। केचिच्छाब्दिकादयः 'अनचिचे'त्यादौ द्वे न स्तः-इत्याख्यातनञोर्योगेनापि निषेधमुपपादयन्ति। केचिदाख्या -तयोगे नञः निवर्तना अर्थः इति कथयन्ति ,'भावप्रधानमाख्यातम्' इत्यभियुक्तोक्तेः,आख्यातं परित्यज्य केवलधातोःप्रयोगाभावाच्च,आख्यातपदेन,तत्सहचरितं धातुमपि स्वीकृत्य,आख्यातसहचरितेन धातुनापि प्रतिषेधपक्षं स्वीकुर्वन्ति। अथवा नञः आख्यातेन लिङादिनापि सम्बन्धं स्वीकृत्य प्रतिषेधपक्षः उपपादयितुं शक्यत इति प्रतिषेधपक्षोपपादनं कुर्वन्ति। रत्नप्रभाकारैः पक्षद्वयं स्वीकृत्यात्र वाक्यार्थबोध-सरणिर्दर्शिता। भाष्यकाराणां कस्मिन् पक्षे तात्पर्यमित्यत्र यद्यपि स्पष्टं लिङ्गं न दृश्यते, तथापि भाष्ये 'हननक्रियानिवृत्त्यौदासीन्य-व्यतिरेकेण' इति पङ्क्तिबलात् नञः धातुनैव योजना कृता आभाति। कथञ्चिदन्यभाष्यपङ्क्तेः विधिप्रत्ययेन योजनायामपि नास्ति विरोधः – इति भावेन साच 'दग्धेन्दनाग्निवत्स्वयमेवोपशाम्यति'-इत्यादिभाष्यग्रन्थे चशब्देन अप्यर्थकेन पक्षान्तरावद्योतित्वस्य

 In Public domain. Digitization Muthulakshmi Research Academy

रत्नप्रभाकारैः स्वीकारात् ,प्रत्ययार्थप्राधान्य -न्यायाविरोधाच्च ,द्वितीयपक्षोऽपि तैस्समर्थितः।(र.प्र.पृ.91-93.)

नञः आख्यातैकदेशधात्वन्वयेन वाक्यार्थनिरूपणम्

ब्राह्मणो न हन्तव्यः इत्यत्र नञःहनधातुयोगात्, अर्थात् प्रकृत्यर्थहननस्य नञर्थेन अभावेनान्वयात्, हननाभाव इत्यर्थः प्रतीयते।तव्यत्प्रत्ययस्य इष्टसाधनत्वमित्यर्थः।इष्टं चात्र नरकदुःखप्रगभावः। तत्साधनंच हननाभावः इति वाक्यार्थः अत्र प्रतीयात्।परं स नोपपद्यते, अभावस्याकारणत्वात्, अकार्यत्वाच्च। अतोऽत्र दण्डेन घट इत्यादाविव उत्पादककारणत्वस्याभावे अयोगात्, क्षेमसाधारणकारणत्वं स्वीकार्यम्।तथा च कार्यम्-इष्टं – दुःखप्रागभावपरिपालनम्, तत्कारणम्-हननाभावः-इति नहन्तव्य-इति वाक्यात्पर्यवस्यति।हननाभावो दुःखप्रागभावपरिपालक-इत्युक्ते प्रकारा -न्तरेण हननं दुःखसाधनमिति ज्ञात्वा पुरुषः निवर्तते।नात्र नियोगः कश्चिदस्ति।तस्य चक्रिया-तत्साधनदध्यादिविषयत्वात्।न च नञ्वाच्या निवृत्तिःक्रिया,अभावरूपत्वात्।नापि क्रियासाधनम् ,अभावरूपत्वात्, क्रियायाअभावेनापहारात्,तां प्रति साधनत्वायोगाच्च।अतः निषेधशास्त्रस्य सिद्ध एवार्थे प्रामाण्यं स्वीकार्यम्।

पर्युदासपक्षमाश्रित्य क्रियार्थत्वमितिशङ्कानिरासः

In Public domain. Digitization Muthulakshmi Research Academy

नन्वत्र प्रतिषेधपक्षं परित्यज्य पर्युदासपक्षाश्रयणेन हननविरोधिसङ्कल्पक्रियैव विधीयताम्, अस्य वाक्यस्य कार्यार्थत्वमपि सिद्ध्यति। स्वभावतः रागतः प्राप्तेन हननेन नञर्थस्य सम्बन्धात्, नञर्थस्य च विधातुमशक्यत्वात्, विधियोग्यः हननविरोधिसङ्कल्परूपार्थः नञ् हन्तिभ्यामाहत्य लक्षणया उपस्थाप्यते। सा च अप्राप्तत्वादनेन शास्त्रेण विधीयते— अहननसङ्कल्पं कुर्यादिति। तथा च कार्यान्वितशक्तिवादस्य नास्ति हानिः किल अयमेव पूर्वपक्षः स्वभावप्तहन्त्यनुरागेण नञःशक्यमप्राप्तक्रयार्थत्वं कल्पयितुम् इति भाष्यभागेनोपक्षिप्तः। समाधानं च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण(न च कल्पयितुं शक्यम्) इत्यनेन। अयमाशयः। 1.नञ्हन्तिभ्यां हननाभावे बोधिते, स अभाावः निवृत्तिरूपः,अथवा दु-खप्रागभावरूपमिष्टं प्रति साधनत्वनिर्वाहाय निवृत्त्युपलक्षितौदासीन्यस्वरूपः। तच्च हनननिवृत्त्युपलक्षितमौदासीन्यं न हन्तव्यः- इति प्रतिषेधशास्त्रबोधितं सद्रूपपुरुषस्वरूपौदासीन्यमेव भवति। स एव हननस्याभावः नञर्थश्च। एवमौदासीन्यस्वरूपस्य अभावस्य नञ्-पदशक्यत्वे सम्भवति, नञ्-हन्तिभ्यां लक्षणया अहननसङ्कल्पक्रयाबोधनं महदन्न्याय्यम्। 2.किं च हननौदासीन्यं दुःखप्रागभावपरिपालन -हेतुरिति ज्ञानात् पुरुषस्य हननक्रियानिवृत्तिः जायते-इति युक्तम्। अहननसङ्कल्पे

In Public domain. Digitization Muthulakshmi Research Academy

कार्यताज्ञानमात्रात् कथं पुरुषस्यहननान्निवृत्तिः। न हन्तव्यः- इति निषेधस्थलेऽपि विधेरेव वाक्यार्थत्वे विधिनिषेधभेदस्योपप्लवः स्यात्। (र.प्र.पृ. 91-92.)

अभावस्यैव नञ्पदशक्यत्वम्

ननु नञः सन्ति बहवः मुख्यार्थाः.।

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः"।।इति।

1.2.तत्सादृश्यम्, तदन्यत्वं च 'अब्राह्मणः'–इत्यत्र नञर्थः। अब्राह्मणपदात् लोष्टादेः सजातीयब्राह्मणस्य वा अभानात् "नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थावगतिः" (परिभाषेन्दुशेखरः75.) इति परिभाषयाब्राह्मणसदृशस्य ब्राह्मणान्यस्य चभानात्, सदृश्यान्यत्वे नञ्पदार्थौ। 3.'घटो नास्ती'त्यत्र तु अत्यन्ताभावः नञर्थः। 4.'अनुदरा कन्या'–इत्यादौ तु अत्यल्पत्वं नञर्थः।5.ब्राह्मण एव अब्राह्मणपदप्रयोगेतु अप्राशस्त्यं नञर्थः।6.'अधर्म' इत्यादौ तु धर्मविरोधो नञर्थः। तथाच नञः तद्विरोधेऽपि शक्तिः। 'नहन्तव्य' इति वाक्ये हननविरोधिसङ्कल्पभानेऽपि नास्ति मुख्यार्थत्याग- इति पर्युदासपक्षेऽपि को दोष इति चेत्-उच्यते। एकस्मिन् शब्दे अनेकार्थपरिकल्पनस्य अन्याय्यत्वात्। गवादिशब्दानां स्वर्ग-इषु-वाक्-वज्रादिषु शक्यस्वार्थ -पशुसम्बन्धाभावात्, तत्र लक्षणाया

In Public domain. Digitization Muthulakshmi Research Academy

अप्यभावात्, तत्तदर्थेषु पूर्वप्रयोगदर्शनाच्च अगत्या नानार्थत्वं कल्प्यते। अन्य-विरुद्धयोस्तु नञः स्वशक्यसम्बन्धात्, लक्ष्यत्वमेव ,न शक्यत्वम्। अब्राह्मणः- इत्यादौ ब्राह्मणादन्य -स्मिन् क्षत्त्रियादौ,अधर्म- इत्यादौ धर्मविरुद्धे पापजनके च नञ्शक्यार्थसम्बन्धात्, शक्यसम्बन्धरूपलक्षणा युक्तेति,न तयोः शक्यत्वपरिकल्पनम्। ततश्च प्रकृते नञ् आख्यात(धातु)योगात्, प्रसज्यप्रतिषेधबोधक एव, न पर्युदासलक्षकः, अभावरूपमुख्यार्थत्यागाभावात्। अत एवोक्तं भाष्ये-"नञश्चैष स्वभावः यत्स्वसम्बन्धिनोऽभावं बोधयती"ति। स्वभावश्च स्वाभाविकोर्थःशक्यार्थ एव। (र.प्र.पृ.92.)ननु प्रतिषेधपक्षेऽपि नञः निवृत्त्युपलक्षितौदासीन्यार्थकत्वात् इष्टदुःखप्रागभावहेतुत्व-निर्वाहायौदासीन्यांशस्य लक्षणया अधिकतया स्वीकारात्तस्यापि नञ्शक्यत्वं नास्ति किल? इत्युक्ते, तत्रत्यौदासीन्यलक्षणायाः अजहल्लक्षणात्वेन शक्यार्थत्याग -प्रयुक्तदोषाभावात्। नहि नञःअभावात्मकनिवृत्तिं परित्यज्य औदासीन्यं लक्ष्यते। अहननसङ्कल्पलक्षणायां तु नञ्शक्यस्यअभावस्य त्याग एव। अन्यथा भावः सङ्कल्पो न विधातुं शक्येत। अतः हननिवृत्त्यौदासीन्यं दुःखप्रागभावात्मकेष्टपर्पालनहेतुः इतिवाक्यार्थवर्णनं प्रतिषेधपक्षश्च युक्तमेव।

नञः आख्यातप्रत्ययेन सम्बन्धाद्वाक्यार्थनिरूपणम्

 In Public domain. Digitization Muthulakshmi Research Academy

यद्वा इत्यादिना मतान्तरमिदं रत्नप्रभायां निरूपितम्। माभूत् नञः धातुना सम्बन्धः,किन्त्वाख्यातप्रत्ययेन। यतः "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन धात्वर्थस्यहननस्य प्रधाने प्रत्ययार्थे इष्टसाधनत्वे अन्वयात् ,तस्य नञर्थे अभावे अन्वयायोगात्। "एकत्र विशेषणतया अन्वितस्य पदार्थस्यापरत्र विशेषणतया अन्वयायोगः" इति न्यायात्। अतः प्रकृत्यर्थहनने प्रत्ययार्थभूतेष्टसाधनत्वस्यान्वयः। इष्टसाधनत्वं च स्वापेक्षया बलव - दनिष्टाननुवन्धित्वं,यत्तदेव,न तु तात्कालिकसुखसाधनत्वमात्रम्। तथा सति विषसंयुक्तान्नभोजनेऽपि इष्टसाधनत्वापत्तेः। बलवदनिष्टाजनकत्वविशेषणे तु तादृशान्नभोजने एकतः इष्टसाधनत्वस्य सत्त्वेऽपि, अन्यतः विषसम्पृक्तत्वेन बलवदनिष्टसाधनत्वस्य सत्त्वात्, नतत्रातिव्याप्तिः। तथा च 'न हन्तव्य'–इति वाक्ये नञः आख्यातप्रत्ययेन सम्बन्धात् हननं बलवदनिष्टासाधनत्वे सति इष्टसाधनं न –इति निषेधवाक्याद्बोधो जायते। यद्यपि हननस्य रागतः प्राप्तत्वात्, अहत्वा तूष्णीमवस्थानायोगात्, स्वरागपूरणोपयोगितया हननं इष्टसाधनं न –इति बुद्धिर्न जायते, तथापि रागजनितायाः हननबुद्धेः, अथवा हननस्य सुखादपि नरकरूपधिकदुःखजनकत्वात्,नहन्तव्य-इति शास्त्रेणानिष्टसाधनत्वं बोध्यते। बलवदनिष्टाऽजनकत्वरूपविशेषणा-भावाद्विशेषणाभावप्रयुक्तोऽत्र इष्टसाधनत्वरूपविशेष्याभावः। तथा

In Public domain. Digitization Muthulakshmi Research Academy

च पक्षेऽस्मिन् नञाख्यातप्रत्यययोर्योगात्, नञा विशिष्टेत्वसाधनत्वस्य अभावबुद्धिर्जायत इति, अभावस्यैव नञ्घटितवाक्येषु वाक्यर्थत्वेन भानात्,न कार्यपरत्वं नञ्-घटितवाक्यस्येति सुस्थम्।भाष्ये अभावबुद्धिश्चैदासीन्यकारणमिति वाक्यस्य हननगतविशिष्टेष्टसाधनत्वस्य अभावबुद्धिः पुरुषगतौदासीन्यकारणमित्यर्थस्य स्वीकारात्, भाष्यवाक्यादप्येतन्मतलाभः-इत्वधेयम्। अभावबुद्धिश्चौदासीन्य-कारणमिति भाष्यपङ्क्तौ अभावबुद्धिरित्यनेन हननाभावबुद्धिः-इत्यर्थस्वीकारे तु इष्टसाधनत्वविशेषितायाः तस्याः बुद्धेः,हननाभावः दुःखाभावपरिपालनरूपेष्टसाधनमितिबुद्धेः,प्रकारान्तरेण हननं दुःखसाधनमित्यर्थे पर्यवसानात्,औदासीन्यकारणम्-अर्थात् हनननिवृत्त्यौदासीन्यकारणमेत्यर्थस्य स्वीकारात्, प्रथममतस्याप्यस्या एव पङ्क्तेर्लाभः। 'सा च दग्धेन्धनाग्निवत्स्वयमे-वोपशाम्यती'तिवाक्ये प्रकृत्यर्थहननस्य अभावगतेष्टसाधनत्व-बुद्धिवत्, प्रत्ययार्थस्येष्टसाधनत्वस्याभावबुद्धिरपीत्यर्थतात्पर्यकः चशब्दोऽप्यमुमेवार्थमवद्योतयतीति रत्नप्रभाकाराः।(र.प्र.पृ.92-93.)

ननु हनने इष्टसाधनत्वाभावबुद्धेः क्षणिकत्वात् तन्नाशे हनननिवृत्तेःप्रच्युतौ,पुनः हनने प्रवृत्त्यापत्तिरिति चेत्, साच दग्देन्धनाग्निवत्स्वयमेवोपशाम्यति- इति भाष्ये समाधानम्।अस्य

 In Public domain. Digitization Muthulakshmi Research Academy

वाक्यस्य द्वेधा रत्नप्रभयामर्थः विवृतः।1.सा च-नञर्थाभावबुद्धिः हननादौ इष्टसाधनत्वभ्रान्तिमूलं रागेन्धनं दग्ध्वैव शाम्यतीति हनन -प्रवृत्तिमूलरागस्य नाशात्, नपुनस्तस्य हनने प्रवृत्तिः।2.यद्वा सा- इत्यस्य हननक्रियेत्यर्थः। सा च रागतः प्राप्तेति, निषेधवाक्यपर्यालोचनेन रागनाशे स्वयमेव नश्यतीत्यन्योऽर्थः।ये तु नञ्-हन्तिभ्यां लक्षणया हननाभावसङ्कल्पमास्थिषत,तन्मते हननविरोधिसङ्कल्पक्रिया कार्या इत्युक्तेऽपि, हनने इष्टसाधनत्वभ्रान्तिर्न निरस्यत इति,हननात्प्रच्युतिर्दुर्निर्वारा। तस्मात् इष्टसधनत्वस्याभाव एव नञ्पदशक्यः। सच प्रसक्तक्रिया–निवृत्त्यौदासीन्यमेव।अत एव "तस्मात्प्रसक्तक्रिया-निवृत्त्यौदासीन्यमेव 'न ब्राह्मणो हन्तव्य'–इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः" इत्युक्तं भाष्ये।अत्रापि रत्नप्रभाकारैः तस्मादितिपदस्य द्वेधा अर्थःवर्णितः।1तस्मात्-भावार्थाभावेन-हननाभावेन,तद्विषयककृत्यभावात्,कार्याऽभावेनेति तस्मादित्यस्यार्थः।2.यद्वा नञः विधिप्रत्ययेनान्वयपक्षे,यस्मात् हनननिवृत्त्युपलक्षितमौदासीन्यं बलवदनिष्टाजनकत्वविशिष्टेष्ट-साधनत्वस्य अभावायत्तमेव, तस्मात् इत्यर्थः।पक्षेऽस्मिन् हननगतविशिष्टेत्वसाधनत्वाभाव एव न हन्तव्य इति वाक्यार्थः।प्रसक्तक्रियानिवृत्त्यौदासीन्यं तु आर्थिकार्थः एव ,न

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यार्थः। एकस्मिन्नेव वाक्ये नञः हननेन, इष्टसाधनत्वेन चान्वयायोगात्।

ननु पुरुषे हननप्रागभावः स्वत एवास्ति। तस्य नञर्थाभावज्ञानजन्यत्वोपपादनं किमर्थम् इति चेत्, यदा पुरुषे हनननिवृत्त्युपलक्षितौदासीन्यं-हननप्रागभावः,तदा पुरुषे स्वतः विद्यमानःहननप्रागभावोऽपि संरक्षितो भवति। अतः तदौदासीन्यं हननप्रागभावपरिपालकमिति, नञर्थाभावसाध्यत्वं पुरुषे स्वतो विद्यमानहनन-प्रागभावस्येत्युच्यते। 'अन्यत्र प्रजापतिव्रतादिभ्यः' इति भाष्यस्यत्वयमाशयः। तस्य-स्नातकस्य, व्रतम्-अनुष्ठेयक्रियाम्, उपदिशामीत्युक्त्वा नेक्षेतोद्यन्तमादित्यमिति प्रजापतिव्रतमुक्तम्। यदि तत्रनञः मुख्यार्थमभावं गृहीत्वा ईक्षेत –इति विधिप्रत्ययेन सम्बन्धः स्वीक्रियेत, आदित्यविषयकेक्षणनिवर्तनारूपप्रतिषेधार्थ-बोधात्' तस्य व्रतमि'त्युपक्रमेण प्रतीयमाना एकवाक्यता भज्येत। अतः उपक्रमबलात् ईक्षणविरोधिसङ्कल्पविषयकपर्युदासविधि-रेवाश्रीयते। तदर्थं नञीक्षतिभ्यांमुख्यार्थं परित्यज्य लक्षणयाअनीक्ष -णसङ्कल्पार्थः स्वीक्रियतां नाम। प्रकृते तु 'न हन्तव्य'–इत्यादौ तादृशकारणाभावात् मुख्यार्थहननाभावः इष्टसाधनम्- इति हननगतविशिष्टेष्टसाधनत्वस्यैव अभावाभ्युपगमः उक्तः। अगौः, असुराः, अधर्मः-इत्यादौ तु प्रतिषेधपक्षाश्रयणायोगात्,नामयुक्तस्य नञःपर्युदासार्थकत्वमेव। 'अन्यत्र प्रजापतिव्रतादिभ्यः'न हन्तव्यः'

In Public domain. Digitization Muthulakshmi Research Academy

इत्यादिषु प्रतिषेधार्थं मन्यामहे' इत्यनेन सम्बन्धः। निषेधशास्त्रस्य दुःखप्रागभावफलके नञर्थे हननस्याभावे,इष्टसाधनत्वस्याभावे चप्रामाण्यवत्, वेदान्तानां सिद्धे ब्रह्मणि मानत्वम्। तर्हि क्रियार्थानामानर्थक्यमिति सूत्रं किंविषयकमित्युक्ते 'तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्'- इति भाष्ये समाधानम्। वेदान्तानां स्वार्थे फलवत्त्वात्, विधिवाक्यैरेकवाक्यतामनापद्यैव प्रामाण्यम्। तत्सूत्रप्रतिपादित-मानर्थक्यं तुपुरुषार्थानुपयोगिव्यर्थकथाविषयं तु सम्भावनीयम्। (र.प्र.पृ.93-94)

ज्ञानादशरीरत्वस्य जीवन्मुक्तेरभिव्यक्तेःतस्य कर्माद्यकार्यत्वात् सशरीरत्वस्य च मिथ्याज्ञानकार्त्वात् न वेदान्तानां कार्यपरत्वम्

शा.भा.- यदप्युक्तं कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमान-मनर्थकं स्यात्, 'सप्तद्वीपा वसुमती' इत्यादिवत् इति, तत्परिहृतम्। 'रज्जुरियं नायं सर्प' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् । ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम् । अत्रोच्यते नावगतब्रह्मातब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं, वेदान्तप्रमाणजनितब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाण

In Public domain. Digitization Muthulakshmi Research Academy

-जनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यंकल्पयितुम्। नहि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न चकुण्डलिनः कुण्डलित्वाभि -माननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वा -भिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या-“अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः”(छा.उ.8.12.1.)इति। शरीरे पतितेऽशरीरत्वं स्यात्,न जीवत इति चेन्न ,सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वाऽन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्मनिमित्तमित्वोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न। शरीरसम्बन्धस्यासिद्धत्वाद्धर्माधर्मयोः आत्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेत -रेतरेतराश्रयत्वप्रसङ्गात् अन्धपरम्परैषानादित्वकल्पना। क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न, धनदानाद्युपार्जितभृत्यसम्बन्धित्वात् तेषां कर्तृत्वोपपत्तेः। नत्वात्मनो धनदानादिवच्छरीरादिभः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्छक्यं

 In Public domain. Digitization Muthulakshmi Research Academy

कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः। एतेन याजमानत्वमात्मनो व्याख्यातम्।।

र.प्र.प्र.-उपरि शीर्षके उक्त एव वक्ष्यमाणभाष्यग्रन्थसारांशः। वृत्तिकारपूर्वपक्षे कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रकथन-मनर्थकमिति प्रतिपादितम्। सप्तद्वीपा वसुमती-इत्यादिवस्तुमात्र-प्रतिपादकवाक्यस्य फलव- त्कार्याबोधकत्वेन यथा आनर्थक्यम्, (अप्रामाण्यम्)तद्वत् कर्तव्यविध्यननुप्रविष्टानां वेदान्तानामानर्थक्यं प्रसज्येतेति,यदप्युक्तम्-योऽयमभिप्रायः आविष्कृतः प्राक्, तस्यापि रज्जुरियम् ,नायं सर्पः इति वस्तुमात्र-कथनेऽपि यथा प्रयोजनं, तथैव वस्तुमात्रप्रतिपादकेषु वेदान्तेष्वपि अनर्थस्य –संसारस्य निवृत्तेः सद्भावादस्त्यर्थवत्त्वमिति वृत्तिकारमतविदलनात्मके भाष्यसिद्धान्ते निरूपितम्।

ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात्, वेदान्तेषु नास्ति संसारनिवृत्तिरूपप्रयोजनम्।रज्जुस्वरूपकथनवाक्ये तु इयं रज्जुरिति ज्ञानात् सर्पभ्रान्तिनिवृत्त्या अर्थवत्त्वं दृश्यत इति, ब्रह्मस्वरूपप्रतिपादकवेदान्तवाक्यस्य रज्जुस्वरूपबोधकवाक्य-मनुदाहरणमिति चेत् अत्रोच्यते इत्यादिनाभाष्यकाराणां समाधानम्। अयं भावः।श्रवणस्य ज्ञानार्थत्वात्, अवगतब्रह्मभावस्यावश्यं संसारनिवृत्तिरूपप्रयोजनलाभात्। यत्तु तस्यापि संसारनिवृत्तिर्न भवतीत्युच्यते, किं प्रायिकी संसारनिवृत्तिर्न

In Public domain. Digitization Muthulakshmi Research Academy

भवतीति? आहो स्वित् आत्यन्तिकी संसार -निवृत्तिर्न भवतीति? न द्वितीयः,इष्टापत्तेः। आत्यन्तिकसंसारनिवृत्तेः देहपातादनन्तरमेव अस्माभिरपि प्रयोजनत्वेनेष्यमाणत्वात्। नाद्यः। जीवन्मुक्तिलक्षणा प्रायिकी संसारनिवृत्तिस्तु भवत्येव,श्रवणजनितात्म -भावावगमात् संसारनिवृत्तेर्नाभाव इति, भाष्यकाराणामभिप्रायात्। एतदेव भाष्ये- अत्रोच्यते इत्यादिना अभिप्रेतम्। श्रवणमात्रात् संसारानिवृत्तावपि, तज्जनितसाक्षात्कारात् जीवत एव अशरीरत्वलक्षणा जीवन्मुक्तिर्दुरपह्नवा इति 'नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्' इत्यादिभाष्यग्रन्थेन प्रतिपाद -यिष्यते। यो हि अवगतब्रह्मात्मभावः न तस्य संसारः, वेदप्रमाणजनितब्रह्मात्म-भावविरोधात्। नहि शरीराद्यात्माभिमानिनः भयादिमत्त्वं दृष्टमिति, तस्यैव वेदप्रमाणजनितब्रह्मात्मभावावगमेन परित्यक्तशरीराभिमान -वतः मिथ्याज्ञाननिमित्तं दुःखभयादिकं कल्पयितुं शक्यम्। अत्र च भाष्यकारैः दृष्टान्तद्वयेन अवगतब्रह्मात्मभावस्य सुखदुःखात्मक-संसाररहित्यमुपपादितम्। यथा कस्यचिद्धनिनो गृहस्थस्य अथ च धनाभिमानि -नःधनापहारनिमित्तं दुःखं दृष्टमपि, तस्यैव प्रव्रजितस्य परित्यक्तधनादिकस्य, अथ च धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखमिदानीमपि न भवति। नचापहृतधनोऽपि इदानीमपि व्यथते। एवमेव कश्चित्कुण्डलीकुण्डलित्वाभिमानवान् सन् सुखमनुभवति। स एव पश्चात्कुण्डलवियुक्तोऽपि,अथ च

In Public domain. Digitization Muthulakshmi Research Academy

कुण्डलित्वाभिमानरहितोऽपि, तदेव कुण्डलित्वाभिमाननिमित्तं सुखमनुभवति। अतःधनिनःधनापहारनिमित्तं दुःखमिव,कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखमिव, अवगतब्रह्मात्मभावस्य सुखदुःखप्राप्तिलक्षणः संसारो न भवति।ब्र ह्मावगतौ च अशरीरत्वलक्षणा जीवन्मुक्तिरेव। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.उ.8.12.1.) इति। इदं चाशरीरत्वं शरीरभिमानराहित्यलक्षणं न कर्मजन्यम्,अपि तु स्वाभाविकं नित्यं च।एतादृशाशरीरत्वस्याभिव्यक्तिरेववेदान्तशास्त्रजन्यज्ञानेनसम्पाद्य ते,नाशरीरत्वमुत्पाद्यते केन चित्कर्मणा।न चशरीरे पतितेअशरीरत्वं स्यात्, न जीवत इति वाच्यम्।सशरीरत्वस्य मिथ्याज्ञान - निमित्तत्वात्।नहि आत्मनःशरीरात्माभिमानलक्षणं मिथ्याज्ञानं विहाय सशरीरत्वं शरीरसम्बन्धः कल्पयितुं शक्यम्।असङ्गस्यात्मनःदेहसम्बन्धस्य भ्रान्तिप्रयुक्तत्वात्।अत एव नित्यमशरीरत्वं अकर्मनिमित्तमिति प्रागेवास्माभिरावेदितम्। (र.प्र.पृ.94-95.)

अथात्र अशरीरत्वस्य नित्यत्वस्वाभाविकत्वयोर्विज्ञानाय सशरीरत्वं कीदृशमिति पर्यालोचनीयम्। ननु धर्माधर्मादिनिमित्तमेव सशरीरत्वं स्वीक्रियताम् किमिति शरीरतादात्म्याभिमाननलक्षणं स्वीक्रियते-इति चेत्, 'शरीरसम्बन्धस्यासिद्धेः, धर्माधर्मयोः आत्मकृतत्वासिद्धेः' इति भाष्ये समाधानम्।अयमभिप्रायः। शरीर -

In Public domain. Digitization Muthulakshmi Research Academy

सम्बन्धस्य धर्माधर्मयोः तत्कृतत्वस्य च अन्योन्याश्रयत्वप्रसङ्गात्। यतो हि आत्मनः शरीरसम्बन्धे जाते धर्माधर्मोत्पत्तिः। धर्माधर्मोत्पत्तौ चसत्यामात्मनः शरीरसम्बन्धजन्म-इत्यन्योन्याश्रयात्, एकस्याप्यसिद्ध्या द्वितीययस्याप्यसिद्धिप्रसङ्गः। न च एतद्देहजन्यधर्माधर्मात्मककर्मणः एतद्देहसम्बन्धेऽन्योन्याश्रय-दोषः प्रसज्यते। वयं तु ब्रूमः पूर्वदेहकर्मण एव एतद्देहसम्बन्धोत्पत्तिः। पूर्वदेहश्च तत्पूर्वदेहकृतकर्मणः-इति बीजादङ्कुरस्य, अङ्कुराद्बीजस्येव अनादिसिद्धकार्यकारणभाव-परिकल्पनया नदोष इति वाच्यम् ,अन्धपरम्परैषा अनादित्वकल्पना –इति भाष्ये समाधानात् ।बीजाङ्कुरादौ क्वचित् अन्योन्याश्रयत्वस्य दृष्टत्वेऽपि, न स दोषाधायकः। यतःबीजादङ्कुरः,तत अङ्कुराद्बीजान्तरमिति प्रत्यक्षेण गृहीतत्वात्। तथा आत्मनः देहसम्बन्धः नप्रत्यक्षसिद्धः, न वा कश्चिदागमोऽपि मानमस्ति। प्रत्युत'असङ्गोह्ययं पुरुषः'इति श्रुतिः सर्वकर्तृत्वं वारयति।अन्यच्च आत्मनि क्रियासमवायः नास्ति।क्रियासमवायाभावादेव आत्मनः शरीरसम्बन्धकर्तृत्वमपि नोपपद्यते।कूटस्थस्य कृत्ययोगान्न कर्तृत्वम्। ननु स्वतो निष्क्रियस्यापि कारकसंनिधानात्कर्तृत्वं दृश्यते।यथा-संनिधानमात्रेण राजप्रभृतीनां कर्तृत्वमिति चेत्-तदपि नयुक्तम्।धनदानादिना राज्ञः भृत्यत्वेन सम्बन्धित्वं प्राप्तैः कर्तृत्वस्य राजादिगतस्योपपत्तेः।न च आत्मनःशरीरादिभिः सम्बन्धे निमित्तं

 In Public domain. Digitization Muthulakshmi Research Academy

किञ्चिद्ग्राह्यं कल्पयितुं शक्यम्। अतः आत्मदेहयोस्सम्बन्धे अन्यनिमित्तादर्शनात्, बीजाङ्कुरवद्वर्तमानयोः तयोस्सम्बन्धः भ्रान्तिकृतएवेति मिथ्या -ज्ञाननिमित्त इत्यनुसन्धेयम्।

न च 'यजेत' इत्यादिविध्यनुपपत्त्या आत्मनः कर्तृत्वमवश्यमेष्टव्यम्। अतः कर्तुरात्मनः सम्बन्धात् कर्म,कर्मणश्च शरीरसम्बन्ध इति वाच्यम्। भ्रान्तिकृतेन देहादिसम्बन्धेन यागादिकर्तृत्वलक्षणं यजमानत्वमपि ब्रह्मबोधपर्यन्तमबाधितमस्ति, कर्मकृतदेहसम्वन्धस्यासिद्धेः। एतेन यजमानत्वमात्मनो व्याख्यातमिति भाष्यस्याप्ययमेवाशयः। एवं च सशरीरत्वस्य मिथ्याज्ञाननिमित्तकत्वात्, ज्ञानेन शरीरतादात्म्याभिमानलक्षणे सशरीरत्वे नष्टे, नित्यं स्वाभाविकमशरीरत्वं ज्ञानेनैव जीवद्दशायामभिव्यज्यत इति अविद्यालेशस्य सत्त्वेऽपि, अवगतब्रह्मात्मभावस्य अशरीरत्वाभिव्यक्तिलक्षणा मुक्तिरस्त्येव। एवं भाष्यकारैःप्रघट्टकेऽस्मिन् जीवन्मुक्ति -दशायाः निरूपणेन, श्रवणजन्यज्ञानमाहात्म्यात् अज्ञानात्मकस्य संसारस्य सर्वात्मना अनिवृत्तावपि जीवन्मुक्तिफलप्रतिपादनेन श्रवणादीनां वैयर्थ्यं वारितम्। (र.प्र.पृ.95-96)

अहम्प्रत्ययस्य प्राभाकरोक्तगौणत्वनिरासेन, श्रुतिस्मृतिभ्यां मिथ्याज्ञानजन्यत्वव्यवस्थापनेन च ज्ञानेन मिथ्याज्ञानापहारात् अवगतब्रह्मात्मभावस्य मननोपासनाविध्यभावनिरूपणम्

In Public domain. Digitization Muthulakshmi Research Academy

शा.भा.- अत्राहुः देहादिव्यतिरिक्तस्यातमनः आत्मीये देहादावभिमानो गौणो नमिथ्येति चेन्न। प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः,ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः सम्पन्नः सिद्धः,तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य। तस्यत्वन्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ।यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद्रजतमितिनिश्चितौ शब्दप्रत्ययौ, तद्वद्देहादिसङ्घातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्।आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिव अविविक्तौ शब्दप्रत्ययौभवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्व-वादिनां देहादावहम्प्रत्ययो मिथ्यैव न गौणः। तस्मान्मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्।तथा च ब्रह्मविद्विषया श्रुतिः- "तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते,अथा-यमशरीरोऽमृतः प्रणो ब्रह्मैव तेज एव" (बृ.उ.4.4.7.) इति। "सचक्षुरचक्षुरिव,सकर्णोऽकर्ण इव, सवागवागिव,समना अमना इव, सप्रणोऽप्राण इव" इति च।स्मृतिरपि च" स्थितप्रज्ञस्य का भाषा (भ.गी.2.54.) इत्याद्यास्थितप्रज्ञलक्षणान्या च क्षाणान्या

In Public domain. Digitization Muthulakshmi Research Academy

च क्षाणा विदुषः सर्वकर्मप्रवृत्त्यसम्बन्धं दर्शयति। तस्मान्नावगतब्रमह्यात्मभावस्य यथापूर्वं संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं नासाव -वगतब्रह्मात्मभाव इति सर्वमनवद्यम्।।

र.प्र.प्र.-ननु सशरीरत्वं मिथ्याज्ञानजन्यमिति कथनं न युक्तम्। यतः प्राभाकराः 'मनुष्योऽह'मित्यादिप्रतीतेः गौणत्वमेवाभ्युपगच्छन्ति। गौणप्रत्यये विषययोः अवास्तविकत्वमिति लोकानुभवो नास्ति। यथा 'सिंहो माणवक'–इति गौणप्रयोगे च सत्ययोरेव सतोः सिंहमाणवकयोः मध्ये माणवके सिंहशब्दप्रयोगः सिंहाभेदप्रत्ययो वा विवक्ष्यते। तद्वदत्र अहम्प्रत्ययगोचरस्यात्मनःमनुष्ये गौणः अभेदः। तत्प्रतीत्यनुकूलतया मनुष्योऽहमिति समानाधिकरणशब्दप्रयोगश्च श्रूयत इति देहात्मनोः सम्बन्धः सत्य एव न मिथ्यापरिकल्पित इति-अत्राहुः–इत्यादिना भाष्ये प्राभाकरशङ्का उपस्थापिता। समाधानं तुप्रसिद्धवस्तुभेदस्यस्य गौणत्वमुख्यत्वप्रसिद्धेः इत्यादिना भाष्ये उक्तम्। भाष्ये प्रसिद्धवस्तुभेदस्य इत्यस्यायं विग्रहः। वस्तुनोर्भेदः वस्तुभेदःइति पूर्वपदे द्विवचनघटिततया विग्रहः। प्रसिद्ध इत्यस्य ज्ञातः इत्यर्थः। एवं च प्रसिद्धो वस्तुभेदः येन पुरुषेण सः प्रसिद्धवस्तुभेदः इत्युच्यते। एवं च येन पुरुषेण द्वयोर्वस्तुनोर्मध्ये भेदः ज्ञातः,तस्य पुरुषस्य अयं मुख्यःअयं गौणः- इति प्रसिद्धिरस्ति। यथा केसरादिमानाकृतिविशेषः सिंहशब्दस्य प्रयोगे एव भासते। तदभावे

In Public domain. Digitization Muthulakshmi Research Academy

तु न भासत इत्यन्वयव्यतिरेकाभ्यां सिंहशब्दस्य तादृशशब्दजन्यप्रतीतेश्च विषयः कश्चित्प्रसिद्धोऽस्ति। तादृशसिंहादन्यः प्रायिकैः साधारणैः सिंहमाणवकोभयानुगतैः क्रौर्यशौर्यादिभिस्सिंहगुणैः सम्पन्नः माणवकश्च सिद्धः ज्ञातः। अतःपृथग्वस्तुनोः ज्ञातत्वात्,प्रसिद्धवस्तुभेदे पुरुषे माणवके वा सिंहशब्दप्रयोगःसिंहशब्दप्रत्य -यश्चोपपद्यते।यदि सिंहादन्यं तादृशं माणवकं न जानाति,तर्हि अप्रसिद्धवस्तुभेदस्य पुरुषस्य तादृशशब्दप्र -त्ययौ नभवतः।यस्य तु पुरुषस्य वस्तुभेदः नप्रसिद्धः,तस्य अन्यत्र अन्यशब्दप्रत्ययौ "स्थाणुर्वा पुरुषो वा","इदं रजतम्"-इत्यादिस्थल इवसंशयितौ निश्चितौ वा भ्रान्तिज्ञाननिमित्तावेव भवतः, न गौणौ- इति भाष्याशयः।भाष्ये-"तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्त्वभेदस्य"।इति वाक्यानन्तरं"तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ"-इतिवाक्यान्तरं दृश्यते।तत्र द्वितीयवाक्ये तस्य-इत्यस्य भेदज्ञानशून्यस्य पुंसः-इतिरत्नप्रभाव्याख्या।न च तच्छब्दस्य प्रक्रान्तार्थपरामर्शित्वात्, सिंहपुरुषवाक्यस्यैव प्रक्रान्तत्वात्, तादृशवाक्यार्थज्ञानवतः –इत्यर्थ इति वाच्यम्।तथा सति सिंहपुरुषवाक्ये भाष्यकारैः तादृशशब्दप्रयोगौ भ्रन्तिनिमित्तौ, न गौणौ इत्यर्थस्य अभ्युपगतत्वापत्तेः।न चैतन्न्याय्यम्।व्यवहारपथे सर्वैरेव वादिभिः सिंहपुरुषवाक्यस्य सत्यार्थप्रतिपादक-

In Public domain. Digitization Muthulakshmi Research Academy

त्वस्याभ्युपगन्तव्यत्वात्। तद्वाक्यार्थस्यगौणत्वेनेष्टत्वाच्च। अनन्तरं च शुक्ति-स्थाणुवाक्ययोःवाक्ययोः भाष्यकारैरेवोदाहरिष्यमाणत्वात् तस्यत्वन्यत्रेत्यादिद्वितीयवाक्ये शुक्तिरजतयोः,स्थाणुपुरुषयोःवा भेदज्ञानशून्यस्य –इत्येवार्थः द्वितीयवाक्यस्थतत्पदार्थत्वेन ग्राह्यः। तयोर्वाक्ययोः भ्रान्तिनिमित्तत्वस्य अगौणत्वस्य चसर्ववादिसम्मतत्वात्। **यथा चमन्दान्धकारे इत्यादिभाष्यम्-** यथा मन्दान्धकारे सत्यपि द्वयोः साम्यात्,अगृह्यमाणविशेषे "स्थाणौ स्थाणुर्वा पुरुषो वा"इति मिथाज्ञानरूपः संशय एव जायते। न च तत्र स्थाणौ तादृशसंशयवेलायां पुरुषशब्दप्रयोगो गौणः,न पुरुषशब्दजन्यप्रत्ययोऽपि गौणः। यथा वा अकस्मात्-अतर्किताद्दृष्टादिना रजतसंस्कारोद्बोधे,"इदं रजत"मित्यगृह्यमाण-विशेषायां शुक्तिकायां रजतज्ञाने जाते,रजतमिति शब्दप्रयोगः, रजतशब्दजन्यप्रत्ययश्च निरुपचारेण-गुणसादृश्यज्ञानं विनापि, विपर्ययात्मकमिथ्याज्ञानरूप एव जायते ,नगौणः-इति शक्यं वदितुम् । एवम् आत्मानात्मविवेकिनां पण्डितानां, तथा अजाविपालादीनामपि पामराणां "मनुष्योऽहम्"-इत्यविविक्तौ आत्मशब्दप्रत्ययौ मिथ्याज्ञाननिमित्तावेव भवतः,न गौणौ। तस्मात् देहादिव्यतिरिक्तात्मास्तित्ववादिनां,देहादौमनुष्योऽहमित्यभिमानः-अहम्प्रत्ययः मिथ्यैव-प्रमेत्यभिमान एव,न गौणः। तस्मात्-मिथ्याप्रत्यनिमित्तत्वात् सशरीरत्वस्य-शरीराभिमानस्य, ज्ञानेन

In Public domain. Digitization Muthulakshmi Research Academy

तत्त्यागे, जीवतोऽपि विदुषः अशरीरत्वलक्षणा जीवन्मुक्तिः-प्रायिकी संसारनिवृत्तिः फलमिति, श्रवणात् ज्ञानेऽपि संसारानुवृत्तिरिति दोषः वेदान्तिष्वापादयितुं न शक्यते। वक्ष्यमाणश्रुतिस्मृतिभ्यांच सरीराद्यभिमानत्यागसक्षणा जीवन्मुक्तिःप्रसिद्धा। तथा च ब्रह्मविद्विषयाश्रुतिः--तद्यथा-तत्-तत्र जीवन्मुक्तस्य देहे दृष्टान्तः। "अहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते"-इत्यादिः। अहिनिर्ल्वयिनी-सर्पत्वक्,वल्मीके,प्रत्यस्ता-निक्षिप्ता,मृता-सर्पेण त्यक्ताभिमाना,शयीत-निर्जीवं वर्तेत, एवमेवेदं, विदुषः-जीवन्मुक्तस्य,शरीरं शेते- निर्जीव -वत्तिष्ठति-त्यक्ताभिमानं तिष्ठति। अथ,तथा-त्वचा निर्मुक्तसर्पवदेव, अयं देहस्थः,अशरीरः-शरीराभिमानाभाववान्, अमृतः प्राणः–प्राणन्नपि, तेज एव स्वयं ज्योतिः आनन्दस्वरूपं ब्रह्मैव। तथा "सचक्षुरचक्षुरिव,सकर्णअकर्ण इव,सवागवागिव, समना अमना इव,सप्राणोऽप्राण इव"-इत्यन्यापि जीवन्मुक्तिप्रतिपादिका श्रुतिः। वस्तुतःचक्षुः-कर्ण-वाङ्मनःप्राणानां ब्रह्मात्मनःअभावेऽपि, सचक्षुष्व-सकर्णत्व-सवात्त्व-समनस्त्वादि -ना प्रतीतिः इत्यभिप्रायः। एतदानुगुण्येनैव श्रुतौ सर्वत्र अचक्षुः सचक्षुरिव,अकर्णः सकर्ण इव-इत्यादिरूपेण वैपरीत्येन योजनीयम्। अतःएषापिजीवन्मुक्तश्रुतिःश्रवणादिजनितज्ञानवतःइन्द्रियादिसम्बन्धस्य मिथ्या-ज्ञाननिमित्तत्वं प्रकाशयति। एवं

"स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।

 In Public domain. Digitization Muthulakshmi Research Academy

स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्"।।

((भ.गी.2.54.)इत्यर्जुनप्रश्नप्रकाशिकापि स्मृतिः किंशब्देन वस्तुतः भाषण-आसन-व्रजिक्रियाः,भाष्यमाणत्वं च प्रतिषेधन्ती, बाधितानुवृत्त्यैव तत्तत्क्रियाः प्रकाशयन्ती, स्थितप्रज्ञस्य प्रज्ञास्थैर्यवतः ज्ञाननिष्ठस्य जीवन्मुक्तस्य तत्तत्क्रियात्मक-संसाराभावः सिद्धः इति ज्ञापयति। तस्मादवगतब्रह्मात्मभावस्य न संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं,नासाववगतात्मभावः-इति सर्वमनवद्यम्-निर्दुष्टम्। सन्दर्भेऽस्मिन् भाष्यकारैः स्थितप्रज्ञलक्षण-प्रतिपादकस्मृत्युदाहरणं न केवलमापातज्ञानप्राप्तिः असंसारित्व-प्रयोजिका, अपि तु ज्ञाननिष्ठालक्षणस्थितप्रज्ञत्वम्, अवगतब्रह्मात्वभावत्वं वा तत्प्रयोजकमित्युक्तं भवति। अत एव ब्रह्मात्मावगतौ यदि कस्य चित् मननादिकमपेक्ष्यते,तदपि न वार्यते। अतः श्रवणमात्रेण ज्ञानलब्धिः,ततः संसारनिवृत्तिर्भवतीति भ्रान्त्वा कृतश्रवणस्यापि यथापूर्वं संसारित्वं भवतीति-पूर्वपक्षिणा नातीव शङ्का कर्तव्या। देहेन्द्रिय-मनः प्राणेषुजीवन्मुक्तस्या-भिमानाभावेन, तत्साध्यक्रियाभावात्, वेदान्तानां कार्यपरत्ववादः अत्यन्तदुर्बल एव। कथं तर्हि वेदान्तानां प्रामाण्यमित्युक्ते-ब्रह्मात्मज्ञानान्मुक्तिलाभात्,हितशासनेन तेषां शास्त्रत्वा - त्प्रामाण्यम्। (र.प्र.पृ.96-97.)

In Public domain. Digitization Muthulakshmi Research Academy

श्रवणादौ विध्यङ्गीकारेऽपि न ब्रह्मणः दर्शनविधिशेषत्वम्, अपि तु शास्त्रप्रमाणकत्वेन स्वातन्त्र्यमेव

शा.भा.-यत्पुनरुक्तं श्रवणात्पराचीनयोः मनननिदिध्यासनयोः दर्शनात् विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति। न। श्रवणवत् अवगत्यर्थत्वान्मनननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत,भवेत्तदा विधिशेषत्वम्।न तु तदस्ति, मनननिदिध्यानयोरपि श्रवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्।।

र.प्र.प्र-"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"-इत्यत्र आत्मदर्शनोद्देशेन श्रवणम्-वेदान्तवाक्यजन्यविचारात्मा मानसव्यापारःप्राधान्येन विधीयते।ज्ञाने जननीये वेदान्तशब्दाः प्रमाणमिति,तद्द्वारा प्रमाणगोचरः विचारः कर्तव्य इति विचारविधिः प्रधानीभूतः।मनन-निदिध्यासने च ब्रह्मात्मकप्रमेयगोचरौ। ब्रह्मात्मकप्रमेयगतसंशयनिवर्तकत्वात्। अतः मनननिदिध्यासन-विधी आत्मदर्शनोद्देशेन प्रवृत्तस्य प्रधानीभूतश्रवणविधेः सहकारिणौ। ताभ्यां विधिभ्यां जायमानं नियमापूर्वं ज्ञाने उपयुज्यत -इति श्रवणादौ विधित्ववादिनामाशयः।श्रवणादौ विधेः तत्प्रयुक्तनियमापूर्वस्य ज्ञानोत्पत्तावङ्गीकारेऽपि दर्शने विधिः

 In Public domain. Digitization Muthulakshmi Research Academy

तत्प्रयुक्तमोक्षोपयोग्यपूर्वं वा न स्वीक्रियते, योग्यताबलात्मकसर्वापेक्षाधिकरणोक्तन्यायात्। "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" (3.4.26.)इत्यधिकरणे एवं प्रतिपादितम्— विद्यायाः स्वोत्पत्तौ सर्वेषामाश्रमकर्मणां ज्ञाने उपयोगः,"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन"(बृ.उ.4.4.22.) इति श्रुतेः।नचैवं ज्ञानवन्मोक्षेऽपि आश्रमकर्मणां विनियोगो भवतु इति शङ्कायां अश्ववत् –इत्युक्तत्वात्, कर्मनिर्वहणसमर्थस्याप्यश्वस्य रथवहनकर्मण्येव विनियोगात्, लाङ्गलवहनकर्मणि सामर्थ्याभाववत् कर्मणां ज्ञानसाध्ये मोक्षे असामर्थ्यान्नास्ति विनियोगः। अतः दर्शनविषये विधिः तत्साध्यमपूर्वं वा अप्रामाणिकत्वेन स्वीक्रियते। मोक्षस्यासाध्यत्वान्नित्यत्वाच्च।

एवं च यदुक्तं पूर्वपक्षिणा श्रवणवत् मनन-निदिध्यासनात्मकविधेयक्रियापरम्परायाः दर्शनात् ब्रह्मणः विधिशेषत्वमेव, न स्वरूपपर्यवसायेत्वमिति, तन्न युक्तम्। पूर्वोक्तरीत्या श्रवणविधेः प्रधानत्वेन, मनननिदिध्यासनयोस्तु सहकारित्वेनावगत्यर्थत्वात्। ज्ञानाच्च मोक्षः। न ज्ञातस्यात्मनः अन्यत्र विनियोगः।यद्यवगतं ब्रह्मान्यत्र विनियुज्येत,तर्हि ब्रह्मणः विधिशेषत्वं युज्येत। न तु तदस्ति।श्रवणवत् मनननिदिध्यासनयोरप्यवगत्यर्थत्वस्योक्तत्वात्।तस्मात् ब्रह्मणः

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपत्तिविधिशेषत्वासम्भवात्, ब्रह्मणः शास्त्रप्रमाणकत्वमेव। अतश्च सत्यादिवाक्यैःस्वतन्त्रतयैव ब्रह्मसमर्प्यत इति,अद्वितीये चेतनेब्रह्मणि वेदान्तवाक्यानां समन्वयात् ब्रह्मणः शास्त्रप्रमाणकत्वं सिद्धम्।

इदं तु बोध्यम् भाष्ये "श्रवणवदवगत्यर्थत्वात् मनननिदिध्यासनयोः" इत्येवोक्तत्वात्, तत्र विधिपदप्रयोगादर्शनात्, श्रवणस्य प्राधान्यम्, मनननिदिध्यासनयोस्त्वप्राधान्यमित्येव भाष्यात्प्रतीतेः प्रागपि श्रोतव्य-इत्यस्यापि भाष्यकारैः विधिछायत्वस्याविष्कारात्,श्रवणस्यैव विध्यविषयत्वे किमिति तत्सहका -रिणोः मनननिदिध्यासनयोर्विध्यविषयत्वं न सिद्ध्येत् ।अत एव भामतीकारादिभिः तेषामविधित्वपक्ष एवसमर्थितः। किंतु"सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्" (ब्र.सू.3.4.47.)इति सहकार्यन्तरविध्यधिकरणे विद्यासहकारिणः मौनस्य (निदिध्यासनस्य) बाल्य-पाण्डित्यवत्-मनन-श्रवणवत् विधिरेवाभ्युपगतः इति सूत्रभाष्याभ्यां ज्ञायते। सूत्रे पक्षेण इतिपदप्रयोगात् भेददर्नप्राबल्यपक्षे एव तेषां विधित्वमिति ज्ञायते। ततश्च श्रवणादिषुविधित्वाविधित्वपक्षौ अधिकारितारतम्येन जायेते। आत्मदर्शनस्य तु प्रमाणतन्त्रत्वमेव ,वस्तुतन्त्रत्वमेव वा,नतु विधिजन्यत्वमिति, ब्रह्मणः शास्त्रप्रमाणकत्वं चेति निश्चप्रचम्। (र.प्र.पृ.97-98.)

 In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मणः शास्त्रप्रमाणकत्व एव ब्रह्मजिज्ञसाशास्त्रस्य पृथगारम्भः, सर्वेषां विधीनां प्रमाणानां च ब्रह्मावगतिफलकत्वमेव न तु ब्रह्मणः विधिशेषत्वम्

शा.भा.एवं सति-'अथातो ब्रह्मजिज्ञासा' इति पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासे'त्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत। आरभ्यमाणं चैवमारभ्येत "अथातः परिशिष्टधर्मजिज्ञासे"ति, "अथातः क्रत्वर्थपुरुषार्योर्जिज्ञासा" (जै.सू.4.1.1.) इतिवत्। ब्रह्मात्मैक्य-वगतिस्त्वप्रतिज्ञातेति तदर्थोयुक्तः शास्त्रारम्भः "अथातो ब्रह्मजिज्ञासा" इति। तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैता-त्मावगतौ निर्विषयाण्यप्रमातृकाणि भवितुमर्हन्तीति।अपि चाहुः-

गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।
सद्ब्रह्माहमित्येवं बोधे कार्यं कथं भवेत्।।

अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः।
अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः।।

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्।।इति।

इति श्रीमच्छङ्करभगवतः कृतौ
ब्रह्मसूत्रशारीरकभाष्यप्रथमाध्यायप्रथमपादचतुर्थाधिकरणं सम्पूर्णम्

In Public domain. Digitization Muthulakshmi Research Academy

।।4।।इति चतुस्सूत्री समाप्ता।।

र.प्र.प्र.-भाष्ये-एवं च सति-इत्यादि। चशब्दश्च अवधारणे। उक्तरीत्या ब्रह्मणः स्वातन्त्र्ये सत्येव भगवतो व्यासस्य पृथक् "अथातोब्रह्मजिज्ञासा" इति ब्रह्मविषयः शास्त्रारम्भ उपपद्यते। धर्मविलक्षणस्य अविधेयस्य ब्रह्मात्मकप्रमेयस्योपलम्भात्। वेदान्तानां कार्यपरत्वे तुप्रमेयभेदाभावान्नपृथक्शास्त्रारम्भः युक्तः स्यात्। ननुपूर्वमीमांसाशास्त्रे बाह्यधर्मविचारस्य कृतत्वेऽपि,इदानीं मानसधर्मविचारार्थं प्रतिपत्तिविधिविषयता पृथक्शास्त्रारम्भस्य युक्तैवेति चेत्,-तथा सति "अथातो धर्मजिज्ञासा"–इति नारभ्येत। आरभ्यमाणं चेदम् "अथातःपरिशिष्टधर्मजिज्ञासा"-इत्येवारभ्येत। अथ बाह्यसाधनधर्मविचारानन्तरम्। अतः बाह्यधर्मस्य चित्तशुद्धिद्वारा मानसोपासनात्मकधर्महेतुत्वात्, परिशिष्टः मानसः धर्मःजिज्ञास्यः-इति तस्य सूत्रस्यार्थः। यथाहि तृतीयाध्याये श्रुत्यादिभिः प्रमाणैः शेषशेषित्वनिर्णयानन्तरं शेषिणा शेषस्य प्रयोगसम्भवात्,कः क्रतु -शेषः?को वापुरुषार्थः? इति जिज्ञासायां, अथातः क्रत्वर्थजिज्ञासा (जै.सू.4.1.1.) इतिवत् पृथक्सूत्रारम्भः कर्तव्यः स्यत्, न तु"अथातो ब्रह्मजिज्ञासा"-इति। अस्मन्मते तु जैमिनिना ब्रह्म न विचारितमिति, तज्जिज्ञास्यत्वसूचनाय ब्रह्मजिज्ञासेति सूत्रारम्भणं युक्तम्। अन्यच्च वेदान्तार्थः यदि अद्वैतं ब्रह्मस्वीक्रियते,"एकमेवाद्वितीयं ब्रह्म" इति

 In Public domain. Digitization Muthulakshmi Research Academy

श्रुतिबलात्, तर्हि अद्वैतब्रह्मणः द्वैतसापेक्षविधिभिः कस्सम्बन्धः?। अतोऽपि नविधिशेषत्वं ब्रह्मणः। तर्हि द्वैतसापेक्षविध्यदीनां का गतिः?इति शङ्कायां-'तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च प्रमाणानि' इत्यादिभाष्यवाक्येन समाधानम्। ज्ञानस्य प्रमेयप्रमातृबुद्धि -बाधकत्वात्,यावता अहं ब्रह्मास्मीति ज्ञानं न जातम्,तावता सर्वे विधयः सर्वाणि प्रमाणानि च भवितुमर्हन्ति। अहेयानुपादेयात्मतत्त्वावगतौ तु जाते प्रमाणानि निर्विषयाण्यप्रमातृकाण्येव भवन्ति। अतः आत्मबोधात्प्राक् प्रमाणादीनां प्रामाण्यमस्तीति, प्रमाणविषये निर्विषयत्वचिन्ता न कार्या। अयमेव विषयः अपिचाहुः इत्यादिना उपक्रान्तैः 'गौणमिथ्यात्मनोऽसत्त्वे' इत्यादिश्लोकैः ब्रह्मगोष्ठीषु प्रसिद्धैः प्रतिपादितः। एते च श्लोकाःसुन्दरपाण्ड्याचार्याणामिति ब्रह्मविद्याभरणकाराणामुल्लेखः। गौणात्मा मिथ्यात्माचेति परकल्पितः आत्मा द्विविधः। तत्र गौणात्मा पुत्रादिः। मिथ्यात्मा तु देदादिः। तयोरुभयोः मिथ्यात्वेन, असत्त्वे बाधितत्वे,पु त्रदेहादेः सत्तापि बाधिता भवति। तेषां मायामात्रत्वनिश्चयात् स्वीयसुखदुःखगुणयोगात् पुत्रादिरहमिति गौणात्माभिमानस्य, नरोऽहं कर्ता इति मिथ्यात्माभिमानस्य च सर्वव्यवहारहेतोः असत्त्वेकार्यं विधिनिषेधादिव्यवहारः कथं भवेत् ।हेत्वभावान्न कथंचिदपि भवेदित्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

ननु अहं ब्रह्मेति बोधः बाधितः। अहमर्थस्य प्रमातुः ब्रह्मत्वायोगदित्याशङ्क्य, प्रमातृत्वस्याज्ञानविलसितान्तःकरण-तादात्म्यकृतत्वादहं ब्रह्मेति बोधस्य न बाधः। "य आत्मा अपहतपाप्मा विजरो विमृत्युःविशोकः अविजिघत्सः अपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः" (छा.उ.8.7.1.)इत्यादिश्रुतेः ज्ञातव्यपरमात्मविज्ञानात्प्रागेव चिद्धातोरात्मनः अज्ञानात्प्रमातृत्वम्। प्रमातैव ज्ञातस्सन्, पाप्म-राग-द्वेष-मरणवर्जितः परमात्मा स्यादिति द्वितीयश्लोकार्थः। अन्यच्च वैदिकैः कल्पितःदेहात्मप्रत्ययः भ्रमोऽपि,यथा व्यवहाराङ्गतया स्वीक्रियते,तथा लोकेऽपि व्यवहारकाले बाधाभावात् प्रमाणानां व्यावहारिकं प्रामाण्यं स्वीक्रियते। कियत्पर्न्तमित्युक्ते-आत्मनिशाचयात् इति समाधानम्। आत्मनिश्चयात्-इति छेदः। अत्र आङ् मर्यादायाम्। मर्यादा च तेन विना मर्यादा –इत्युक्तेः, आत्मनिश्चयं वर्जयित्वा भवति। आत्मनिश्चये जाते तु प्रमाणानां प्रामाण्यस्यावकाशः नास्ति। आत्मज्ञानेन सर्वेषां प्रमाणानां बाधितत्वात्। अतः लौकिकप्रमाणानां व्यवहारकालीनतत्त्वावेद-कत्वलक्षणं प्रामाण्यम्। वेदान्तानां तु कालत्रयाबाध्यबोधित्वात् तत्त्वावेदकत्वलक्षण प्रामाण्यम्। अतः प्रमाणानां ब्रह्मणि यथार्थतया अद्वितीये ब्रह्मणि समन्वय इति सुस्थम्।।4।।(र.प्र.पृ.99.)

In Public domain. Digitization Muthulakshmi Research Academy

इति सुधीगुरुजनविधेयस्य श्रिष्टि लक्ष्मीकुमारशर्मणः कृतौ

चतुस्सूत्रीशाङ्करशारीरकभाष्यरत्नप्रभाप्रकाशे

चतुर्थं समन्वयाधिकरणं वृत्तिकृदादिमत-तन्निरासात्मकं नवमं वर्णकं

च समाप्तम्

समाप्तोऽयं ग्रन्थः

In Public domain. Digitization Muthulakshmi Research Academy

उपयुक्तग्रन्थसूची

1.ब्रह्मसूत्रशाङ्करभाष्यम् :- भाष्यरत्नप्रभा-भामती-न्यायनिर्णयसहितम्, लक्ष्मणशास्त्रिभिः संस्कृतम्, तृतीयं संस्करणम् निर्मयसागर् प्रेस्, मुम्बई, 1934,

2. ब्रह्मसूत्रशाङ्करभाष्यम् :- प्रथमः भागः, चतुस्सूत्र्यन्तपूर्णानन्दीयव्याख्या-सहितम्, द्वितीयसंस्करणम्, चौखम्वासंस्कृतसंस्थान, वाराणसी, पं.ढुण्ढिराजशास्त्रिभिः संस्कृतम्

3. विवरणोपन्यासः :- रामानन्दसरस्वतीकृतः, स्वामिमहेशानन्दगिरि-सम्पादितः, दक्षिणामूर्तिमठप्रकाशन, वाराणसी, प्रथमसंस्करणम्,

4.पञ्चपादिका :- विवणतत्त्वदीपनादिसहिता, पं.यस्.सुब्रह्मण्यशास्त्रिभिः संस्कृता, 2009, श्रीदक्षिणामूर्ति मठ प्रकाशन, वाराणसी,

5. उपनिषद्भाष्यम् :- प्रथमो भागः, (छान्दोग्य-बृहदारण्यकवर्जं अष्टोपनिषदाम्,) पं. यस्.सुब्रह्ण्यशास्त्रिणां संस्करणम्, 2004, दक्षिणामूर्ति-मठप्रकाशन, (आनन्दगिरितैत्तिरीयकवार्तिकयोः तैत्तिरीयवनमालायाश्च)

6. श्रीमद्भगवद्गीताशाङ्करभाष्यम् :- सव्याख्यम्, पं.मणिद्राविडशास्त्रिणां संस्करणम्, 2015, दक्षिणामूर्तिमठप्रका.

7. ईशादिदशोपनिषदः :- (छान्दोग्य-बृहदारण्यकयोः) वाणीविलाससंस्कृत-पुस्तकालयः काशी,

8. शास्त्रसिद्धान्तलेशसंग्रहः :- अप्पय्यदीक्षितेन्द्राः, 1973, श्रीमदप्पय्य-दीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः, सिकिन्दराबाद् ,आन्ध्रप्रदेशः

In Public domain. Digitization Muthulakshmi Research Academy

9. परिभाषेन्दुशेखरः :- नागेशभट्टाः, आचार्य श्रीपादसत्यनारायणमूर्तिभिः सम्पादितः, 2004, राष्ट्रियसंस्कृत विद्यापीठम्,तिरुपति,

10. वौयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) :- श्रीगोपालदत्तपाण्डेय-सम्पादितम्, चौखम्बा

11. अद्वैतवेदान्तपरिभाषा :- शिखामणिव्याख्यासहितम्, 1927, वाविल्ल रामस्वामिशास्त्रुलु अन्ड् सन्स्, चेन्नै

12. प्रश्नोपनिषच्छाङ्करभाष्यम् :- शाङ्करानन्ददीपिकाविभूषितम्, डा.श्रिष्टि लक्ष्मीकुमारशर्मा, रत्नगिरिनगर्, गुण्टूर् 6.आ.प्र.

13. मीमांसान्यायप्रकाशमु :- आपदेवाः, प्रधानसम्पादकाः, आचार्य श्रीपाद सुब्रह्मण्यशास्त्रिणः, प्रभुत्वप्राच्य लिखितग्रन्थालयः, हैदराबाद् .2015.

सङ्केताक्षरसूची

1.शा.भा.-शाङ्करभाष्यम्	16.जा.उ.जाबालोपनिषत्
2.र.प्र.-भाष्यरत्नप्रभा	17.ई.उ.-ईशावास्योपनिषत्
3.र.प्र.प्र.-भाष्यरत्नप्रभाप्रकाशः (प्रकृतग्रन्थकर्तुः)	18. श्वेता.-श्वेताश्वतरोपनिषत्
4.पृ.-पृष्ठसंख्या	19.शा.सि.ले.सं.-शास्त्रसिद्धान्तलेशसङ्ग्रहः
5. व्या.-व्याख्या	20.मी.न्या.प्र.-मीमांसान्यायप्रकाशः
6.श.ब्रा.-शतपथब्राह्मणम्	21.म.स्मृ.-मनुस्मृतिः
7.बृ.उ-बृहदारण्यकोपनिषत्	22.पा.सू.-पाणिनीयसूत्राणणि
8.छा.उ.छान्दोग्योपनिषत्	23.जै.सू.-जैमिनीयसूत्राणि

In Public domain. Digitization Muthulakshmi Research Academy

9.क.उ.-कठोपनिषत्	24.न्या.सू.-गैतमीयन्यायसूत्राणि
10के.उ.-केनोपनिषत्	25.यो.सू.-पातञ्जलयोगसूत्राणि
11.मु.उ.-मुण्डकोपनिषत्	26.भ.गी.-भगवद्गीता
12.तै.उ.-तैत्तिरीयोपनिषत्	27.तै.ब्रा.-तैत्तिरीयब्राह्मणम्
13.तै.उ.वा.-तैत्तिरीयोपनिषद्वार्तिकम्	28.प्र.उ.प्रश्नोपनिषत्
14.तै.सं.-तैत्तिरीयसंहिता	29.वि.उ.- विवरणोपन्यासः
15. मै.सं.-मैत्रायणीयसंहिता	30.ऐ.उ.-ऐतरेयोपनिषत्

अन्ये उद्धृताः ग्रन्थाः - न्यायनिर्णयः, (न्या.नि.) पूर्णानन्दीयम्, भामती, कालाग्निरुद्रोपनिषत्, कात्यायनवार्तिकम्, नृसिंहोत्तरतापनीयोपनिषत्, नैष्कर्म्यसिद्धिः, वनमाला, (तैत्तिरीयोपनिषद्व्याख्या,) ब्रह्मविद्याभरणम्, शाबरभाष्यम्, ऋग्वेदसंहिता.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यातृस्वीयपरिचयः

व्याख्याकारः - श्रिष्टि लक्ष्मीकुमारशर्मा,

जननीजनकौ - ब्रह्मश्री श्रिष्टि सत्यनारायणावधानी, श्रीमती मङ्गळाम्बा, स्वीकारपितरौः - ब्रह्मश्री श्रिष्टि साम्बमूर्तिशास्त्री, श्रीमती पद्मावतम्मा,

जन्मदिनाङ्कः - 27-7-1954,

जन्मस्थलम् विलासश्च - पश्चाद्गृहम् श्रीलक्ष्मीगणपतिदेवालयस्य, 122-4-339, रत्नगिरिनगर्2लैन् गुण्टूर् पिन् कोड्522006. आ0प्र. सेल्.न. 9441410472. सम्भाषणचरवाणी, 6300471113.

शैक्षिकयोग्यताः - साहित्यविद्याप्रवीण1970, (आन्ध्रविश्वविद्यालयप्रप्रथमः, न्यायविद्याप्रवीण, P.O.L,M.A. (vyakarana) PH.D (A.U.) M.A. (Telugu),

विद्यागुरवः - पं शाब्दिकाग्रेसराः की.शे.श्रिष्टि साम्बमूर्ति-शास्त्रिणः, व्याकरणादिशास्त्रेषु, महामहोपाध्याय की.शे.रामचन्द्रुल कोटीश्वरशर्माणः न्यायपूर्व-वादेषु, की.शे.म.म.मद्दुलपल्लिमाणिक्यशास्त्रिणः, न्यायोत्तरवादेषु, शास्त्ररत्नाकराः पं आर्. कृष्णमूर्तिशास्त्रिणः अद्वैतवेदान्ते, पं डा.देन्दुकूरि नारायणशास्त्रिणः ब्रह्मानन्दीयाध्यापकाः, पं कुप्पा रामसुब्रह्मण्यशास्त्रिणः निवीतान्तभाट्टदीपिका-ध्यापकाः, मन्त्रदीक्षागुरवः तुनि

In Public domain. Digitization Muthulakshmi Research Academy

तपोवनपीठाधिपतयः सच्चिदानन्दसरस्वती-स्वामिनः।

अध्यापकानुभवः - 9-11-1972-3-9-1973, श्रीगोगिनेनिकनकय्य-संस्कृतान्ध्रकलाशालायां संस्कृतोपन्यासकत्वेन, 4-9-1973-26-6-95, जिल्लेल्लमूडिस्थमातृश्री-प्राच्यकलाशालायां न्याय-मीमांसा-व्याकरण-अलङ्कारशास्त्रेषु उपन्यासकत्वेन, क्रमेण प्रवाचकत्वेन च, 26-6-95-31-12-2012, श्री गोरन्ट्ल वेङ्कन्न प्राच्यकलाशालायां तेष्वेव विषयेषु प्रवाचकत्वेन।

विशिष्टपुरस्काराः विशिष्टसभ्यत्वं च -

1.म.म.तातासुब्बरायशास्त्रिस्मारकपुरस्कारः,
2.कामेश्वरीविश्वनाथपुरस्कारः आन्ध्रविश्वविद्यालयप्रथमत्वस्य,
3.अद्वैतवेदान्तरत्नपुरस्कारः श्रीकाञ्चीपीठाधिपश्रीजयेन्द्रसरस्वतीकरकमलेभ्य,
4.अद्वैतवेदान्तसम्राट् पुरस्कारः श्रीविष्णुभट्ल सुब्रह्मण्यशास्त्रिसाङ्गवेदवेदान्त-प्रतिष्ठानात्,
5.उगादिविशिष्टशास्त्रपण्डितपुरस्कारः श्रीविशाखशारदापीठाधिपकरकमलेभ्यः,2016.
1.नागार्जुन-श्रीवेङ्कटेश्वरवेदविश्वविद्यालययोः, राष्ट्रियसंस्कृतविद्यापीठे च भूतपूर्वपाठ्यप्रणाली-निर्णायकसदस्यत्वम्,

In Public domain. Digitization Muthulakshmi Research Academy

2.तिरुपति-राष्ट्रियसंस्कृतविद्यापीठे भूतपूर्व-सन्दर्शकाचार्यत्वम्,

3.विविधविश्वविद्यालयीयसदस्सु, शास्त्रार्थगोष्ठीषु च भागस्वाम्यग्रहीतृत्वम्, परिशोधनापत्राणि-25,

मुद्रितरचनाः - राष्ट्रियसंस्कृतविद्यापीठप्रकाशनानि त्रीण

1.जगन्नाथसिद्धान्तपरिशीलनम्,

2.रसगङ्गाधर-सङ्गमनी,भा1

3.रसगङ्गाधर-सङ्गमनी,भा2,

4.कालभैरवस्तोत्रान्ध्रव्याख्या,

5.श्रीमद्भगवद्गीताशाङ्करभाष्यम्,

शाङ्करानन्ददीपिकाविभूषितम्(मुद्रणस्थम्,)

आद्याध्यायषट्कात्मकम्,

यस्.वि.वैदिकविश्वविद्यालयः, तिरुपति.आ.प्र.6.

6.प्रश्नोपनिषच्छाङ्कर भाष्यम्,

शाङ्करानन्ददीपिकाविभूषितम्, स्वयंप्रकाशितम्,

2022.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy

Adarsha Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University Campus, Hyderabad – 500 007

2022

978-93-80171-76-0